श्रीभरतमुनिविरचितम्

नाट्यशास्त्रम्

आचार्याभिनवगुप्तप्रणीताभिनवभारतीसहितम्

तस्य तृतीयो भागः

सम्पादको व्याख्याकारश्च

१९ पञ्चदशसाहस्रमुद्राभिः उत्तरप्रदेशसरकारद्वारा पुरस्कृतः

आचार्य मधुसूदन शास्त्री, एम्०ए०

एमस-बील, फैकल्टी आफ दि ओरियन्टल लर्निङ्ग,

सन् १९८१

काशीहिन्दूविश्वविद्यालय

वाराणसी

NĀTYASHĀSTRA

of

BHARATMUNI

PART THIRD

ABHINAVBHARATI OF ACHARYA ABHINAV GUPTA

Edited with an Original Profound Introduction Commentries

by

ACHARYA SHRI MADHUSUDAN SHASTRI, M. A.

Ex-Dean of the Faculty of ihe Oriental Learning,

Banaras Hindu University.

1981

BANARAS HINDU UNIVERSITY

VARANASI

श्रीभरतमुनिविरचितम्

नाट्यशास्त्रम्

तृतीयो भागः

आचार्याभिनवगुप्तप्रणीतया अभिनवभारत्या सहितम्

आचार्यमधुसूदनशास्त्रिग्रंथितया बालक्रीडा हिन्दीटीकया सनाथम्

सम्पादकः

आचार्यमधुसूदनशास्त्री, एम्०ए०

एक्स-डीन, फैकल्टी आफ दि ओरियन्टल लर्निङ्ग, का०हि०वि०वि०, वाराणसी

बी० एच्० यू० प्रेस

व्यवस्थापकेन भरतनारायणगुप्तेन मुद्रापितः

वि० सं० २०३८

मूल्य ६०.०० रुपया

अथ प्रस्तूयते ।

नाट्यशास्त्रशब्दं तदर्थञ्चाधिकृत्य अधिश्रित्य पर्यनुयुज्य कोहलादयो मात्सर्यमुत्सार्य यं मतस्य लवं न्यभान्त्सुः स सर्वो मतलवो मया विदुष्मतां समक्षं भेटितः भया कान्त्या उज्ज्वलरीत्या इटितः प्रापितः [इट किट गतौ इत्यस्यान्तर्भावितण्यर्थस्य क्तप्रत्यये रूपम्] तेन पथा प्रासीसरम् येनेदमीयं वृत्त सर्वेभ्यः आष्टमाष्टादशाध्यायीय ग्रन्थस्यास्य प्रास्ताविके भूमिकाह्वे पर्यचीचयम्। इदानीं नाट्यशास्त्रग्रन्थः कीदृश इति सम्भाल्यं वस्तु प्रचाकशीमि विविद्वद्भ्यः ।

दृश्यं रूपकं रूपं नाटयमधिशय्य संदृब्धमिदं नाट्यशास्त्रं नाटकादिदशरूपकाणां श्रीगदितादिदशोपरूपकाणां स्वरूपस्य तन्निर्माणोपयोगिनां सारगर्भितानां विषयाणाञ्च प्रत्यायकः उच्चस्तरीयः प्रामाणिको ग्रन्थः। अयं स्वविषये प्रतिदिशं परिपूर्णात्मा नाटयक्षेत्रे सर्वतः प्रथमो मूर्धन्यश्चेति अखिले विश्वेऽस्मिन् कस्यामपि भाषायामेतादृशं मौलिकग्रन्थरत्नं द्वितीयं नास्तीति एकमेवाद्वितीयमिति कथितुं कथयितुञ्च पार्येत ।

यतो हि आनाटयोत्पत्ति आभूमिकाविकल्पान्तं समेषां वस्तूनां यथ्यं स्वरूपं तथ्यं वैशद्येन गम्भीरतया प्रकाशकं विश्वस्य इतिहासे अप्रतिमल्लं विजोडं[1] रत्नम्।

संसारेऽस्मिन्नधुना नाटकादीनां प्रचारः प्रसारः प्रकाशः विकाशो वा यदस्ति तत्सर्वमस्यैव देनमस्ति। यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित् इति तत एव सङ्गच्छते।

अस्य विविधा विलक्षणताः चिरन्तनमनीषिणां मननस्य मुख्यो विषय आसीत्। अद्यापि इमाः स्वस्मिन् स्वरूपे तादृश्यः सन्ति। भविष्यति च भविष्यन्ति। इमा इयत्य एतादृश्यश्च भावभूमयः भूयस्यः स्थिरा वर्त्तन्ति। यावान् आसां विमर्शः सम्पाद्यते तावत्य इमाः प्रस्फुटेयुः। भट्टलोल्लट भट्टनायक भट्टोद्भटाऽभिनवगुप्तादयः प्रौढा उद्भटाः मण्डितप्रान्ताः पण्डिताः अस्य शास्त्रस्य व्याख्यानानि निरमीयन्त। प्रगाढं वैदुष्यं पर्यचीचयंश्च तत्रापि निगाहं चक्षुर्ददतु [न्युपसृष्टस्य गाहू विलोडने धातोर्घञि रूपम्। निगाह्यते विलोक्यते वस्तु अनेन तन्निगाहं चक्षुः] गूढानां ग्रन्थग्रन्थीनां प्रस्फोटनमद्यावधि सावशेषमेव न; वल्किस्तेषां व्याख्यानेषु इमा अधिकं चकाशन्ते (यङ्लुकि रूपम्)।

तदेतन्नाट्यं कावात् काव्यान्निष्पद्यते [पाणिनीयव्याकरणतः काव्यशब्दो न निष्पद्यते अपितु कावशब्दः। इगन्ताच्च लघुपूर्वात् ५।१।१३१। इति सूत्रादणि कवेः कर्म इति विग्रहे कावम्। काव्यन्तु त्रयी काव्यं छन्दः इति श्रुतेः छान्दसं वैदिकं रूपं न तु लौकिकं। लौकिकं तु कावमित्येव। ब्राह्मणादिषु पाठाभावेऽपि आकृतिगणं

---

[1] विगतजोडम् विगतबन्धनम् जुड बन्धने इत्यस्य पचाद्यचि रूपम्।

मत्वा कथञ्चित् ष्यञ् प्रत्ययेन निष्पन्नमिति] इति नाटयशास्त्रस्य चतुर्थाध्याये द्विसप्तत्युत्तरद्विशततमे श्लोके अभिनवगुप्ताचार्या जगदुः।

काव्यस्यैवादः सातिशयं माहात्म्यं यत् त एव भावाः यान् प्रत्यक्षं दृष्ट्वापि पश्यो न चमत्कृतो भवति ते तद्हृदये चमत्कारं नानुभावयन्ति ये काव्यशब्दोपस्थाप्यमाना अद्भुतं चमत्कारं जनयन्ति। ये अद्भुताः चमत्कारिणः प्रतीयन्ते। यैरध्येतुः छात्रवर्गस्य अभिरुचिर्वृद्धिमियात्। अध्ययनपराङ्मुखा बालका अध्ययनोन्मुखाः भवेयुः अध्ययनप्रवृत्ताः स्युः। तदर्थं रसमयमाकर्षकं साधनं काव्यमेव। राष्ट्रस्य भाविने विकाशाय महोपयोगिनां यूनां ज्ञानपिपासा समृध्यतु। अध्ययनोत्तर मध्येतुश्चित्तपटले बहुविधविधानस्य कल्याणपरम्पराणां सरलः सरसो हेतुवर्गः समृध्नोतु तथा तेषां स्वान्ते सत्यस्य बीजं प्ररोहतु तस्मै सद्यः फलदायि कारणं काव्यम्। इतिहासे ललितकलानां प्रधानं स्थानम्। तत्र कलासीमा काव्यमिति भर्तृहर्युक्तेः कलानां सीमा अवधि काव्यम्। तेन मूढमस्तिष्कानां संफुल्लनं शिक्षणीयानां विनेयानां बालकानां मनोवृत्तेस्तत्कालं परिवर्त्तनं कर्त्तुं सुशकमेतदेव।

मानवं नवनवमुन्नेतुञ्च आन्तराः प्रेरिकाः शक्तयः कामपि शैलीमनु निरन्तरं विलासयन्ति। येन परिवर्तिनीषु स्थितिषु सतीषु अपि मानवीयाश्चेतनाः प्रमुखां भूमिकामादातुं शक्नुवन्ति।

परं मानवस्य सर्वाङ्गीणविकासोन्मुखकारिणीस्ताः पास्पर्धितुं माहर्तुमसंख्या जटिलाः समस्या उपतिष्ठन्ति यासां समाधानं न केवलं मुष्किलमेव [ऊषशुषिमुष्कमधो रः इति पाणिनिसूत्रे मुष्कः शब्दस्ततः सिध्मादित्वात् इलचि सति मुष्किलशब्दो निष्पन्नो भवति] अपि तु ता मानवं विक्षिपन्ति। अवसरेऽस्मिन् सरससरसाभिर्भावभङ्गीभिः कल्याणपरम्पराणामाविर्भावकानामुपायानां गुरुवदुपदेशकम् अमृतवदाप्यायकं सञ्जीवकं बाह्या विशृंखलता दूरीकृत्य हृत्तन्त्रीनादं जागरयितुं दृश्यं काव्यमेव। मानवे नवमां प्रमां चेतयितुं तस्य कल्पनाशक्तिमुर्वरां वरीतुं विलक्षणमसाधारणञ्च मेधासमेधने योगदानमासादयितुं पूर्णं स्थिरं सद्यः परनिर्वृतिसम्वर्द्धकमनुल्लंघनीयोल्लाघदाने उत्कटं समर्थञ्च अनुष्ठानीयं काव्यमेव।

राष्ट्रसञ्जीवनीम् उद्भूतिदायिनीं समग्रतां, सफलतां, सर्जनात्मकप्रवृत्तिञ्च प्रति विशेषस्य अनुकूलिनीभिः अभिमुखीभूताभिः आत्मीयताया भावनाभिः ओतप्रोतः विशालहृदयो गुरुर्वा सुहृद्वा नान्यं काव्यमेव। उच्छृंखलस्य सर्वस्मिन् दुर्दण्डमुद्दिधीर्षोः विनयनीयस्य विद्यार्थिसार्थस्य कल्मषां बुद्धिं गङ्गामिव निर्मलां कलकलनादिनीं स्वाशयेन मधुरां प्रवाहेण निर्व्यूढां विधत्ते यत् तद् रूपकमेव। यतो हि सर्वः सुखं समीहते। सौन्दर्यं निरीक्षते। भावं बिभर्त्ति। रसास्वादने लोलुपः लालसस्तिष्ठति। तत्परतया परमानन्दं विन्दति। एतादृशं युववर्गमध्ययनेऽभिमुखं विधातुं नागरिकाणां स्तरमुन्नेतुं शास्त्रीयवास्तविकरहस्येषु प्रीणासु तथ्यकथासु च सम्मुखीकर्त्तुं जागरणस्य दिशामुद्बोधयितुं प्रकाशविकाशछविं दर्शयितुं गभीरान् विषमाँश्च विषयान् आस्वादनीयतया लघु प्रस्तोतुं महत्त्वाकांक्षां समुद्वोढुं प्रभुः विभुः

शम्भुः कालिदासादिमहाकवीनां पञ्चषाणामेव दृश्यं श्रव्यं पठ्यं काव्यमेव। यत्र मधुरं कलकलञ्च नदन्ती रसगङ्गा वहति यस्या जलमाचम्य आस्वाद्य आप्लाव्य मूढा विक्षिप्ताः सन्दिग्धा भ्रान्ता युवानो विदुष्मन्तः चेतनाशालिनः वादविवादयोः प्रगल्भा निर्णेतारः प्रामाणिका विश्वसनीया सम्भ्रान्ताश्च नागरिका जायन्ते। तानि इमानि रसप्रधानानि काव्यानि तेभ्यो हि रसप्रतीतिः स्थायिविभावानुभावव्यभिचारिभिर्भावैर्भवति। एतद्रसप्रत्यायकविभावादेरुपस्थापकानां शैली बहुभेदं बिभ्राणा विराजते। सा चेयं नवविधापि अनेकतां गाहते। तत्र प्रथमा शैली सार्थकनिरर्थक शब्दरूपं रागरागिणी प्रधानं श्रव्यं काव्यम्। द्वितीया शब्दप्रतिपाद्यार्थ शुद्धार्थरूपमभिनेयप्रधानं दृश्यमभिनयात्मकं काव्यम्। तृतीया शब्दसहकृतवर्ण्यमानार्थसम्पन्नं गद्यात्मकं कादम्बर्यादि, पद्यात्मकं रघुवंशादि, गद्यपद्योभयात्मकं नलचम्पू प्रभृति पठ्यं काव्यम्। चतुर्थी शब्दशून्यं केवलभावमयार्थरूपं विलक्षणरेखाभिः सम्पन्नं चित्रं काव्यश्रेणीबहिर्भूतम्। पञ्चमी लिपिस्वरूपं रेखानुगतं सार्थकशब्द प्रधानं चित्रं खड्गबन्धमुरजबन्धादि काव्यम्। षष्ठी उत्कीर्णनप्रधाना। सप्तमी टंकणप्रधाना। अष्टमी स्थापत्यप्रधाना। नवमी स्थाप्या। एषु द्वितीयां शैलीमनुरुध्य नाट्यशास्त्रे प्रपञ्चितं दशरूपकविधानं तदिहास्माभिरस्य तृतीयभागस्य पर्यन्ते संकेतितं विद्योतते। ह्याग्निबिन्दुनेत्रतमवर्षस्य आफाल्गुनम् वस्वग्निबिन्दुनेत्रतमवर्षस्य आचैत्रं चक्षुः पीडया विकलः किमपि द्रष्टुमहं नापारयम्। अतः प्रूफस्य अध्ययनाय तत्संस्कर्त्तुञ्च न प्राभवम्। तेन मदीयः पञ्चमः पुत्रः चिरञ्जीवी चन्द्रोदयः बी० ए० एव सर्वमकरोत्ततश्च या अशुद्धयो ग्रन्थेऽस्मिन् संजातास्तदर्थं प्रार्थये पाठकान् विदुष्मतो विद्यार्थिनश्च। क्षन्तव्योऽहं देशनीयो दयनीयो वराकः।

हिन्दूविश्वविद्यालयीयमुद्रणालयस्य व्यवस्थापको मैनेजरपदाभिधेयो भरतनारायणगुप्तो नितान्तं सोल्लासं सोल्लाघं शुभाशिषा संवर्द्धनीयः। धन्यताश्रियो धामायं विराजतां सुखमयसमृद्धया। अथ च एतस्मिन् प्रकाशने योगदानेनास्मच्छिष्यकल्पो जोखूरामसिंहः कमला सिंहश्च वारं २ सहर्षं धन्यावादार्हः स्मरणीयश्चिरम्।

विदुषामाश्रवोऽयम्

आचार्य मधुसूदनशास्त्री

एक्स डीन०, फकल्टी आफ दि ओरियण्टल लर्निङ्ग

का० हि० वि० वि०

भदैनी वाराणसी।

७।११।८१

गीताजयन्ती।

अभिनवभारत्यां स्मृता ग्रन्था ग्रन्थकर्त्तारश्च

अभिनवगुप्तश्लोकः
अभिसारिकावञ्चितकम्
ईश्वरकृष्णः
उद्भटः
उणादिः
उपाध्यायः
कर्पूरमञ्जरी
कामन्दकम्
कुमारसम्भवः
कृत्यारावणम्
कोहलः
गुणाढ्यः
चन्द्रकः
टीकाकारः
तापसवत्सराजम्
तोतः
दरिद्रचारुदत्तम्
नागानन्दम्
प्रतिमानिरुद्धम्
बिन्दुसारः
बृहत्कथा
बेज्जलः
भगवद्गीता
मायापुष्पकम्
मुद्राराक्षसम्
रत्नावली
राजशेखरः
राधाविप्रलम्भः
रामाभ्युदयम्
रामायणम्
राहुलः
लोल्लटः
वाक्यपदीयम्
वासवदत्तानाट्यधारा
विक्रमोर्वशी
विन्ध्यवासी
विशाखदेव
वेणीसंहारः
शङ्कुकः
शाकुन्तलम्
सहृदयालोकः
सुबन्धुः
हर्षचरितम्

विषयसूची

एकोनविंशोऽध्यायः

विंशोऽध्यायः

एकविंशोऽध्यायः

द्वाविंशोऽध्यायः

चतुर्विंशोऽध्यायः

पञ्चविंशोऽध्यायः

श्रीरस्तु

श्रीगणपतये नमः

नाट्यशास्त्रम्

एकोनविंशोऽध्यायः

अभिनवभारती

देहे ससन्ध्यङ्गगणे समस्ते यत्स्थापनं स्पर्शनवृत्तिकारि ।
तदिन्द्रियं यस्य वपुर्नमामि तमान्तरस्पर्शमयं महेशम् ।१७।

मधुसूदनी

देहे इति । सन्धिभिः पर्वभिःसहितानि अङ्गानि करचरणादीनीति ससन्ध्यङ्गानि तेषां गणः समूहो यत्रास्तीति । अर्श आद्यच् । तस्मिन् ससन्ध्यङ्गगणयुक्ते समस्ते देहे शरीरे यत् स्पर्शनाख्यायाः वृत्तेश्चेष्टायाः कारि सम्पादकं स्थापनं सत्त्वं तत्त्वगिन्द्रियं यस्य भगवतो नटराजस्य वपुः तं महेशम् नमामि । महेशस्य सम्मुखे प्रह्वीभवामि । कथम्भूतं महेशम् आन्तरस्पर्शमयं आन्तरात् स्पर्शात् आगतम् आजातम् । गत्यर्थानां ज्ञानार्थकत्वात् । तत आगत इति मयट् । योगबलेन आन्तरे स्पर्शसम्बसधे सत्येव महेशस्य ज्ञानं भवितुमर्हति नान्यथेति बोधरहस्यम् । इति बाह्यम् व्याख्यानम् । षट्त्रिंशत्तत्त्वात्मकः शिवः प्रथमादिषट्त्रिंशात्मकेऽध्याये वन्दितः । ततः त्वगात्मकतत्त्वरूपः सोऽत्र एकोनविंशेऽध्याये वन्दितः ।

आन्तरन्तु—सन्धिभिः मुखादिपञ्चसन्धिभिः । अङ्गानि चतुषष्टिसंख्याकानि उपक्षेपादीनि । समस्ते इतस्ततः सन्धिषु तदुङ्गेषु च सम्यक् क्षिप्ते विन्यस्ते । शरीरे इतिवृत्ते नटनीये कथानके । स्पर्शनात्मिकां वृत्ति कैशिकीं वा सात्वतीं वा करोतीति विग्रहः । समासस्तु षष्ठचन्तघटितस्यैव । वृत्तेः कारि इति । स्थापनमभिनयनम् । अन्यत्समं समम् ।

बालक्रीड़ा

देहे । सन्धियों के सहित यानी बीच बीच में जोड़ से युक्त जो करचरणादि अङ्गगण, अवयव समूह है उनसे युक्त सम्पूर्ण शरीर में जो स्पर्शनवृत्तिकारी स्थापन है अर्थात् स्पर्शनकारी चेष्टाओं की विधायक स्थिति है सत्ता है वह त्वगिन्द्रिय जिसका शरीर है उस महेश को मैं अभिनवगुप्त प्रणाम करता हूं जो आन्तरस्पर्श से प्राप्त होता है योग की प्रक्रिया समाधि से स्पर्श करने पर मिलता है यह बाह्य अर्थ है । यहां ना० शा० के ३६ अध्यायों में ३६ तत्त्वात्मक शिव की वन्दना की है तदनुसार यहां १९ वें अध्याय में त्वगिन्द्रिय तत्त्व का वन्दन है ।

नाटकादि की रचना में अपेक्षित इतिवृत्त कथाभाग जो किसी मुख्य प्रयोजन से सम्बद्ध है उसका जो अवान्तर प्रयोजनों से सम्बन्ध है उसे सन्धि कहते हैं । वे मुख प्रतिमुख नाम वाली पांच संधियां हैं । इन सन्धियों एवं इनके उपक्षेप परिकर आदि चतुषष्ठि

इतिवृत्तं तु नाटचस्य शरीरं परिकीर्तितम् ।
पञ्चभिः सन्धिभिस्तस्य विभागः संप्रकल्पितः ॥१॥

अभिनवभारती

"पुनरस्य शरीरविधानसन्धिविधिलक्षणं वक्ष्ये" इत्यनेन (१८-१२७) शरीरमितिवृत्तात्मकं विधानं च तस्य विधानरूपप्रकारात्मकं, सन्धयश्च मुखादयो, विधयश्च सन्ध्यङ्गस्वभावा लक्षणीयत्वेन प्रतिज्ञाता, तत्र शरीरमादौ लक्षयितव्यमिति दर्शयति इतिवृत्तं त्विति । तुशब्दो व्यतिरेके— काव्यमात्रस्यानभिनेयस्याभिनेयस्य तावद् वृत्तमात्रं शरीरं, नटनीयस्य त्वभिनेयरूपस्य इति एवंप्रकारतया यदुपस्कृतं वृत्तं, अत एवेतिवृत्तशब्दवाच्यं तद्वस्तु शरीरं रसः पुनरात्मा शरीराविर्भावकः, अत एवार्थनिर्मापकत्वात् अर्थतादात्म्यात् अर्थरूपताध्यासात् अर्थैकज्ञाननिवेशितत्वात् अर्थो-

मधुसूदनी

पुनरस्य शरीरविधानसन्धिविधिलक्षणं वक्ष्ये इत्यनेन संकेतितम् । प्रकारात्मकम् प्रभेदात्मकम् । प्रकारो भेदसादृश्ये इत्यमरः । विधानम् विधानरूपम् विधानमिति पुनः श्रुत्यर्थकं नाङ्कनीयम् । नटनीयवस्तुनः विशेषेण धानम् पोषकं तद्रूपं विधानमनुष्ठानम् । विधयः सन्धीनामङ्गानाञ्च स्वो भावा स्वकीयाः क्रियाः । रसः पुनः विशेषः आत्मा । पुनरप्रथमे विशेषे चेति गणरत्नकोषः । शरीराविर्भावकः काव्येतिवृत्तसमर्पक अत एव वागात्मनां शब्दानाम् । इतिवृत्तैकार्थयोगक्षेमत्वम् । इतिवृत्तेन सह एकस्मिन्नर्थे काव्ये अभिनेये दृश्ये, अनभिनेये पठये

बालक्रीड़ा

(मूल) अथ अब नाट्यशास्त्र की उन्नसीवें अध्याय की बालक्रीड़ा का आरम्भ करते हैं । इति वृत्त को नट्य का शरीर कहा है । पाँच सन्धियों से उसके विभाग की कल्पना की है ॥ ११ ॥

अङ्गगण इससे सम्पन्न सम्पूर्ण शरीर में इतिवृत में स्पर्शनरूप कथाभागोत्तेजनात्मक वृत्तियों को कैशिकी सात्वती आदि नाम से प्रसिद्ध वृत्तियों को करने वाला जो स्थापन है विधायक है ऐसी इन्द्रियां जिसका शरीर है उस महेश को मैं प्रणाम करता हूं । बाकी सब पूर्ववत् है । यह आन्तर अर्थ है ।

पुनरस्य शरीर विधान सन्धि विधिलक्षणं वक्ष्ये इस अट्ठारहवें अध्याय के अन्तिम श्लोक के उत्तरार्ध में कथित अंश से इतिवृत्तात्मक शरीर और उसके विधानरूप पोषकरूप प्रकारात्मक भेदस्वरूप विधान माने अनुष्ठान और सन्धियां मुखादि तथा विधियां माने सन्ध्यङ्गस्वभाव ये लक्षणीय हैं ऐसी जो प्रतिज्ञा की थी उसमें पहले शरीर का लक्षण करना है उसको दिखाते हैं । इतिवृत्तं तु । यहाँ तु शब्द का अर्थ व्यतिरेक है । काव्यमात्र का-- चाहे वह अभिनेय है अथवा अनभिनेय हैं—शरीर सभी वृत्त हैं । किन्तु जो नटनीय है अभिनेय है उसका इति माने इस प्रकार से उपस्कृत जो वृत्त है अत एव जो इतिवृत्त शब्द

अभिनवभारती

रञ्जनकत्वात् अर्थनिमित्तत्वाद्वा, इतिवृत्तार्थैकयोगक्षेमत्वं त्वागामनां शब्दानामिति।
तदाशयेन—

वाचि यत्नस्तु कर्तव्यो नाट्यस्यैषा तनुः स्मृता। (१४-२)

इति पूर्वमुक्तम्, इह वृत्तं शरीरमिति दर्शितमित्यविरोधः। स तु कथं प्रकारवैचित्र्य इत्याशंक्याह पञ्चभिः सन्धिभिरिति। एतदुक्तं भवति—प्रकारवैचित्र्यकल्पनामया एव सन्धयः। तत्र पारम्यपरतया (पारम्पर्यतया) पञ्चसङ्ख्येति, तेन हीनसन्धित्वेऽपि न कश्चिदत्र विरोधः।

मधुसूदनी

श्रव्ये, लिख्ये खड्गमुरजबन्धात्मना लिपिस्वरूपे अर्थात् चित्र्ये योगक्षेमत्वम्। तादृशयोगक्षेमत्वे हेतुमाह—अर्थनिर्मापकत्वम् प्रत्यर्थं हि शब्दाभिनिवेशः। कुतस्तन्निवेशः गौरिति पृष्टे गौरिति शब्दः अभिनिवेश्यते अर्थेन सह शब्दस्य तादात्म्यात्। ननु तथात्वे तु अग्निरित्युच्चारणे ज्वलनं जिह्वायाः स्यादित्याह—अर्थरूपताया अध्यासात् आरोपात्। तत्वारोपोऽपि कथमित्याह—एकस्मिन् ज्ञाने निवेशितत्वात् समानवित्तिवेद्यत्वात्। ननु शब्दादर्थस्य ज्ञानम्, क्रियाभेदाय कालः स्यादिति शब्दार्थज्ञानयो पूर्वोत्तरकालभेदात्समानत्वम् एकत्वं कुत इत्याह—अर्थस्य उपरञ्जकत्वाद् उपरञ्जनकारित्वात्। ननूपपरञ्जनमपि कथमित्याह—अर्थस्य निमित्तत्वात् बीजत्वात्।

बालक्रीड़ा

से वाच्य है कथनीय है वह वस्तु शरीर है और रस जिसमें पुनः माने विशेषरूप से आत्मा है यानी शरीर का आविर्भावक है। यहाँ का आशय यह है कि शरीर से ही भोग होता है क्योंकि भोग का आयतन शरीर है और भोग को करने वाला आत्मा है अतः आत्मा के भोग के लिए शरीर का आविर्भाव किया जाता है अतः कहाकि रस शरीराविर्भावक आत्मा है।

इसीलिए वाणीरूप शब्द का इतिवृत्त के साथ काव्यरूप एक अर्थ में योगक्षेम है। क्योंकि प्रत्यर्थं हि शब्दाभिनिवेशः के अनुसार शब्द अर्थ का निर्मापक है अभिनिवेश करने वाला है अर्थात् उपस्थापक है। वह शब्द अर्थ का उपस्थापक भी तभी होता है जब कि इसका अर्थ के साथ तादात्म्य है। क्योंकि प्राश्निक किसी वस्तु के विषय में पूछता है कि यह क्या है? उत्तरदाता उसके उत्तर में शब्द बोलता है। जैसे सामने गौ खड़ी है उसके बारे में कोई प्रश्न करता है कि यह क्या है? उत्तरदाता कहता है कि यह गौ है। इससे सिद्ध होता है कि शब्द और अर्थ का तादात्म्य है।

इस पर प्रश्न होता है कि यदि तादात्म्य है तब अग्नि के उच्चारण करने पर मुह को जल जाना चाहिए। उत्तर—तादात्म्य वास्तविक नहीं है उसका अध्यास होता है अर्थात् आरोप किया जाता है। प्रश्न—अच्छा यह बतलाइये कि इस अरोप का मूल क्या है।

अभिनवभारती

अन्ये तु सर्वत्र पञ्चैव सन्धयः, अपूर्णाङ्गत्वात्तु कस्यचिद्रूपकस्य हीनसन्धित्वमुच्यत इत्याहुः। एतच्च स्वस्थाने वितनिष्यामः।

एवमितिवृत्तशब्दे इतिभागस्य योऽर्थः सोऽप्रसिद्ध इति कृत्वा द्वितीयार्धेन पञ्चभिरित्यादिना व्याख्यातः, न तु सन्धिनिरूपणमेतत्तत् उद्देशक्रमेण तस्य अनेकविधत्वात् ॥१॥

मधुसूदनी

अविरोध इति। पूर्वं चतुर्दशेऽध्याये शब्दस्य अधुनैकोनविंशेऽध्याये इति वृत्तस्यार्थस्य नाट्यतनुत्वेऽपि एतैः षड्भिर्हेतुभिः विरोधः परिहृत इत्यर्थः। ननु प्रकारात् वैचित्र्यमिति प्रकारहेतुकवैचित्र्यसद्भावे कथं सोऽविरोध इत्याशंकाया माह-पञ्चभिरिति। पारम्यपरतयेति। परमस्य भावः पारम्यम्। काव्ये हि कल्पनापरमत्वं कल्पनयैव परा उत्कृष्टा मा शोभा सञ्जायते। इति रहस्यम्। स्वस्थाने सन्धीनां निरूपणावसरे ॥१॥

बालक्रीड़ा

उत्तर : इसका मूल है ये शब्द और अर्थ एक ज्ञान में निवेशित हैं यानी एक ज्ञान के विषय होते हैं। प्रश्न—ऐसा कैसे? उत्तर—शब्द अर्थ का उपरञ्जक है यानी अर्थ शब्द से उपरक्त है क्योंकि शब्द अर्थ का निमित्त है, वीज है। इसी आशय से शब्द और अर्थ का अभेद है। इसी से कहा है कि—

शब्द के विषय में यत्न करना चाहिए यह शब्द ही नाट्य का शरीर है। पहले शब्द को नाट्य का शरीर कहा अब वृत्त को अर्थ को नाट्य का शरीर कहते हैं इस में अविरोध कथन उनमें अभेद होने से होता है।

प्रश्न—जब कि उनमें प्रकार वैचित्र्य है तब इनमें भेद होना स्वतः प्राप्त है ऐसी स्थिति में अविरोध कैसे? ऐसी आशंका में उत्तर देते हैं—पाँच संधियों से यह युक्त है। इससे यह कहते हैं कि प्रकार के वैचिश्य की कल्पना ही सन्धियाँ हैं। यानी वस्तुतः एक हैं भेद उनमें काल्पनिक है। क्योंकि नाटकादि में पर उत्कृष्ट मा शोभा ही अपेक्षित है इसलिए वे पारम्य के पर हैं यानी अधीन हैं और वह पारम्य उत्कृष्ट सौन्दर्य पाँच संख्यावाली संधियों से होता है। कभी २ वह शोभा पांच संधियों से कम संधियों के होने पर भी होती है इसलिए इसमें कोई विरोध नहीं है।

अन्य लोग तो कहते हैं कि सभी नाटकादि में पाँच ही संधियाँ होती हैं। किन्तु जब किसी रूपक के अङ्ग पूर्ण नहीं होते हैं तब उस रूपक को हीन सन्धि कहते हैं। इसका विवेचन सन्धियों के निरूपण के प्रसङ्ग में करेंगे।

इस प्रकार इतिवृत्त शब्द में 'इति' इस भाग का जो अर्थ है वह अप्रसिद्ध है इसलिए पञ्चभिः इस द्वितीयार्ध से उसकी व्याख्या कर दी है किन्तु यह सन्धियों का निरूपण नहीं हैं। उसका निरूपण तो उद्देश के क्रम से करेंगे। वे अनेक प्रकार की हैं ॥१॥

इतिवृत्तं द्विधा चैव बुधस्तु परिकल्पयेत् ।
आधिकारिकमेकं स्यात् प्रासङ्गिकमथापरम् ।।२।।

अभिनवभारती

एवं शरीरमभिधाय तस्य विधानशब्देनोद्दिष्टं प्रकारवैचित्र्यं दर्शयति—इतिवृतं द्विधा चैवेति। इतिवृत्तं स्थितं सत्, बुधो विवेचकः कविर्द्विधैव परिकल्पयेत्। चकारात् प्रकारणादावितिवृत्तं च कल्पयेत्। तच्च द्विधा। एकमपरमित्यनेनेदमाह—न निसर्गतः किञ्चिदाधिकारिकम्, अन्यद्वा। कविधिया यदेतदाधिकारकं कृतं तदापरस्य प्रासङ्गिकतास्तीति द्विधाशब्देन सूचितं, तदेवेदं दर्शितम्। "अधिकरण-विचाले च" (पा० ५-३-४३) इति धाप्रत्ययः। एकं राशिं द्विधा कुरु इति यथा; तेनैकमेवेतिवृत्तं द्विशाखमिति यावत् ।।२।।

मधुसूदनी

कविधियेति। कविः स्वस्य धिया धारणारूपया कस्यापि इतिवृत्तस्य आधिकारिकत्वमुद्भावयति अतस्तदाधिकारिकं न तु निसर्गतः इति सारम्। यदा एकस्य तथात्वं तदापरस्य प्रासंगिकत्वमर्थात् प्राप्तम्। ननु कुत एवमभिप्रैति भवानित्याह—द्विधेत्यनेन अर्थात् द्विशब्दाज्जायमानेन धाप्रत्ययेन एतत् प्राप्तम्। अयं भावः। अधिकरणविचाले च इति पाणिनेः सूत्रम्। तस्यार्थः—अधिकरणं द्रव्यम्। विचालः विचलनमन्यथा करणम् संख्यान्तरापादनम्। संख्यान्तरापादनं हि एकस्य अनेकीकरणम् एकं राशिं द्विधा कुरु इति, अथवा अनेकस्य एकीकरणम् अनेकम् एकधा कुरु इति। एवमत्र एकमितिवृत्तं द्विधा द्विशाखं वृत्तमित्यर्थः ।।२।।

मधुसूदनी

(मूल) इतिवृत्त दो प्रकार का है ऐसी बुधों को कल्पना करनी चाहिए। उनमें एक आधिकारिक है दूसरा प्रासङ्गिक है ।।२।।

इस प्रकार शरीर को कह कर अब उसके विधान शब्द में उद्दिष्ट प्रकार वैचित्र्य को दिखाते हैं इतिवृत्ति दो प्रकार का है। बुध माने विवेचना करने वाला कवि सद्रूप से स्थित प्रसिद्ध इतिवृत्त की दो प्रकार से कल्पना करे। द्विधा चैव में कहे हुए चकार से प्रकरणादि में भी इतिवृत्त की कल्पना करनी चाहिए। वह भी दो प्रकार का है। एकम् शब्द और अपरम् शब्द इनसे यह कहा कि स्वभाव से कोई इतिवृत्त आधिकारिक नहीं होता है अथवा अन्य होता है। किन्तु कवि अपनी धारणा से जिसको यह आधिकारिक है ऐसा जब कह देता है या कर देता है तब उससे अपर दूसरा इतिवृत्त अर्थात् प्रासङ्गिक कहलाता है इस बात को द्विधा शब्द ने सूचित किया उसी को यहाँ दिखा दिया है। वहाँ द्विधा शब्द में अधिकरण विचाले च इस पाणिनि सूत्र से धा प्रत्यय हुआ है अतः जैसे एक राशि को द्विधा करो ऐसा कहा जाता है वैसे ही इस तरह एक ही इतिवृत्त की दो शाखायें हैं ।। २ ।।

यत्कार्यं हि फलप्राप्त्या सामर्थ्यात्परिकल्प्यते ।
तदाधिकारिकं ज्ञेयमन्यत्प्रासङ्गिकं विदुः ॥३॥

अभिनवभारती

तत्प्रकारद्वयं क्रमेण दर्शयति यत्कार्यं हीति। प्रधानत्वेन सम्पाद्ये फले यो ज्ञानेच्छाप्रयत्नक्रियालक्षण आरम्भः तत्कार्यमिति यथा वक्ष्यते 'यदाधिकारिकं वस्तु' (१९-२६) इति, तथाभूतो य आरम्भो मुख्यफलप्राप्त्या परिकल्प्यते तद् आधिकारिकमितिवृत्तम्। हि यस्माम् तथैव ज्ञेयम्। निरुक्तेनाधिकारः सर्वत्रनुयायि (त्वं ?) हृदयानुयायि (त्वं ?) प्रयोजनमस्य। प्रासङ्गिकेऽपि हि तदन्तर्लीनमेव। तथाहि आधिकारिके फलाप्ते आचिख्यासाधनैषाफलजिहिर्षानिष्पत्तौ यथा न शक्यत्यन्तरव्यापारणं, तद्वत्प्रासङ्गिकेऽपि सर्वत्र शक्त्यन्तरव्यापाराभाव एव। शक्त्यन्तरेऽपि पृथग्व्यापार्यमाणे तस्याप्याधिकारिकत्वमेव स्यात्। प्रतिज्ञानिर्वहणं जगत्कण्टकरावणोद्धरणं शरणागतविभीषणरक्षणमित्याद्यपि हि प्रधानफले सीताप्रत्यानयनलक्षणे विवक्षिते न शक्त्यन्तरव्यापारसाध्यं, अपि तु तदुपयोगिसामाद्युपायचतुष्टयतद्द्विकत्रिकादिभेदसम्पादननान्तरीयकोपनीतमेव। तापसवत्सराजे राज्यप्रत्यापत्तेः प्रधानफलत्वे वासव-

बालक्रीड़ा

(मूल) फल प्राप्ति के अनुरोध से जिसकी कार्य के रूप में अथवा कर्त्तव्य के रूप में कल्पना की जाती है उसको आधिकारिक समझना चाहिए और इससे अतिरिक्त को प्रासङ्गिक समझें ॥३॥

अब उन दो प्रकारों को क्रम से दिखाते हैं यत्कार्यं हि। प्रधान रूप से सम्पाद्य फल का जो ज्ञान इच्छा बाह्य क्रिया रूप एवं आन्तर प्रयत्न रूप आरम्भ है वह कार्य है। जैसा कि आगे १९ अं० २६ श्लो० में कहेंगे कि जो आधिकारिक वस्तु है। उन ज्ञानेच्छा प्रयत्न और क्रियारूप आरम्भ की जो मुख्य फल प्राप्ति से परिकल्पना करते हैं वह आधिकारिक इतिवृत्त है। क्योंकि ऐसा ही इसे समझना चाहिए।

इस उपर्युक्त निर्वचन से यह सिद्ध हुआ कि अधिकार वह है जिसका प्रयोजन सभी जगहों में अनुस्यूत वो सभी के हृदयों में अनुगत होता हो। प्रासङ्गिक इतिवृत्त में भी वह प्रयोजन अन्तर्लीन है अन्तर्निहित है। आधिकारिक इतिवृत्त में जैसे फल के प्राप्त होने से आचिख्यासा आधिकारिक के कहने की इच्छा, साधनैषा लोकैषणा एवं फलजिहीर्षा माने फल के संहार करने की इच्छा इन सबकी निष्पत्ति यानी समाप्ति के होने पर शक्त्यन्तर का क्रियान्तर का व्यापारण नहीं होता है उसी तरह प्रासङ्गिक में भी शक्त्यन्तर के क्रियान्तर के व्यापारण का अभाव ही है। क्योंकि शक्त्यन्तर यदि पृथक् व्यापार्यमाण होगा तो वह भी आधिकारिक हो जायेगा। किन्तु सिद्धान्त है प्रधानरूप से विवक्षित फल है सीता को दुश्मन के घर से लौटा लेना। जिसमें उस लौटा लेने के लिए किये जानेवाले व्यापार से ही प्रतिज्ञा का निर्वाह और जगत् के कण्टक रावण का उद्धार और शरण में आने वाले विभीषण का रक्षण आदि अवान्तर फल भी सिद्ध हो जाते हैं अतः उनको सिद्ध करने के लिए शक्त्यन्तर के व्यापार की आवश्यकता नहीं है।

कारणात्फलयोगस्य वृत्तं स्यादाधिकारिकम् ।
तस्योपकरणार्थं तु कीर्त्यते ह्यानुषङ्गिकम् ॥४॥

अभिनवभारती

दत्तासङ्गमपद्मावतीप्राप्त्यादौ क्रियान्तरानुपयोग एव मन्तव्यः । यदि ह्यस्य वासवदत्ताप्राप्त्युपायत्वं पद्मावतीपरिणयस्य नोच्येत न वत्सराजस्तत्र प्रवर्तेत, तदप्रवृत्तौ कुतः प्रधानफलमिति सर्वप्रासङ्गिकमेकरूपमेव । प्रसक्तिर्हि प्रसङ्गः तत आगतं प्रासङ्गिकं प्रसज्यते वा प्रधानफलनिष्पत्तये इति प्रसङ्गस्तत आगतमिति । तेन शक्त्यन्तरयोगायोगाभ्यां च यत्प्रासङ्गिकस्यानेकविधत्वं टीकाकृद्भिरभ्यधायि न तदुपाध्यायाः संमन्यन्ते ॥३॥

अत एवाह कारणात्फलयोगस्येति । अयमर्थः—आधिकारिकं नाम अधिकारः यस्त्वितिवृत्तं फलसम्बन्धं करोति स कविना वर्णनोपायारोहमानीतः तत्समर्थाचरणेन प्रयुज्यते । एवमन्यत्स्यादितिवृत्तमिति पूर्वपक्षमाशंक्य तत्रोत्तरमवान्तरेणाह तस्योपकरणार्थं त्विति । हिरप्यर्थे भिन्नक्रमः अनुषङ्गिकमपि कीर्त्यत इति ॥४॥

बालक्रीड़ा

(मूल) मुख्य फल के योग में जो कारण है अर्थात् फल की प्राप्ति में जो हेतु बनता है वह वृत्त आधिकारिक है। और जिसको उसके उपकरण के लिए कहते है वह वृत्त आनुषङ्गिक है ॥ ४ ॥

अपितु मुख्य फल के उपयोगी सामादि चार उपायों में से किसी एक दो या तीन का सम्पादन जो नान्तरीयकतया उपनीत हो जाता है यानी अवश्य ही प्राप्त हो जाता है उसके लिए शक्त्यन्तर की जरूरत है।

जैसे तापसवत्सराज नाटक में राज्य का प्रत्यानयन ही मुख्य फल है अतः वहाँ वासवदत्ता के साथ सङ्गम एवं पद्मावती की प्राप्ति आदि में क्रियान्तर का अनुपयोग ही माननीय है।

यदि पद्मावती परिणय को वासवदत्ता की प्राप्ति में उपाय है ऐसा नहीं कहेंगे तो वत्सराज की उधर प्रवृत्ति ही नही होगी और प्रवृत्ति के नही होंने पर प्रधान फल राज्य की प्राप्ति कैसे होगी। इस तरह सभी प्रासङ्गिक इतिवृत को एक रूप ही समझना चाहिए। प्रसक्ति का नाम प्रसङ्ग है उससे प्राप्त होने वाला प्रासङ्गिक है। अथवा प्रधान फल की निष्पत्ति के लिए की जाने वाली प्रसक्ति का नाम प्रगङ्ग है उससे प्राप्त होने वाला प्रासङ्गिक है। इसलिए टीकाकारों ने जो शक्त्यन्तर के योग एवं अयोग के कारण प्रासङ्गिक को अनेक प्रकार का कहा है उस को उपाध्यायजी नही मानते हैं ॥३॥

इसी लिए कहते हैं कि कारणात् फल योगस्य। इसका अर्थ यह है कि आधिकारिक वह इतिवृत्त है जो फल के साथ सम्बन्ध करता है जिसको कवि ने वर्णन रूपी उपाय पर आरूढ़ किया है यानी पहुंचाया है और आरूढ़ होने के योग्य आचरणों के कारण प्रयुक्त किया है। इसी प्रकार आधिकारिक इतिवृत्त से अन्य भी इतिवृत्त है। ऐसे पूर्वपक्ष की आशङ्का करके उस विषय में उत्तर को अवान्तर तरीके से कहते हैं—उसके उपकरण के लिए तो। यहां तु का अपि के अर्थ में प्रयोग किया है और इसका क्रम स्थान भिन्न है

कवेः प्रयत्नान्नेतॄणां युक्तानां विध्यपाश्रयात् ।
कल्प्यते हि फलप्राप्तिः समुत्कर्षात्फलस्य च ॥५॥

अभिनवभारती

ननु फलप्राप्तिलक्षणेन प्रयोजनेन सप्रयोजनत्वमाधिकारिकस्य लक्षणमुक्तम् फलप्राप्तिश्च प्रासङ्गिकेऽप्यस्ति सा प्रासङ्गिकीति चेत्, सिद्धे प्रासङ्गिकस्याधिकारिकाद् भेदे भवेदेतत्, तत एव तत्सिद्धौ चक्रकान्योन्याश्रयदोषः, तस्मात्फलप्राप्तिरेव विशिष्य वक्तव्येत्यभिप्रायेणाह कवेः प्रयत्नान्नेतॄणां युक्तानामिति । समुत्कर्षं प्राधान्यमवलम्ब्य फलप्राप्तिः कल्प्यते, प्रधानफलप्राप्तिप्रयोजनमाधिकारिकमित्यर्थः ।

ननु फलप्राप्तेः कथं प्राधान्यमाधिकारिकं, निर्वर्त्यत्वादिति चेत्तर्हि स एव दोष इत्याशङ्क्याह कवेः प्रयत्नादिति । कविर्यत्फलमुत्कर्षेण विवक्षति तत्प्रधानफलम् । ननु पुरुषेच्छा यद्यनियन्त्रिता, तदा पुनरपि स एव दोषः प्रयत्नादित्याह । नेतॄणां

बालक्रीड़ा

(मूल) कवि के प्रयत्न से की गई विधि के आश्रय के कारण फल के बीज के समुत्कर्ष से नाट्य के इतिवृत्त के युक्त अनुरूप नायक एवं नायिकाओं को फल के प्राप्ति की कल्पना होती है । यहाँ 'फलं फले धने बीजे' इस कोष के आधार पर फलशब्द का बीज अर्थ किया गया है । निमित्तकारण को भी बीज कहते हैं ॥५॥

अर्थात् उपकरणार्थ पद के साथ इसका अन्वय नहीं है इसका अन्वय आनुषङ्गिक के साथ है । अतः आधिकारिक इतिवृत्त की सहायता के लिए उपोद्वलन के लिए आनुषङ्गिक का भी कथन किया जाता है ॥४॥

प्रश्न — फलप्राप्ति रूप प्रयोजन से जो सप्रयोजन है यानी प्रयोजन वाला है वह आधिकारिक है ऐसा आधिकारिक लक्षण का सप्रयोजनत्व बतलाया किन्तु वह फलप्राप्ति प्रासङ्गिक में भी होती है । जो प्राप्ति प्रासङ्गिकी है । यह फलप्राप्ति आधिकारिकी है और यह प्रासङ्गिकी है यह तभी हो सकता है जब आधिकारिक से प्रासङ्गिक का भेद सिद्ध हो जाय । क्योंकि यदि उन फलप्राप्तियों से ही उनके भेद की सिद्धि होगी तो चक्रक या अन्योन्याश्रय दोष हो जायगा । इसलिए फलप्राप्ति को विशेष रूप से कहना चाहिए इस अभिप्राय से कहते हैं कि कवि के प्रयत्न से निश्चित किये गये नेताओं के उत्कर्ष का प्राधान्य का अवलम्बन करके फलप्राप्ति की कल्पना करते हैं अतः प्रधान फल की प्राप्ति रूप प्रयोजन आधिकारिक है । ऐसा इसका अर्थ है ।

प्रश्न—फलप्राप्ति को आधिकारिक प्राधान्य कैसे होगा क्योंकि फल संम्पाद्य होता है निर्वर्त्य होता है । और जो निर्वर्त्य होता है वह सापेक्ष होता है । उसमें यदि वे परस्पर सापेक्ष हुए तो अन्योन्याश्रय दोष होगा और पृथक् २ सापेक्ष हुए तो चक्रक दोष होगा । इस आशंका का शमन करने के लिए उत्तर देते हैं कि कवि के प्रयत्न से यानी कवि जिस फल को उत्कृष्ट कहना चाहता है वह प्रधान फल है ।

लौकिकी सुखदुःखाख्या यथावस्था रसोद्भवा ।
दशधा मन्मथावस्था व्यवस्था त्रिविधा मता ॥६॥

अभिनवभारती

विध्यपाश्रयाद्, धीरोदात्तादिभेदानां नायकानां मध्ये यो यत्र नायको युक्त उचितः तस्य यो विधिः, सम्पाद्य वस्तु; तदपाश्रयप्रयत्नाद्धेतोः कविफलं प्रधानमिति । यस्मिंश्च विधौ यो नायको युक्तः उचितस्तस्य मयैतत्कर्तव्यमित्यभिसन्धानाभावेऽपि तत्सन्निधौ फलं नायकत्वं विना कथं कर्तव्यम्, यथा तापसवत्सराजे वत्सराजस्य राज्यप्रत्यापत्ति कर्तव्यतायाममात्याभिसंहिता, अत एव ह्यस्यासौ नेता फलस्य चाक्रष्टा अमात्य सम्पादिताभिसन्धिप्रत्युपायपरम्पराजितस्यापि ।

नन्वेवमपि रामस्य स्वदारप्रत्यानयनकण्टकोद्धरणभीताभयवितरणादौ सर्वत्र कर्त्तव्यतौचित्यमस्ति, तथापि न व्यवस्थितं लक्षणमित्याह फलस्य चेति । चकारेण

बालक्रीड़ा

(मूल) जैसे लौकिकी सुख दुःख स्वरूपा अवस्थाएं होती हैं उसी प्रकार नाट्य में काम सम्बन्धिनी अवस्थाएँ होती है । इन अवस्थाओं का उद्भव शृङ्गार रस से होता है । ये दश प्रकार की होती है इनकी व्यवस्था तीन प्रकार की है ॥६॥

प्रश्न—कवि जिस फल को उत्कृष्ट कहना चाहता है वह फल प्रधान है ऐसा मानेंगे तो । मनोरथानामगतिर्न विद्यते । ऐसा कोई स्थल नहीं हैं या ऐसा कोई विषय नहीं है जिसमें इच्छा नहीं पहुंच सकती है क्योंकि इच्छा अनियन्त्रित है और यदि वह इच्छा अनियन्त्रित हुई तो फिर वही दोष कवि के प्रयत्न में आयेगा । उत्तर । कवि के प्रयत्न से युक्त समुचित नेताओं की विधि के सहारे से अर्थात् धीरोदात्तादि विभिन्न नेताओं के मध्य में जो नेता जहाँ युक्त है उचित है उसकी विधि है यानी उस नेता के द्वारा सम्पाद्य वस्तु है उसका अपाश्रय करके किये गये कवि के प्रयत्न रूप हेतु से वह फल होता है । जिस विधि में जो नायक युक्त है उचित है उसका मुझे वह अथवा ऐसा करना चाहिए इस तरह के अभिसन्धान के नहीं होने पर भी उस नायक की सन्निधि में फल कवि के लिए अवश्य कर्त्तव्य है । क्योंकि नायकत्व के बिना फल कैसा । जैसे तापसवत्सराज में अमात्य यौगन्धरायण के द्वारा अभिसंहित राज्यप्रत्यापत्ति वत्सराज को अवश्य कर्त्तव्य है । इसीलिए यह उसका नेता है और अमात्य की अभिसन्धि के प्रति किये गये उपाय परम्पराओं से अर्जित फल का आकर्षण करने वाला भी है ।

प्रश्न—इस प्रकार भी राम का अपनी दारा का प्रत्यानयन कण्टक का उद्धार और भीतों को अभय वितरण आदि भी स्थलों में कर्त्तव्यों में औचित्य है तब भी लक्षण व्यवस्थित नहीं हुआ । उत्तर—कहते हैं कि फलस्य च । यहां चकार से समुत्कर्षात् इसकी आवृत्ति द्योतित होती है । इससे इसका यह अर्थ है कि यह जो फल है उस अंश में अधिक उत्कर्ष का अवलम्बन करता है ।

जितना यह फल है उतने ही अंश में वह अधिक उत्कर्ष का अवलम्बन करता है अतः उसी अंश में कवि को उसके औचित्य की कल्पना करनी चाहिए । तथा हि-से उस

अभिनवभारती

समुत्कर्षादित्यस्यावृत्तिर्द्योत्यते। तेनायमर्थः—यदेतत्फलं तावत्यंशे समधिकमुत्कर्षमवलम्बते तत्रैव तस्यौचित्यं कविना कल्पनीयम्। तथा हि—रावणोच्छेदाद्यवधि सीताप्रत्यानयनमेव समुत्कृष्टं भवति, तस्यैव सम्पादनायेतरप्रवृत्तिः। सचिवायत्तसिद्धिस्तु यतो वत्सराजस्ततो यौगन्धरायणाद्यमात्यवर्गस्तावानसाविति तदामात्याद्यभिसंहतिराज्यप्राप्तिफलस्यैव तत्रोत्कर्षः। सह्येवं मन्यते—राज्यभारचिन्ता एतैर्या कृता सा मयैवेति। एवमधिकाधिकहृदयविपरिवर्तननं समुचितं च नायकस्य फलं यद्यदा कवियत्नेन विवक्ष्यते सम्पाद्यतया तदा तस्य प्रधानफलत्वं, रामाभ्युदयादौ सीताप्रत्यानयनादेरिव, न हि तत्राश्वमेधयागादेर्नायकोचितस्य कविविवक्षितत्वमस्ति।

नन्वेमपि कविविवक्षैव पुनरपि प्रधानीभूता तत्र चोक्तो नियमहेत्वभाव इति तत्राह विध्यपाश्रयादिति। यो विधीयत स विधिरिति व्युत्पत्तिः तस्यापाश्रयात्। एतदुक्तं भवति–यादृशि पुरुषार्थे व्युत्पत्तिः कर्त्तव्या तदुचितनायकग्रहणेन कविः प्रवर्तमानो न स्वेच्छया प्रवृत्तो भवतीति। हिशब्देन समुच्चयाभिधायिनैत्सूचितं—विध्यपाश्रयाद्युक्ता ये नेतारस्तेषां यत्फलं तस्योत्कर्षाय कवेः प्रयत्नः ततः फलप्राप्तिः समुत्कर्षावलम्बिनी कल्प्यत इति तात्पर्यम् ॥५॥६॥

बालक्रीड़ा

फल को बतलाते हैं—रावण के उच्छेद पर्यन्त सीता का प्रत्यावर्त्तन ही समुत्कृष्ट फल है। उसी सीता के प्रत्यावर्तन के सम्पादन के लिए इन फलों के विषय में प्रवृत्ति होती है।

किन्तु वत्सराज तो सचिवायत्तसिद्धि था इसलिए वहाँ पर जब यौगन्धरायण वगैरह उतना वर्ग था तब वहां यौगन्धरायण प्रभृति अमात्य वर्ग के द्वारा अभिसन्धान किया गया राज्यप्राप्तिरूप फल का ही उत्कर्ष होना स्वाभाविक है। वह वत्सराज ऐसा मानता है कि इन अमात्यों ने जो राज्यभार की चिन्ता की है उसे मैने ही की है। इसलिए अधिकाधिक रूप से हृदय में विपरिवर्त्तमान है और उचित भी है, ऐसा जो नायक का फल जब कवि के द्वारा प्रयत्न से सम्पाद्यत्वेन विवक्षित है तब वह प्रधान फल है; जैसे रामाभ्युदय नाटक में सीता का प्रत्यानयन वगैरह। यहाँ पर अश्वमेधादि याग कर्त्तव्य है जो कि नायक के लिए उचित है तब भी वह कवि को विवक्षित नहीं है।

प्रश्न—यदि इस प्रकार फिर भी कवि की विवक्षा ही प्रधान मानी जायगी जिसमें नियमकारी हेतु के अभाव को कह दिया है तब कैसे संगति होगी, इस पर कहते हैं कि विधि के आधार से हेतु को लाया जायगा। जो विधान किया जाता है वह विधि है ऐसी इसकी व्युत्पत्ति है। उस विधि के अपाश्रय से। यहाँ यह कहा कि जिस प्रकार के पुरुषार्थ के विषय में व्युत्पत्ति करनी है उसी धर्म अर्थ काम एवं मोक्ष रूप पुरुषार्थ के उचित नायक का आलम्बन करके प्रवृत्त होता है न कि कवि अपनी इच्छा से प्रवृत्त होता हैं इति।

यहां मूल पाठ कल्प्यते हि में जो समुच्चय को कहने वाला हि शब्द है उसने यह सूचित किया कि विधान के आश्रयण के अनुसार जो नायक हैं उनके जो फल हैं उनके उत्कर्ष

संसाध्ये फलयोगे तु व्यापारः कारणस्य यः ।
तस्यानुपूर्व्या विज्ञेयाः पञ्चावस्थाः प्रयोक्तृभिः ॥७॥
प्रारम्भश्च प्रयत्नश्च तथा प्राप्तेश्च संभवः ।
नियता च फलप्राप्तिः फलयोगश्च पञ्चमः ॥८॥
औत्सुक्यमात्रबन्धस्तु यद्बीजस्य निबध्यते ।
महतः फलयोगस्य स फलारम्भ इष्यते ॥९॥

अभिनवभारती

अथ कविप्रयत्नेन साध्ये व्यापारपरिस्पन्दो यो वाङ्मनसगतरतस्य या अवस्था। आनुपूर्व्येति उद्देशक्रमेणैव प्रयोक्तृभिः कविभिर्निबन्धनीयतया ज्ञातव्याः ॥७॥

ता उद्दिशति प्रारम्भश्चेति। चकारैस्तथाशब्देन चावश्यंभाविक्रमत्वमासामुच्यते। न हि प्रेक्षापूर्वकारिणोऽवस्थान्तरासम्भावनायां प्रारम्भ उचितो भवति, तत्प्रारम्भश्चेदुत्तरोत्तरावस्थाप्रसर एव। पञ्चम इत्यनेन क्रमो विवक्षित इति दर्शयति ॥८॥

एताः क्रमेण दर्शयितुमाह औत्सुक्यमात्रबन्धस्त्विति। महतः प्रधानभूतस्य फलस्य प्रयुज्यमानस्य तत्तन्नायकोचितस्य यद् बीजमुपायसम्पत्तस्य यदौत्सुक्यमात्रं तद्विषय।

बालक्रीड़ा

(मूल) संसाध्य फल में जो कारण का व्यापार है उसकी पाँच अवस्थाओं को प्रयोक्ता लोग क्रमशः समझें ॥७॥

(मूल) प्रारम्भ १, प्रयत्न २, प्राप्तिसम्भव ३, नियत फलप्राप्ति ४, और फलयोग ५। ये पाँच अवस्थाओं के नाम हैं ॥८॥

(मूल) बीज की उत्सुकता से सम्बन्धी के रूप में जिसका निबन्धन करते हैं उसको प्राप्तव्य महान् फल का आरम्भ माना है ॥९॥
के लिए जो कवि का प्रयत्न हैं उससे फल की प्राप्ति की कल्पना की जाती है जो समुत्कर्षावलम्बिनी है। ऐसा तात्पर्य है।५।६।

अब कवि के प्रयत्न से साध्य फल के विषय में जो व्यापार परिस्पन्द मन एवं वाणी में प्राप्त है उसकी जिन अवस्थाओं को आनुपूर्वी से उद्देशक्रम से प्रयोग करने के लिए कवियों को काव्य में निबन्धन करने के लिए ज्ञातव्य हैं उनको कहते है—प्रारम्भश्चेति। यहाँ प्रारम्भश्च इत्यादि में उक्त पाँच चकार और तथा प्राप्तेश्च में उक्त तथा शब्द इन अवस्थाओं के अवश्यं भावी क्रम को कहते हैं कि प्रेक्षापूर्वक कार्य को करने वाले के लिए अन्य अवस्थाओं की सम्भावना को किये विना प्रारम्भ करना उचित नहीं है अगर उसको प्रारम्भ करना है तब उत्तरोत्तर आगे आगे अवस्थाओं का प्रसार करना ही होगा। पञ्चम इससे यह दिखाते है कि यहां क्रम विवक्षित है।७।८।

अपश्यतःफलप्राप्तिं व्यापारो यः फलं प्रति ।
परं चौत्सुक्यगमनं स प्रयत्नः प्रकीर्तितः ॥१०॥

अभिनवभारती

स्मरणोत्कण्ठानुरूपं, अनेनोपायेनैतत् सिद्धयतीति, तस्य बन्धो हृदये निरूढिः प्रारम्भः, सा च नायकस्यामात्यस्य नायिकायाः प्रतिनायकस्य दैवस्य वा । तस्या हि यथैवानुमानाद् व्यवस्था । दैवसाध्यमपि च समुद्रदत्ताभिमतप्राप्त्यादिकं पुण्योपार्जनं प्रयत्नबहुमानसिद्धये दैवसाहाय्यस्य पुरुषकारस्य फलवर्तिता तद्व्युत्पत्तिलाभाय प्रदर्श्यत इति ॥९॥

एवमपश्यत इति तदुत्पत्त्यव्यतिरेकेण फलप्राप्तिमपश्यतः फलदर्शनमसंभाव्यमानं विवेचयतः फलमुद्दिश्य यो व्यापारः उपायविषयपरमौत्सुक्यगमनलक्षणं तेन विनेदं फलं न भवति तस्मात् स एवोपायोऽन्वेष्यः इत्युपायविषयस्मरणेच्छासन्तानस्वभावः, स प्रयत्नः ॥१०॥

बालक्रीड़ा

(मूल) फल की प्राप्ति को नहीं देखने वाले का, जो फल को प्राप्ति के प्रति व्यापार है, उस व्यापार को प्रयत्न कहते हैं। इसमें फल के लिए अत्यन्त उत्सुकता होती है ॥१०॥

अब इनको क्रम से दिखाने के लिए कहते है कि औत्सुक्यमात्र बन्धस्तु । महान्, प्रधानभूत, प्रयोग के लिए समय से प्राप्त तथा भिन्न २ नायक के उचित जो फल है उसका जो बीज माने उपायसम्पत् है उसका जो औत्सुक्य ऊत्कण्ठा के अनुरूप स्मरण है अर्थात् इस उपाय से यह सिद्ध होता है इत्यादि । उसका बन्ध माने हृदय में निरूढि प्रारम्भ है । वह निरूढि नायक की अमात्य की नायिका की प्रतिनायक की अथवा दैव की है । उसी के अनुगत प्रमाण से उसकी व्यवस्था होती है ।

दैवसाध्य भी जो समुद्रदत्त को अभिमत की प्राप्ति है वह पुण्योपार्जित है । यहां ब्रह्मयशः स्वामी के बनाये हुए पुष्पदूषितक नाटक के छठे अङ्क में समुद्रदत्त का नन्दयन्ती के साथ जो समागम हुआ है उसमें केवल दैव ही सहायक है नीतिरूपी नेत्र के द्वारा किये गये पौरुष का प्रभाव नहीं है । प्रयत्न में बहुमान की सिद्धि के लिए दैव की सहायता से युक्त पुरुषकार में उद्योग में फल की वर्त्तिता प्राप्ति है । अतः उसकी व्युत्पत्ति के लाभ के लिए दिखाया है ॥९॥

एवमपश्यतः । फल के अनुरूप उपाय के विना फलप्राप्ति को देखने वाले को फल का दर्शन होना असम्भव है एसी विवेचना करने वाले का जो फल को लक्ष्य करके व्यापार है उपाय के विषय में औत्सुक्य है अर्थात् इस उपाय के विना यह फल नहीं होगा अतः इस उपाय का अन्वेषण करना चाहिए इस प्रकार जो उपाय के वारे में स्मरण करने का और इच्छा सन्तान परम्परा करने का स्वभाव है वह प्रयत्न है ॥१०॥

ईषत्प्राप्तिर्यदा काचित्फलस्य परिकल्प्यते ।
भावमात्रेण तं प्राहुर्विधिज्ञाः प्राप्तिसम्भवम् ॥११॥
नियतां तु फलप्राप्तिं यदा भावेन पश्यति ।
नियतां तां फलप्राप्तिं सगुणां परिचक्षते ॥१२॥

अभिनवभारती

ईषत्प्राप्तिरित्यादि । भवत्यस्मादिति भावः उपायः, तस्य सहकार्यन्तरयोगः प्रतिबन्धकवारणं च मात्रपदेनावधारितम् । तदयमर्थः–उपायमात्रेण लब्धेन यदा कदाचिद् विशिष्टफलप्राप्तिरीषत् कल्प्यते संभावनामात्रेण स्थाप्यते न तु निश्चीयते तदा प्राप्तेः सम्भवः । संभावनायोग्यत्वम् संभावनाविशिष्टत्वं नाम तृतीया कर्तुरवस्था ॥११॥

नियतां तु फलप्राप्ति यदेति । फलस्य प्रकर्षेणाप्तिर्यतः सहकारिवर्गः प्रतिबन्धकविध्वंसनसहितता च सामग्रीरूपतः अपेक्षितौः, तां सामग्रीं, यदा तेन भावेन पूर्वोपात्ततया मुख्योपायेन नियतां नियन्त्रितां फलाव्यभिचारिणीं पश्यति तदा नियतफलप्राप्तिर्नामावस्था । ननु सा किं कर्तरीत्याशङ्क्याह सगुणामिति गौणी उपचरिता तस्येयमवस्था । नियतफलकर्तृविषयत्वेन नियतफलप्राप्तिशब्दो विषयविषयिणोरभेदोपचाराद्

बालक्रीड़ा

(मूल) जब फल की ईषत् प्राप्ति की कल्पना करते हैं, तब विधि के जानकार लोग उसको भावना मात्र से प्राप्ति सम्भव कहते हैं ॥११॥

(मूल) जब भावना के बल से कवि नियत फल प्राप्ति को देखता है तब विधिज्ञ उसको नियत फल प्राप्ति कहते हैं । यह अवस्था गुणों से युक्त होती है ॥१२॥

ईषत्प्राप्तिः । जिससे कार्य होता है वह भाव है उपाय है । उसके लिए दूसरे सहकारी का योग तथा प्रतिबन्धक का वारण है वह सब मात्र पद से अवधारित है । इस लिए इसका यह अर्थ है कि साधारण उपाय के मिलने से जब कभी विशिष्ट फल प्राप्ति की थोड़ी सी कल्पना करते हैं केवल भावना के वल पर स्थापना ही करते हैं न कि निश्चय करते हैं तब फल प्राप्ति की सम्भवना है । वह सम्भावनायोग्यत्वरूपा सम्भावना-विशिष्टत्वरूपा कर्त्ता की तृतीय अवस्था है ॥११॥

जब फल की प्राप्ति नियत है । फल की प्रकर्षेण प्राप्ति तभी होती है जब सहकारी वर्ग जुट जाय और प्रतिबन्धकों का विध्वंस हो जाय । प्रतिबन्धक का अत्यन्ताभाव कार्य-जनक कारणसामग्री में कारणरूप से निविष्ट है । यहां यतः में यत्र रूप सप्तमी के अर्थ में तसिल् प्रत्यय है । अतः जहां प्रतिबन्धकविध्वंसनसहित सहकारिवर्ग सामग्री रूप से अपेक्षित है । उस सामग्री को जब उस भाव के द्वारा अर्थात् पूर्वोपात्त होने से मुख्य उपाय के द्वारा नियत नियन्त्रित उस फलाव्यभिचारिणी सामग्री को देखता है तब नियत-फलप्राप्ति रूप अवस्था होती है ।

अभिप्रेतं समग्रं च प्रतिरूपं क्रियाफलम्
इतिवृत्ते भवेद्यस्मिन् फलयोगः प्रकीर्तितः ॥१३॥

अभिनवभारती

युक्त इति यावत् । अत एव पश्यतीत्यनेन दर्शनमेवावस्थेति दर्शितम् । यदि वा सह गुणेन दर्शनेन वर्तते नियतफलप्राप्तिदर्शनं तन्नामावस्थेत्यर्थः । ये त्वकारप्रश्लेषादभावेन नियतां सन्देहमयीमिति व्याचक्षते ते नियता फलप्राप्तिः संदिग्धा चेत् कथमेतद्विरुद्धं संगच्छतामिति प्रष्टव्याः ॥१२॥

अभिप्रेतं समग्रं चेति । यस्मिन्निति वृत्ते कर्त्रवस्थात्मनि नायकस्याभिप्रेतं तादृशम्, अपि च नानुचितं, अपितु प्रतिरूपमुचितं, संभावात् पूर्णं क्रियाफलमिति समनन्तरफलं, न च विधिफलमिव स्वर्गादि कालान्तरापेक्षि वर्ण्यते, सावस्था नायकस्य फलयोगः फलोत्पत्तिर्नाम । तत्र सचिवामात्यादेरपि यावस्था सा वस्तुतो नायकगामिन्येव भवतीति नाटकेषु नावश्यं सर्वा नाकस्य सक्षादेवोपनिबन्धनीया अपि तु सचिवादिगतत्वेनापि, फलयोगस्तु साक्षादेव तद्गत इत्यभिप्रेतमित्यनेन दर्शितम् । अवस्थान्तराणि सचिवादिगतान्यपि पर्यवस्यन्ति नायकादेरेवेत्येत्तदेव सुकविना रत्नावल्यां "प्रारम्भेऽस्मिन् स्वामिनः सिद्धिहेतौ" (अ० १) इति श्लोकेन प्रतिपदमुक्त्वा अस्मदभिप्रायः समुच्छ्रितेन दर्शितः ॥१३॥

बालक्रीड़ा

(मूल) जिस इतिवृत्त में क्रिया का अपने अनुरूप समग्र सम्पूर्ण इष्ट अभिप्रेत फल होता है उसको फलयोग कहते हैं ॥१३॥

प्रश्न—पश्यति शब्द को कहते हैं अतः क्या यह अवस्था कर्त्ता की होती है । उत्तर । सगुणाम् । गौणी उपचरिता यह फल की अवस्था है । तब पश्यति क्यों कहा इस पर कहते हैं कि नियम से फल को करने वाले के विषय के अनुरोध से यह नियतफलप्राप्ति शब्द विषय एवं विषयी में अभेद मानकर प्रयुक्त है । अर्थात् यहां अभेदोपचार है अतः गौणी लक्षणा है । इसीलिए पश्यति इससे यह दिखाया कि दर्शन ही यह अवस्था है । अथवा दर्शनरूप गुण के साथ रहता है अतः नियतफलप्राप्ति दर्शन उसकी अवस्था है यह उसका अर्थ है । जो तो यहां यदाऽभावेन इसमें अकार का प्रश्लेष करके अभावेन नियतां माने सन्देहमयीम् ऐसी व्याख्या करते हैं उनको पूछना है वे प्रष्टव्य हैं कि जब नियत फलप्राप्ति अनियत है सन्दिग्ध है तब सन्दिग्ध के विरुद्ध संगच्छताम् ऐसा क्यों ॥१२॥

अभिप्रेतं समग्रश्च । कर्ता के अवस्थारूप जिस इतिवृत्त में जो नायक का अभिप्रेत है इष्ट है । परन्तु इष्ट होता हुआ भी अनुचित नहीं है अपि तु अनुरूप है उचित है और सम्भवतः पूर्ण है । क्रियाफलम् । इसका मतलव है समनन्तर होने वाला तत्काल मिलने वाला फल । न कि विधि यानी याग से कालान्तर में मिलनेवाला स्वर्गादि रूप फल । यह नायक की अवस्था फलयोग फलोत्पत्ति नाम से व्यवहृत होती है । उसमें सचिवादि की जो अवस्था है वह अवस्था भी वस्तुतः नायक में ही होती है । तब भी नाटक में इन सब

सर्वस्यैव हि कार्यस्य प्रारब्धस्य फलार्थिभिः ।
एतास्त्वनुक्रमेणैव पञ्चावस्था भवन्ति हि ॥१४॥

अभिनवभारती

ननु मानुषव्याषारे नायकस्य तत्सचिवादेर्वा भवन्त्येता अवस्थाः, प्रतिनायकेऽप्येवं तत्र परमसदुपायापेक्षया । यत्र तु दैवायत्तं फलं वर्ण्यते, तत्र कथं, न च वर्ण्यं पुरुषकारमात्राभिमानिनां दैवमवजानानां चार्वाकादिमतमेयुषां, स देवबहुमानव्युत्पत्तये हि पुरुषकारोऽप्यफलः, तदभावोऽपि सफलः प्रदर्शनीयः. अत एव दरिद्रचारुदत्तादिरूपकाणि तद्विषयाणि । तस्माद्दैवायत्तत्वे कथमेतदवस्थापञ्चकम्, तत्परिहर्तुमाह सर्वस्यैव होति दैवादागच्छतोऽपीत्यर्थः तत्रापि हि यद्यपि नायको न वर्तते तथापि यत्र फलं भवति तत्रावश्यमवस्थादिभिर्भाव्यम् । स एव च परं फलेन तदानीमर्थीभवति' 'यमर्थमधिकृत्य प्रवर्तत' इति हि प्रयोजनलक्षणं वदन्ति । तच्च हि सेवाद्यशेषोपायप्रारम्भं विना न, यत आनन्दसंपादनहृदय एव तत्र प्रवर्त्तते । अपरथा परतः प्राप्तमपि फलं नाङ्गीकुर्यात्, अनङ्गीकरणेऽपि वास्य फलार्थित्वमेवाधिकफलान्तरसन्तोषमनु प्रसिद्धयादिफलान्तराभिसन्धानादिति युक्तमुक्तं मुनिना सर्वस्यैव पञ्चावस्था इति ||१४॥

बालक्रीड़ा

(मूल) फल को चाहने वालों के द्वारा आरम्भ किए गए सम्पूर्ण कार्य की क्रमशः यही पाँच अवस्थाएं होती हैं ॥१४॥

अवस्थाओं का साक्षात् नायक से सम्बन्ध करके उपनिबन्धन नहीं करना चाहिए । अपि तु सचिवादि में भी इन अवस्थाओं का उपनिबन्धन करना चाहिए । किन्तु फलयोग का उपनिबन्धन तो साक्षात् नायक में ही करना चाहिए इस बात को इस चर्चा को अभिप्रेत इस शब्द से दिखाया है। सचिवादि की भी भिन्न-२ अवस्थाएं नायक में ही पर्यवसित होती है इसी तथ्य को सुकवि ने रत्नावली में 'स्वामी की सिद्धि के हेतु का आरम्भ किया' इस श्लोक से प्रतिपद कहकर हमारे अभिप्राय को बड़े जोर से समुच्छ्रित रूप से दिखाया है ॥१३॥

प्रश्न—यह दृश्य काव्य प्रणयन और फिर उनका अभिनयन यह सब मानुष व्यापार है। इस मानुषव्यापार में नायक की अथवा उसके सचिव आदि की ये अवथाएं होती हैं। इसी तरह प्रतिनायक में भी ये अवस्थाएं होती हैं इन सब में परम सत् उपायों की अपेक्षा है। किन्तु जहां दैवाधीन फल वर्ण्य है वहाँ कैसी अवस्थाएं । क्योंकि केवल पुरुषकार के ही उद्योग के अभिमानी दैव को नहीं जानने वाले चार्वाकमतानुयायी लोगों की इन अवस्थाओं का वर्णन नहीं किया जा सकता है। जहाँ दैव को ही बहुत मानना सिखाया जाता है वहाँ पुरुषकार को उद्योग को अफल और पुरुषकार के अभाव को सफल दिखाना चाहिए । दरिद्रचारुदत्तादि रूपक सब इसी विषय के हैं। इसलिए जहाँ दैवाधीन व्यवस्था है वहाँ ये पाँच अवस्थाएं कैसे होंगी । इसका परिहार करने के लिए कहते हैं सर्वस्यैव । दैव से आते हुए को भी ऐसा इसका अर्थ है। वहाँ पर यद्यपि नायक यत्न नहीं करता

आसां स्वभावभिन्नानां परस्परसमागमात् ।
विन्यास एकभावेन फलहेतुः प्रकीर्तितः ॥१५॥

अभिनवभारती

नन्वासां तावत् स्वरूपभेदः कालभेदश्च । कालभिन्नानां चैककालत्वाभावात् 'संसाध्ये फलयोगे तु व्यापारः कारणस्य यः' इति (१९-७) यदुक्तं तत् कथम्, यतः फलयोगे साध्ये च तत्रावस्थाः कारणस्य पञ्चेतीहावस्थाः कालभेद एव, न तु ताः कदा चिदन्यथेत्याशङ्क्याह आसां स्वभावभिन्नानामिति स्वभावभेदे तु कालभेदोऽप्युपलक्ष्यते, स्वभावभेदे दिक्कालभेदे च सति दण्डचक्रादिभिरेकफलसंपादना, तेन कालभिन्नानामपि, आसां परस्परमन्योन्यं संगत्या नान्तरीयकत्वेन एकभावे यदागमनं तदवलम्ब्य यो विन्यासो यत्फलहेतुः तत आद्यन्तावकर्षणेन निश्चितोत्तरोत्तरकार्याणां कारणकारणा-

बालक्रीड़ा

(मूल) अपने अपने भाव अर्थात् क्रिया कलाप के अनुसार भिन्न हुई इन अवस्थाओं का परस्पर के समागम के आधार पर एक भाव से एक रूप से विन्यास है उसे फल हेतु कहते हैं ॥१५॥

है तब भी जहाँ पर फल होता वहाँ पर अवस्थाएं अवश्य होंगी । परं किन्तु उस समय वही वहाँ पर फल का अर्थी होता है क्योंकि 'जिस अर्थ के लिए वह प्रवृत्त होता है वह प्रयोजन है' ऐसा प्रयोजन का लक्षण कहा है । वह प्रयोजन भी सेवादि अशेष उपायों के आरम्भ के विना नहीं हो सकता है । क्योंकि आनन्द के सम्पादन करने में जिसका हृदय रहेगा वही उपायों के करने में प्रवृत्त होता है । अपरथा जब आनन्द सम्पादनार्थ हृदय में वासना ही नहीं रहेगी तो दूसरे से मिलने वाले फल का भी अङ्गीकार नहीं करेगा । अथवा अङ्गीकार नहीं करने में उसका कदाचित् यह आशय हो कि यह फल अपूर्ण है इससे अधिक फल प्राप्त होगा तभी सन्तोष होगा । क्योंकि देखा गया है कि प्रसिद्धि वगैरह अन्य फलों का अभिसन्धान नायक लोग करते हैं अतः मुनि ने जो कहा है वह सब युक्त ही कहा है कि सभी की पाँच अवस्थायें होती है ॥१४॥

अब यहां यह अशंका होती है कि इन पूर्वनिर्दिष्ट अवस्थाओं मे स्वरूप का भेद और काल का भेद होता है । जब काल भेद मान लिया गया तब एक कालिकता इनमें नही हो सकती है । ऐसी स्थिति में 'संसाध्ये फलयोगे तु व्यापारः कारणस्य यः' यह जो कहा वह कैसे ? क्योंकि यहां साध्य फल में कारण की पांच अवस्थाएं आपने कही है । उनमें पञ्चसंख्यात्व तभी होगा जब भिन्नकालत्व रहेगा अन्यथा नही । इस आशंका के उत्तर में कहते हैं—इन स्वभावतः भिन्न अवस्थाओं का । इति । स्वभावभेद होने पर तो दिग्भेद और काल भेद भी स्वतः प्राप्त है अतः उपलक्षण विधया दिग्भेद और कालभेद भी मान लेना लेना चाहिए । इसी को कहते हैं कि स्वभावभेद दिग्भेद एवं कालभेद रहने पर भी दण्ड चक्र एवं चीवर वगैरह के द्वारा मृत्तिका में घटरूप एकफल की सम्पादना होती है । इससे स्वभावादि के भेदसे

यद्वृत्तं हि यदाख्यातं पूर्वमेवाधिकारिम् ।
तदारम्भादि कर्त्तव्यं फलान्तं च यथा भवेत् ॥१६॥

अभिनवभारती

नामपि हेतुत्वानपायादिति भावः । यच्चोक्तं फलयोगे कथं फलयोगान्तरमिति तत्राप्याह एकभावेन फलहेतुरिति । एकभावः संबन्धः । तेनायं भावः–फलस्योत्पत्त्यवस्था एका नायकेन सह संबद्धा, द्वितीया येयं संसाध्ये फलयोग इत्यत्र निर्दिष्टा, पूर्वा त्ववस्था मध्यत्रयेण युज्यमाना योग्यफलोत्पत्तिदर्शना पञ्चम्यवस्थेत्यर्थः ॥१५॥

एवमवस्थापञ्चकं प्रदर्श्य तदनुयायित्वेनेतिवृत्तस्याधिकारिकत्वं समर्थयितुमाह यद् वृत्तं हि यदाख्यातमिति । यद्यस्माद्यत् कर्त्तव्यं कार्यं वस्त्वारम्भादि फलान्तं च तदिति तस्मात्तदवस्थानुयायित्वेनाधिकृतत्वादाधिकारिकमुच्यते । चस्तुशब्दस्यार्थे, यथा तु तदितिवृत्तशब्दवाच्यं भवेत् तथा प्राक् सम्यगाख्यातमितिशब्दार्थमिति निरूपणेन 'पञ्चभिः सन्धिभिस्तस्य विभागः, इत्यनेन । एतच्च तद्गतवक्तव्यान्तरोपक्षेपाय पुनरभिहितम् ॥१६॥

बालक्रीड़ा

(मूल) आधिकारिक इतिवृत्त को जिसे पहले ही कह दिया है उस आधिकारिक इतिवृत्त की आरम्भादि अवस्थाओं को इस प्रकार से करना चाहिए जिससे पर्यन्त में फल की प्राप्ति हो जाय ॥१६॥

भिन्न होने वाली भी इन अवस्थाओं की परस्पर में अन्योन्य में सङ्गति से मिलान से नान्तरीयकतया जबरन् जो एकभाव में आगमन है उसका अवलन्वन करके उसके आधार पर जो उन अवस्थाओं का विन्यास है वह फल का हेतु है। इस विन्यास में आदिम तथा अन्तिम अवस्थाओं का अवकर्षण है अतः इस अवकर्षण के वदौलत जिनसे उत्तरोत्तर कार्यो का उत्पन्न होना निश्चित है उन कारणों तथा उन कारणों के भी कारणों में भी हेतुत्व का अनपाय है अर्थात् कारण के भी कारणों से हेतुपना गया नहीं है मौजूद ही है। यह यहाँ का भाव है।

और भी जो कहा था कि एक फल के योग में दूसरे फल का योग कैसे । उसमें भी कहते हैं कि एकभाव से फल का हेतु है। यहां एक भाव का अर्थ है सम्बन्ध । अतः यह भाव है—फल की उत्पतिरूपा अवस्था एक है पहली है जिसका नायक के साथ सम्बन्ध है। दूसरी वह है जिसको संसाध्य फलयोग में कही है। इनमें पूर्व अवस्था का मध्य की तीन अवस्थाओं से योग करने पर जिस योग फल की उत्पत्ति दिवाई पड़ती है वह पञ्चमी अवस्था है ॥१५॥

इस तरह पांच अवस्थाओं को दिखाकर अब उन अवस्थाओं के अनुगामी के रूप से इतिवृत्त में आधिकारिकत्व का समर्थन करने के लिए कहते हैं कि यद् वृत्तं हि यदाख्यातम् । यत् यस्मात् यानी क्योंकि आरम्भ से फलपर्यन्त जो वस्तु कर्तव्य है कार्य है इसलिए वह वस्तु

पूर्णसन्धि च कर्तव्यं हीनसन्ध्यपि वा पुनः ।
नियमात् पूर्णसन्धि स्याद्धीनसन्ध्यथ कारणात् ॥१७॥

अभिनवभारती

ननु किं सर्वत्र पञ्चैव सन्धय इत्याद् पूर्णसन्धि चेति। विकल्पः सर्वत्रेति कश्चिदाशङ्कते तं प्रत्याह नियमादिति। उत्सर्गेणेति केचित्। उपाध्यायास्त्वाहुः- सर्वत्रेतिवृत्तं पञ्चसन्ध्येव, न हि कश्चिदपि व्यापारो प्रारम्भाद्यवस्थापञ्चकं विना सिद्धयेत्; न शक्यमूनीकर्तुं वा। उक्तं च

सर्वस्यैव हि कार्यस्य प्रारब्धस्य फलार्थिभिः ।

एतास्त्वनुक्रमेणैव पञ्चावस्था भवन्ति हि ॥ इति (१९-१४)

अवस्थापञ्चकानुयायिना सन्धिपञ्चकेनापि भाव्यमेव, तेन सर्वं नियमात्पञ्चसन्धि, हीनसन्धित्वं तु तत्र कारणादपूर्णाङ्गत्वलक्षणादुच्यते, अत एव पुर्णसन्धीति व्यपदिश्यते इत्यपिशब्देन चोक्तं 'हीनसन्ध्यपि वा पुनः' इति ॥१७॥

बालक्रीड़ा

(मूल) नाट्य में पूरी सन्धियों को करना चाहिए। अथवा किसी विशेष प्रसङ्ग से सन्धियों में कमी भी की जा सकती है। उनमें नियम के अनुसार सन्धियां पूर्ण ही होनी चाहिए। सन्धियों में हीनता तो कभी किसी विशेष कारण से होती है ॥१७॥
उन उन अवस्थाओं के अनुयायी के रूप में अधिकृत होने से आधिकारिक कहलाता है। यहां फलान्तं च में उक्त च शब्द तु के अर्थ में है। अतः जैसे तो वह वस्तु इतिवृत्त शब्द से वाच्य है वैसा इतिशब्दार्थम् इस निरूपण के द्वारा पुरस्तात् पहले सम्यक् रूप से कह दिया है। पांच सन्धियों से उसका विभाग है इससे तो उसमें किये जाने वाले वक्तव्यान्तर का उपक्षेप करने के लिए पुनः कहना है ॥१६॥

प्रश्न—क्या सभी जगहों में पांच ही सन्धियां होती है। उत्तर। कहते हैं करनी तो पूरी पाँच संधियां है कहीं पर कम भी की जा सकती है। इस पर कोई आशंका करता है कि तब क्या सभी जगह विकल्प होता है इस आशंका करने वाले को प्रत्युत्तर देते है कि नियमात्। नियमतः तो पाँच ही होती है। कोई नियम की जगह में उत्सर्ग को मानते हैं अतः स्वभाव से पांच अवस्थाओं के विना कार्य सिद्ध नही हो सकता है। अथवा यों कहिए कि ऊनीकरण यानी कम करना शक्य नही है। जैसा कि कहा है—सर्वस्य। पांच अवस्थाओं के अनुरूप पांच सन्धियां भी होनी ही चाहिए इसलिए सब नाटकों में नियम से पांच ही होती है। किन्तु कहीं पर कारण वश कम सन्धियाँ भी हो सकती है ऐसी स्थिति में अङ्गो की पूर्णता नही हो सकेगी। इसका भाव यह है जहां कहीं किसी रूपक में सन्धियों के चौसठ अंगों में पूर्णता नही हो सकती है वहां पर कम सन्धियां होगी। इसीलिए रूपकों को पूर्णसन्धि वाले कहा जाता है। इस बात को हीनसन्ध्यपि में कहे गये अपि शब्द ने कहा है ॥१७॥

एकलोपे चतुर्थस्य द्विलोपे त्रिचतुर्थयोः ।
द्वितीयत्रिचतुर्थानां त्रिलोपे लोप इष्यते ॥१८॥

अभिनवभारती

'डिमः समवकारश्च चतुस्सन्धी' इति वक्ष्यते, तत्रावमर्शस्य लोपः । 'व्यायोगेहामृगौ चापि सदा कार्यौ त्रिसन्धिकौ' इत्यत्र गर्भविमर्शयोर्लोपः । 'द्विसन्धि तु प्रहसनं वीथ्यङ्को भाण एव च' तत्र प्रतिमुखगर्भावमर्शानां लोपः, त्रिशब्देन (द्वितीयत्रिचतुर्थानामित्यत्र) तृतीयो लक्ष्यते। तत्रोपक्रमोपसंहारौ तावत् सर्वत्राऽवश्यं भाविनौ, । तत्र तु ये प्रेक्षापूर्वकारिणो विततं बहुफलं कर्तव्यमारभन्ते तेषां पञ्चैव सन्धयः । आर्तिसहिष्णुत्वेन शंक्यमानविरुद्धप्रत्ययस्यापाकरणे "द्वौ प्रतिषेधौ विधि द्रढयतः" इति न्यायात् सुदृढो हि भवत्येषां फलयोगः । डिमादिनायकास्त्वत्युद्धतप्रायत्वान्नातीव विनिपातमाशङ्कन्ते । व्यायोगादिनायका अपि तारतम्येन फलयोगाङ्गीभावान्नाद्रियन्ते । प्रहसनादिनायकास्त्वधर्मप्रायत्वात्तदितिवृतस्य चर्वितशरीरत्वादुपक्रमोवसंहारमात्रे विश्राम्यन्तीत्यपूर्णा अवमर्शादिरहितत्वात् ॥१८॥

बालक्रीड़ा

(मूल) नाटकादि में पूरी पांचों सन्धियाँ होनी चाहिए। कदाचित् कारण विशेष के आधार पर सन्धियों में कमी भी यानी लोप भी हो सकता है। उनमें एक के लोप में चौथी अवमर्श सन्धि का, दो के लोप में तीसरी गर्भ एवं चौथी अवमर्श का, तीन के लोप में दूसरी प्रतिमुख, तीसरी गर्भ, चौथी अवमर्श का लोप इष्ट है ॥१८॥

अब इनके विशेष लक्षणों को कहते हैं--यत्र बीज समुत्पत्ति। प्राक् पहले प्रारम्भावस्था होने के कारण मुख की तरह मुख है जैसे शरीर के करचरणादि समस्त अवयवों का पोषण मुख ही भक्ष्य भोज्य लेह्य चोष्य पेयादि पदार्थों का ग्रहण करके करता है अतः सम्पूर्ण अवयवों में प्रधान है उसी तरह मुखसन्धि भी है। इस लिए मुखमिव मुखम् कहा। इसका तत्त्व यह है कि जितना भी क्रियावान् अर्थ भागराशि है उसमें मुख्य उपायभूत बीज की सम्यक् उत्पत्ति प्रारम्भिक अवस्था विशिष्ट इतिवृत्त के अनुगत होती है। अर्थवश से प्रसङ्गतः प्राप्त नाना प्रकार के रस की सम्भूति जहां हो सकती है। यहाँ यह कहा कि प्रारम्भिक अवस्था के उपयोगी विचित्र आस्वाद वाला जितना भी अर्थसमूह प्रसक्तानुप्रसक्ति से आ जाता है उतना अर्थ समूह मुख सन्धि है। उसको कहने वाला अंश रूपक का एक देश होता है। जैसे रत्नावली में प्रथम अङ्क

काव्ये शरीरानुगता तन्मुखं परिकीर्तितम् ॥ ३९ ॥

बीजस्योद्घाटनं यत्र दृष्टनष्टमिव क्वचित् ।

अभिनवभारती

रत्नावल्यां प्रथमोऽङ्कः, तथा हि, अमात्यस्य वीरो, वत्सराजस्य शृङ्गाराद्भुतौ ततः शृङ्गार इति इयानयं सागरिकायाया राजदर्शनेऽमात्यप्रारम्भविषयीकृतेऽर्थराशिरुपयोगीति मुखसन्धिः । एवं प्रतिसन्धि वक्तव्यम् ॥३९॥

बीजस्योद्घाटनं यत्रेति । कार्यतया दृष्टं कारणतया नष्टमिति केचित्, उपादेये दृष्टं हेये नष्टमित्यन्ये, नायकेतिवृत्ते दृष्टं प्रतिनायकेतिवृत्ते नष्टमित्यपरे । न चैतत्समञ्जसम्, एकविषयमन्तरेण सन्धानायोगात्, नाशस्यापि च हेयादिविषयस्य प्रारम्भवशेन दृष्टतयैव संग्रहसंपत्तेः । तस्मादयमत्रार्थः – बीजस्योद्घाटनं तावत् फलानुगुणो दशाविशेषः तद् दृष्टमपि विरोधिसंनिधेर्नष्टमिव, पांसुना पिहितस्येव बीजस्याङ्कुररूपमुद्घाटनम् । यथा वेणीसंहारे कञ्चुकिवचनम्—

बालक्रीड़ा

(मूल) जहां बीज की उत्पत्ति नाना अर्थों से प्रयोजनों से अनुस्यूत रसों का उद्भव करने वाली होकर इतिवृत्त के अनुगत होती है उसे मुख सन्धि कहते हैं ॥३९॥

है । इसमें रसौ का विचित्र आस्वाद जैसे--अमात्य में वीररस है बत्सराज में पहले शृङ्गार एवं अद्भुत है पश्चात् भी शृङ्गार है । यहां अमात्य की प्रारम्भिक क्रियाओं के द्वारा सागरिका को राजा के दर्शन की प्राप्ति में इतना अर्थराशि उपयोगी है अतः यह मुख सन्धि है । इसी प्रकार प्रतिमुख सन्धि को समझें ॥३९॥

यहाँ बीज का उद्घाटन होता है । बीज के उद्घाटन का आशय कोई ऐसा बतलाते हैं कि कार्यरूप में दिखाई पड़ता है अतः दृष्ट है किन्तु कारण रूप में नहीं दिखाई पड़ता है अतः अदृष्ट है । अन्य लोग कहते हैं उपादेय अंश में दृष्ट है और हेय अंश में अदृष्ट है । अपर लोनों का मत है कि नायक के इतिवृत्त में दृष्ट है किन्तु प्रतिनायक के इतिवृत्त में कथाभाग में अदृष्ट है । अभिनवगुप्ताचार्य कहते हैं कि यह समञ्जस नही है युक्तियुक्त नही है । क्योंकि किसी विषय को आधार बनाये विना अनुसन्धान नही हो सकता है अनुसन्धान विषय का ही होता है अतः हेयादिविषयक नाश भी प्रारम्भिक अवस्था के रूप में दृष्ट ही का होता है फलतः नाश में भी दृष्टरूप से ही पदार्थ का संग्रह प्राप्त है । इस लिए यहां यह अर्थ है—बीज का उद्घाटन माने फल के अनुकूल दशाविशेष । वह दशा विशेष दिखाई दिया हुआ भी विरोधी की सन्निधि में नष्टप्राय हो जाता है । फलतः उद्घाटन पदार्थ है जैसे धूलि में छिपे हुए बीज का अङ्कुर के रूप में उद्घाटन । जैसे वेणीसंहार में कञ्चुकी का वाक्य है—

अभिनवभारती

आशस्त्रग्रहणादकुण्ठपरशोस्तस्यापि जेता मुने-
स्तापायास्य न पाण्डुसूनुभिरयं भीष्मः शरैः शायितः ।
प्रौढानेकधनुर्धरारिविजयश्रान्तस्य चैकाकिनो
बालस्यायमरातिलूनधनुषः प्रीतोऽभिमन्योर्वधात् ।। (अ २-२)

अत्र पाण्डवाभ्युदयस्य मुखोपक्षिप्तस्योद्घाटनं भीष्मवधाद् दृष्टमभिमन्युवधान्नष्टम् । अत्रापि वेदितमिति केचित् । तदा चार्थो न संगमितः स्यात् । दृष्टतैव प्रतिमुख उपयोगिनी, नष्टता त्ववमर्शं एवेति केचिदुत्तरोत्तरविकासतारतम्यं दृष्टनष्टत्व-माहुः । पूर्वावस्था हि दृष्टाप्युत्तरदृष्टविकासापेक्षया नष्टा । एवं संमृष्टोपमविकास उत्तरापेक्षयेति मन्यते, अत्रापीवार्थो न संगच्छत एव, न कार्यजननं शक्त्या ।

तस्मादयमत्रार्थः – दृष्टं नष्टमिव कृत्वा तावन्मुखे न्यस्तं भूमाविव वीजं, अमात्येन सागरिकाचेष्टितं वसन्तोत्सवकामदेवपूजादिना तिरोहितं नष्टमिव । सागरि-काचेष्टितस्य हि बीजस्येव तदाच्छादकमुत्सवादिरूपं भूमिरिव प्रत्युद्बोधकम् । तस्य दृष्टनष्टतुल्यं सर्वत्रैव कथाभागसमूहे तत्प्रतिमुखं, प्रतिराभिमुख्येन यतोऽत्र वृत्तः । पराङ्मुखता हि दृष्टनष्टकल्पनानिदर्शनम् । रत्नावल्यां—परप्पेसत्तण-

बालक्रीड़ा

आशस्त्र । जब से शस्त्र ग्रहण किया है तब से आज तक जिसका परशु कभी भी किसी के द्वारा भी कुण्ठित नही हुआ है उस परशुराम मुनि को भी जीतने वाले भीष्म को इन पाण्डु के छोकरों ने वाणों के द्वारा मार कर युद्ध में सुता दिया । अहो महान् खेद का विषय है कि यह भीष्म का सुला देना जिस राजा दुर्योधन के ताप का हेतु नहीं हुआ वह दुर्योधन आज अभिमन्यु के वध से प्रसन्न हो रहा है । जो अभिमन्यु प्रौढ अनेक धनुर्धारियों को जीत कर के थका हुआ था । जो एकाकी था बालक था उस पर भी शत्रुओं के द्वारा धनुष के काट देने से जो धनुष से रहित था ।

यहां मुख सन्धि में उपक्षिप्त पाण्डुओं का अभ्युदय भीष्म के वध से दृष्ट है किन्तु अभिमन्यु के वध से अदृष्ट हो गया है । कोई कहते हैं कि कुछ भी हो किन्तु मुखसन्धि में उपक्षिप्त अर्थ की जानकारी तो यहां हुई । अन्य लोग कहते हैं कि जानकारी होने से भी क्या हुआ अर्थ सङ्गत तो नही हुआ । क्योंकि प्रतिमुख सन्धि में अर्थ की दृष्टता ही अपेक्षित है नष्टता तो अवमर्श में होती है । कोई तो कहते हैं कि उत्तरोत्तर विकाश में जो तारतम्य है कभी वेशी है वही दृष्ट नष्ट पदार्थ है । पूर्वावस्था दिखाई पड़ी यद्यपि तद्यपि उत्तर विकाश की अपेक्षा से नष्ट ही है । इस तरह उत्तर विकाश की अपेक्षा से ,य काश सम्मृष्ट जैसा है धुल गया जैसा है । यहां दृष्ट नष्टमिव में उक्त इव शब्द का अर्थ सङ्गत नही होता है और न शक्ति के द्वारा कार्य को पैदा करता है ।

मुखन्यस्तस्य सर्वत्र तद्वै प्रतिमुखं स्मृतम् ।। ४० ।।
उद्भेदस्तस्य बीजस्य प्राप्तिरप्राप्तिरेव वा ।

अभिनवभारती

दूसिदं वि मे शरीरं एदस्स दंसणेण अज्ज बहुमदं संपण्णम् (परप्रेष्यत्वदूषितमिव मे शरीरमेतस्य दर्शनेनाद्य बहुमतं सम्पन्नम्) इत्यादिसागरिकोक्तेः प्रथमाङ्कगतायाः सुसङ्गतारचितराजसमागमपर्यन्तं काव्यं द्वितीयाङ्कगतं प्रतिमुख सन्धिः । उद्घाटितत्वाद् बीजस्यस्तोकमात्रं तु शङ्कुकादिभिरुदाहृतं यत्तदेकदेश-लक्षणमिति द्रष्टव्यम् ।। ४० ।।

उद्भेद इति । तस्येति उत्पत्युद्घाटनदशाद्वयाविष्टस्य बीजस्य यत्रोद्भेदः फल-जननाभिमुख्यत्वं स गर्भः । उद्भेदमेव विवृणोति प्राप्तिरित्यादिना । प्राप्तिर्नायक-विषया, अप्राप्तिः प्रतिनायकचरिते पुनश्चान्वेषणमित्युभयसाधारणम् । अन्ये तु

बालक्रीड़ा

(मूल) पहले कहीं पर दिखाई पड़ा परन्तु फिर नष्ट हो गया ऐसे मुखसन्धि में उपन्यस्त बीज का जहां उद्घाटन होता है उसे प्रतिमुख सन्धि मानते हैं ।।४०।।

इस लिए यहां यह अर्थ है कि जैसे भूमि में रख देने से बीज दृष्ट हुआ भी नष्ट जैसा है वैसे मुख सन्धि में रखा हुआ अर्थ राशि प्रतिमुंख सन्धि में नष्ट कहा जाता है। अमात्य ने सागरिका की चेष्टाओं को कसन्तोत्सव एवं कामदेव के पूजन आदि से निरोहित कर दिया अतः नष्ट की तरह वे प्रतीत हुई। किन्तु जैसे जैसे भूमि बीज की आच्छादक होती हुई भी प्रत्युद्बोधक होती है उसी तरह उत्सव पूजन आदि सागरिका की चेष्टाओं के आच्छादक होते हुए भी उद्बोधक ही हैं। इस लिए सर्वत्र कथाभाग समूह में बीज के दीखने और छिपने के तुल्य प्रतिमुख सन्धि है। क्योंकि यहां प्रति माने आभिमुख्येन इतिवृत्त की वृत्ति है स्थिति है। पराङ् मुखता दृष्ट नष्ट कल्पना में निदर्शन है।

रत्नावली में—दूसरे की चाकरी करने से जिस शरीर को मैं तुच्छ समझती थी वह शरीर आज मेरे लिए बहु सम्मान्य हो गया है। इत्यादि प्रथमाङ्कगत सागरिका के कथन से आरम्भ करके सुसङ्गता के द्वारा कराये गये वत्सराज के समागम पर्यन्त द्वितीयाङ्कगत काव्य प्रतिमुख सन्धि है। क्योंकि इसमें बीज का उद्घाटन है। और जो तो अङ्कुरादि के द्वारा थोडा सा बतलाया गया है वह उसका एक देशीय लक्षण है ऐसा समझना चाहिए ।।४०।।

उद्भेद। उत्पत्ति और उद्घाटन इन दो दशाओं से आविष्ट बीज का जहां उद्भेद होता है यानी फल को पैदा करने की अनुकूलता होती है वह गर्भ सन्धि है। प्राप्ति इत्यादि के द्वारा उद्भेद का ही विवरण करते हैं। नायक के विषय में प्राप्ति

अभिनवभारती

वीररौद्रविषय एवैतस्यार्थस्य भावादव्यापित्वादेवमाहुः । प्राप्तिः, अप्राप्तिः, अन्वेषग मित्येवं भूताभिरवस्थाभिः पुनः पुनर्भवन्तीभिर्युक्तो गर्भसन्धिः, प्राप्तिसम्भवाख्य-यावस्थया युक्तत्वेन फलस्य गर्भीभावात् । तथा हि—रत्नावल्यां द्वितोयेऽङ्के सुसङ्गता—अदक्खिणा दाणि तुमं, जा एव्वं भट्टिणा हत्थेण गहीदा वि कोव ण मुंचेसि (अदक्षिणा इदानीं त्वं या एवं भर्त्रा हस्तेन गृहीतापि कोपं न मुञ्चसि) इत्यादौ प्राप्तिः । पुनर्वासवदत्ताप्रवेशेऽप्राप्तिस्तृतीयेऽङ्के । तद्वृत्तान्तान्वेषणाय गतश्चिरयति वसन्तकः" इत्यन्वेषणम् । विदूषकः--ही ही भोः कोसंबीरज्जलंभेगावि ण तारिसो पिअवअस्सस्स परितोसो । जारिसो मम सआसादो पिअवअणं सुणिअ भविस्सदि" अहो हा कोशाम्बीराज्यलाभेनापि न तादृशः प्रियवयस्यस्य परितोषो यादृशो मत्सकासत् प्रियवचनं श्रुत्वा भविष्यति इत्यादौ प्राप्तिः । पुनः "इह तदप्यस्त्येव बिम्बाधरे" इति । विदूषकस्य--"भो वयस्य, किं अवरं" इत्यत्र वासवदत्ताप्रत्यभिज्ञानादप्राप्तिः । पुनः सागरिकायाः सङ्केतस्थानागमने अन्वेषणम् ।

बालक्रीड़ा

है और प्रतिनायक के चरित में अप्राप्ति है । फिर अन्वेषण है । यह उभय साधारण है । अन्य लोग तो कहते हैं कि वीर एवं रौद्र रस के विषय में ही इस अर्थ की सत्ता है । प्रश्न-ऐसा क्यों कहते है । उत्तर । ऐसा कहने का आशय है कि यह अर्थ अव्यापी है । कभी प्राप्ति कभी अप्राप्ति और पुनः अन्वेषण इस प्रकार की पुनः पुनः होने वाली अवस्थाओं से युक्त गर्भ सन्धि है । प्राप्ति सम्भव नामक अवस्था से युक्त होने के कारण फल का गर्भीभाव इस में होता है । जैसे—रत्नावली में द्वितीय अङ्क में सुसङ्गता कहती है कि हे सागरिके ! इस समय तुम अदक्षिण हो गई हो प्रतिकूल हो गई हो जो भर्त्ता के द्वारा स्वयं अपने हाथ से गृहीत होने पर भी कोप को नही छोड़ रही हो । इत्यादि में प्राप्ति अवस्था है । पुनः तृतीय अङ्क में वासवदत्ता के प्रवेश के समय में अप्राप्ति है । उसके वृत्तान्त का अन्वेषण करने के लिए गया वसन्तक देरी कर रहा है । यह अन्वेषण है ।

विदूषक कहता है अहा हा कौशाम्बी के राज्य के मिलने पर भी प्रियवयस्य को उतना परितोष नही होगा जितना कि मुझ से प्रिय वचन को सुनकर होगा । इत्यादि में प्राप्ति है ।

पुनः— किं पद्मस्य रुचिं न हन्ति, नयनानन्दं विधत्ते न किं
वृद्धिं वा झषकेतनस्य कुरुते नालोकमात्रेण किम् ।
वक्त्रेन्दौ तव सत्ययं यदपरः शीतांशुरुज्जृम्भते,
दर्पः स्यादमृतेन चेदिह तदप्यस्त्येव बिम्बाधरे ।

पुनश्चान्वेषणं यत्र स गर्भ इति संज्ञितः ॥ ४१ ॥
गर्भनिर्भिन्नबीजार्थो विलोभनकृतोऽथवा ।

अभिनवभारती

पुनर्लतापाशकरणे प्राप्तिरित्येवं गर्भः । अप्राप्त्यंशश्चात्रावश्यंभावी, अन्यथा हि सम्भावनात्मा प्राप्तिसम्भवः कथं, निश्चय एव हि स्यात् । अवमर्शे तु प्राप्तेरेव प्रधानता प्राप्त्यंशस्य च न्यूनतेति विशेषः ॥ ४१ ॥

गर्भनिर्भिन्नबीजार्थ इति । केचिद्विमर्श इति पठन्ति, अन्येऽवमर्श इति, तत्र सन्देहात्मको विमर्शः । ननु पूर्वः सम्भावनाप्रत्ययः, ततः संशय इति नेदमुचिम्, संशयनिर्णयान्तरालवर्तिनं हि तर्कं तार्किका प्राहुः । किं च विमर्शसन्धिर्नियत-फलप्राप्त्यवस्थया व्याप्तः, तच्च नियतत्वं सन्देहश्चेति किमेतत् । अत्राहुः—तर्कान्तरमपि हेत्वन्तरवशाद् बाधच्छलरूपतापराकरणे संशयो भवेत्, किं न भवति ।

बालक्रीड़ा

(मूल) जहां मुखसन्धि में उपन्यस्त बीज का उद्भेद होवे उसकी गर्भसन्धि यह संज्ञा है । इसमें कभी फल की प्राप्ति होती है और कभी नहीं । अतः उसका पुनः अन्वेषण करना होता है ॥४१॥

हे प्रिये सागरिके ! तुम्हारे मुख चन्द्र के रहते हुए यह जो अपर शीतांसु उज्जृम्भण कर रहा है यह क्या बात है । क्या तुम्हारा यह मुखचन्द्र पद्म की कान्ति को फीका नही कर देता है ? या नयनों को आनन्द नही देता है क्या ? या देखने ही मात्र से काम को उत्तेजित नहीं कर देता है क्या ? अगर कहो कि इस शीतांशु को अमृत का दर्प है तो वह भी बिम्बाधर में है ही । इत्यादि ।

विदूषक के द्वारा भोः वयस्य ! और क्या हो सकता है' इस में वासवदत्ता को पहिचान लेने से सागरिका की अप्राप्ति है । पुनः सागरिका का संकेत स्थान में नही आने पर अन्वेषण है । पुनः लता की फांसी बनाकर लटकने के समय में सागरिका की प्राप्ति होती है इस प्रकार यह गर्भ सन्धि है । गर्भ सन्धि में अप्राप्त्यंश अवश्यं भावी है यदि अप्राप्त्यंश नही होगा तो सम्भावना स्वरूप प्राप्ति सम्भव कैसे हो सकता है निश्चय ही होगा । प्रश्न—यदि इसमें अप्राप्ति रूप अंश भी रहेगा तो गर्भ का और अवमर्श का परस्पर में भेद क्या होगा । उत्तर देते हैं कि गर्भ में सम्भावना मात्र प्राप्ति की रहती है अतः अप्राप्ति की प्रधानता है और प्राप्त्यंश न्यून है । और अवमर्श में तो प्राप्ति की प्रधानता है और अप्राप्ति रूप अंश की न्यूनता है । यही विशेष है यही इन दोनों में भेद है ॥४१॥

गर्भनिर्भिन्नबीजार्थः । यहां कोई विमर्शः ऐसा पढते हैं दूसरे लोग अवमर्शः ऐसा पढते हैं । किन्तु यहां सन्देहात्मा विमर्श ही है । प्रश्न-जब पहले सम्भावना का प्रत्यय हो गया तब फिर सन्देह कैसा । यह तो उचित नही है । क्योंकि तार्किक लोग

क्रोधव्यसनजो वापि स विमर्श इति स्मृतः ॥ ४२ ॥

अभिनवभारती

इहापि च निमित्तबलात्कुतश्चित्संभावितमपि फलं यदा बलवता प्रत्यूह्यते। कारणानि च बलवन्ति भवन्ति तदा जनकविघातकयोस्तुल्यबलत्वात् कथं न सन्देहः। तुल्यबलविरोधविधीयमानवैधुर्यव्याधूननसन्धीयमानस्फारफलावलोकनायां च पुरुषकारः सुतरामुद्धुरकन्धरीभवतीति तर्कानन्तरमत्र संशयः ततो निर्णय इत्येतदेवोचिततरम्। तथा हि--पुरुषकारशालिन एव श्लाघ्यन्ते, अद्भुतमद्भुतं प्राणसंदेहादप्यनेनात्मा समुत्तारितो यत्र संभावनाविनाभवति, अत एवात्र प्रयत्नस्ततो विधुरप्रयत्नस्ततो य उपनिपातः, तत एव पुरुषकारोद्यतः नाशमपि भजन् विजिगीषागर्भत्वेन पुनः प्रोद्यमं भजतीति तदाशयेन नियता फलप्राप्तिरुच्यते। श्रेयांसि बहुविघ्नानीति पश्यता तदत्र मया विघ्नापसारणं कर्तव्यमिति साभिमानः स्वमुद्योगसूत्रं सहस्रगुणीकुरुते, तथा हि सागरिकाबन्धनेऽपि महामात्यप्रयुक्तमैन्द्रजालिकवृत्तं सुनिपुणमुपनिबद्धं तावत्।

बालक्रीड़ा

(मूल) गर्भ सन्धि में उद्भिन्न बीज रूपी अर्थ के विलोभन के कारण अथवा क्रोध के व्यसन पौनःपुन्य के बदौलत जो विमर्श होता है वही विमर्श सन्धि मानी गई है ।।४२।।

संशय और निर्णय के अन्तरालवर्त्ती को तर्क कहते हैं। किं च एक बात और भी है कि विमर्शसन्धि नियत फलप्राप्ति रूप अवस्था से व्याप्त रहती है अतः नियतत्व भी रहे और सन्देह भी रहै यह क्या ? इस पर उत्तर देते हैं कि तर्क के बाद भी अन्य हेतुओं के कारण होने वाले बाध और छल के पराकरण में संशय हो सकता है कि यह क्यों नही होता है। या क्यों नहीं हो रहा है। यहां किसी निमित्त के बदौलत सम्भावित हुआ भी फल जब किसी बलवान् विघ्न के कारण विरुद्ध ऊहा का विषय अवश्य बन जाता है या हो जाता है किन्तु उत्पादक कारण भी बलवान् है तब उत्पादक एवं विघातक दोनों की तुल्यबलवत्ता के होने पर सन्देह क्यों नही होगा अवश्य ही होगा।

तुल्यबलशाली। विरोधियों के द्वारा विधीयमान विघ्न के हटाने और सन्धीयमान विशाल फल के मिलने में उद्योगी का सामर्थ्य अवश्य ही समुत्कृष्ट होता है उद्धुर कन्धरी होता है अतः तर्क के बाद संशय और फिर निर्णय यही उचिततर है। पुरुषकारशाली समर्थों की श्लाघा की जाती है कि आश्चर्य है आश्चर्य है कि प्राणों की सन्देहावस्था से भी इसने अपने आप को उबार लिया इस तरह जहां सम्भावना का अविनाभाव है निश्चितता है और इसी लिए यहां प्रयत्न करता है विधुरता होती है फिर प्रयत्न करता है फिर जो उपनिपात होता है इसी से पुरुषकार करने में उद्यत पुरुष नाश को प्राप्त करता हुआ भी विजिगीषु होने के कारण पुनः प्रकृष्ट उद्यम

अभिनवभारती

अन्ये त्ववमर्शो विघ्न इति विदन्ति । तस्य व्याख्यानं बीजशब्देन, तद्बीजफलं, अर्थशब्देन निवृत्तिरुच्यते । तेन गर्भनिर्भिन्नप्रदर्शितमुखं यद्बीजफलं तस्य योऽर्थो निवृत्तिः पुनस्तत्रैव संपादनं निष्प्रत्यूहप्राणतया फलप्रसूतिः, तच्छब्देन यत्रेत्याक्षिप्तम्, सा च निवृत्तिः क्रोधेन च निमित्तेन लोभेन वा व्यसनेन शापादिना वा । अपिशब्दाद् विघ्ननिमित्तान्तराणां प्रतिपदमशक्यनिर्देशानां संग्रहः । स च देव्या वासवदत्तया सागरिकायाः कारानिक्षेपात्प्रभृति येयं तुरीयेऽङ्के राज्ञ उक्तिः--

कण्ठाश्लेषं समासाद्य तस्याः प्रभ्रष्टयानया ।
तुल्यावस्था सखीवेयं तनुराश्वास्यते मम ॥

अत्र विघ्ने वासवदत्ताक्रोधो निमित्तम् । लोभस्तु निमित्तं, तथा तापसवत्सराजे— 'त्वत्संप्राप्तिविलोभितेन सचिवैः प्राणा मया धारिताः' इति । तदपरे न सहन्ते-न ह्यत्र वासवदत्ताप्राप्तिलोभः प्रकृते फले विघ्नकारीति, इदं तदोदाहरणं-तत्रैव परिणीता-यामपि पद्मावत्यां वासवदत्तामलभमानस्य राज्ञो मरणाध्यवसायो, मुमूर्षोः तदलाभे मन्त्रिणां सुतरां राज्यप्राप्तिदीर्घलोभो निमित्तमिति ।

बालक्रीड़ा

करता है इस लिए वहां फल की प्राप्ति को नियत कहते हैं । क्योंकि उत्तम कार्यों में बहुत विघ्न होते हैं ऐसा समझकर मुझे यहां विघ्नों का अपसारण अवश्य करना है इस अभिमान से वह अपने उद्योग सूत्र को हजार गुणा करता है । जैसे-सागरिका को बन्धन सूत्र में बांधने में भी महामात्य ने ऐन्द्रजालिक के वृत्तान्त को बड़ी बुद्धिमानी के साथ उपनिबद्ध किया ।

अन्य लोग तो अवमर्श माने विघ्न होता है ऐसा समझते हैं । उसकी व्याख्या करने के समय में बीज शब्द से बीज का फल कहते हैं और अर्थ शब्द से उसकी निवृत्ति को कहते हैं । इस लिए जो गर्भ में निर्भिन्न है प्रगट है अतः आरम्भ में दिखलाई पडा है ऐसा जो बीज का फल है उसका जो अर्थ माने निवृत्ति है । अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु इस कोष के अनुसार अर्थ शब्द का निवृत्ति अर्थ है । इसके बाद उस निवृत्त बीज फल का पुनः वही पर सम्पादन अर्थात् निर्विघ्न प्रसव । यत्तदोः नित्य सम्बन्धः के अनुसार यहां तच्छब्द से यत्र शब्द का आक्षेप कर लिया है । वह निवृत्ति भी कहीं पर क्रोध के कारण कहीं पर लोभ के कहीं पर व्यसन के कहीं पर शापादि के द्वारा हो जाती है । अपि शब्द से विघ्न के भिन्न २ कारणों का संग्रह है जिनमें प्रत्येक का निर्देश करना अशक्य है ।

देवी वासवदत्ता के द्वारा जो सागरिका का कारागार में निक्षेप है वहां से आरम्भ करके यह जो वासवदत्ता के विषय में चतुर्थ अङ्क में राजा की उक्ति है कि—

अभिनवभारती

तच्च व्यसनं त्ववमर्शनिमितमिति अभिज्ञानशाकुन्तले दर्शितम् । एवमन्यदुत्प्रेक्ष्यम् । तथा हि-सपत्न्यां विद्याप्रभावो निमित्तमवमर्शे, क्वचिद्दैवं, क्वचित्समयः-यथा विक्रमोर्वश्यां पुत्रवदनावलोकनादूर्वश्याः स्वर्गगमनाध्यवसायः ।

बालक्रीड़ा

उसके कण्ठ का आलिङ्गन करके प्रभ्रष्ट होने वाली यह तुल्य अवस्था से युक्त सखी की तरह मेरे शरीर का आश्वासन करती है ।

यहां होने वाले विघ्न में वासवदत्ता का क्रोध निमित्त है । लोभ भी निमित्त होता है-जैसे तापस वत्सराज में सचिवों के द्वारा तुम्हारी प्राप्ति के बारे में लुभाये गये मैंने बड़े कष्ट से प्राणों को धारण किया है ऐसा समझकर इस तुच्छ शरीर को छोड़ते हुए मुझे कुछ भी स्नेह नही है । यहां शरीरक में कुत्सिते सूत्र से कुत्सित अर्थ में कन् प्रत्यय हुआ है । अतः तुच्छ कुत्सित शरीर है तुम्हारा अनुगमन करने का यह अवसर है तब भी धृति हो गई है । किन्तु इतना खेद है कि उस दारुण क्षण में भी इस हृदय के शत शत टुकड़े नहीं हो गये । श्लोक यह है---

त्वत्सम्प्राप्तिविलोभितेन सचिवैः प्राणा मया धारिताः
तन्मत्वा त्यजतः शरीरकमिदं नैवास्ति निस्स्नेहता ।
आसन्नोऽवसरस्तवानुगमने जाता धृतिः किं त्वियान्
खेदो यच्छतधा गतं न हृदयं तस्मिन् क्षणे दारुणे ।

विलोभन कृतोऽथवा के द्वारा कहा कि लोभ भी अवमर्श का निमित्त होता है किन्तु इसका अपर लोग सहन नही करते हैं । वे कहते हैं कि वासबदत्ता के मिल जाने का लोभ प्रकृत में विघ्नकारी नही है । यदि यह विघ्नकारी होता तब उदाहरण होता वहीं पर पद्मावती के साथ विवाह कर लेने पर भी जब वासवदत्ता राजा को नही मिलती है तब राजा वत्सराज का मरने के लिए अध्यवसाय होता है जब वासवदत्ता के अलाभ में राजा मुमूर्षु हो जाता है तब उस अवस्था में मन्त्रियों के लिए राजा के दीर्घ जीवन के विषय में राज्य की प्राप्ति के लोभ का निमित्त होना ठीक ही है ।

व्यसन भी अवमर्श का निमित्त होता है इसको अभिज्ञान शाकुन्तल में दिखा दिया है इस प्रकार अन्य निमित्तों को भी उत्प्रेक्षा कर लेनी चाहिए । जैसे—सपत्नी में विद्या का प्रभाव अवमर्श का निमित्त है कहीं पर दैव अवमर्श में निमित्त है और कहीं पर समय । जैसे विक्रमोर्वशी में पुत्र के मुख के अवलोकन से ऊर्वशी का स्वर्ग के प्रति गमन का अध्यवसाय अवमर्श में निमित्त है ।

अभिनवभारती

अन्ये त्वावृत्तिं विमर्शशब्दस्य कल्पयन्त इत्थं व्याचक्षते-गर्भान्निर्भिन्नं बीजार्थफलं यस्मिन्, विमर्शादिकारणत्वाद् विमर्शरूपे कथावयवे स विमर्शो नामेति । अत्र व्याख्याने मुख्यमस्य सन्धेर्यद्रूपं विदूरकारणसंपातात्मकत्वं नाम तदस्पृष्टमेव स्यात् ।

अन्ये तु लाभयोग्यत्वं, नाशावस्था, अन्वेषणावस्था च यथारुचि गर्भे निबन्धनीया, तत्र यदा लाभात्मिका प्राप्त्यवस्था प्रतिमुखे नैव बध्यते तदान्ये द्वे गर्भे सन्धौ, यदाप्यवमर्शे नाशावस्था तदा गर्भेऽन्वेषणमेव, गर्भे यदा नाशान्वेषणे तदा चावमर्शे विचारो निबन्धनीयः । कथं मया प्राप्तप्रायमप्यपहारितं, किमत्र विगुणोपायानुष्ठानं मया कृतं, उत प्राप्तियोग्यमेवैतन्न भवतीति, यदाहोद्भटः- यासावन्वेषणभूमि त्रमृष्टिरवमर्श इति, तच्चेदं व्याख्यानं लक्ष्यविरुद्धं युक्त्या च पूर्वोदितप्रारम्भाद्यवस्थापञ्चकगतक्रमनियमसमर्थनप्रस्तावोक्त्या विरुद्धमित्यास्ताम् ।

"अहमनेन विफलायां क्रियायां विलोभ्य प्रवर्तित इति यत्र कर्ता विमृशति स विलोभनकृत इति, क्रोधव्यसनादेस्तु व्यापद्यमाने फलव्यापत्तिविषयो यः कर्तु-

बालक्रीड़ा

अन्य लोग तो अवमर्श शब्द के आवृत्ति की कल्पना करते हैं और व्याख्या करते हैं कि जहां बीजार्थ एवं फल गर्भ सन्धि से निर्भिन्न हो गये हैं प्रगट हो गये हैं । विमर्श रूप कथावयव में विमर्श कारण है अतः यह विमर्श है । इस व्याख्यान में इस सन्धि का मुख्य जो रूप विदूर कारणों का सम्पात वह अस्पृष्ट ही रह जाता है ।

अन्य तो कहते हैं कि लाभ की योग्यता, नाश की अवस्था एवं अन्वेषणावस्था इनको अपनी इच्छा के अनुसार गर्भसन्धि में निबन्धन करना चाहिए । उनमें से जब लाभात्मक प्राप्त्यवस्था का प्रतिमुख सन्धि में ही निबन्धन कर देते हैं तब अन्य दो का गर्भ सन्धि में निबन्धन करें । जब अवमर्श में नाशावस्था का निबन्धन करते हैं तब गर्भ में अन्वेषण का करना चाहिए । और जब गर्भ में अन्वेषण का तब अवमर्श में विचार का निबन्धन करना उचित है ।

विचार का स्वरूप दिखलाते हैं क्यों या कैसे मैंने मिले हुए पदार्थों को छोड़ दिया । यहां मैंने किस विरुद्ध उपाय का अनुष्ठान किया जिससे मिला हुआ पदार्थ हाथ से निकल गया । अथवा यह मिलने के योग्य नही था या नही है । इत्यादि । जैसा कि उद्भट ने कहा कि यह जो अन्वेषण की भूमि अवमृष्टि है वह अवमर्श है । किन्तु यह व्याख्यान पहले कही हुई प्रारम्भादि पांच अवस्थाओं के क्रम विषयक नियम के समर्थन के लिए किये गये प्रस्ताव को बतलाने वाली युक्ति के विरुद्ध है अतः रहने दिया जाय ।

इसने मुझे लोभ दिखाकर लालच देकर व्यर्थ के काम में फँसा दिया इस प्रकार जहां काम को करने वाला व्यक्ति विमर्श करता है वह अवमर्श विलोभन कृत है ।

समानयनमर्थानां मुखाद्यानां (सबीजिनाम्) ।
नानाभावोत्तराणाञ्च (फलोपसङ्गतानाञ्च) भवेन्निर्वहणं तु तत् ।।४३।।

अभिनवभारती

विचारः स क्रोधव्यसनजो विममर्श इत्येवं विमर्शनस्वभाव एव विमर्शः, कार्यविनिपातस्तूत्तरनिर्वहणसन्धिनिबध्यमानाद्भुतरसपरिपोषकत्वेन निबध्यते" इति श्रीशङ्कुकः । तन्मते विचारस्य सर्वसन्ध्यनुयायित्वात् पृथग्विमर्शसत्त्वेनाभिधानं स्यात् ।

व्यापत्तिविषयो विचार इति केचित् । पुनरप्यस्य सरणिरेव; सा च न व्याख्यानेन क्रमेण दर्शिता । विलोभनकृतोदाहरणं तु न व्यापत्तिविमर्श इति सर्वं त्वसमञ्जसं यथारुचि परिकल्पितमित्यलमनेन ।।४२।।

समानयनमिति । मुखाद्यानां चतुर्णां सन्धीनां येऽर्थाः प्राम्भाद्याः, तेषां सहबीजिभिः बीजविकारैःक्रमेणावस्थाचतुष्टयेन भवद्भिः उत्पत्त्युद्घाटनोद्भेदगर्भनिर्भेदलक्षणैः वर्तमानानां नानाविधैः सुखदुःखात्मकैः हासशोकक्रोधादिभिर्भावैं-

बालक्रीड़ा

(मूल) मुखादि सन्धियों में आद्य प्रधानरूप से उपन्यस्त बीजसहित अर्थो का जो फल संगति से समानयन है तथा जहाँ नाना भावों का कारणों का औत्तर्य है परम्परा है वह निर्वहण सन्धि है । यहाँ उत्तराणां यह भावप्रधान निर्देश है ।।४३।।

क्रोध एवं व्यसन आदि से व्यापन्न होने वाले फल की व्यापत्ति का विषय जो कर्त्ता का विचार है वह क्रोध से होने वाला एवं व्यसन से होने वाला विमर्श है इस प्रकार विमर्शन स्वभाव वाला ही अवमर्श है । क्रोध से या व्यसन से होने वाले कार्य का विनिपात तो निर्वहण सन्धि में निबध्यमान अद्भुत रस के परिपोषक के रूप से निवद्ध किया जाता है ऐसा श्रीशङ्कुक कहते हैं । इनके मत में विचार सभी सन्धियों में अनुगत है अतः विमर्श की सत्ता को पृथक् से कहना चाहिए या विमर्श की सत्ता का पृथक् से अभिधान होना चाहिए । कोई कहते हैं कि विचार व्यापत्ति के विषय में होता है । ठीक है ।

फिर भी इसकी एक सरणि है हं पद्धति होती ही है । उसका क्रमशः व्याख्यान दिखाना चाहिए था किन्तु दिखाया नही है । विलोभन कृत उदाहरण तो व्यापत्ति विषयक विमर्श स्वरूप ही है । इस तरह यह सब कुछ असमञ्जस है मनमाना परिकल्पन है । इसलिए बस किया जाय या बस करते हैं ।।४२।।

समानयनम् । मुखादि चार सन्धियों में आप्त उपात्त जो बीजादि अर्थ हैं उनका जो समानयन हैं यानी जिस अर्थ राशि के रूप में समानयन करते हैं फल की निष्पत्ति के विषय में योजना करते है वह फलयोग की अवस्था से व्याप्त निर्वहण सन्धि है । वे समानयनीय अर्थ कैसे हैं उनको दिखलाते हैं कि प्रारम्भादि चार अवस्थाओं से

अभिनवभारती

रुत्तराणां चमत्कारास्पदत्वे जातोत्कर्षाणां यत्समानयनं, यस्मिन्नर्थराशौ समानीयन्ते फलनिष्पत्तौ योज्यन्ते तन्निर्वहणं फलयोगावस्थया व्याप्तम्। अत्र केचिदमून् सर्वान् सन्धीनवस्थापञ्चकनिर्वहणे पृथग्वृत्त्या योज्यमानानिच्छन्ति।

अन्ये तु सन्धौ सन्ध्यन्तरानुप्रवेशमिच्छन्तोऽपि प्रागवस्थाया एकोत्तरावस्थापरिणामात्मकत्वे कारणं न पश्यन्त्यपि तु ताः कार्यीभवन्तीति सांख्यदर्शनतच्छायाश्रयेणैकावस्थायाः फलसंबन्धसंगमनोपकरणभावप्राप्तं तदेकभावानामवस्थान्तराणां फलसंगमनमुचितमेवेति मन्यन्ते।

अन्ये तु मुखसन्धौ ये अवलम्ब्यमानतया आद्याः प्रधानभूता अर्थाः उपयास्ते महौजसः फलसंपत्तौ साधकाः तेषां फलसंगत्या समानयनमिति व्याचक्षते। "महौजसां फलोपसंगतानां च" इति पाठे—यदा च सुखप्राप्तेः फलवत्त्वं तदा रतिहासादिबाहुल्यं प्रारम्भादीनां, दुःखहानेस्तु फलत्वे क्रोधशोकादिदुःखात्मकभावाद् बाहुल्यं, उभयत्र स्वोचितव्याभिचारिसहितं

बालक्रीड़ा

क्रमशः होने वाले उत्पत्ति, उद्घाटन, उद्भेद एवं गर्भनिर्भेद रूप बीजियों के बीज विकारों के साथ वर्तमान तथा नानाविध सुख दुःखात्मक हास शोक क्रोधादि भावों से उत्तर अर्थात् चमत्कारी होने से उत्कृष्ट हैं कोई लोग चाहते हैं कि पाँचो अवस्थाओं से युक्त इन बीजादि सभी अर्थो की निर्वहण सन्धि में पृथक् २ वृत्ति से योजना की जानी चाहिये।

अन्य लोग तो एक सन्धि में दूसरी सन्धि का अनुप्रवेश चाहते हुए भी पहली अवस्था का एक के बाद होने वाली उत्तर अवस्था के परिणाम के कारण को नही देखते हैं अपि तु कार्य के रूप में आते हुए देखते हैं अतः सांख्य दर्शन की छाया का आश्रयण करके अवस्था का फल के साथ संगमन करने में उपकार भाव को प्राप्त उन एकभाववाली भिन्न-भिन्न अवस्थाओं का फल के साथ संगमन उचित ही है ऐसा मानते हैं।

अपर लोग तो महौजसां फलोपसंगतानां च ऐसा पाठ मानते हैं और व्याख्या करते हैं कि अवलम्ब्यमान होने से जो आद्य प्रधान भूत अर्थ उपाय हैं और महान् ओजस्वी हैं यानी फल सम्पत्ति में साधक हैं उनका फल के साथ संगति करके समानयन निर्वहण सन्धि है।

जब सुख प्राप्ति ही फल है तब रतिहासादि सुखात्मक भावों का बाहुल्य है। जब दुःख हानि फल है तब क्रोध शोकादि दुःखात्मक भावों का बाहुल्य है। जो दोनों में अपने २ अनुकूल व्यभिचारि भावों के सहित है। उदाहरण रत्नावली में ऐन्द्रजालिक के प्रवेश से लेकर समाप्ति पर्यन्त द्रष्टव्य है प्रारम्भादि अवस्थाओं से विशिष्ट इन

एते तु सन्धयो ज्ञेया नाटकस्य प्रयोक्तृभिः ।
तथा प्रकरणस्यापि शेषाणां च निवोधत ॥ ४४ ॥

डिमः समवकारश्च चतुःसन्धी प्रकीर्तितौ ।
न तयोरवमर्शस्तु कर्तव्यः कविभिः सदा ॥ ४५ ॥

अभिनवभारती

द्रष्टव्यम् । उदाहरणं रत्नावल्यामैन्द्रजालिकप्रवेशात्प्रभृत्यासमाप्तेः । एषामवस्था सन्ध्यादीनां नायकतदमात्यतत्परिवारनायकादिमुखेनापि नियोजनं न त्वेकमुखेनैवेति नियम इत्युक्तं पूर्वमेव ॥४३॥

एतेषां विनियोगं विभजति एते त्वित्यादिना "मुखनिर्वहणे तत्र कर्तव्ये कविभिः सदा" इत्यन्तेन । एतच्च पूर्वमेव निर्णीतार्थं 'एकलोपे चतुर्थस्येत्यादि (१६-२७) व्याख्यानावसरे ।

कस्मात्तौ (डिमसमवकारौ) चतुःसन्धी इत्याह न तयोरित्यादिना । तुर्हेतौ, यतस्तयोरवमर्शं निबद्धुमशक्यमिति । एवमुत्तरत्रापि हेतुग्रन्थान्तरत्वेनेदं योज्यम्, न तु लोपस्थानित्वेन, तस्यैको लोप इत्यादिना पूर्वमेवोक्तत्वात् ।

बालक्रीड़ा

(मूल) प्रयोक्ता लोग इनको नाटक तथा प्रकरण की सन्धियाँ समझें । शेष रूपकों की सन्धियों को मैं बतलाता हूं । उनको भी ससझें ॥४४॥

(मूल) डिम और समवकार चार सन्धियों वाले कहे हैं । उनमें अवमर्श सन्धि को कवि लोग कभी भी नहीं करें ॥४५॥

सन्ध्यादि का नियोजन नायक उसके अमात्य उसके परिवार एवं नायिकादि के द्वारा न कि किसी एक के द्वारा होता है यह नियम है ऐसा पूर्व में ही कह दिया है ॥ ४३ ॥

एते तु इत्यादि से इनके विनियोग का विभाजन करते हैं कि मुख सन्धि और निर्वहण सन्धि को कवि लोग अवश्य रूपकों एवं उपरूपकों में कहें । इसका निर्णय 'एकलोपे चतुर्थः' इत्यादि की व्याख्या करने के अवसर में पहले ही कह दिया है ॥४४॥

अब डिम और समकार को चार सन्धियों वाले क्यों करना चाहिए इसको न तयोरित्यादि से कहते हैं । यहाँ तु हेतु में है । क्योंकि इन रूपकों में अवमर्श सन्धि का निबन्धन करना अशक्य है ॥।४५॥

इसी प्रकार आगे भी हेतु के अर्थ में ही ग्रन्थान्तर की योजना करनी चाहिए । न कि लोपस्थानी के रूप में । इस अंश को पहले ही एक के लोप में चतुर्थ का लोप होता है इत्यादि से कह दिया है ॥४६॥४७॥४८॥

व्यायोगेहामृगौ चापि सदा कार्यौ त्रिसन्धिकौ ।
गर्भावमर्शौ न स्यातां तयोर्वृत्तिश्च कैशिकी ।। ४६ ।।

द्विसन्धि तु प्रहसनं वीथ्यङ्को भाण एव च ।
मुखनिर्वहणे तत्र कर्तव्ये कविभिः सदा ।। ४७ ।।

वीथी चैव हि भाणश्च तथा प्रहसनं पुनः ।
कैशिकीवृत्तिहीनानि कार्याणि कविभिः सदा ।। ४८ ।।

एवं हि सन्धयः कार्या दशरूपे प्रयोक्तृभिः ।

अभिनवभारती

ननु सन्धिपञ्चकात्मक इतिवृत्तशरीराम्भे कथं दशरूपकादिभेद इत्याशंक्याह एवं हीति । हिर्यस्मात्, एवमुक्तेन विनियोगप्रकारेण सन्धयो भवन्ति ततो दशरूपभेद इति केचिदाशङ्कापूर्वकं व्याचक्षते, तच्चासत्, लक्ष्यभेदादेव दशरूपकभेदस्य दर्शितत्वात् । अवश्यं चैतत्, अन्यद्वा डिमसमवकारयोश्चतुःसन्धिताविशेषात् कथं भेदः स्यात्, नाटकादीनां वा, तस्मादुपसंहारग्रन्थोऽय-

बालक्रीड़ा

(मूल) व्यायोग और ईहामृग को सदा तीन सन्धियों वाले करें। उनमें गर्भ एवं अवमर्श सन्धियां नहीं होती हैं सदा उनमें वृत्ति कैशिकी होती हैं ।।४६।।

(मूल) प्रहसन वीथी अङ्क एवं भाण दो सन्धियाँ वाले होते हैं। इनमें मुख और निर्वहण सन्धि को कवि लोग सदा करें ।।४७।।

(मूल) वीथी भाण और प्रहसन को कौशिकी वृत्ति रहित कवि लोग सदा बनावें ।।४८।।

(मूल) इस प्रकार प्रयोक्ता लोग दश रूपकों में सन्धियों को करें। अब इन सन्धियों में अङ्गों की कल्पना को समझे ।।४९।।

सन्धि पञ्चात्मक इतिवृत्त नाटच का शरीर है इस बात को १९ वें अध्याय के आरम्भ में कहा है उसमें आशंका होती है कि ऐसी अवस्था में दशरूपकों का भेद कैसे होगा इसके शमन के लिए कहते है एवं हीति। हि का अर्थ है क्योंकि इस कहे हुए विनियोग के तरीके से सन्धियां होती हैं इस लिए दश रूपकों में भेद होता है ऐसी आशंका करके कोई लोग व्याख्या करते हैं वह असत् है। क्योंकि लक्ष्य के भेद से ही दशरूप का भेद होता है ऐसा दिखा दिया है। आवश्यक भी यह है। और भी बात है कि डिम और समवकार में चार सन्धियां होती है यह समानता है तब इनमें भेद का निमित्त क्या है। इसी प्रकार नाटकादि अन्य रूपकों में भी भेदक बीज क्या।

पुनरेषां तु सन्धीनामङ्गकल्पं निबोधत ॥ ४६ ॥
सन्धीनां यानि वृत्तानि प्रदेशेष्वनुपूर्वशः ।
स्वसम्पद्गुणयुक्तानि तान्यङ्गान्युपधारयेत् ॥ ५० ॥

अभिनवभारती

मिति हीति । अङ्गानां कल्पः कल्पनाप्रकारो वा तेनैवंप्रायमन्यदपीतिवृत्तोपयोगि भवति ।

अङ्गानां सामान्यस्वरूपं प्रयोजनद्वारेण दर्शयितुं प्रथमेन स्वरूपं द्वाभ्यां प्रयोजनमेकेन द्वयं द्वयेन द्वयं प्रकाशयन्नाह श्लोकषट्कं "सन्धीनां यानि वृत्तानी" त्यादि "शोभामेति न संशयः" इत्यन्तम् ॥४६॥

अर्थभागराशिः सन्धिरित्युक्तं, तत्र सन्धीनां संबन्धनीयानि वृत्तानि संविधानखण्डानि । अनुपूर्वश इति मुख्यप्रयोजनसंपादनबलोपनतेन क्रमेण, न तु लक्षणनिरूपणप्रसंङ्गद्वारकल्पितेन, प्रदेशेष्वादिमध्यान्त्यभागेषु वर्तनेनाङ्गानि, कुत इत्याह स्वस्याङ्गिनः सन्धेर्या संपत्तिर्निष्पत्तिः तत्र गुणवत्वे शेषभावे यतो युक्तान्युचितानि संबन्धसंपादकत्वादङ्गानीत्यर्थः ॥५०॥

बालक्रीड़ा

(मूल) भिन्न-भिन्न प्रदेशों में अवयवों में आनुपूर्वी के अनुसार अपने सम्पद् गुणों से युक्त जो सन्धियों के वृत्त है उनका अङ्गों के रूप में उपधारण करें ॥५०॥

इस लिए एवं हीति यह उपसंहार ग्रन्थ है। अङ्गो का कल्प अथवा कल्पना का प्रकार। इससे सिद्ध है इस तरह का अन्य भी तत्व इतिवृत्त के उपयोगी होता है ॥४६॥

अङ्गों के सामान्य स्वरूप को प्रयोजन के द्वारा दिखलाने के लिए 'सन्धीनां यानि वृत्तानि' यहां से 'शोभामेति न संशयः' यहां तक ६ श्लोकों को कहते हैं जिनमें प्रथम श्लोक से स्वरूप को, दो श्लोकों से प्रयोजन को एक से स्वरूप और प्रयोजन दोनों को फिर दो से दोनों को कहा है ।

अर्थभाग की राशि सन्धि है ऐसा पहले कहा है उसमें सन्धियों के वृत्त हैं यानी सम्बन्ध करने के योग्य संविधान के खण्ड हैं । अनुपूर्वशः माने मुख्य प्रयोजन के सम्पादन के बल से प्राप्त होने वाले क्रम के अनुसार न कि लक्षण के निरूपण करने के प्रसङ्ग से परिकल्पित क्रम से। प्रदेशों में आदि मध्य एवं अन्त के भागों में वर्त्तन से वृत्त अङ्ग है । क्यों अङ्ग है इसको कहते हैं कि स्व माने अङ्गी सन्धि की जो सम्पत्ति निष्पति है उसमें गुणत्व में शेष भाव में माने अङ्गभाव में जैसे २ उचित है वैसे २ युक्त हैं अर्थात् सम्बन्ध के सम्पादक होने से उचित हैं ॥५०॥

इष्टस्यार्थस्य रचना वृत्तान्तस्यानुपक्षयः ।
रागप्राप्तिः प्रयोगस्य गुह्यानां चैव गूहनम् ।। ५१ ।।
आश्चर्यवदभिख्यानं प्रकाश्यानां प्रकाशनम् ।

अभिनवभारती

अन्ये त्वाहुः—स्वसंपदो बीजोत्पत्त्युद्घाटनादिका गुणाश्च शब्दार्थवैचित्र्याणि, स्वसंपदां वा गुणाः तैरेव युक्तानीति ।५०।।

इष्टस्येत्यादिना प्रयोजनमाह । अभीष्टस्य प्रयोजनस्य रसास्वादकृते रचना विस्तारणा । वृत्तान्तस्यानुपक्षयः क्रमेण स्फुटत्वादयः शलाकाकल्पत्वाभावः, एतत्प्रयोजनं सर्वसाधारणम् । प्रयोगस्येतिवृत्तस्य स्वयं परस्परस्यापि रागप्राप्तिः रञ्जनायोग्यत्वलाभः व्युत्पत्त्यवस्थायोगात्, यदि वा पौनरुक्त्याद्याभासे गुह्याः संछादनीया अर्थाः तेषां संछादनम् ।।५१।।

पुनः पुनः श्रुतमपि यदभिख्यानं इतिवृत्तं तत एव नाश्चर्यकारि तदपि अङ्गयोजनायामपूर्वतामिव दधदद्भुततामेति, तदाह आश्चर्यवदिति। यच्च व्युत्पत्तौ

बालक्रीड़ा

(मूल) इष्ट अर्थ की रचना १ वृत्तान्त का अनुपक्षय २ नाटकादि प्रयोग में राग के आकर्षण की प्राप्ति ३ गुह्यतत्वों को छिपाना ४ आश्चर्यमय अर्थ को कहना ५ एवं प्रकाश्य वस्तु का प्रकाशन करना ये अङ्गों के ६ प्रयोजन शास्त्रों में देखे जाते हैं।।५१।।५२।।

अन्य लोग तो कहते हैं स्वसम्पति के जो बीज की उत्पत्ति एवं उद्घाटनादि गुण है माने शब्द और अर्थ की विचित्रताएँ है उससे युक्त हैं। अथवा अपनी सम्पत्तियों के जो गुण हैं उनसे युक्त हैं ।।५०।।

इस तरह अंगो के स्वरूप को कहकर अब इष्टस्य इत्यादि प्रयोजनों को कहते हैं। अभीष्ट प्रयोजन की रसास्वाद के लिए रचना विस्तारणा। वृत्तान्त का अनुपक्षय क्रमशः स्फुटता वगैरह का होना और शलाका कल्पता नही होना। थोड़ा कहीं पर फिर थोड़ा कहीं पर कहना नही होना।

यह वृत्तान्त का अनुपक्षय रूप प्रयोजन सभी सन्धियों में साधारण है। प्रयोग की इतिवृत्त की स्वयं अपने आप परस्पर में व्युत्पादक अवस्थाओं के योग से राग प्राप्ति माने रञ्जना योग्यता की लब्धि। और जहाँ पुनरुक्ति मालूम पड़ती हो वहां गुह्य संछादनीय जो अर्थ है उसका संछादन। ।।५१।।

पुनः पुनः बार बार सुना हुआ होने से जो अभिख्यान इतिवृत्त आश्चर्यकारी प्रतीत नही होता है वह भी अङ्ग योजना में अपूर्वता को धारण कर लेने से अद्भुत हो जाता है उसी को कहते हैं आश्चर्यवत्। जो इतिवृत्त व्युत्पत्ति के

अङ्गानां षड्विधं ह्येतद् दृष्टं शास्त्रे प्रयोजनम् ।। ५२ ।।
अङ्गहीनो नरो तद्वन्नैवारम्भक्षमो भवेत् ।
अङ्गाहीनं तथा काव्यं न प्रयोगक्षमं भवेत् ।। ५३ ।।
उदात्तमपि यत्काव्यं स्यादङ्गैः परिवर्जितम् ।

अभिनवभारती

सातिशयोपयोगि तत एव प्रकाश्यं तस्य प्रकाशनं विस्तारणम्, आद्यन्तु प्रयोजनं चमत्कारकृतं स्मृतिदृष्टमपि प्रत्यक्षविशेषसिद्धमेव, न तु सन्ध्योपासनादिवददृष्टं, नापि पूर्वरङ्गाङ्गवदुभयरूपमित्यर्थः । शास्त्र इति नाट्यात्मके वेद इत्यर्थः ।।५२।।

एषां प्रयोजनानामङ्गलक्षणेषूदाहरणं वर्णयिष्यामः अत एव दृष्टान्तेन द्रढयति । अङ्गकर्तव्यसंपादनं प्रयोगक्षममिति । ततः प्रयोजनस्यासंपत्तेर्दृष्टस्य वा प्रच्युतसंभावनात् ।।५३।।

एतद् व्यतिरेकद्वारेण स्फुटयति उदात्तमपीति लक्षणगुणालङ्कृति-युक्तमित्यर्थः । प्रयोगस्येति अपादानमपि संबन्धित्वेन षष्ठी, वृक्षस्य

बालक्रीड़ा

(मूल) जैसे अङ्गहीन नर किसी कार्य के आरम्भ करने में क्षम नहीं होता है उसी तरह अङ्गहीन काव्य भी प्रयोग के योग्य नहीं होता है ।।५३।।

(मूल) जो काव्य उदात्त भी है माने लक्षण गुण एवं अलंकारों से युक्त भी है किन्तु यदि अंगों से परिवर्जित है हीन है । अतएव उसके प्रयोग से सज्जनों का मनोरञ्जन नही होता है ।।५४।।

सम्पादन में अतिशय उपयोगी है इसी लिए जो प्रकाशनीय है उसका प्रकाशन करना विस्तारण करना ।

इन छ प्रयोजनों में पहला प्रयोजन चमत्कार से सम्पादित है अतः स्मृति से प्राप्त हुआ भी विशेष रूप से प्रत्यक्ष सिद्ध ही है न कि सन्ध्योपासनादि की तरह अदृष्ट है और न पूर्व रङ्ग के अङ्ग की तरह उभयरूप है दृष्ट एवं अदृष्ट रूप है । शास्त्र में माने नाट्यात्मक वेद में यह है ।।५१।।५२।।

इन प्रयोजनों के उदाहरणों का अङ्गों के लक्षणों के निरूपण करने के समय में वर्णन करेंगे । इसी लिए दृष्टान्त के द्वारा दृढ करते हैं । प्रयोग में क्षम है माने अङ्गों के नियत कर्त्तव्य का सम्पादन करने में समर्थ है । इससे दृष्ट प्रयोजन की असम्पत्ति को अथवा प्रच्युत होने की संभावना है ।।५३।।

इसको व्यतिरेक के द्वारा स्पष्ट करते हैं उदात्त भी अर्थात् लक्षण गुण और अलंकारों से युक्त भी काव्य । प्रयोगस्य यहां अपादान को माने पञ्चम्यन्त को षठयन्त के रूप में कहा है । जैसे वृक्ष से पत्ता गिरता है इस तरह पञ्चम्यन्त पद

हीनत्वाद्धि प्रयोगस्य न सतां रञ्जयेन्मनः ॥५४॥
काव्यं यदपि हीनार्थं सम्यगङ्गैः समन्वितम् ।
दीप्तत्वात्तु प्रयोगस्य शोभामेति न संशयः ॥५५॥
तस्मात् सन्धिप्रदेशेषु यथायोगं यथारसम् ।
कविनाङ्गानि कार्याणि सम्यक्तानि निबोधत ॥५६॥

अभिनवभारती

पर्णं पततीति यथात्र । तस्य प्रयोगस्य तस्य काव्यस्य यतो हीनत्वं यदयोग्यत्वं यस्मात्, सतां परोपकारप्रवृत्तानां कविनटानां साधुभूतानां वा सामाजिकानां मनो न रञ्जयतीति संभाव्यते ॥५४॥

अन्वयद्वारेणोपसंहरति यदपि इति। हीनार्थमिति स्वल्पमपि प्रयोजनं प्रहसननिदर्शनकथाख्यायिकादि । प्रयोगः प्रयुक्तिः तत्राङ्गं प्रयोजकं रञ्जनातिशयो व्युत्पत्त्यतिशयश्च तदुभयम्, तत्र काव्ये दीप्तं स्फुटमित्यर्थः ।

बालक्रीड़ा

(मूल) भले ही काव्य हीनार्थ है माने स्वल्प प्रयोजन वाला है किन्तु यदि अङ्गों से समन्वित है तो प्रयोग की दीप्ति के बदौलत शोभा को प्राप्त करता है इसमें तनिक भी संशय नही है ॥५५॥

(मूल) इस लिए सन्धिरूप प्रदेशों में युक्ति के द्वारा रसों के अनुसार अङ्गों का विन्यास कवियों को करना चाहिए । अतः उनको सम्यक् प्रकार से समझिये ॥५६॥

का प्रयोग साधु है परन्तु वृक्षके पत्ते गिरते हैं इस तरह भी सम्बन्ध सामान्य में षष्ठी विभक्ति होती है। उसी तरह की प्रकृत में स्थिति है। उस प्रयोग को उस काव्य को जिसके कारण हीनता है माने जिससे अयोग्यता है ऐसे अर्थ को यहां कहना चाहते हैं। क्योंकि उस हीनार्थ प्रयोग से काव्य से परोपकार में प्रवृत्त कवि और नटों के तथा साधुभूत सज्जनों के मनोरञ्जन होने की सम्भावना नही है ॥५४॥

इसका अन्वय के द्वारा उपसंहार करते हैं। यदपि इति। जो भी हीन अर्थ वाले प्रयोजन वाले प्रहसन कथा एवं आख्याधिकादि काव्य हैं। उनका प्रयोग प्रयुक्ति है। उनमें यदि अङ्ग मनोरञ्जन का अतिशय एवं व्युत्पत्ति का अतिशय दोनों हैं वहाँ उस काव्य में दीप्तत्व स्फुट है ॥५५॥

उपक्षेपः परिकरः परिन्यासो विलोभनम् ।
युक्तिः प्राप्तिः समाधानं विधानं परिभावना ॥५७॥
उद्भेदः करणं भेद एतान्यङ्गानि वै मुखे ।
तथा प्रतिमुखे चैव शृणुताङ्गानि नामतः ॥५८॥
विलासः परिसर्पश्च विधूतं तापनं तथा ।
नर्म नर्मद्युतिश्चैव तथा प्रगयणं पुनः ॥५९॥

अभिनवभारती

अथाङ्गानामुद्देशमाह उपक्षेपः परिकर इत्यादिना एतान्यङ्गानि सन्धिषु इत्यन्तेन । मुखे द्वादश, प्रतिमुखे गर्भे च त्रयोदश, अवमर्शे द्वादश, निर्वहणे चतुर्दशेति मिलित्वा चतुःषष्टिः ।

केचिन्मन्यन्ते—इह उपक्रम उपसंहारो मध्यमिति प्रत्यवस्थं स्थानभेद-त्रयं, तत्र प्रत्येकं सूक्ष्मेणारम्भावस्थापञ्चकेन भाव्यमिति पञ्चदश्यो दशाः क्रम-भाविन्यः, यत्राद्यास्तावद्दशानामङ्गत्वेन वर्ण्यन्ते । अङ्गिबुद्ध्युदयात् । तत्रेति चतुर्दश निर्वहणे फलयोगबलात् सर्वा एवोपपाद्यन्ते । अन्यत्र तु मुखादौ

बालक्रीड़ा

(मूल) उपक्षेप, परिकर परिन्यास विलोभन युक्ति प्राप्ति समाधान विधान परिभावना ॥५७॥

(मूल) उद्भेद करण एवं भेद ये मुख सन्धि में अंग है। अब प्रतिमुख सन्धि के अङ्गों के नामों को सुनो ॥५८॥

(मूल) विलास परिसर्प विधूत तापन नर्म नर्मद्युति प्रगयण ॥५९॥

अब व ६४ अंगों का उद्देश माने नामग्राहं कीर्त्तन करते हैं उपक्षेप परिकर इत्यादि से एतानि अंगानि सन्धिषु ये मुखादि सन्धियों में अङ्ग है यहाँ तक । मुख में १२ प्रतिमुख और गर्भ में १३ अवमर्श में १२ एवं निर्वहण में १४ इस तरह मिल कर ६४ है ।

कोई तो मानते हैं कि यहां उपक्रम उपसंहार एवं मध्य इस प्रकार प्रत्येक अवस्था के विभिन्न तीन स्थान होते हैं। उनमें प्रत्येक में सूक्ष्म रूप से प्रारम्भादि पांच अवस्थाओं का होना आवश्यक है। इस तरह पांच सन्धियों में तीन अवस्थाओं के होने से ५=३=१५ दशाएँ क्रमशः होती हैं। उनमें पहिली का दशाओं के अङ्ग रूप में वर्णन किया जाता है। क्योंकि उनसे बुद्धि का उदय होता है। उनमें भी निर्वहण सन्धि में फल योग के बल के अनुसार चौदहों में सभी का उपपादन किया जाता है। अन्यत्र मुखादि में तो कुछ को छिपा देते हैं अतः मुखादि सन्धियों में पूरे १२

निरोधश्चैव विज्ञेयः पर्युपासनमेव च ।
पुष्पं वज्रमुपन्यासो वर्णसंहार एव च ॥६०॥
एतानि वै प्रतिमुखे; गर्भेऽङ्गानि निबोधत ।
अभूताहरणं मार्गो रूपोदाहरणे क्रमः ॥ ६१॥
संग्रहश्चानुमानं च प्रार्थनाक्षिप्तमेव च ।
तोटकाधिबले चैव ह्युद्वेगो विद्रवस्तथा ॥६२॥
एतान्यङ्गानि वै गर्भे; ह्यवमर्शे निबोधत ।
अपवादश्च संफेटो विद्रवः शक्तिरेव च ॥६३॥
व्यवसायः प्रसङ्गश्च द्युतिः खेदो निषेधनम् ।
विरोधनमथादानं छादनं च प्ररोचना ॥६४॥

अभिनवभारती

काश्चिल्लीनीक्रियन्ते, न द्वादशादिभेदानि तत्राङ्गानीति तदेतदसत् । एवं हि वक्ष्यमाणेषु तेनैव क्रमेण भाव्यम् । न चासावस्ति प्रयोजन-शङ्काषट्कं ततश्चानुपपन्नं स्यात्, अनुपक्षय इत्येकमेव हि प्रयोजनं भवेत् । बीजकरणेऽपि च नियमनिदानानुपपत्तौ द्वयोर्द्वादश द्वयोस्त्रयोदशेति कुतस्त्यो विभाग इत्यास्तामदः ।

बालक्रीड़ा

(मूल) निरोध पर्युपासन पुष्प वज्र उपन्यास एवं वर्णसंहार ॥६०॥

(मूल) ये प्रतिमुख के सन्धि के अङ्ग हैं अब गर्भ सन्धि के अंगों को समझो । अभूताहरण मार्ग रूप उदाहरण क्रम ॥६१॥

(मूल) संग्रह अनुमान प्रार्थना आक्षिप्त तोटक अधिबल उद्वेग और विद्रव ॥६२॥

(मूल) ये गर्भसन्धि के अंग है । अब अवमर्श सन्धि के अंगों को समझो । अपवाद संफेट विद्रव शक्ति ॥६३॥

(मूल) व्यवसाय प्रसङ्ग द्युति खेद निषेधन विरोधन आदान छादन प्ररोचना ॥६४॥

अङ्गों का उपयोग नही होता है । इस पर आचार्य अभिनवगुप्त कहते हैं कि यह मन्तव्य असत् है ठीक नही है । क्योंकि इस तरह मानने पर वक्ष्यमाण में यानी आगे कहे जाने वाले अङ्गों में वही क्रम होगा जो कि ठीक नही है क्योंकि इससे कहे हुए छ प्रयोजन अनुपपन्न हो जायेंगे । वस केवल एक ही अनुपक्षय रूप प्रयोजन हो सकेगा । बीज के

व्यवहाराश्च युक्तिश्च विमर्शाङ्गान्यमूनि च ।
सन्धिर्निरोधो ग्रथनं निर्णयः परिभाषणम् ॥६५॥
द्युतिः प्रसाद आनन्दः समयो ह्युपगूहनम् ।
भाषणं पूर्ववाक्यं च काव्यसंहार एव च ॥६६॥
प्रशस्तिरिति संहारे ज्ञेयान्यङ्गानि नामतः ।
चतुष्षष्टिर्बुधैर्ज्ञेयान्येतान्यङ्गानि सन्धिषु ॥६७॥
संपादनार्थं बीजस्य सम्यक्सिद्धिकराणि च ।
कार्याण्येतानि कविभिर्विभज्यार्थानि नाटके ॥६८॥
पुनरेषां प्रवक्ष्यामि लक्षणानि यथाक्रमम् ।
काव्यार्थस्य समुत्पत्तिरुपक्षेप इति स्मृतः ॥६९॥

अभिनवभारती

पुनरेषामिति । पुनश्शब्दो विशेषद्योतकः, लक्षण एवायं क्रमो न निबन्धन इति यावत् । तेन यदुद्भटप्रभृतयोऽङ्गानां सन्धौ क्रमे च नियममाहुस्तद्युक्त्यागमविरुद्धमेव । तथा हि—'संप्रधारणमर्थानां युक्तिरित्यभिधीयते' इति यन्मुखसन्धौ पञ्चममङ्गं वक्ष्यति तत्सर्वेषु सन्धिषु तावन्निबन्धन-

बालक्रीड़ा

(मूल) व्यवहार और युक्ति ये विमर्श सन्धि के अङ्ग है। सन्धि निरोध ग्रथन निर्णय परिभाषण ॥६५॥

(मूल) द्युति प्रसाद आनन्द समय उपगूहन भाषण पूर्ववाक्य काव्य संहार और प्रशस्ति ये संहार सन्धि के अंगों के नाम है। पांचों सन्धियों में इन ६४ अंगों को विद्वान् लोग समझें ॥६६॥६७॥

(मूल) बीज के सम्पादन के लिए सम्यक् सिद्धि करने वाले इन अंगों का प्रयोग या उपयोग नाटक में कवियों को अर्थो का विभाग करके करना चाहिए ॥६८॥

सम्पादन करने में भी नियम के कारणों में अनुपपत्ति होने पर दो सन्धियों में १२ और दो सन्घियों में १३ अंग होते हैं यह विभाग भी कैसे हो पायेगा अतः इस मन्तव्य को रहने दिया जाय ॥५६॥६८॥

पुनरेषां में पुनः शब्द विशेष का द्योतक है अर्थात् लक्षण में ही यह क्रम है न कि निबन्धन में रचना में यह क्रम है। इस लिए उद्भट वगैरह ने जो सन्धि और क्रम में नियम कहा है वह युक्ति और आगम के विरुद्ध ही है। इसको स्पष्ट करते हैं कि अर्थों के सम्प्रधारण को युक्ति कहते हैं। ऐसा जो मुखसन्धि में पञ्चम अङ्ग को कहेंगे

अभिनवभारती

योग्यं, न च तथा निवेश्यं बध्यमानमदृष्टकृतं विदध्यात् । न च लक्ष्ये न दृश्यते । वेणीसंहारे हि तृतीयेऽङ्के गर्भसन्धौ दुर्योधनकर्णयोर्महति संप्रधारणे द्रोणवधे वृत्ते—

तेजस्वी रिपुहतबन्धुदुःखपारं
बाहुभ्यां तरति धृतायुधप्लवाभ्याम् ।
आचार्यः सुतनिधनं निशम्य संख्ये
किं शस्त्रग्रहसमये विशस्त्र आसीत् ।।

इत्यादि यावत् –

दत्त्वाभयं सोऽतिरथो हन्यमानं किरीटिना
सिन्धुराजमुपेक्षेत नैवं चेत् कथमन्यथा ।। इति ।

न चात्र प्रतीतिव्युत्पत्त्योः क्षतिः काचित् । यत्तु सन्धिनैयत्येनाभिधानं तत्र सन्धाववश्यंभावित्वख्यापनार्थं युक्तिर्मुखे भवत्येव । सन्ध्यन्तरालानि तु नेत्थमिति पृथक तानि वर्णयिष्यन्ते । कानिचित्त्वङ्गानि स्वरूपबलादेव

बालक्रीड़ा

उसका सभी सन्धियों में निबन्धन करना योग्य है। किन्तु ऐसा उसका निवेश नही करे जिससे निबध्यमान पदार्थ अदृष्ट के उपयोगी हो जाय। क्योंकि ऐसी बात नही है कि लक्ष्य में दिखाई नही पड़े। वेणीसंहार में ही तृतीय अङ्क में गर्भसन्धि में दुर्योधन और कर्ण के बड़े भारी सम्प्रधारण में निर्णय करने में द्रोणाचार्य के वध हो जाने पर।

तेजस्वी आचार्य द्रोण जिनमें आयुध रूपी नौका को धारण किया है उन बाहुओं से युद्ध में पुत्र के मारे जाने से होने वाले दुःख रूपी समुद्र को पार जाने के लिए तैरना चाहते हैं।

क्यों क्या हुआ।

क्या ! युद्ध में पुत्र के मारे जाने को सुनकर शस्त्रग्रहण के समय में शस्त्र को छोड़ दिया। यहां से लेकर

इसीलिए उस अतिरथ आचार्य ने अभय प्रदान करके अर्जुन के द्वारा मारे जाने के समय में सिन्धुराज की उपेक्षा कर दी। यदि ऐसी बात नही होती तो भला अन्यथा अभय प्रदानकर के उपेक्षा करना कैसे होता। यहां तक वह अङ्ग लक्ष्य में दिखाई पड़ रहा है।

यह बात भी नही है कि यहां प्रतीति और व्युत्पति की कोई क्षति दिखाई पड़ती है। जिसका तो सन्धियों में नियमन कथन करना है उसका उस सन्धि में अवश्य भावित्व के ख्यापन करने के लिए युक्ति होती ही है। किन्तु सन्धियों

अभिनवभारती

नियमभाञ्जि, यथोपक्षेपो मुखसन्धावेव प्रथमे । एवं च न ह्यनुपक्षिप्ते वस्तुनि किञ्चिदपि शक्यक्रियम् । यत्तूच्यते 'चतुःषष्टचङ्गसंयुत' मिति तेन संभवमात्रमेषामुक्तं, न तु नियमः । यथासन्धिकृतः कर्तव्यानीति वचनं प्रत्युत सन्ध्यौचित्येनैषां निबन्धनमभिदधदस्मदभिहितनीतिपथोपदेश्येव, योग्यतार्थवृत्तिना हि यथाशब्देनायमव्ययीभावः ।

यत्तूक्तं शरीराङ्गनियमदर्शनात् कथमेतदिति, तत्रापि दृष्टान्ताद् व्यवस्थापि तु न संभवतिः स चास्तीत्युक्तं, शाखादयश्च वृक्षावयवा मध्येऽपि बुध्नेऽप्यूर्ध्वेऽपि भवन्ति । न च शरीरे पादपादिवदुपक्षेपादिभिरवयवविकल्पः सन्धिरारभ्यते, यच्च प्रतिसन्ध्यभिधानं तद्बाहुल्येन तथा दर्शनात् । तथा-

बालक्रीड़ा

के अन्तराल यानी संन्धियों के अङ्ग इय प्रकार के नही होते हैं अतः उनका अलग से वर्णन करेंगे। किन्तु कुछ अङ्ग ऐसे हैं जो अपने लक्षण के अनुसार नियमतः किये जाते हैं। जैसे उपक्षेप अङ्ग है जिसका मुख सन्धि में आरम्भ में ही नियमतः उपयोग किया जाता है। हाँ यह बात जरूर है कि जिस वस्तु का उपक्षेप निरूपण या वर्णन नही किया जाता है उस अनुपक्षिप्त वस्तु के विषय में कुछ भी नही किया जा सकता है। जो तो कहते हैं कि ६४ अङ्गों से संयुत यह है वह केवल उनकी संभावना की गई है न कि नियम किया गया है। यथा सन्धि कर्त्तव्यानि यह वचन तो प्रत्युत सन्धियों में निरूपणीय वस्तुओं के औचित्य के अनुकूल अंगों के निबन्धन को कहता है जो हमारी कही हुई नीति के मार्ग का उपदेश करता है क्योंकि यह योग्यता रूप अर्थ में रहने वाले या योग्यतार्थ वाले यथाशब्द के साथ अव्ययीभाव समास हुआ है।

जो तो कहा कि कथाशरीर इतिवृत्त में अंगों का नियमतः होना देखा गया है अतः न तु नियमः यह कैसे। वहां पर भी दृष्टान्त के अनुसार व्यवस्था है न कि वहां संभव है इसलिए व्यवस्था है वह तो वहां है ही ऐसा कहा है। जैसे शाखादि वृक्षों के अवयव मध्य में भी नीचे भी तथा ऊपर में भी होते हैं वैसे वृक्षों की तरह कथा शरीर में उपक्षेपादि के द्वारा किये गये अवयवों के विकल्प से युक्त संन्धि का आरम्भ होता है। और जो तो प्रतिसन्धियों का अनुसन्धियों का कथन है वह तो बाहुल्येन वैसा देखा गया है। तब भी जिस अर्थ का उपक्षेप एवं विस्तार कर दिया है और जो निश्चित गुण के बदौलत अभिलषित है उसके विषय में उपायादि का सम्प्रधारण संम्भावनीय है। अतः उपक्षेप परिकर परिन्यास एवं विलोभन के हेतु के रूप से भिन्न भिन्न अङ्गों को कहकर युक्ति को बतलाई है। किन्तु यह परिस्थिति नही है कि उसी स्थन में उनका सद्भाव है। और इस अंग के बाद इस अंग का उपन्यास करे ऐसे आनन्तर्य का नियम भी मुनि को अभिमत नही दिखाई पड़ता है। अन्यथा

अभिनवभारती

प्युपक्षिप्तेऽर्थे विस्तारिते निश्चितगुणादभिलषिते संभावनीयमुपायादिविषयं संप्रधारणमित्युपक्षेपपरिकरपरिन्यासविलोभनहेतुत्वादन्यान्यभिधाय युक्तिरुक्ता, न तु तत्रैव सद्भभावात् । आनन्तर्यनियमश्च मुनेरनभिमतो लक्ष्यते । अन्यथा सन्ध्यन्तरालानि सामादीनि मदान्तान्येकविंशतिः, लास्याङ्गानि गेयपदादीनि दश यानि वक्ष्यन्ते, तेषां कुत्र निवेशः स्यात् । सन्धिपञ्चकमयं हि रूपकं क्रमनियतं, तदङ्गसंहारभावितश्च सन्धिरिति, न च क्रमेणानेनैव तानि प्रयोज्यानीति वचनमस्ति । सदपि वा न्यायापेतमन्यथा योज्येत । न चोद्देशक्रममनूच्यते निबन्धनं लक्षणालङ्कारगुणवीथ्यङ्गसन्ध्यन्तराणि लास्याङ्गवृत्तितदङ्गान्यपि तु असाधर्म्यदृष्टान्तः । तदेतत्प्रत्येकं लक्षणे स्फुटीभविष्यतीत्यास्तां तावत् ।

१ उपक्षेपः—तत्र प्रस्तावना न तावद्रूपकाङ्गं नटवृत्तव्याप्ततयेतिवृत्ताननुप्रवेशात् । इति तदनन्तरं पूर्वं, काव्यार्थ इतिवृत्तशरीरलक्षणोऽभिधेयः प्रधानरसलक्षणं च प्रयोजनसंक्षेपेणोपक्षिप्यते । यथा वेणीसंहारे भीमः—

बालक्रीड़ा

मुनि को अनभिमत नही होता तो सामादि मदान्त २१ सन्ध्यङ्गों को और गेय पदादि १० लास्य के अङ्गों को जिनको कहेंगे उनका कहाँ निवेश हो सकेगा । पाँच सन्धियों वाले रूपक में अंगों का क्रम नियत है और सन्धि भी उन अङ्गों के संहार से भावित है । किन्तु ऐसा कोई वचन नही है कि इसी क्रम से उनका प्रयोग करना चाहिए । अथवा हो भी तो जो न्याय संगत नही है उसकी अन्यथा योजना करनी चाहिए । उद्देश क्रम के अनुसार लक्षण गुण अलंकार वीथी के अङ्गों लास्याङ्गों और का निबन्धन करना नही कहा है अपि तु असाधर्म्य दृष्टान्त है । यानी इसमें जैसा कहा है वैसा उसमें भी कहना चाहिए ऐसा साधर्म्य बोधक दृष्टान्त नहीं है । ये सब प्रत्येक बात लक्षण के निरूपण प्रसङ्ग में स्फुट होगी अतः यहां रहने दिया जाय ।

(१) उपक्षेप । यहाँ प्रस्तावना रूपक का अङ्ग नही है क्योंकि वह नट के वृत्त आचरणीय कर्त्तव्य से व्याप्त होने से इतिवृत्त में उसका अनुप्रवेश नही है । इति=यहां मूल में उपक्षेप इति स्मृतः में जो इति शब्द का उल्लेख किया है उसको अभिनव भारती में लिख दिया है । प्रस्तावना के अनन्तर बाद में पहले काव्यार्थ इतिवृत्त कथा शरीर लक्षण माने संज्ञा जिसकी है अभिधेय है और प्रधानरूप से निरूणीय रस है उनका प्रयोजन कहते हुए संक्षेप में उपक्षेप करते हैं । जैसे वेणी संहार में भीम उपक्षेप करता है—

यदुत्पन्नार्थबाहुल्यं ज्ञेयः परिकरस्तु सः ।

अभिनवभारती

लक्षागृहानलविषान्नसभाप्रवेशैः
प्राणेषु वित्तनिचयेषु च नः प्रहृत्य ।
आकृष्य पाण्डववधूपरिधानकेशान्
स्वस्था भवन्तु मयि जीवति धार्तराष्ट्राः ॥ इति ।६९।

२ परिकरः—परितः क्रियते तत ईषद् विस्तार्यते परिकरः । यथा भीमः—

प्रवृद्ध' यद्वैरं मम खलु शिशोरेव कुरुभि-
र्न तत्रार्यो हेतुर्न भवति किरीटी न च युवाम् ।
जरासन्धस्योरस्तलमिव विरूढं पुनरपि
क्रुधा भीमः सन्धिं विघटयति यूयं घटयत ॥

बालक्रीड़ा

(मूल) उपन्न हुए अर्थ का जो बाहुल्य है विस्तार है वह परिकर है उस उत्पन्न हुए अर्थ की निष्पत्ति परिन्यास है ऐसा कवियों को सदा जानना चाहिए ॥७०॥

यहां सूत्रधार की "स्वस्था भवन्तु कुरुराजसुताः सभृत्याः । धृताराष्ट्र के लड़के अपने भृत्यों के साथ स्वस्थ रहें" ऐसी उक्ति को सुनकर क्रुद्ध भीम कहते हैं कि लाक्षा से निमित घर को हम लोगों का आवास बनाने और फिर उसमें अग्नि लगा देने तथा विषसम्पृक्त अन्न को खिलाने से हमारे प्राणों पर आघात करके और जूआ खेलने के लिए सभा में प्रवेश करा देने से हमारे धन दौलत पर प्रहार करके फिर उस सभा में पाण्डवों की बहू के चीर का हरण एवं केशों का आकर्षण कर के भी मेरे जीते हुए कुरुराज के लड़के स्वस्थ होंवें अपनी प्रकृति में रहें यह कैसे हो सकता है अपि तु स्वस्थ माने स्वर्गस्थ हो जायें, यह हो सकता है ।

यह स्वस्थः में खर प्रत्याहारीय वर्ण थकार के आगे रहते हुए शरप्रत्याहारीय सकार के रहने से स्वर के रके स्थान मे हुए विसर्ग का खर्परे शरि वा विसर्गलोपः इस वार्तिक से लोप हो गया । यहां स्वस्था भवन्तु में अधिक्षेप काकु है । आः दुरात्मन्ः स्वस्थ होवें । नही । कभी नही स्वस्थ होंवे अपि तु स्वर्गस्थ होंवे । ऐसा इसका अर्थ हैं ॥६९॥

(२) परिकर—जो उपक्षेप की अपेक्षा से विस्तुत किया जाता है । परिकर है । जैसे भीम कहता है—कि मेरी बाल्य अवस्था से ही जो बैर कुरुओं के साथ बढ़ गया उसवैर के होने में एवं बढ़ने में न आर्य युधिष्ठिर कारण है न किरीटी अर्जुन है

तन्निष्पत्तिः परिन्यासो विज्ञेयः कविभिः सदा ॥७०॥

गुणनिर्वर्णनं चैव विलोभनमिति स्मृतम् ।

अभिनवभारती

३ परिन्यासः—ततोऽपि निश्चयापत्तिरूपतया परितो हृदये सोऽर्थो न्यस्यते परिन्यासः ।

यथा—चञ्चद्भुजभ्रमितचण्डगदाभिघात-

संचूर्णितोरुयुगलस्य सुयोधनस्य ।

स्त्यानावनद्धघनशोणितशोणपाणि-

रुत्तंसयिष्यति कचास्तव देवि भीमः ॥ इत्यादि ।७०।

४ विलोभनम्—ततस्तदेव गुणवदिति श्लाघ्यते, श्लाघैव विलोभनहेतुत्वाद्विलोभनम् । यथा—द्रौपदी-अणुगह्णन्तु मए एदं वअणं देवदाओ (अनुगृह्णन्तु मे एतद्वचनं देवताः) इत्यादि । यथा वा विक्रमोर्वश्यां—

बालक्रीड़ा

और न तुम दोनों ही हेतु हो। इस प्रकार वैरी हुआ भीम क्रोध से जरासन्ध के विरूद्ध माने जमाये गये उरस्तल छाती की संधि तोड़ने की तरह संधि को मेल को तोड़ रहा है तुम लाग जोड़ो।

(३) परिन्यास—परिकर की अपेक्षा निश्चयापत्तिरूप से हृदय में उस बीज भूत अर्थ का परितः न्यास परिन्यास है। जैसे—

चमकती हुई भुजाओं से घुमाई गई प्रचण्ड गदा के अभिघात से जिसकी दोनों ऊरु संचूर्णित कर दी हैं ऐसे दुर्योधन के स्त्यान संहत अवनद्ध अवबद्ध एवं गाढे खून से सने हुए लाल हाथों से है देवि। तुम्हारे केशपाशों को यह भीम सजायेगा संवारेगा ।७०।

(४) विलोभन—वह है उसकी अपेक्षा वही गुण युक्त है इस तरह जिसकी श्लाघा की जाती है। विलोभन के हेतु होने से कार्यकारण में अभेद मानकर वह श्लाघा ही प्रशंसा ही विलोभन हैं। जैसे—द्रौपदी-देवतालोग मेरे इस वचन पर अनुग्रह करें। इत्यादि। अथवा जैसे - विक्रमोर्वशी में—

इस उर्वशी को सृष्टि करने के समय में कान्ति को देने वाला चन्द्रमा प्रजापति रहा अत एव ऐसी कान्तिमती यह है। केवल शृङ्गाररस स्वरूप स्वयं मदन एवं वसन्त ऋतु प्रजापति रहा। अन्यथा वेद के अभ्यास से निरन्तर पढने से जड अतएव मौतिक

संप्रधारणमर्थानां युक्तिरित्यभिधीयते ॥७१॥

अभिनवभारती

अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः
शृङ्गारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः ।
वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो
निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः ॥ इत्यादि ॥

तदेतदुपक्षेपाद्यङ्गचतुष्कं प्रायशो मुखसन्धौ भवति। उक्तेनैव न पौर्वापर्येण भवति। आनन्तर्यनियमस्तु नास्ति, न सन्ध्यन्तराणां सामादीनां मध्येऽनुप्रवेशात्। तदेतदाह मुनिः काव्यार्थस्य समुत्पत्तिरित्यादिना विलोभनमिति स्मृतमित्यन्तेन तत्र वृत्तान्तेनोपक्षयः सर्वेषां प्रयोजनमित्युक्तम्। परिकारस्य प्रयोजनमिष्टार्थस्य रचनापि।

५ युक्तिर्यथा–'सहदेवः—आर्य, किंचन महाराजसन्देशोऽयं आर्येण अव्युत्पन्न इव गृहीतः' इत्यतः प्रभृति यावद्भीमवचनम्—

युष्मान् ह्रेपयति क्रोधाल्लोके शत्रुकुलक्षयः ।
न लज्जयति दाराणां सभायां केशकर्षणम् ॥ इति ।

अस्याः प्रयोजनं प्रकाश्यप्रकाशनमपि ।७१।

बालक्रीड़ा

विषयों से जिसका कौतूहल नष्ट हो गया है ऐसा बूढा मुनि ऐसे मनोहर रूपके निर्माण करने में कैसे समर्थ हो सकता है।

वासवदत्ता 'यह इतना कार्य मेरी बहिन के अनुरूप होना चाहिए'। ऐसा कहकर अपने आभरणों से उसको अलंकृत करती है। कोई लोग द्युति के बाद इस अङ्ग को पढ़ते हैं ॥१०१॥

(६१) उपगूहन—अद्भुत वस्तु की सम्प्राप्ति उपगूहन है । जैसे—विदूषक उठकर खड़ा होकर नृत्य करता है। ही ही भोः। कैसे कैसे हम लोग सम्पूर्ण मनोरथ वाले हुए हैं।

(६२) भाषण—सामदाम आदि से युक्त वाक्य भाषण है यद्यपि संग्रह नाम से इस अङ्ग को पहले कह दिया है तद्यपि इस जगह में इसका अवश्य ही प्रयोग करना है इसको बतलाने के लिए पुनः शब्दान्तर से उपपादन किया है। जैसे—

वसुभूति—आप का देवी शब्द को उद्वहन ग्रहण करना यानी जनता आपको देवी कहती है और आप उसके अनुसार अपने को देवी स्वीकार करती हैं यह बिलकुल ठीक है। सामदान तो जैसे भगवती जीमूतवाहन को वरदान देती है कि मैं तुमको क्षण भर में प्रेम से विद्याधर चक्रवर्त्ती बना देती हूं इत्यादि । अन्य लोग मानते है

पूर्ववाक्यं तु विज्ञेयं यथोक्तार्थप्रदर्शनम् ।

वरप्रदानसंप्राप्तिः काव्यसंहार इष्यते ॥१०३॥

अभिनवभारती

अन्ये मन्यन्ते—आदिशब्देन भेददण्डादेरुपायान्तरस्य संग्राह्यत्वं, तस्य चेह स्थाने स्पष्टेन पथानौचित्यात् गर्भसन्ध्युक्तसामाद्युपायानुवदनमात्रमत्र यत्क्रियते इत्थमिदं 'प्राप्तमित्येवप्राय' तदिदंभाषणाख्यमङ्गमिति ॥१०२॥

६३ पूर्ववाक्य—पूर्ववाक्यं यथोक्तार्थप्रकाशनमिति । यथा वाभ्रव्यः—इदानीं सफलपरिश्रमोऽस्मि संपन्न—इति ।

६४ काव्यसंहारः—वरप्रदानसंप्राप्तिः काव्यसंहार इति । यथा यौगन्धरायणः—देव तदुच्यतां किं ते भूयः प्रियमुपहरामीत्यादि यावत्, इत्यादि ॥१०३॥

'यावत्, यातो विक्रमबाहुरात्मसमतां' प्राप्तेयमुर्वीतले
सारं सागरिका ससागरमहीप्राप्त्येकहेतुः प्रिया ।
देवी प्रीतिसुपानता च भगिनिलाभज्जिताः कोशलाः
किं नास्ति त्वयि सस्यमात्यवृषभे यस्मिन् करोमि स्पृहाम् ॥

बालक्रीड़ा

(मूल) जैसा कहा गया था उसी तरह के अर्थ के प्रदर्शन को पूर्व वाक्य समझो । अभीष्ट वरदान की संप्राप्ति काव्य संहार नाम से इष्ट है ॥१०३॥

कि यह साम दानादि में आदिशब्द से भेद एवं दण्ड आदि अन्य उपायों को संग्रह करना चाहिए । किन्तु इस जगह में उस उपायान्तर का स्पष्ट तरीके से संग्रहकरना अनुचित है । क्योंकि गर्भसन्धि में कहे हुए सामादि उपायों का यहाँ अनुवाद मात्र जो करते है कि यह इस प्रकार प्राप्त है इस तरह का यह भाषणादि अङ्ग है ॥१०२॥

(६३) पूर्ववाक्य—यथोक्त माने जो जैसा है उसको उसी प्रकार का कह देना । इसके अनुसार यथोक्त अर्थ का प्रकाशन कर देना पूर्व वाक्य है । जैसे वाभ्रव्य कहता है कि इस समय मैं सफल परिश्रम बाला हो गया हूं ।

(६४) काव्यसंहार—वरदान की सम्प्राप्ति काव्य संहार है । जैसे यौगन्धरायण कहता है हे देव ! कहिये इससे बढ़कर और अपका क्या प्रिय करूं । यहां से विक्रमवाहु को मैंने अपने समान कोटि में पहुंचा दिया यहां तक ॥१०३॥

नृपप्रदेश शान्तिश्च प्रशस्तिरभिधीयते ।
यथासन्धि तु कर्तव्यान्येतान्यङ्गानि नाटके ॥१०४॥
कविभिः काव्यकुशलै रसभावमपेक्ष्य तु ।

अभिनवभारती

६४ प्रशस्तिः – नृपप्रदेशशान्तिश्च प्रशस्तिरिति । (यथा रत्नावल्यां)—

उर्वीमुद्दामसस्यां जनयतु विसृजन् वासवो वृष्टिमिष्टां
इष्टैस्त्रैविष्टपानां विदधतु विधिवत्प्रीणनं विप्रमुख्याः ।
आकल्पान्तं च भूया क्रमसमुपचितः संगमः सज्जनानां
निशेषंयान्तु शान्ति पिशुनजनगिरो वज्रलेपायिताश्च ॥

यथासन्धि त्विति यो यस्मिन् सन्धौ योग्य इत्यर्थः ॥१०४॥

योग्यतां च कविरेव जानाति, न च मुक्तककविः, किन्तु प्रबन्धयोजनासमर्थः । तदाह कविभिरित्यादि ।

ननु कवेः कीदृशं तत्प्रबन्धनिर्माणकौशलमित्याह रसभावमपेक्ष्येति, तदपेक्षां कौशलमित्यर्थः । रस एव हि प्रीत्या व्युत्पत्तिप्रदं नाट्यात्मकं शास्त्रमित्युक्तम् । ततश्च यद्यथा यद्यस्योपयोगि तदुचितदधिशर्करापयःप्रभृतिरसान्तरमध्ययोजित—

बालक्रीड़ा

(मूल) राजा के द्वारा शासित प्रदेश की शान्ति को प्रशस्ति कहते हैं। सन्धियों के अनुसार नाटक में इन अंगों को करना चाहिए ॥१०४॥

(६५) प्रशस्ति—नृप प्रदेश माने राष्ट्र की शान्ति प्रशस्ति है जैसे रत्नावली में—जनता के मनोऽनुकूल वृष्टि को करने वाला इन्द्र पृथिवी को उत्कृष्ट सस्य से सम्पन्न कर दें। और वैदिक लोग शास्त्रानुसार सम्पन्न की गई वृष्टि यज्ञ से देवताओं को प्रसन्न करें। क्रमशः वृद्धि को प्राप्त होने वाला सज्जनों का संगम आकल्पान्त स्थायी होवे। और वज्रलेप की तरह कठिन चुगलखोरों की वाणी विशेष शान्त हो जाय।

यथासन्धि तु अर्थात् जो अङ्ग जिस सन्धि के योग्य है उस अङ्ग का उस संन्धि में विन्यास करना समुचित है ॥१०४॥

कौन अङ्ग किस सन्धि के योग्य हैं इस योग्यता को कवि ही जानता है। न कि मुक्तक कवि किन्तु कवि भी वही जानता है जो प्रबन्ध की महाकाव्य की रचना में समर्थ है। इसी को कहा है कि कवियों के द्वारा। प्रश्न—महाकाव्य के निर्माण के विषय में कवि का वह कौशल कौनसा है किस प्रकार का है? उत्तर—रस और भाव की अपेक्षा करके अर्थात् रस और भाव की अपेक्षा से किया जाने वाला निर्माण

अभिनवभारती

पेयम् रसः। तद्द्वारेणैअन्तः प्रविष्टः सत् पुष्टिं व्याधिनिवृत्तिं च विधत्ते, तथैव पुमर्थोपायो हृदयमनुप्रवेष्टुं समर्थः सुन्दरतदुचितरससङ्क्रमणया प्राप्तान्तःप्रवेशो विनेयजनस्य संपाद्ये वस्तुनि कल्पपादपकल्पनायै कल्पते। रससंक्रान्तिश्च विभावादिरूपतयैव नान्यथेत्युक्तं षष्ठे। तान्यङ्गानि विवक्षितरसभावादिसंपूर्णभावभाञ्जि भवन्ति यानि त्वेकरसावहितमनसो यत्नान्तरनिरपेक्षतयैवाहमहमिकया समुचितभावेन बन्धशय्यामनुवर्तन्ते। इतिवृत्ताविच्छेदोऽपि हि रसस्यैव पोषकः, अन्यथा विच्छेदे स्थाय्यादेस्त्रुटितत्वात् क्व रसवार्ता। तेन रसस्यैवायं विभावादिपरिकरो यदङ्गचक्रमिति। तथा हि 'लाक्षागृहानले' त्युपक्षेपो वीररौद्रयोर्विभावांशपूरकः, 'प्रवृद्धं यद्वरै' मिति क्रोधस्य वीरे व्यभिचारिणो रौद्रे स्थायिनः स्वरूपं प्रत्युज्जीवकः परिकरः, 'चञ्चद्भुज' इति च परिन्यासोऽनुभावांशं पुष्णाति, 'अणुगह्णन्तु एदं ववसिदं देवदाओ' (द्रौपदी—अनुगृह्णन्त्वेतद्व्यवसितं देवताः) (वेण्या—अङ्क?) इत्यादि विलोभनम्। अतो निवृत्त्यौत्सुक्यहर्षमतिस्मृतिप्रभृतिर्व्यभिचारिवर्गः स चायं सन्धानधुर्यः, एवमन्यदपि योज्यम्।

बालक्रीड़ा

कौशल है। रस ही प्रीति से व्युत्पत्ति देने वाला नाटयशास्त्र है। अतः जो जैसा जिसके उपयोगी हो उसके योग्य दधिशर्करा दुग्ध प्रभृति भिन्न रसों को डालकर पेय बनाया जाता है। जैसे—उस पेय के द्वारा वह रस अन्तः प्रविष्ट होकर उदर में जाकर पुष्टि को करता है और व्याधि की निवृत्ति भी करता है। उसी तरह पुरुष के द्वारा अर्थनीय उपाय हृदय में प्रवेश करने के लिए समर्थ हो जाता है अर्थात् वह उपाय सुन्दर और उसके उचित रस के सङ्क्रमण से अन्तःकरण में प्रवेश को प्राप्त कर चुका है विनेयजन सम्पाद्य वस्तु के विषय में कल्पवृक्ष की कल्पना के लिए समर्थ हो जाता है। उसके उचित अनुरूप रस का सङ्क्रमण भी विभावादि रूप से ही होता है अन्यथा माने विभावादि के सिवाय अन्य प्रकार से सम्भव नहीं है ऐसा षष्ठ अध्याय में बतला चुके हैं। वे अङ्ग विवक्षित रस एवं भावों की सम्पूर्णता के भागी होते हैं जो एक रस के विषय में सावधान मन वाले के यत्नान्तर की निरपेक्षता से ही अहमहमिका से समुचित भाव से बन्धशय्या का अनुवर्तन करते हैं।

इसमें इतिवृत्त का अविच्छेद भी रस का ही पोषक होता है अन्यथा इतिवृत्त के विच्छेद होने पर स्थायी वगैरह की त्रुटि हो जायगी तब फिर रस सम्बन्धी वार्त्ता कहां हो सकती है। इससे यह सिद्ध हो गया कि जो यह अङ्ग चक्र है वह रस के विभावादि का ही उपकरण है। जैसे 'लक्षागुहानता' का उपक्षेप वीर और रौद्र के विभावांश का पूरक है। प्रवृद्धं प्रद्वौरम यह वीर के व्यभिचारी और रौद्र के स्थायी भाव क्रोध के स्वरूप को प्रत्युज्जीवक परिकर है। चञ्चद्भुजभ्रामित इसका परिन्यास रौद्र के अनुभावांश को पुष्ट करता है। दौपदी जो प्रार्थना करती है कि देवता लोग

संमिश्राणि कदाचित्तु द्वित्रियोगेन वा पुनः ॥१०५॥

अभिनवभारती

ननु सन्धिपरतन्त्रैरङ्गैर्भवितव्यम्, पद्रसपारन्त्र्यमेषां कुतस्त्यम्, उच्यते—सन्धयो ह्यवस्थापरतन्त्राः प्रारम्भाभिधानदशाविशेषोपयोगिकथाखण्डलकं मुखसन्धिरित्युक्तम्, एवमन्यत्र। अवस्था अप्यन्यकृतिविशेषमनूच्यन्ते। नन्वतः किम्, इदमतो भवतीत्याह—रसभावापेक्षया तु कार्यं स्थितं तस्यापेक्षया अवस्थेति ज्ञेयम्। कार्यस्यापि रसप्रवाहजननपर्यन्तत्वेन कृतार्थता संपद्यते इति यावत्।

संमिश्राणीति सन्ध्यन्तरोक्त सन्ध्यन्तरेऽपीत्यर्थः। यथा युक्तिर्मुखेऽप्युक्ता गर्भेऽप्युपनिबद्धा वितर्कव्यभिचार्यंशपोषकभावेन वेणीसंहारे, यथोदाहृतं प्राक् 'तेजस्त्री रिपुहतबन्धुदुःखभार' मित्यादि। द्वित्रीति द्वित्वत्रित्वयोगेनेत्यर्थः। तेनैकमपि सन्ध्यङ्ग तत्रैव सन्धौ द्विस्त्रिर्वा कर्तव्यम्। यथारत्नावल्यां प्रतिमुखे विलासः सागरिकायां राज्ञि वाऽसकृदुपनिबद्धः प्रधानं शृङ्गारं समुद्दीपयति। वेणीसंहारे संफेडविद्रवौ पुनः प्रदर्शितौ वीररौद्रोद्दीपगौ भवतः। अतिशयेन

बालक्रीड़ा

(मूल) काव्य निर्माण में कुशल कवि लोग रस एवं भावों की अपेक्षा करके कभी कभी दो या तीन के योग संम्मिश्रिक अङ्गों को करें ॥१०५॥

इस व्यवसित को उद्योग के प्रारम्भ को अनुगृहीत करें। इत्यादि विलोभन है। अतः निवृत्ति औत्सुक्य हर्ष मति एवं स्मृति प्रमृति यह व्यभिचारी बर्ग है। यह अनुसन्धान में धुर्य है प्रधान है इस प्रकार अन्य की योजना करनी चाहिए।

प्रश्न—अङ्ग तो सन्धियों के परतन्त्र होते हैं अतः इनकी रस की परतन्त्रता कैसी और कहां से आ गई। उत्तर—कहते हैं सन्धियां अवस्था के परतन्त्र होती हैं। प्रारम्भ जिसका अभिधान है नाम है ऐसी दशा विशेष का उपयोगी कथा खण्ड मुख सन्धि है। इस तथ्य को कह चुके हैं। इसी प्रकार अन्यत्र भी समझो अवस्था भी भिन्न भिन्न कृति विशेष का निर्माण विशेष का अनुवचन है अनुकूल कथन है। प्रश्न—इससे क्या मिला। क्या सिद्ध हुआ। इससे यह होता है इसको कहते हैं कि कार्य नाटक का फल रस और भाव की अपेक्षा से होता है यह स्थित है सिद्ध है। और कार्य की अपेक्षा से पांच अवस्थाएं प्रारम्भादि होती है यह जानना चाहिए। कार्य की भी कृतार्थता सफलता इस प्रवाह के जनन पर्यन्त होने से सम्पन्न होती है।

संमिश्र माने दूसरी सन्धि में कहे हुए अंग दूसरी सन्धि में भी करे। जैसे युक्ति को मुख में भी कहा गर्भ में भी उपनिबद्ध किए और वितर्क व्यभिचारी के पोषक से रूप में भी वेणीसंहार में बतलाया। जैसा कि पहले उदाहरण कह चुके हैं। तेजस्वी है जिसमें रिपुओं को मार कर बन्धुओं के दुःख को दूर कर दिया है। द्वित्रीति दो या तीन के योग से। इससे एक ही सन्ध्यङ्ग को उसी सन्धि में दो या तीन बार

ज्ञात्वा कार्यमवस्थां च कार्याण्यङ्गानि सन्धिषु ।

अभिनवभारती

तु पौनःपुन्यै वैरस्यं स्यादिति द्वित्रिग्रहणम् । तथा द्वयोर्योगो द्वाभ्यामङ्गाभ्यां संपाद्यं तदेकेनैव चेद्घटते तत्किमपरेण । एवं त्रियोगः । द्वियोगो यथा प्रतिमानिरुद्धे भीमसूनोर्वसुनागस्य कृते—उपक्षेपानन्तरमेवं न परिकरः, आद्येनैव कृते परिन्यासदर्शनम् । एवं त्रियोगः, यथा भेज्जलविरचिते राधाविप्रलम्भे रासकाङ्के उपक्षेपेणैवहि "लिअलीस्सा" इत्यादि परिकरपरिन्यास-कार्येगुरुभूते संचालिते एकोद्देशेन विलोभननिरूपणम् । एवं चतुरङ्ग यावत् सन्धिर्भवतीति ॥१०५॥

अथ सन्ध्यन्तराणि दर्शयितुमाह एतेषामेव चाङ्गानामित्यादि । तत्र केचिदाहुः—आन्तरं छिद्र सन्धिरिति । तदङ्गमात्रं तात्स्थ्याच्च तत्स्थान्यं

बालक्रीड़ा

करना चाहिए। जैसे रत्नावली में प्रतिमुख संधि में सागरिका या राजा के विषय में उपनिबद्ध विलास प्रधानीभूत श्रृङ्गार को उद्दीप्त करता है। वेणीसंहार में संकर और विद्रव पुनः दिखाने से वे वीर और रौद्र के पोषक हो जाते हैं।

अतिशय के कारण बारंबार करने में वैरस्य हो सकता है अतः दो एवं तीन का ग्रहण किया। तब दो का योग निष्फल है। क्योंकि जो दो अङ्गों से सम्पाद्य है वह यदि एक ही से घटित हो जाता है तब दूसरे की क्या जरूरत है। यही त्रियोग का हाल है। दो का योग जैसे—प्रतिभाऽनिरुद्ध नाटक में भीम के लडके वसुनाग के वास्ते उपक्षेप के अनन्तर परिकर को नही किया। आद्य उपक्षेप से ही परिकर का कार्य हो गया तब परिकर को नही दिखाकर परिन्यास को दिखाया। यहां का आशय यह है कि—उपेक्षः परिकरः परिन्यासो विलोभनम्। इस क्रम से अङ्गों को बतलाया है। अतः जिस क्रम से जिनको बतलाया है उसी क्रम से उनका उपयोग करना चाहिए। परन्तु जब पहले से ही दूसरे का भी कार्य सम्पन्न हो जाता है तब दूसरे का उपयोग वहां नही करना चाहिए। इसलिए उपक्षेप अङ्ग के बाद परिकर को नही दिखाकर परिन्यास को दिखाया। यही हाल त्रियोग का है। जैसे भेज्जल कवि के द्वारा विरचित राधाविप्रलम्भ नामक रासक के अङ्क में उपक्षेप से ही लिअलींस्सा इत्यादि में गुरुभूत महत्त्वपूर्ण कार्य परिकर एवं परिन्यास से सञ्चालित हो रहा है वहां उसी एक कार्य के उद्देश से तृतीय अङ्ग विलोभन का निरूपण किया है। इस प्रकार चतुरङ्ग तक सन्धि होती है ॥१०५॥

अब सन्ध्यन्तरों को दिखाने के लिए कहते हैं—कि इन्ही अंगों का इत्यादि। इस पर कोई कहते हैं कि आन्तर छिद्र का सन्धान करने के लिए सन्धि है। यानी यहां सन्धि शब्द लक्षणा से उस सन्धि के अङ्ग का ग्रहण है। यहाँ का आशय है कि

एतेषामेव चाङ्गानां संबद्धान्यर्थयुक्तितः ॥ १०६॥

सन्ध्यन्तराणि सन्धीनां विशेषास्त्वेकविंशतिः ।

अभिनवभारती

तेन सन्ध्यङ्गच्छिद्रवर्तित्वात् सन्ध्यन्तराणि, अत एव चाङ्गानां संबद्धानि कार्याणीत्युच्यते ॥१०६॥

ननु किं शेषमात्रेण, नेत्याह, किं त्वर्थस्य प्रयोजनस्य योगेन, अत एव सन्ध्यङ्गानां विशेषकाः, तदर्थविशेषसंबद्धं हि तदङ्गं भवति (इति) ॥१०७॥

अन्ये मन्यन्ते—य एवोपक्षेपाद्या सामान्या उक्ताः तेषामेवैतद्विशेषा अवान्तरभेदाः । उपक्षेपो हि सामादिविशेषभिन्नः, तथा हि "लाक्षागृहानल" (वेणी-१) इति क्रोधात्मोपक्षेपः, रामाभ्युदये भयात्मोपक्षेपः प्रतिमानिरुद्धे स्वप्नरूपः' उदात्तराघवे हेत्ववधारणात्मा । एवमन्यदनुसरणीयम् (इति । एते च विभावानुभावव्यभिचारिरूपा एव । न तु तदतिरिक्तं जगति किंचिदस्ति

बालक्रीड़ा

(मूल) कार्य एवं अवस्था को समझकर सन्धियों में अङ्गों को करना चाहिए । सन्धियों के इन्हीं अंगों के प्रयोजन की योजना के अनुसार विशेष सन्ध्यन्तर होते है। जो संख्या में २१ हैं ॥१०६॥

अङ्गों की स्थिति सन्धियों में होती है इसलिए तात्स्थ्यात् माने उसमें स्थिति होने से भी लक्षणा होती है। इसको तात्स्थ्य लक्षण कहते हैं। तस्मिन् तिष्ठति-उसमें रहता है वह तत्स्य है। तत्स्य का भाव तात्स्थ्य होता है तात्स्थ्य से तत्स्था नित्व होता है माने उसके स्थान में रहता है। इससे दूसरी सन्धि के अङ्ग में रहने से सन्ध्यन्तर होता है। इसीलिए अंगों का सम्बद्ध कार्य है ऐसा कहते हैं ॥१०६॥

प्रश्न—क्या शेष रूप से यानी पूर्ण रूप से अंगो का सम्बन्धी कार्य होता है ? उत्तर—नही। पूर्ण रूप से नही है किन्तु प्रयोजन के अनुसार सम्बन्ध होता है इसी लिए कहते हैं कि सन्धि के अङ्गों के विशेषक हैं माने उस कार्य के प्रयोजन विशेष से सम्बद्ध ही वह अङ्ग होता है। और लोग तो ऐसा मानते हैं जो सामन्य रूप से उपक्षेपादि अंग कहे हैं उन्हीं के अवान्तर भेद सन्ध्यन्तर हैं जो इनकी विशेषता को कहते हैं। उपक्षेप सामादि विशेष उपायों से भिन्न है। जैसे—'लाक्षागृहानल' इसमें क्रोध का उपक्षेप है। रामाभ्युदय में भय का उपक्षेप है। प्रतिभाऽनिरुद्ध स्वप्न रूप उपक्षेप है। उदात्तराघव में हेत्वावधारणात्मा है। इसी प्रकार और जगहों में भी अनुसरण कर लेना चाहिए। इनको विभाव अनुभाव एवं व्यभिचारि भाव रूप ही समझें क्योंकि अभिनय स्थल में इनसे अतिरिक्त पदार्थ जगत् में है ही नही। प्रयोग की

साम भेदस्तथा दण्डः प्रदानं वध एव च ॥१०७॥
प्रत्युत्पन्नमतित्वं च गोत्रस्खलितमेव च ।
साहसं च भयं चैव ह्रीर्माया क्रोध एव च ॥१०८॥
ओजः संवरणं भ्रान्तिरतथा हेत्वपधारणम् ।
दूतो लेखस्तथा स्वप्नश्चित्रं मद इति स्मृतम् ॥१०९॥

अभिनवभारती

प्रयोगे । प्रयोगोज्ज्वलत्वोपयोगाय तूपलक्षणत्वेनैकविंशतिरित्युक्तं कवेर्मार्गं प्रदर्शयितुम् ।

तत्र सामादयो वीरे उज्ज्वलत्वहेतवः, वधो रौद्रे, प्रत्युत्पन्नमतित्वं मतिलक्षणं व्यभिचारिरूपं, सर्वत्र गोत्रस्खलनमीर्ष्याविप्रलम्भे, साहसं (शृङ्गारवीरादौ), चापलं हास्यादौ । एवमन्यत्र ॥१०८॥

ओज इति तेजः, सामान्याभिनये (अ-२२) लक्षयिष्यते—"अधिक्षेपावमानादेः" (इत्यत्र), संवरणमवहित्थं, चित्रं विस्मयः शिल्पविशेषश्च । एते सर्वेषु नाटकादिरूपकेषु सुलभाः स्वयं च सुज्ञाना इति तदुदाहारणपरिवर्तनेन ग्रन्थो न विस्तारितः ॥१०९॥

बालक्रीड़ा

(मूल) वे विशेष ये हैं । साम, भेद, दण्ड, दान, वध है ॥१०७॥

(मूल) प्रत्युत्पन्नमतित्व, गोत्रस्खलन, साहस, भय, ह्री, माया, क्रोध ॥१०८॥

(मूल) ओज, संवरण, भ्रान्ति, हेत्वपधारण, दूत, लेख, स्वप्न, चित्र, एवं मद ॥१०९॥

उज्वलता के उपयोग के लिए उपलक्षण रूप से २१ भेद हैं ऐसा कहना कवि को मार्ग दिखाने के लिए है ॥१०७॥

उनमें सामादि उपाय वीर में उज्वलता के हेतु हैं वध रौद्र में, प्रत्युत्पन्नमतित्व मति नामक व्यभिचारी भाव है। गोत्रस्खलन सभी जगहों में ईर्ष्याविप्रलम्भ के विषय में है। साहस शृङ्गार और वीर आदि में है। चपलता हास्य वगैरह में है। इस प्रकार अन्यत्र भी समझें ॥१०८॥

ओज-- यह तेज का पर्याय है। सामान्य अभिनय में इसका लक्षण करेंगे। अधिक्षेपापमानादि में। संवरण अवहित्था है। चित्र विस्मय है और शिल्पविशेष भी है। ये सभी नाटकादि दशरूपकों में सुलभ है और सुख से समझने के योग्य हैं। इसलिए उदाहरणों का परिवर्त्तन करके ग्रन्थ का विस्तार नही किया है ॥१०९॥

विष्कम्भश्चूलिका चैव तथा चैव प्रवेशकः ।
अङ्कावतारोऽङ्कमुखमर्थोपक्षेपपञ्चकम् ॥११०॥
मध्यमपुरुषनियोज्यो नाटकमुखसन्धिमात्रसंचारः ।
विष्कम्भकस्तु कार्यः पुरोहितमात्यकञ्चुकिभिः ॥१११॥
शुद्धः संकीर्णो वा द्विविधो विष्कम्भकस्तु विज्ञेयः ।
मध्यमपात्रैः शुद्धः संकीर्णो नीचमध्यकृतः ॥११२॥
अन्तर्यवनिकासंस्थैः सूतादिभिरनेकधा ।
अर्थोपक्षेपणं यत्तु क्रियते सा हि चूलिका ॥११३॥

अभिनवभारती

एवमितिवृत्तनिरूपणनान्तरीयकत्वेन सन्धयः सन्ध्यङ्गानि सन्ध्यन्तराणि चात्मभूतरसोपयोगीन्यपि प्राधान्येनेतिवृत्तात्मकं शरीरांशमभिनिविशमानानि, तत एव वृत्तिचतुष्कसाधारणे निर्दशितानि । अधुना तु यस्याः प्रसादेन शास्त्रेतिहासादिभ्योऽभ्युद्धरकन्धरीभूतं सर्वजनाहरणीयतास्पदत्वं तु नाट्यं, यामुद्दिश्य प्रथमेऽध्याये "कैशिकीमपि योजय यच्च तस्याः क्षमं द्रव्यं"

बालक्रीड़ा

(मूल) विष्कम्भ, चूलिका, प्रवेशक, अङ्कावतार एवं अङ्कमुख ये पांच अर्थों के उपक्षेपक माने विन्यास के प्रकार हैं ॥११०॥

(मूल) मध्य श्रेणी के पुरुषों के द्वारा विनियोग करने लायक केवल नाटक की मुख सन्धि में जिसका सञ्चार है ऐसे विष्कम्भक को पुरोहित, अमात्य एवं कञ्चुकीयो कहना चाहिए ॥१११॥

(मूल) इस विष्कम्भ को शुद्ध एवं संकीर्ण रूप से दो प्रकार का समझना चाहिए । जिनमें मध्यम पात्रों से सम्पादित किया जाने वाला विष्कम्भ शुद्ध हैं और नीच एवं मध्यम पात्रों से सम्पाद्यमान विष्कम्भ संकीर्ण कहलाता है ॥११२॥

(मूल) यवनिका परदे के भीतर स्थित सूतादि पात्रों के द्वारा जो अनेक प्रकार से अर्थों का उपक्षेपण किया जाता है वह चूलिका है ॥११३॥

इस प्रकार इतिवृत्त के निरूपण में नान्तरीयक आवश्यक होने के कारण सन्धियां सन्धियों के अङ्ग एवं सन्ध्यन्तरों का निर्देश किया । ये आत्मा भूत रस के उपयोगी होते हुए भी प्रधान तथा इतिवृतांशभूत नाट्य शरीर में इनका अभिनिवेश है अत एव इनको कौशिकी आदि चारों वृत्तियों में साधारण रूप से लिखा है । अब तो जिसके प्रसाद से जिसकी कृपा से नाटच शास्त्र एवं इतिहास से अभ्युद्धकन्धरीभूत है यानी जिसके कारण नाटच को देखने सुनने जानने के लिए जानता की ग्रीवा शास्त्री एवं

अङ्कान्तरानुसारी संक्षेपोऽर्थमधिकृत्य बिन्दूनाम् ।
प्रकरणनाटकविषये प्रवेशको नाम विज्ञेयः ॥११४॥
अङ्कान्त एव चाङ्को निपतति यस्मिन् प्रयोगमासाद्य ।
बीजार्थयुक्तियुक्तो ज्ञेयो ह्यङ्कावतारोऽसौ ॥११५॥
विश्लिष्टमुखमङ्कस्य स्त्रिया वा पुरुषेण वा ।
यदुपक्षिप्यते पूर्वं तदङ्कमुखमुच्यते ॥११६॥

अभिनवभारती

इत्यादि बहुतरमुक्तं, तदाविर्भावकानि, अत एवात्मभूतरसभावभागाभिनिवेशशालीन्येव लास्याङ्गान्यपि कविप्रयोक्तृभिरभिनेतव्यकाव्यविषये सर्वथैव योज्यानीति दर्शयितुमाह अन्यान्यपि लास्यविधावङ्गानीत्यादि। नाटकमित्यभिनेयमात्रम् । इतःपरमध्यायान्तमुक्तेभ्योऽङ्गेभ्यो लास्यविधौ यान्यङ्गानि वक्ष्यन्ते तानि नाटकोपयोगीन्यपि भवन्ति ॥११०-११६॥

बालक्रीड़ा

(मूल) प्रकरण और नाटक में उपात्त अर्थप्रकृति विन्दु के प्रयोजन के सम्बन्ध में जो अंकान्तर के अनुसार संक्षेप है उसको प्रवेशक समझना चाहिए ॥११४॥

(मूल) जहां अंक के अन्त में ही प्रयोग के अनुसार बीज भूत अर्थ की युक्ति से युक्त अङ्क का निपतन होता है अर्थात अंक किया जाता है उसको अङ्कावतार समझना चाहिए ॥११५॥

(मूल) स्त्री या पुरुष के द्वारा पूर्व में ही अंक के विश्लिष्ट मुख का जो उपक्षेप किया जाता है उसको अंक मुख कहते हैं ॥११६॥

इतिहास से उत्सुकता के बदौलत अभ्युन्नत रहती है जो सब जनों की आहरणीयता आदरणीयता या ग्राह्यता का आस्पद है। और जिसको उद्देश करके प्रथम अध्याय में कैशिकी की भी योजना करो और जो योग्य द्रव्य हो उसकी भी योजना करो इत्यादि बहुत कुछ कहा है उन वृत्तियों के आविर्भावक है अतएव आत्मभूत रस एवं भाव में हिस्से के अभिनिवेश से युक्त लास्याङ्गों को भी अभिनेय काव्यों में अवश्य ही कविप्रयोक्ता लोग योजना करें। इसको दिखाने के लिए कहते हैं कि और भी लास्य विधि में अङ्ग हैं इत्यादि। नाटकोपयोगी पद में नाटक पद से सभी अभिनेय दशरूपकों का ग्रहण है। इसके बाद अध्याय की समाप्ति पर्यन्त उक्त अंगों के सिवाय लास्य विधि में जिन अंगों को कहेंगे वे सब नाटकादि दशरूपकों के लिए भी उपयोगी होते हैं ॥११०।११६॥

अन्यान्यपि लास्यविधावङ्गानि तु नाटकोपयोगीनि ।
अस्माद्विनिः सृतानि तु भाण इवैकप्रयोज्यानि ॥११७॥
भाणाकृतिवल्लास्यं विज्ञेयं त्वेकपात्रहार्यं वा ।
प्रकरणवदूह्य कार्यासंस्तवयुक्तं विविधभावम् ॥११८॥
गेयपदं स्थितपाठ्यमासीनं पुष्पगण्डिका ।

अभिनवभारती

नन्वेवमङ्गानामभेदादङ्गिनोऽपि लास्यस्य नाटकात्को भेद इत्याशङ्कां शमयति (अस्मादिति । अस्मान्नाटकादनुकाराभिनेयलक्षणात् विनिस्सृतानि बहिर्भूतानि, एकपात्रहार्याणि । भाण इति ॥११७॥

इवशब्देन नाटकमाह भाणे नाट्यरूपता समस्ति, न तु लास्ये कथंचिदपि तस्य नाट्यरूपवैलक्षण्यात् । तच्चोपपादितं वितत्य तुर्येऽध्याये ॥११८॥

ननु कानि लास्याङ्गानि नाट्ये वक्ष्यन्त इत्याह गेयपदमित्यादि दशविधं ह्येतदङ्गनिर्देशलक्षणमित्यन्तम् । एतस्य अङ्गनिर्देशस्याङ्गोद्देशस्य दशविधं, यद्विशेषलक्षणं तालाध्याये (अ-३१) लास्यनिरूपणावसरे वक्ष्यते, तथा चोपसंहरिष्यति "एतेषां लास्यविधौ विज्ञेयं लक्षण" मिति (अ-१९) ।

बालक्रीड़ा

(मूल) इन्ही अंगों से निकले हुए और भी लास्य में होते है जिनका भाण की तरह एक ही पात्र से प्रयोग किया जाता है ये भी नाटक के उपयोगी माने गये हैं ॥११७॥

(मूल) भाणकी आकृति की तरह एकपात्र प्रयोज्य लास्य को समझो । इसकी प्रकरण की तरह ऊहा करके विविध भावों के संस्तव से युक्त करना चाहिए ॥११८॥

प्रश्न—इस प्रकार जब अङ्गों में अभेद है तब अंगी लास्य का भी नाटक में क्यों भेद होता है या कौन भेद है। इस आशंका का शमन करने के लिए समाधान करने के लिए उत्तर देते है कि यह लास्य अनुकरणात्मक अभिनेय नामक नाटकादि दशरूप से विनिःसृत हैं बाहर आये हैं अर्थात् पैदा हुए है जिसका भाण की तरह एक पात्र से प्रयोग होता है । यहां इव शब्द नाटकादि को कहता है ॥११७॥

भाण में नाट्यरूपता है किन्तु लास्य में तो किसी भी प्रकार नही है उसकी नाट्य के रूप से विलक्षणता है। उस विलक्षणता का उपपादन ४ अध्याय में विस्तार से कर दिया है ॥११८॥

प्रश्न—वे कौन से लास्य के अंग है। जिनको आगे नाट्य में कहेंगे। उत्तर—कहते हैं कि गेयपदम् यहां से लेकर दश प्रकार का यह अङ्ग निर्देश लक्षण है यहाँ

प्रच्छेदकं त्रिमूढं च सैन्धवाख्यं द्विमूढकम् ॥११९॥
उत्तमोत्तमकं चैवमुक्तप्रयुक्तमेव च ।

अभिनवभारती

तत्रैव हि संपूर्णमङ्गानां रूपं, इह तर्हि कथमुपयोग इति नाट्योपयोगितां गययितुं आसनेषूपविष्टैर्यें इत्यादिग्रन्थः । तेनेदं तात्पर्यम्—यानि लास्याङ्गानि वक्ष्यन्ते तेभ्यः कश्चिद्वैचित्र्यांशो लोकापरिदृष्टोऽपि रञ्जनावैचित्र्याय कविप्रयोक्तृभिर्नाट्ये निबन्धनीयः ।

अन्ये तु व्याचक्षते—तथाविधलास्याङ्गयोजनैवात्र क्रियते, तथा हि गेयपदे निदर्शनं दर्शयति "ततः प्रविशति वीणां वादयन्ती मलयवती चेटी च । मलयवती 'उत्फुल्लकमलकेसर' इत्यादि गायति" (नागा-१) इति । तच्चेदमसत् । अत्र ह्यन्यव्यापारवद् देवतापरितोषः, किंचिद्गेयं जप्यसहस्रतुल्यं तन्मिश्रं जप्यं कोटिफलसाधनमित्यादिपुराणवाक्यबलात्, कर्तव्यत्वेनाभिसंहितो मलयवत्याः । "सा च प्रयोज्ये" ति न लास्यार्थोऽत्र किञ्चित्,

बालक्रीड़ा

(मूल) लास्य के जिन अङ्गों को नाटच में कहेंगे इसको कहते हैं—गेयपद, स्थितपाठ्य, आसीन, पुष्पगण्डिका, प्रच्छेदक त्रिमूढ, सैन्धव, द्विमूढ ॥११९॥

तक इस अंग निर्देश का अंगोद्देश का दश प्रकार वाला जो विशेष लक्षण तालाध्याये ३१ वें अध्याय में लास्यनिरूपण के प्रसंङ्ग में कहेंगें और लास्य विधि में इनके लक्षण को समझना चाहिए इस रूप में उपसंहार भी करेंगे ॥११९॥

उसी समय अंगों का सम्पूर्ण रूप भी बतलाया जायगा। यहां फिर इनका कैसा उपयोग है इस प्रश्न के उत्तर में नाट्योपयोगिता को समझाने के लिए आसनों पर उपविष्ट हुए जो इत्यादि ग्रन्थ को कहते हैं। इससे इसका यह तात्पर्य है कि लास्य के जिन अंगों को कहेंगे। उनकी अपेक्षा कोई वैचित्र्यांश लोक में नही दिखाई पड़ता है तब भी रञ्जना वैचित्र्य के लिए कविलोगों को प्रयोग के लिए नाटच में उनका निबन्धन करना चाहिए।

अन्य लोग तो व्याख्या करते हैं कि दशविध लास्याङ्गों की योजना को यहां करते हैं। जैसे—गेयपद के विषय में निदर्शन को दृष्टान्त को दिखाते हैं 'उसके बाद वीणा को बजाती हुई मलयवती और उसकी चेटी प्रवेश करती हैं। और मलयवती 'उत्फुल्ल हुए कमल के केसर इत्यादि गाती है। नागानन्द १ अङ्क' इत्यादि। यह सब व्याख्या असत् है। क्योंकि अन्य व्यापारों की तरह देवता का परितोष भी एक व्यापार है। कुछ गेय ऐसा है जो हजार जप के बराबर है। और कुछ गेय से मिश्रित जप है जो करोड़ जप करने के फल को देने वाला है। इत्यादि पुराणो के वाक्य

लास्ये दशविधं ह्येतदङ्गनिर्देशलक्षणम् ॥१२०॥

अभिनवभारती

न लास्याङ्गतापि । यत्रापि, ततः प्रविशतो गायन्त्यौ चेट्यौ, "कुसुमाउहपिअदूअउपे" (रत्ना-२) इत्यादि तत्रापि परिभ्रमणादिवदेव लौकिकवृत्तं वसन्तोत्सवप्रमोदाभ्युदयावसरकृतं । प्रयोजने चेद्यावत् क्रियते तत्र यद्यप्यनुकार्यस्य तथापि नाट्याङ्गत्वे पृथगनुपदेश्यतापत्तिः, यथा (यदा) ह्यश्वमेघयागाद्यनुकारः कर्तव्यस्तदोपयुज्यते यज्ञाङ्गज्ञानमिति यज्ञाङ्गान्युपदेश्यानि भवेयुः। न हि तादृग्वस्तुमात्रमप्यस्ति यन्नाट्ये नोपयुज्यते च । तस्माल्लास्ये यान्यङ्गानि तत उपजीव्ये लौकिक एवांशो रञ्जनोपयोगी लास्याङ्गत्वेन मुनेरिह विवक्षितः । अन्यथा "आसनेषूपविष्टैर्य" दित्यादि किमिहोक्त्या, "एतेषां लक्षणं व्याख्यास्ये" इत्येतदिहैव किं न तोक्तमित्येतद् विश्रृङ्खलं स्यात्, "ततश्च परिधानक" मित्यादि (३१-३५०) यत्पूर्वरङ्गविधौ (अ-३१) लास्याङ्गलक्षणमुक्तं तदप्यत्राभिनेयभागे प्रयोक्तव्यं स्यात् ॥११६।१२०॥

बालक्रीड़ा

(मूल) उत्तमोत्तमक उक्तप्रत्युक्त। यह लास्य के दश प्रकार के अंगों का निर्देश कर दिया है अब इनके लक्षणों को कहते हैं ॥१२०॥

के अनुसार मलयवती को कर्त्तव्य रूप में अभिसंहित है। वह भी प्रयोज्य है वह भी शिक्षणीय है इसमें कुछ भी लास्य सम्बन्धी अर्थ नही है। और न कोई लास्याङ्गता ही है। जहां है भी जैसे गान करती हुई चेटियां रंगशाला में प्रवेश करती हैं। वहां पर भी वह वसन्तोत्सव के आनन्द के उल्लास के प्रसङ्ग में किया गया लौकिक वृत्त ही है जो परिभ्रमणादि के सदृश है। अगर कहें कि जितना प्रयोजन है उतना करते हैं तो वहाँ पर भी वह यद्यपि अनुकरणीय नायक के प्रयोजन की वस्तु है तद्यपि गेयपदादि का नाट्य के अङ्ग के रूप में अलग से उपदेश करने की आवश्यकता नही है ऐसी आपत्ति लग जायगी। जैसे—जब अश्वमेधादि यज्ञों के अनुकरण करने का अवसर प्राप्त हुआ तब यज्ञों के अङ्गों का ज्ञान करना उपयुक्त है अतः यज्ञों के अंग भी उपदेश्य हो सकते हैं। क्योंकि ऐसी कोई भी वस्तु नही है जिसका नाट्य में उपयोग नही होता है इसलिए लास्य में जो अंग है उनमें उपजीव्य रञ्जन के उपयोगी जितना लौकिक अंश है वही लास्य के अङ्ग के रूप में मुनि को विवक्षित है। अन्यथा रञ्जनानुपयोगी को भी लास्याङ्ग मानेंगे तो आसनेषूपविष्टैः इत्यादि के यहाँ कहने की क्या आवश्यकता है। इनके लक्षण की व्याख्या करूंगा वहीं पर इसको क्यों नही कहा इस तरह यह सब विश्रृंखलित हो जायगा। जैसे 'ततश्च परिधानकम्' पूर्वरंग विधि में जिस लास्याङ्ग के लक्षण को कहा वह भी यहां अभिनेय भाग में प्रयोक्तव्य हो जायगा ॥१२०॥

आसनेषूपविष्टैर्यत्तन्त्रीभाण्डोपबृंहितैः ।
गायनैर्गीयते शुष्कं तद्गेयपदमुच्यते ॥१२१॥

या गायत्यासना नारी गेयं प्रियगुणान्वितम् ।

अभिनवभारती

ततो यावानंशो नाट्योपयोगी तं दर्शयितुमाह आसनेषूपविष्टैर्यदिति । यच्छब्दो निपातो यस्मिन्नित्यत्रार्थे, तेन यत्र काव्ये प्रयोगे वा शुष्कमित्यनुकरणीयतया शून्यं गायनैरिति न तु पात्रैः, आसनोपविष्टैरिति स्वस्थैः, न तु नेपथ्ये गीयत इत्यादिवत्, कविप्रयोगायातमावेशविशेषं जृम्भद्भिर्गीयते यत् । तन्त्रीभाण्डान्वितमिति सर्वातोद्ययुतं, न तु भाव्यासीनपाठ्यवत्तद्विहीनं तद्गेयस्य पदं स्थानमिति कृत्वा गेयपदम्, तेन ध्रुवागानपञ्चकमन्तरालापस्वररहितं यत्र प्रयोगयोग्यं भवति स काव्यप्रयोगो गेयपद मित्युक्तं भवति, यत्र हि प्रयोगे तत्त्राभिनिविष्टं सामाजिकरञ्जकं भवतीति यावानंशोऽसौ लास्याङ्गादिहोपजीवितः ।

यत्तु गायनैः ननु पात्रैः शुष्कमित्यर्थात् छेकाश्रितं, गेयं निर्गीतमपि वा,

बालक्रीड़ा

(मूल) तंत्री माने बीणा भाण्ड माने वाद्य इनसे उपबृंहित विशिष्ट गायक लोग आसनों पर बैठे हुए जो शुष्क गान करते हैं उसको गेयपद कहते हैं ॥१२१॥

इस लिए जितना अंश नाट्य का उपयोगी है उसको दिखाने के लिए कहते हैं आसनों पर बैठे हुए जो इति । यहाँ यत् यह निपात 'जिसमें' इस अर्थ में है । अतः जिस काव्य या प्रयोग में जो शुष्क है अर्थात् जो गायन से शून्य है न कि पात्रों से शून्य है आसनों पर बैठे हुए इसका अर्थ है अपने स्थान पर बैठे हैं न कि नेपथ्य में गान करते हैं । इत्यादि की तरह जो कवि के प्रयोग से प्राप्त आवेश विशेष का उज्जृम्भण करते हुए गाते हैं ।

तन्त्री भाण्डों से अन्वित इसका अर्थ है सभी तरह के वाद्यों से युक्त है न कि आगे कहे जाने वाले आसीन पाठ्य की तरह वाद्यों से विहीन है रहित है । वह गेय का पद है स्थान है इसलिए यह गेयपद है । इसलिए जहां अन्तरालाप स्वर विहीन ध्रुवागानपञ्चक प्रयोग के योग्य होता है वह काव्य प्रयोग गेयपद है ऐसा कहा जाता है । अतः जिस प्रयोग में वह सामाजिकों का रञ्जनाकारी अंश अभिनिविष्ट है उतना अंश लास्याङ्ग से यहां उपजीव्य है । और जो तो गायनों से शुष्क है न कि पात्रों से शून्य है इसका अर्थ है वह अंश छेको के विदग्धों के अधीन है विदग्ध नाट्य के विशेषज्ञ जैसा चाहें । गेय हो या निर्गीत हो । यह त्र्यश्र भी या चतुरश्र भी गीयमान होता है ।

साङ्गोपाङ्गविधानेन तद्गेयपदमुच्यते ॥१२२॥
प्राकृतं यद्वियुक्ता तु पठेदात्तरसं स्थिता ।
मदनानलतप्ताङ्गी स्थितपाठ्यं तदुच्यते ॥१२३॥

अभिनवभारती

एतत् त्र्यश्रं चतुरश्रं वेत्येवंभूतं गीयमानं गेयानि पदानि यत्र गेयपदमिति व्याचक्षते, तत्पूर्वमेवापास्तम् ।।१२१।१२२।।

अथ स्थित पाठ्यमपि यल्लास्याङ्गं भविष्यति तदुपजीवितुमाह प्राकृतं यद्वियुक्ता त्विति । लास्येऽपि तावद् देवतानरपतिरञ्जनप्रधानं पाठ्यमस्ति । (तच्चित्तग्रहणं हि तत्र) तेनैव मध्ये वैचित्र्याय पाठ्यमपि क्रियते, तत्र स्थिते च पठत्यासीनेवेति पठ्यगतं तदलौकिकं रञ्जनाङ्गं चित्रत्वं तस्मादङ्गादुपजीव्यते । तथा हि—यद्वियुक्ता आतप्तापि सती प्राकृतभाषालक्षणयुक्तं तथात्तरसमिति रसोपयोगि (स्थायिरसग्रहणपूर्वकं) पठेत् । एतल्लौकिकं यल्लास्याङ्गादुपजीव्यमानं स्थितपाठ्यम् । एतच्चावेशोपलक्षणं तेन क्रोधाविष्टाऽपि संस्कृतेन पठतीत्याद्यपि मन्तव्यम् ॥१२३॥

बालक्रीड़ा

(मूल) आसन पर बैठी हुई नारी साङ्गोपाङ्ग विधान के साथ प्रिय के गुणों से युक्त गेय का गान करती हैं उसे गेयपद कहते हैं ॥१२२॥

(मूल) जहां प्रिय वियुक्त अत एव कामरूपी अग्नि से सन्तप्त हुई नारी आसन पर बैठकर रस से निर्भर प्राकृत का पाठ करती है । उसको स्थित पाठ्य कहते हैं ॥१२३॥

गेय जाने के योग्य पद जहां हो वह गेय पद है ऐसा व्याख्यान कोई करते है उसको तो पहले ही हटा दिया है ॥१२१॥१२२॥

अब स्थितपाठ्य भी जो लास्याङ्ग होगा उसके उपजीवन सहारा देने के लिए कहते हैं—प्राकृतं यद्वियुक्ता तु । लास्य में भी प्रधान रूप से देवता एवं राजा को रञ्जन खुश करने वाला पाठ्य होता है । अतः मध्य में विचित्रता का सम्पादन करने के पाठ्य भी करते हैं । वहां बैठी २ नायिका पढती है इसलिए पाठ्य में अलौकिक रञ्जनकारी अङ्ग विचित्रता का उस लास्याङ्ग से उपजीवन करते हैं । इसको बतलाते है तथाहि सो जिससे वियुक्त होने पर आतप्त हुई भी नायिका आत्तरस माने रसोपयोगी प्राकृत भाषा के लक्षण से युक्त पाठ्य को पढे । यह लौकिक स्थित पाठ्य है जो लास्याङ्ग से उपजीवन किया है । यह आवेश का उपलक्षण है इसलिए क्रोधाविष्ट होकर संस्कृत भी पढती है इत्यादि भी समझना चाहिए ॥१२३॥

बहुचारीसमायुक्तं पञ्चपाणिकलानुगम् ।
चच्चत्पुटेन वा युक्तं स्थितपाठ्यं विधीयते ॥१२४॥
आसीनमास्यते यत्र सर्वातोद्यविवर्जितम् ।

अभिनवभारती

अन्ये तु बहुचारीयुतम् चच्चत्पुटे युक्तं यत् स्थितपाठ्यमिति लक्षणं कुर्वन्ति, उदाहरन्ति, रत्नावल्यां द्वितीयेऽङ्के राजा—"उद्दामोत्कलिका" मित्यादीति, तत्पूर्वमेव निरस्तम्। न च पाठ्ये चावसरोऽत्र तालस्त्र्यश्रश्चतुरश्रो वा, यथा तु लास्याङ्गत्वे। तत्सर्वं तालाध्याय एव वक्ष्यामः ॥१२४॥

अथासीनपाठ्यादुपजीवनीयमंशमाह आसीनमास्यते यत्रेति। अत्यन्त-शोकावेशेऽभिनयादिशून्यत्वेन यत्र आस्ते सोंऽश उपरञ्जकगुणश्चतुर्विधातोद्यव-र्जितोऽतिसुकुमारकाकलीप्रायप्रमदागीतमात्रावशेषो यश्चित्तग्राही (स लौकिकः) लौकिकादपि च तत्र हि साम्यमात्रार्थस्य तस्याश्रयमाणा च स्थितिः, तदासीनन्नामाङ्गं, आसीनपाठ्यादुपजीवितेनासनांशेन योगतश्च सर्वत्र करुणादौ रञ्जनोपयोगि। तदाह चिन्ताशोकसमन्वितमिति। अधःशय (नध्यानाधोमुखाद्य-नुभावयुतम्। सर्वेति ध्यानविलापादिषुचिन्ताशोकानुभावेषु ततादेरप्रयोज्यतया

बालक्रीड़ा

(मूल) अथवा बहुत चारियों से संयुक्त हस्त की पांच कलाओं से अनुगत एवं चञ्चतू पुर से युक्त है उसका स्थितपाठ्य के रूप में विधान है ॥१२४॥

और लोग तो बहुचारियों से अथवा चञ्चत्पुर से युक्त स्थित या उसका जो लक्षण करते हैं और उदाहरण भी देते हैं। जैसे रत्नावली में द्वितीय अङ्क में राजा— उद्दामोत्कलिकाम् इत्यादि पढते हैं। उसका निरसन पहले ही कर दिया है। पाठ्य में कोई अवसर नही है कि यहाँ ताल त्र्यश्र या चतुरश्र हो और वह लास्य का अङ्ग हो। इस सबका निरुपण आगे तालाध्याय में करेंगे ॥१२४॥

अब आसीन पाठ्य से ग्राह्य उपजीवनीय अंश को कहते हैं। आसीनमास्यते यत्रेति। अत्यन्त शोकावेश में जहां अभिनयादि से शून्य होकर रहता है वह अंश उपरञ्जनकारी गुणों से युक्त चारों प्रकार के आतोद्य से वर्जित जिसमें अतिसुकुमार काकलीबहुल प्रमदागीत केवल अशिष्ट है अत एव जो चित्त ग्राही है वह लौकिक है। लौकिक से भी वहां समानता युक्त अर्थ की आश्रयमाण स्थिति है। वह आसीन नामक अंश है। जो आसीन पाठ्य से उपजीवित आसनांश के साथ योग माने सम्बन्ध करने से सर्वत्र करुण रस प्रधान स्थल में रञ्जन का उपयोगी है। इसी को कहते हैं कि चिन्ता एवं शोक से समन्वित है। अधः शयन ध्यान एवं अधोमुखत्वादि अनुभावों से युत हैं। चिन्ता के अनुभाव ध्यान और शोक के अनुभाव विलापादि की सत्ता में ततादि सभी तरह के वाद्यअप्रयोज्य हैं इसलिए उनसे रहित कहा है। इसका

अप्रसारितगात्रं च चिन्ताशोकसमन्वितम् ॥१२५॥

नृत्तानि विविधानि स्युर्गेयं चातोद्य संश्रितम् ।
चेष्टाशब्दाश्रया पुंसां यत्र सा पुष्पगण्डिका ॥१२६॥

यत्र स्त्री नरवेषेण ललितं संस्कृतं पठेत् ।
सखीनां तु विनोदाय सा ज्ञेया पुष्पगण्डिका ॥१२७॥

अभिनवभारती

तद्राहित्यमुक्तम्,) निःशब्दमिति भावः । तदनु अप्रसारितगात्रमित्यभिनयशून्य-मित्यर्थः । सुप्रसारितगात्रमित्यन्ये पठन्ति, तत्रापि (लास्याङ्गप्रदर्शनपृथग्यत्न-राहित्येन) सुप्रसारितगात्रतय ? अभिनयशून्यतैव ॥१२५॥

पुष्पगंडिकाख्यलास्याङ्गादुपजीव्याशमाह नृत्तानीति । गान इति मध्ये ततेन मध्ये सुषिरेण मध्येऽवनद्धेन मिश्रणाकृतो विचित्रभावः । पात्राणां सुकुमार-प्रयोगोऽभिनयेऽपि रञ्जक एव यद्यप्यलौकिकं यद्वैचित्र्यम् मालासादृश्या-

बालक्रीड़ा

(मूल) चिन्ता एवं शोक से समन्वित हुए की तरह गाने बजाने की सभी सामग्री से रहित होकर शरीर के अवयवों को बिना फैलाये हुए जहां बैठते हैं वह आसीन है ॥१२५॥

(मूल) जहां विविध वृत्त हो गेय पदार्थ गान पर संश्रित हो । और चेष्टाओं से पुरुषों का आश्रय हो पुष्पगाण्डिका हे ॥१२६॥

(मूल) जहां सखियों को खुश करने के लिए स्त्री पुरुष के वेष को धारण करके ललित संस्कृत पढती है वह पुष्पगाण्डिका है ॥१२७॥

आशय है उस अवस्था में सभी चिन्ता और शोक की अवस्था में किसी भी तरह का कोई भी शब्द नहीं होने पावे । एक दम निःशब्दता रहे । इसी के अनुकूल अप्रसा-रितगात्र यानी अभिनय शून्य है । और लोग सुप्रसारितगात्रम् ऐसा पाठ करते हैं उसमें भी लास्याङ्गों के प्रदर्शन के लिए अलग से यत्न करने की आवश्यकता नही है । क्योंकि गात्र फैलाये हुए हैं अतएव अभिनय करने की स्थिति के नही होने से अतएव अभिनय शून्यता ही है ॥१२५॥

पुष्पगण्डिका नामक लास्याङ्ग से लेने लायक अंश को कहते हैं वृत्तानीति । गानें इति । बीच बीच में तत वीणादि वज रहे हैं बीच बीच में सुषिर वंशी वज रही है बीच २ में आनद्ध या अवनद्ध नगारे या तबले बज रहे हैं बीच बीच में घन तालादि बज रहे हैं । इस तरह मिश्रण करने से विचित्र ही भाव होता है । गाना वजाना नाचना वगैरह के वैचित्र्य से यद्यपि यह विचित्र भाव अलौकिक है तब भी पात्रों का अभिनय में सुकुमार प्रयोग जनरञ्जक ही है ।

नृत्तं तु विविधं यत्र गीतं चातोद्यसंयुतम् ।
स्त्रियः पुंवच्च चेष्टन्ते सा ज्ञेया पुष्पगण्डिका ।।१२८।।
प्रच्छेदकः स विज्ञेयो यत्र चन्द्रातपाहताः ।

अभिनवभारती

त्पुष्पगण्डिका गाननृत्तादिगतवैचित्र्ययोगात् (स्त्रीलिङ्गविवक्षया च स्त्रीपात्राणां पुष्पगण्डिकोक्ता । पुंसामिति) सा च चेष्टाश्रयशब्दाभ्यां पर्यायेण योज्या ।।१२६।१२७।१२८।।

अथ प्रच्छेदकाङ्गकृतं वैचित्र्यं योजयितुमाह (प्रच्छेदक इति लास्यविधाने-(अ ३१) वक्ष्यते 'ज्योत्स्नायां मदिरायां वा दर्पणे सलिलेऽथवा।) छाया-सादृश्यकान्तस्य प्रहर्षार्थविभूषित" मिति (३१-अ) त्रिधाप्रच्छेदकस्य लक्षण (मुक्तम् । तत्र जलक्रीडायां जले प्रसाधने दर्पणे पानगोष्ठयां पान) ईषत्प्रतिफलि-ततत्तदाकृतिदर्शने सति कान्तायाः प्रहर्ष इति त्रिधा प्रच्छेदं प्रति विमल (फलन ?) मिति पर्यायात् (काव्येषु कविभिः प्रतिबिम्बदर्शनजातहर्षस्य स्त्रीणां प्रणयकोप-प्रसादनसामर्थ्यं वर्णितम् ।) यथा—

बालक्रीड़ा

(मूल) जहां विविध प्रकार का नृत्त हो आतोद्य से वाद्यभाण्ड से संयुत गीत होता हो और स्त्रियां पुरुष की तरह चेष्टा करती हों उसे पुष्पगण्डिका समझना चाहिए ।।१२८।।

माला के सादृश्य से इसका नाम पुष्पगण्डिका है । पुष्पों की गण्डिका माने पुष्पों की लडी अतः इसमें माला का सादृश्य है। स्त्री लिंग की विवक्षा के कारण पुष्पगण्डिका का प्रयोग स्त्री पात्रों के द्वारा अभिनेय कहा है। पुरुषों को भी इसमें पात्र कहा है अतः पर्याय से माने पारीपाटी से कभी स्त्रियां कभी पुरुष इसका प्रयोग करें। पुरुषों की चेष्टाएं एवं स्त्रियों की चेष्टायें एवं उनके उच्चारण अलग २ स्वभाव के होते हैं। अतः क्रम का होना स्वाभाविक है ।।१२६।१२७।१२८।।

अब प्रच्छेदक अङ्ग से किये गये वैचित्र्य की योजना करने के लिए कहते हैं। चन्द्रमा की चांदनी के विकास के समय मदिरा में दर्पण में अथवा नल में कान्त की छाया का सादृश्य प्रहर्षणीय आनन्ददायक अर्थ से विभूषित होता है। इस तरह प्रच्छेदक का तीन प्रकार का लक्षण कहा । उनमें जलक्रीड़ा के समय में जल में, प्रसाधन के समय में दर्पण में मदिरा की पान गोष्ठी के अवसर पर मदिरा में कान्त की प्रतिविम्बित आकृतियों के दर्शन होने से कान्ता को प्रहर्ष होता है इसलिए तीन प्रकार से विमल प्रतिबिम्बन प्रच्छेदक है। इसका वर्णन—

अभिनवभारती

पणमह पणयप्पकुविअगोरीचलणग्गलग्गपडिबिंबं ।
तंसु णहदप्पणेसु अ एआअअ तनुअरं रुद्दं ॥

पणमत पणअप्पकुपि अकोरीचलणक्कलक्कपटिंपिपम् ।
तंसु नखतप्पनेसुं एकातस तनुतरं रुत्तम् ॥

प्रणमत प्रणयप्रकुपितगौरीचरणाग्रलग्नप्रतिबिम्बम् ।
तेषु नखदर्पणेषु एकादशतनुतरं रुद्रम् ॥ इति छाया

इत्यादि । तत्र च त्रिविधेऽपि ज्योत्स्नैवोपयोगिनी, विशेषलीलाधायिनी स्वाधीनभर्तृकोचितसंभोगविशेषोपलम्भेन । एतदुक्तं भवति—लोकवृत्ते तावन्न सर्वदा संपूर्णचन्द्रोदयो भवति प्रयोगे तु संभावनागर्भतया रसोपयोगी तथाविधः कालविशेषो गृहीतव्यः। तथा च रत्नावल्यां भूयसा चन्द्रोदयो वर्णितः, "संप्रत्येष सरोरुहद्युतिमुष" (१-२३) इति, "उदयतटान्तरित" मिति (१-२४), "वक्त्रेन्दौ तव सत्ययं यदपरः शीतांशुरभ्युद्गत" (३-१३) इति। एवं रसोपयोग्यलौकिककालविशेषग्रहणं प्रच्छेदकोतपजीवितम् । यदाहुरुपाध्यायपादाः—

बालक्रीड़ा

प्रणमत प्रणय कुपितगौरीचरणाग्रलग्नप्रतिविम्वतम् ।
तेषु नखदर्पणेषु एकादशतनुवरं रुद्रम् ॥ इत्यादि।

प्रणयकलह में कुपित गौरी के चरणों को अग्रभाग में बीस नखरूपी दर्पणों में प्रतिबिम्बित एकादश शरीरधारी भगवान् साम्बसदाशिव को प्रणाम करो। इस तरह के काव्यों में कवियों ने किया है कि प्रतिबिम्बदर्शन में हर्ष के हो जाने के फलस्वरूप प्रणय कलह में क्रुद्ध स्त्रियों के प्रसादन का सामर्थ्य है।

इस तीन तरह के प्रच्छेदक में स्वाधीन भर्तृका के समुचित सम्भोग विशेष के उपलम्भ से विशेष लीला के आधान में ज्योत्स्ना का ही उपयोग है । इस का आशय यह है कि लौकिक इतिवृत्त में या लोक की स्थिति में सर्वदा सम्पूर्णचन्द्र का उदय नही होता है किन्तु अभिनय में तो सम्भावना करके रसोपयोगी उस प्रकार के काल विशेष का ग्रहण करना समुचित है। इसीलिए रत्नावली में बाहुल्येन चन्द्रोदय का वर्णन किया गया है। सम्प्रति यह कमलों की कान्ति को चुराने वाले चन्द्र का उदय हो रहा है। उदयाचल पर्वत के तट से अन्तरित यह चन्द्रोदय दिखाई पड़ रहा है। तुम्हारे मुखचन्द्र के रहते हुए भी यह अपर शीतांशु उदित हो रहा है।

इस तरह रस के उपयोगी अलौकिक काल विशेष का ग्रहण प्रच्छेदक का उपजीव्य है। जैसा कि उपाध्यायपादों ने कहा है—

स्त्रियः प्रियेषु सज्जन्ते ह्यपि विप्रियकारिषु ॥१२९॥

अनिष्ठुर श्लक्षणपदं समवृत्तैरलङ्कृतम् ।

अभिनवभारती

यद्यत्रास्ति न तत्रास्य कविर्वर्णनमर्हति ।
यन्नासंभवि तत्रास्य तद्वर्ण्यं सौमनस्यदम् ॥
देशोऽद्रिदन्तुरो द्यौर्वा तडित्कुण्डलमण्डिता ।
ईदृक्स्यादथवा न स्यात् किं कदाचन कुत्रचित् ॥ इत्यादि ॥१२९॥

अथ त्रिमूढलक्षणोपयोगिनं भागं निरूपयितुमाह अनिष्ठुरश्लक्षणपदमित्यादि । त्रिमूढके तावल्लास्याङ्गे नायकस्य व्यलोकवशादेकस्या द्वेष्यतोऽभिनवायाः प्रथमप्रणयबद्धलज्जादिनेति मोहस्त्रयाणाम् । तत्र नायकस्यावश्यमनिष्ठुराण्येवोदयनविषयाणीव वचांसि भवन्ति । तत इह वचसि रसोपयोगी गुणालङ्कारांशः स्वीकर्तव्यः । न हि लोके यदृते माधुर्यौजःप्रभृतिगुणगणोऽस्ति सर्वो ह्येवमाविष्टो यत् किंचिद्वदति तत्काव्यमेव स्यात् । छायामात्रेण त्वंशतः स एवापूर्णत्वादनुपयोग्येव । तस्मादलौकिकमेवैतद्वैचित्र्यं

बालक्रीड़ा

(मूल) उसे प्रच्छेदक समझना चाहिए जहां चन्द्रमा की चांदनी वियोग के कारण दुःख दायिनी हो जाती है और विप्रिय करने पर स्त्रियाँ अपने प्रिय के लिए शृंगारमयी सजावट करती हैं ॥१२९॥

यद्यपि यहां यह नही है तद्यपि कवि लोगों को इसका वर्णन करना योग्य है । जिसकी सम्भावना नही की जा सकती है वहां पर भी वह वर्णनीय सौमनस्य का विधायक है। पर्वत श्रेणि से दन्तुर माने समुन्नत प्रदेश हो, चाहे न हो, विजली कुण्डल से मण्डित आकाश हो चाहे न हो, किन्तु कदाचित कहीं पर हो सकता है इस सम्भावना से वर्णन करना योग्य है ॥१२९॥

अब त्रिमूढ के लक्षण के उपयोगी अंश के निरूपण करने के लिए कहते हैं कि निष्ठुरता रहित कोमलपद इत्यादि। त्रिमूढक नामक इस लास्याङ्ग में नायक अपने अपराध से एक नायिका का द्वेष्य हो जाता है और अभिनव दूसरी नायिका का प्रथम प्रणय में वद्ध हो जाने से लज्जित होता है। इस तरह नायक, प्रथम नायिका एवं अभिनव नायिका इन तीनों को मोह होता है।

उनमें चन्द्र का विरह में सन्तापकारी होने से उसके उदय विषयक नायक के वाक्य अवश्य ही निष्ठुर होते हैं। इसलिए यहां इस वाक्य में रस के उपयोगी गुण एवं अलंकार के अंश को अवश्य ही स्वीकार करना चाहिए। क्योंकि लोक में भी रस के विना माधुर्य एवं ओज वगैरह गुणगण की सत्ता नही है। इसलिए

नाट्यं स्त्रीपुंसभावाढ्यं त्रिमूढकमिति स्मृतम् ॥१३०॥
पात्रं विभ्रष्टसङ्केतं सुव्यक्तकरणान्वितम् ।

अभिनवभारती

रसोपयोगे सर्वं तद्गुणग्रामकृतम् । समवृत्तैरित्यनेन वृत्तकृतवैचित्र्यं, स्त्रीपुंस भावाढ्यमित्यनेन पात्रकृतमपि हेलाभावादि, एवं विशेषकृतं वैचित्र्यं यत्र नाट्ये सौन्दर्यमस्तीति दर्शयन् गुणानामेवान्वयव्यतिरेकाभ्यां तत्र प्रभावं दर्शयति ॥१३०॥

अथ सैन्धवकादुपजीव्यमंशं स्वीकर्तुमाह पात्रं विभ्रष्टसंकेतमिति

"सैन्धवीमाश्रिता भाषा ज्ञेयं तत्सैन्धवं बुधैः ।
रूपंवाद्यादिसंयुक्तं"

इति च लास्याङ्गविधाने (अ-३१) वक्ष्यते । तत्र यदा नान्यप्राकृतादिभाषोपकरणत्वेन सैन्धवीप्राया आश्रीयते तद्रसोपयोगि रञ्जनाधिक्यात्, अलौकिकोऽप्यमर्थो रञ्जनोपयोगी लास्याङ्गात् स्वीकृतो भवति । तथा हि शृङ्गाररसे सातिशयोपयोगिनी प्राकृतभाषेति सट्टकः कर्पूरमञ्जर्याख्यो राजशेखरेण

बालक्रीड़ा

(मूल) जहां उच्चार्यमाण पद निष्ठुर नही होवें अपि तु श्लक्ष्ण हो यानी चिकने जैसे प्रतीत हों और समवृत्तों से अलंकृत हो ऐसा स्त्रीपुरुष के भावों से आदय नाटच त्रिमूढक माना है ॥१३०॥

सभी कोई रसाविष्ट हुआ जो कुछ भी कहता है वह सब काव्य ही होता है। केवल छाया के कारण अंशतः तो वह अपूर्ण होने से अनुपयोगी ही है। अतः यह सब वैचित्र्य अलौकिक ही है जो कि रस के उपयोग में गुण एवं अलंकारों के बदौलत हुआ है। समवृत्त कहने का आशय है वृत्तों के कारण वैचित्र्य पुरुषभावाढ्यम् स्त्री व पुरुषों के भावों से सम्पान्न कहने का आशय है कि यहां हेला हाव भावादि पात्रों के द्वारा करणीय है। इस प्रकार इन विशेषताओं से होने वाला वैचित्र्य नाटच में सौन्दर्य है इसके दिखाते हुए यह भी दिखाते हैं कि यहां अन्वय एवं व्यतिरेक के द्वारा यही सिद्ध होता है कि इस पर गुण एवं अलंकारों का ही प्रभाव है ॥१३०॥

अब सैन्धवक के उपजीव्य अंश को स्वीकृत करने के लिए कहते है कि जहां पात्र संकेत से भ्रष्ट हैं सिन्धु देश में उद्भूत प्राणियों की भाषा का आश्रयण करके किये गये गाने बजाने एवं नाचने से युक्त रूपक को बुध लोग सैन्धक समझें। ऐसा लास्याङ्ग के विधान में कहेंगे। वहां जब अन्य प्राकृतादि भाषाओं को उपकरण न बनाकर सैन्ववी बहुल भाषा का आश्रयण करते हैं तब रञ्जन की अधिकता से

प्राकृतैर्वचनैर्युक्तं विदुः सैन्धवकं बुधाः ॥१३१॥

गीतवाद्यादिसंयुक्तं पाठ्येन च विवर्जितम् ।

अभिनवभारती

तन्मय एव निबद्धः, भेज्जलेन राधाविप्रलम्भाख्यो रासकाङ्कः सैन्धवभाषा-बाहुल्येन, चन्द्रकेन स्वानि रूपकाणि वीररौद्राधिकोपयोगीनि संस्कृत-भाषयैव । अत एव च तत्तद्रसोपयोगतारतम्यादेवैकतमस्यातोऽन्यस्माद प्राधान्यं कल्प्यते ।

तदेतदाह पात्रमित्यादिना । जातावेकवचनं, तेन यत्र पात्राणि प्राकृतैर्वचनैर्युक्तानि, अत एव विभ्रष्टः संकेतविशेषः रसोचितः काक्वध्याये कथित-पूर्वः, स एष भ्रष्टात्मा भ्रंशं नीतः संकेतो यत्र, सुष्ठु व्यक्तिर्यतो रसस्य तेनैव करणेन वीणावाद्यादिक्रिययान्वितं पात्रं सैन्धवकमिति विषयतद्वतोरभेदोप-चारात् । तेन दशरूपकस्य यद् भाषाकृतं वैचित्र्यं कोहलादिभिरुक्तं तदिह मुनिना सैन्धवाङ्गनिरूपणे स्वीकृतमेव ।

बालक्रीड़ा

(मूल) जिनके कारण (साधन) सुष्पष्ट हों जिनका संकेत भ्रष्ट हो गया हो जो प्राकृत भाषाओं का व्यवहार करते हो ऐसी विशेषताओं से युक्त लास्य को बुध लोग सैन्धवक समझें ॥१३१॥

वही रसोपयोगी होता है। जैसे देखिये कि प्राकृत भाषा शृंगार रस में अतिशय कर के उपयोगिनी होती है इस लिए राजशेखर ने प्राकृत भाषामय कर्पूर मञ्जरी सट्टक का निर्माण किया। भेज्जल कवि ने राधाविप्रलम्भ नामक रासक को सैन्धवी भाषा बहुल बनाया। चन्द्रक कवि ने अपने रूपकों को जो वीर एवं रौद्र के अधिक उपयोगी है संस्कृत भाषा से ही बनाये इसीलिए भिन्न २ रसों के उपयोग के तारतम्य से ही किसी एक का दूसरे से प्राधान्य कल्पित किया जाता है। इसी तथ्य को पात्र मित्यादि से कहते है। यहां पात्र यह जाति के अभिप्राय से एक वचन है। इससे जहां पात्र प्राकृत भाषामय वचनों से युक्त हैं अत एवं जिसको काकुनिरूपक अध्याय में पहले कह चुके हैं कि रसोचित संकेत विशेष बिलकुल भ्रष्ट हो गया है। वह यह भ्रष्टात्मा माने जहां संकेत का भ्रंश कर दिया है। उसी कारण से जहां रस की सुन्दर अभिव्यक्ति हो रही है। जहां वीणा वादनादि क्रिया से अन्वित पात्र हैं वह सैन्धवक है यह विषय और तद्वान् विषयी में अभेद का उपचार करके कहा है। इस दश रूपकों में जो भाषा के कारण होने वाले वैचित्र्य को कोहलादि ने कहा है उसको सैन्धवक के निरूपण में मुनि ने स्वीकृत कर लिया है। यहां करुणान्वित यह अपपाठ

नाट्यं हि तत्तु विज्ञेयं सैन्धवं नाट्यकोविदैः ॥१३२॥

मुखप्रतिमुखोपेतः चतुरश्रपदक्रमः।

अभिनवभारती

करुणान्वितमिति त्वपपाठः । एवं 'पाठ्यविहीनं सैन्धवक' मिति 'यथा रत्नावल्यां विदूषको नृत्यतीति प्रियाप्रतिनिधिप्रभ्रंश, इति मुनिमतो पेक्षयैव लक्षणमुदाहरणं च कृतं न चोक्तं युक्त्या तेन किंचिदित्यसदेव ॥१३१।१३२॥

द्विमूढकोपयोगि वैचित्र्यांशं स्वीकरोति मुखप्रतिमुखमित्यादिना । यत्र काव्ये लास्यमित्याश्रये द्वयोर्नायकस्य नायिकायाश्च नायिकयोर्वा प्रतिमूढक इव मोहो व्यावर्ण्यते तत्र, तालनिरूपणायामेकस्तालश्चतुर्भिः पादैर्युक्तः सन्नावर्तत इति वक्ष्यते (अ-३१) —

मुखप्रतिमुखोपेतं तथा चंचत्पुटाश्रयम् ।
यथाक्षरैः सन्निपातैस्तथा द्वादशभिर्युतम् ॥ इति ।

तस्मादङ्गाङ्गपरिक्रमे यदेव तालानुसरणं चतुर्षु च मुखादिषु गतिपरिसमापनं

बालक्रीड़ा

(मूल) गीत वाद्य और आदि पद ग्राह्य नृत्त से संयुक्त तथा पाठ्य से विवर्जित जहां नाट्य हो उसे नाट्यकोविद सैन्धव समझें ॥१३२॥

है । इस प्रकार पाठ्य विहीन सैन्धवक है । इति । जैसे रत्नावली में विदूषक नाचता है इति । और प्रिया के प्रतिनिधि का प्रभ्रंश है इति । यह सब मुनि ने मत की उपेक्षा करके ही लक्षण और उदाहरण लिखा है वह युक्ति से नही कहा है अतः जो कुछ है वह सब असत् ही है ॥१३१।१३२॥

अब मुख प्रतिमुख इत्यादि से द्विमूढक के उपयोगी विचित्र अंश का स्वीकार करते हैं । जिस काव्य में लास्य है इस प्रकार काव्यरूपी आश्रय में एक नायक एवं एक नायिका अथवा दो नायिकाओं के मोह का विवरण करते हैं वहां ताल के निरूपण के प्रसङ्ग में एक ताल का चार पादो के साथ आवर्त्तन करते हैं। ऐसा कहेंगे ।

जैसे मुख एवं प्रतिमुख सन्धियों से उपेत हैं वैसे ही चञ्चत्पुर नामक लास्याङ्ग का आश्रय है । जैसे सन्नियाताख्य अक्षरों से युक्त है वैसे ही द्वादश अंगों से युक्त है। अतः लास्याङ्गों के परिक्रम में जो तालानुसरण है और मुखादि चार सन्धियों में गति समापन है वह अतिशय करके रस का उपयोगी है इसलिए उसको मानलिया है। यद्यपि यह गतिसमापन लोक में नही देखा जाता है या नही, देखा गया है तद्यपि नर एवं सामाजिक वर्ग के समीप में उसके अध्यासन से प्राप्त साम्य आनन्द का स्वाभाविक अंग है जिससे रसांशेतर का भी अंग है ।

शिलष्टभावरसोपेतं वैचित्र्योऽर्थो द्विमूढके ॥१३३॥

अभिनवभारती

लोके गत्यादावपरिदृष्टमपि नटसामाजिकवर्गसविधाध्यासनेन साम्याङ्गस्यानन्दस्वभावतया रसांशेतराङ्गत्वादतिशयेन रसोपयोगीति तत् स्वीकृतम् ।

मुखा यदग्रे सामाजिकाः प्रतिमुखास्ततोऽन्यदिशिः लास्यमभिनेतुम्, मुखप्रतिमुखौ गीतकाङ्गत्वेन हि । चतुरश्रेति क्रान्तदिक्चतुष्टयैः पदैः चैतुरश्रं क्रमणं यत्रेति । किमेवं सति भवतीत्याह वैचित्र्यार्थं वैचित्र्यमत्र प्रयोजनमिति । तेनापि किमिति चेत्तत आह (श्लिष्टभावेति) श्लिष्टभावेन सर्वसाम्यलक्षणेन चित्तवृत्तिसंघट्टेन रसानामुपगतं स्फुटत्वं येनेति ।

गीतकाङ्गाभ्यां मुखप्रतिमुखाभ्यामङ्गसौष्ठवेन रसभावैर्नायिकाद्वयरचनया च युतमिति श्रीशङ्कुकाद्याः, तच्च प्रागेव परीक्षितम् ।

मुखप्रतिमुखौ सन्धो इत्येतदपि न समोचीनं, अनुपयोगादस्यार्थस्येत्युपाध्यायमतमेवानवद्यमावेदितपूर्वं ग्राह्यम् ॥१३३॥

बालक्रीड़ा

(मूल) द्विमूढ उसे कहते हैं जहाँ अर्थ विचित्रता को लिये हुए हो। अर्थ की विचित्रता को बतलाने के लिए विशेषण देते हैं कि जो अर्थ मुख एवं प्रतिमुख उपेत है जिसमें चतुरश्र पदों का क्रम माने परिपाटी है एवं जो परस्पर श्लिष्ट परस्पर में आश्रित रहने वाले भाव एवं रसों से संयुक्त हैं ॥१३३॥

अग्रभाग में प्रथम स्थान में बैठने वाले सामाजिक मुख हैं। उससे अन्य दिश भाग प्रतिमुखी है। गीतक माने गेय के अंग के रूप में लास्य का अभिनय करने के लिए मुख एवं प्रतिमुख की स्थिति है। चतुरश्रपदक्रमम् माने जहां चारों दिशाओं को क्रान्त करने वाले पदों से चतुरश्र क्रमण होता है। इस तरह होने पर क्या होता है अर्थात् चतुरश्र क्रमण होने से क्या होता है। इस प्रश्न का उत्तर देते हैं कि यह क्रमण विचित्रता के लिए होता है यानी वैचित्र्य ही यहां प्रयोजन है। उससे क्या होता है इस पर कहते हैं श्लिष्ट भाव इति। जिस श्लिष्ट भाव अर्थात् सब समान है विषमता यहां कुछ भी नही है ऐसे चित्तवृत्ति के संघट्ट से माने अन्तः करण की प्रवृत्तियों के सम्वाद से रसों का स्फुरत्व उपगत होता है यानी निर्बाध रसों की अभिव्यक्ति होती है।

गेय जहां अंग है ऐसे मुख एवं प्रतिमुख के द्वारा अंगों की सुन्दरता के बदौलत रस एवं भाव तथा नायिकाद्वय माने प्रथमादा और प्रेम से प्राप्त दो नायिकाओं की रचना से युत है ऐसा श्री शंकुक वगैरह का मत है जिसका परीक्षण पहले ही हो चुका है। मुख एवं प्रतिमुख दो सन्धियों का सम्बन्ध यहां है यह भी समीचीन नही है इस अर्थ का कोई उपयोग नही है। अतः उपाध्यायजी का मत ही अनवद्य है निर्दुष्ट है जिसका आवेदन निरूपण पहले कर दिया है उसी को ग्रहण करना चाहिए ॥१३३॥

उत्तमोत्तमकं विद्यादनेकरससंश्रयम् ।

अभिनवभारती

अथोत्तमोत्तमकमङ्गं नाट्य उपयोजयितुमाह उत्तमोत्तमकं विद्यादनेकरससंश्रयमित्यादि । "उत्तमोत्तमके त्वादौ नर्कुटं संप्रयोजयेत्" इत्यादिना "हेलाहावविभूषित" मित्यन्तेन लास्याङ्गं लक्षयिष्यते (३१-अ) । तत्र च चित्तवृत्तिपरिपोषो हेलाहावादिचेष्टालङ्कारमुखेन यः स्थितः सोऽत्र लौकिकः सन्नुपजीव्यते । तथा हि भगवदवतारस्य रामस्य कुलकलत्रमनुपेक्ष्यं, पराभवखलीकारश्च न सोढव्यः, क्षत्रियेण च लोककण्टकाभ्युद्धरणं कर्तव्यमिति यच्छास्त्रार्थपरिपालनं मुक्त्वा, रावणहृतसीतासमानयनाद्युचितं निमित्तं, परमार्थतो न तु यथा प्रतिरूपं "मुहुर्व्याघूतास्तादृश" मित्यादि वर्ण्यते तथास्य त्रेतायुगीनस्यतृतीयावतारस्य रामस्य संभाव्यते । रामायणेऽपि मुनिना तथा वर्णितमिति चेत् किमतो वेदेऽपि हि तथा वर्ण्यतां, न वयमतो बिभीमः । स हि भागः काव्यं यश्च यश्च रसाभिनिष्यन्दी वर्ण्य इत्युक्तमसकृत् । ततश्चान्यतररञ्जनोपक्रमविनेयहृदयसंवादिवैचित्र्यांशोऽसौ नाट्ये लास्याङ्गप्रसादोपनत एव ।

बालक्रीड़ा

अब उत्तमोत्तमक नामक अग का नाटच में उपयोग करने के लिए कहते हैं—अनेक रसों का संश्रय जहाँ है उस उत्तमोत्तमक समझो। उत्तमोत्तमक के आरम्भ में नर्कुटक का सम्यक् प्रयोग करे यहां से लेकर हेलाहाव विभूषितम् यहां तक से लास्य के अंग का लक्षण करेंगे। वहां चित्तवृत्तियों का परिपोषण जो हेला हावादि चेष्टा एवं अलंकारों की प्रमुखता से स्थित है वह यहां लौकिक है इस रूप में उपजीव्य है। तथा हि—भगवान् के अवतार राम की कुलकलत्र उपेक्षणीय नही है पराभवजतित खलीकार भी सहा नही जा सकता है क्षत्रिय का लोककण्टक को उखाडकर फेंकना भी कर्त्तव्य है इसमें शास्त्र प्रतिपाद्य अर्थ का परिपालन तो निमित्त है ही इसके (मुक्त्वा) सिवाय रावण के द्वारा अपहृत सीता के समानयनादि भी उचित निमित्त है किन्तु वस्तुतः जैसा मुहुर्व्याधूतास्तादृश इत्यादि प्रतिरूप विरुद्ध वर्णन करते है वैसा त्रेता युग में होने वाले तृतीय अवतार राम के सम्बन्ध में सम्भव नही है। अगर कहें कि मुनि ने भी रामायण में वैसा ही वर्णन किया है तो इससे क्या है वेद में वैसा वर्णन किया जाता है इससे हम डरते नही है। वह भाग काव्य है अतः वहां जो जो रस का अभिष्यन्दन कारी है वह वर्णनीय है इसको वार २ कह दिया है। अतः इनमें से किसी एक का रञ्जनकारी उपक्रम तथा विनेय के हृदय का संवादी वह वैचित्र्य है जो लास्याङ्ग के प्रसाद से नाटच में उपनत ही है।

लास्य के अङ्ग उत्तम हैं उनसे भी उत्तम यह है। यहां नाटच में सब कुछ रसपर्यायी है अर्थात् पर्यायेण रस रूप ही है इस तथ्य को हम पहिले दिखला चुके हैं। उत्तमादुत्तमम् उत्तमोत्तमम् समस्त शब्द ऐसा बनता है उससे संज्ञा में कन् है अतः

विचित्रैः श्लोकबन्धैश्च हेलाहावविचित्रितम् ॥१३४॥

अभिनवभारती

उत्तमानि तावल्लास्याङ्गानि, तेभ्योऽपीदमुत्तमं सर्वं हि रसपर्यायीति दर्शितं प्राक्। ततः संज्ञायां कन्।

अनेकस्यासाधारणस्य रसस्य संश्रयोऽस्मिन्निति, स्थायिनां बहुत्व-नूतनत्वाद् घटनाविचित्रत्वमुक्तम्। श्लोके च बध्यत इति श्लोकबन्धः, विलक्षणाविधा विविधास्तैः विविधैर्विचित्रैः परमार्थताभूतैः क्वचित्कदाचित्संभवमात्रं तथा वर्णितैर्युक्तम्, यथा (विक्रमोर्वश्यां)—"आ दुरात्मन् रक्षः, क्व नु खलु मे प्रियतमामादाय गच्छसि। (विभाव्य) नवजलधरः सन्नद्धोऽयं" इत्यादि पुरूरवस उक्तिश्चानुरागेणैव व्याख्यातेति किं पुनरुक्त्या।

हेलाहावैर्विशेषेण दीप्ततागमनरूपेण भूषितमिति सात्त्विकाद्यनुभाव-वर्गस्य सर्वस्यापिदीप्ततोपलक्षिता—

तत्राक्षिभ्रूविकाराद्यः शृङ्गाराकारसंयुतः।
सग्रीवारेचको ज्ञेयो भावस्थितसमुत्थितः।
स एव हावः सा हेला ललिताभिनयात्मिका। (अ २२)

इति हेलाहावयोर्लक्षणम् ॥१३४॥

बालक्रीड़ा

(मूल) उसे उत्तमोत्तमक समझो जहां अमक रसों का संश्रय होता है जो विचित्र श्लोक रचनाओं से युक्त है। एवं जो हेला हाव से विचित्र है ॥१३४॥

उत्तमोत्तमक बनता है। अनेक असाधारण रस का संश्रय इसमें है अतः स्थायियों के बहुत्व से मुख्यत्व से नूतनता हेतुक घटना में रचना में विचित्रता को कहा है। श्लोक रूप में बन्धन है निर्माण है इस लिए इसे श्लोक बन्ध कहते हैं। विलक्षण विधा माने विलक्षण प्रकार विविध हैं विचित्र हैं। इन विचित्र जो परमार्थ रूप से हुए नही है अभूत है किन्तु कभी कहां पर हो जाने की सम्भावना है अतः वैसे वर्णन किये गये पदार्थों से युक्त है। जैसे विक्रमोर्वशी में आः दुरात्मन् राक्षस! मेरी प्रिया को लेकर कहां जा रहे हो। फिर देखकर अरे! यह तो नूतन मेघ उठा हुआ है निशाचर नही है इत्यादि पुरुरवा की उक्ति को अनुराग रूप में व्याख्या की है अतः पुनरुक्ति करने से क्या लाभ है।

हेलाहावों के द्वारा दीप्त हो जाने रूप विशेषताओं से भूषित है इससे सम्पूर्ण सात्त्विकादि अनुभाव वर्ग की दीप्तता उज्ज्वलता लक्षित हो गई।

आखों के सञ्चालन एवं भ्रुकुटियों के विकार से शृंगारमय आकार के साथ भावों की स्थिति से उदीयमान जो सग्रीवारेचक है वही हाव है वह ललित अभिनय स्वरूपा हेला है। यह हाव एवं हेला का लक्षण है ॥१३४॥

कोपप्रसादजनितं साधिक्षेपपदाश्रयम् ।

अभिनवभारती

अथान्त्यमङ्गं नाट्योपयोगि कर्तुमाह—कोपप्रसादजनितमित्यादि । प्रथमार्धेन भाविलक्षणमेकदेशद्वारेणानूद्यते, द्वितीयेन तत आकृष्य वैचित्र्य-भागो नाट्योपयोगी कथ्यते । तदयमर्थः—कोपप्रसादजनितं साधिक्षेप-पदाश्रयं चेत्यादिरूपं नाट्ये यदुक्तं प्रत्युक्तं तथास्मिन्गाने (अ-१३) वक्ष्यते, एव-मिति समनन्तरमेवं वक्ष्यमाणेन पथेन स्यात्, तमाह चित्रेति । चित्रं यद्गीतं ध्रुवागानकाव्यं तस्य योऽर्थस्तेन संयोजनं यस्मिन्नाट्यांशे । उक्तप्रत्युक्ते हि (वैचित्र्यं) लास्याङ्गात् स्वीकृतम् । यथा "बाले नाथ विमुञ्च मानिनि रुषम्" इत्यादौ भिन्नानां वाच्यखण्डलकानां समन्वयो रसावेशमहिम्नैव, न तु श्रुतिलिङ्गादिप्रमाणषट्केन । यत्षट्कं तदन्यत्रावकाशं लभते "क्वाकार्यं शशलक्ष्मणः क्व च कुलं" इत्यादावियमेव वार्ता । एवं "णलिनीदलणीसहमुत्तदेहिआ । अइदुल्लहपडिबंधाणुराइआ । (नलिनीदलनिस्सहमुक्तदेहा । अतिदुर्लभप्रति-बन्धानुरागा) ॥"

बालक्रीड़ा

अब अन्तिम अङ्ग को नाट्य के उपयोगी करने के लिए कहते हैं—कोप एवं प्रसाद से जनित इस प्रथमार्ध रूप एक देश के द्वारा अविलक्षण का अनुवाद करते हैं द्वितीयार्ध से नाट्योपयोगी वैचित्र्य भाग को कहते हैं । इसलिए यह अर्थ है कि कोपप्रसादजनित और साधिक्षेपपदाश्रय इत्यादि रूप जो उक्त प्रत्युक्त है उसको इस नाट्य में गान के निरूपण के प्रसङ्ग में कहेंगे । उसके वाद इस प्रकार आगे कहे जाने वाले मार्ग से हो सकता है । उसको कहते हैं कि चित्र जो गीत है यानी ध्रुवात्मक गान काव्य है उसका जो अर्थ है उससे संयोजन जिस नाट्यांश में है क्योंकि उक्तप्रत्युक्त में वैचित्र्य लास्याङ्ग से लिया है । जैसे प्रेयान् कहता है बाले ! प्रेयसी बोलती है नाथ ! फिर प्रेयान् कहता है कि हे मानिनि ! रोष को दूर करो इत्यादि स्थल में भिन्न भिन्न वाक्य खण्डों का समन्वय रसावेश की महिमा से ही होता है न कि श्रुतिलिङ्गादि छः प्रमाणों से होता है । जो प्रमाणषट्क है उसको अन्यत्र दूसरे स्थानों में अवकाश मिलता है । 'कहां अकार्य और कहां चन्द्रवंश" इत्यादि काव्यों में यही बात है । इसी प्रकार कमल दल के सदृश कोमल शरीर को कष्टों के सहन की परिस्थिति से बाहर हो जाने से छोड दिया । क्योंकि अनुराग के विषय में प्रतिबन्ध विघ्न नही हो सकता है । इत्यादि द्विपदिका गीत के अर्थ के और हे हृदय ! समाश्वस्त होओ इत्यादि काव्यार्थ का अभिनय में समावेश जो लोक में अपरिदृष्ट है वह रसावेश का ही किया हुआ है । क्योंकि उपरञ्जन के लिए यह अत्यन्त उपयोगी है रसावेश रूप विवश के प्रसाद से । अतः उक्त प्रत्युक्त रूप लास्याङ्ग से उपजीवित है ।

अभिनवभारती

इत्यादेर्द्विपदिकागीतार्थस्याभिनये काव्यार्थस्य च "हिअअ समास्सस" (शाकु), इत्यादेरसावेशकृत एवाभिनयार्थसमावेशो लोकापरिदृष्ट उपरञ्जनाय सातिशयमुपयोगी रसावेशवैवश्यप्रसादादित्युक्तप्रत्युक्ताल्लास्याङ्गादुपजीवितः ।

यद्यपि "स्थाने ध्रुवास्वभिनयो यः क्रियते" (३२-४७) इति नाट्य-निरूपणायां वक्ष्यते तथापि कविना तादृक्कार्यं प्रयोक्त्रा च तादृग्गीतं गेयमिति शिक्षणाय कुतश्चेदमङ्गमुपजीवितमिति शङ्काशमनाय रूपकाङ्गत्वे-नेहास्याभिधानं सामान्याभिनये त्वभिनयत्वेनास्य निरूपणं भविष्यति "षडात्मकस्तु शारीर" (२२-४०) इत्यत्र । कोपप्रसादजनितत्वमित्यनेन चित्तवृत्त्यावेशस्थानमस्याङ्गस्य निवेशविषय इत्युक्तम् । यत उक्तप्रत्युक्त-महिम्ना चाकाशभाषितात्मकमप्यलौकिरूपं स्वीकुर्वता तत्सहचरं स्वगत-जनान्तिकापवारितकाद्युपलक्षितम् । न च सर्वथा तन्नाशो लोके क्वचित् संभव-न्नाट्येऽपीति गीयमानः स्यात्, अनेन श्रोतुः काकतालीयवशात् स्वचित्तवृत्त्यार्थ-संवादो भवति । यथा हर्षचरिते भगवत्याः सरस्वत्याः ।

"तरलयसि दृशं समुत्सुकामकलुषमानसवासललिते ।"
अवतर कलहंसि वापिकां पुनरपि यास्यसि पङ्कजालयम् ॥

बालक्रीड़ा

यद्यपि ध्रुवा के विषय में जो अभिनय करते हैं वह उचित है तब भी कवि को वैसा निर्माण करना चाहिए और प्रयोक्ता गायक को वैसा गान करना चाहिए जिससे लोकरञ्जन हो ऐसी शिक्षा देने के लिए यह अङ्ग कहां से कैसे उपजीवित हुआ इस शंका के शमन करने के लिए कहते हैं अभिधान करते है कि रुपक के अङ्ग के रूप में इसका यहां उपजीवन किया है। सामान्यतः अभिनय में तो इसका अभिनय होने के नाते निरूपण किया—'नायामषडात्मकस्तु शारीर' इसमें। कोपप्रसादजनितं इस विशेषण से यह कहा गया कि इस अंग के निवेश का विषय चित्तवृत्ति का आवेश स्थान है। क्योंकि उक्तप्रत्युक्त की महिमा से अलौकिक आकाश भाषित को स्वीकार करने वाले आचार्य ने उसके सहचरों स्वगत जनान्तिक और अपवारित को भी उपलक्षित कर दिया। उसका सर्वथा नाश नही है लोक में भी कहीं पर होने से नाट्य में भी गीयमान हो सकता है। इससे श्रोता की चित्तवृत्ति के साथ काव्यतलिय न्याय से संवाद होता है। जैसा कि हर्षचरित काव्य में समुत्सुक हुई दृष्टि को चंचल कर रही है। इस अपरवक्त्र नामक वृत्त को सुनने वाली सरस्वती की चित्तवृत्ति के साथ सम्वाद होता है। यदि यह सबलोक में नही हो तो तब वहां कैसी प्रत्यक्षा प्रतीति

उक्तप्रत्युक्तमेवं स्या च्चित्रगीतार्थयोजितम् ॥१३५॥

यत्र प्रियाकृतिं दृष्ट्वा विनोदयति मानसम् ।

अभिनवभारती

इत्यपरवक्तृं शृण्वन्त्याः । तत्सर्वं हि लोके यदि न स्यात् तर्हि प्रत्यक्षकल्प कथमिव तत्र प्रतीतिरिति नाटयरूपतैव भ्रंशेत ॥१३५॥

अन्ये तु चित्रपदं भाविकं चेत्यङ्गद्वयमाहुः पठन्ति च—यत्रेति दृष्ट्वेति । तच्चेदमसत्, "लास्ये दशविधं" (१९-१२०) इति पठिते ग्रन्थेन, "दशाङ्गं लास्य" मिति च तालाध्याये (३१) पठिष्यमाणेन विरोधात्, न चानयोरुपयोगः कश्चित् । तथा ह्यलौकिककैशिक्युपयोगि रसांशे सर्वथोपकारि यद्वैचित्र्यं तल्लास्याङ्गद्वारेणाह, स्वकार्यं तच्च सर्वं दशभिरेव संगृहीतम् । तथा हि—प्रधाने चित्तवृत्त्यंशे वा वैचित्र्यं विभावाद्यंशे वा उपरञ्जकभावे वा । तत्र चित्तवृत्त्यंशे प्रच्चेदकाद् विभावांशगतं तु वैचित्र्यं, सैन्धवकात् काक्वाद्यंशे, स्थितपाठ्याल्लक्षणगुणाद्यंशे, त्रिमूढकादनुवृत्तांशे, पुष्पगण्डिकात

बालक्रीड़ा

(मूल) इस प्रकार का उक्त प्रत्युक्त होता है जहां अर्थ, कोप एवं प्रसाद उत्पन्न होता है । जहां अधिक्षेप निन्दा बोधक पदों का आश्रय लिया जाता है । जिसकी चित्र, आश्चर्य 'भय' गेय अर्थ से योजना की गई है ॥१३५॥

हो सकेगी इसका आशय तो यह हुआ कि नाट्य का स्वरूप ही भ्रष्ट हो जायगा ॥१३५॥

और लोग तो चित्रपद और भाविक इन दो अंगों को कहते हैं और पढते भी हैं । यत्रेति । दृष्टेति । यह सब असत् है क्योंकि लास्य में 'दशविध अङ्ग' इस पहले पढे हुए ग्रन्थ से और दश अंगो वाला लास्य है इस तालाध्याय में पठिष्यमाण ग्रन्थ से भी विरोध होता है । इन दोनों का चित्रपद और भाविक का कोई उपयोग भी तो नही है ।

जैसा कि दिखाते हैं अलौकिक कैशिकी का उपयोगी और रसांश में सर्वथा उपकारी जो वैचित्र्य है उसको लास्य के अङ्गों के द्वारा कहा है कि जो भी अपना इसका वैचित्र्य रूप कार्य है वह सब दश अंगों से संगृहीत हो गया । चाहे वह वैचित्र्य प्रधान चित्तवृत्ति में है या विभावादि में है या उपरञ्जकता में है । उनमें, चित्तवृत्यंश में जो वैचित्र्य है उसका संग्रह प्रच्छेदक से होता है । विभावों में तो वैचित्र्य अनेक प्रकार का है उनमें से काक्वाद्यंशगत वैचित्र्य का सैन्धवक से, लक्षण-गुणाद्यंशगत वैचित्र्य स्थित पाठ्य से, अनुवृत्तांशगत वैचित्र्य का त्रिमूढक से, आहार्य कृत्रिम उपरञ्जकगीत एवं आतोद्य की योजना में पुष्पगण्डिका से, सात्विक में आसीन

अभिनवभारती

आहार्ये उपरञ्जकगीतातोद्ययोजने च सात्त्विके आसीनपाठ्यात्, उपरञ्जकभावेऽपि (निः)शब्दाद् सर्वातोद्ययोगे ध्रुवागानभागे च गेयपदात्, गीतार्थस्य पात्रे करुणार्थाभिनये उक्तप्रत्युक्ताद्वाचिकस्य, स्वरतालानुसरणा द्विमूढकात् तत एवाङ्गिकवैचित्र्यापि, व्यभिचार्यंशे तु वैचित्र्यस्योत्त मोत्तमकात् । एवं तदतिरिक्तो नास्त्येवांश इति च दशैवाङ्गानि । वाचिक(ग्भाग) स्तनुत्वेनोपरञ्जक(भागः) । स्वरसात्मनि हि तद्वैचित्र्यस्य भूयसा मुनिना निरूपणं कृतम् । अतएव चालौकिको वैचित्र्यांशः प्रस्तुयुरतसे सातिशयोपयोगी इतिशब्दतो मुनेरनुकारो, रसात्मा नाटचमिति (इति)नाभिप्रेतमिति लक्ष्यते । अलौकिकवैचित्र्यसारो हि रसः, तथा चोक्तं भट्टतोतेन—

लक्षणालङ्कृतिगुणा दोषाः शब्दप्रवृत्तयः ।
वृत्तिसन्ध्यङ्गसंरम्भः संभारो यः कवेः किल ॥
अन्योन्यस्यानुकूल्येन संभूयैव समुत्थितैः ।
झटित्येव रसा यत्र व्यज्यन्ते ह्लादिभिर्गुणैः ॥
वृत्तैः सरलबन्धैर्यत् स्निग्धैश्चूर्णपदैरपि ।
अश्लिष्टहृद्यघटनं भाषया सुप्रसिद्धया ॥

बालक्रीड़ा

पाठ्य से, उपरञ्जकभाव में भी सर्वविध वाद्यों के योग में निःशब्द से, ध्रुवा के गान भाग में गेयपद से, करुणार्थ के अभिनय में गाने वाले पात्र से, वाचिक का उक्तप्रत्युक्त से तालानुसरण से और द्विमूढक से, आङ्गिक वैचित्र्य का भी उन्ही से, और व्यभिचार्यंशगत वैचित्र्य का उत्तमोत्तमक से संग्रह होता है। इस प्रकार उनसे अतिरिक्त अंश कोई है ही नही अतः लास्य के दश ही अंश हैं ।

वाचिक उपरञ्जकभाव अल्परूप से स्थित है रस में जो वैचित्र्य है उसका निरूपण मुनिने बाहुल्येन किया है। अत एव अलौकिक वैचित्र्यांश प्रस्तुत रस में अतिशय उपयोगी है। इसको मुनि ने इति शब्द से अनुकृत किया। रसात्मा नाट्य है यह भी इति शब्द से अभिप्रेत है ऐसा लक्षित होता है। अलौकिक वैचित्र्य सार ही रस है। जैसा कि भट्टतोत ने कहा है।

लक्षण, अलंकार, गुण दोष शब्द की प्रवृत्तियां कैशिकीप्रभृति वृत्तियां सन्धि के अंगो का संरम्भ और भी जो कुछ कवि का संभार है जिनमें परस्पर की अनुकूलता के कारण मिलकर प्रतीत होने वाले ह्लादक गुणों से झटिति रस अभिव्यक्त होते हैं। सरल भाषा में रचे गये वृत्तों से चूर्ण बिखरे हुए माने अवद्धस्निग्ध पदों से अर्थात् मुक्तक एवं गद्य तथा सुप्रसिद्ध भाषा से श्लेष रहित मनोहर रचना है और भी जो इस तरह के सभी काव्य हैं जो समीचीन रूप से रस और भावों के अनुभव कारक हैं

मदनानल तप्ताङ्गी तच्चित्रपदमुच्यते ॥१३६॥

दृष्ट्वा स्वप्ने प्रियं यत्र मदनानलतापिता ।
करोति विविधान् भावां स्तद्वै भाविकमुच्यते ॥१३७॥

एतेषां लास्यविधौ विज्ञेयं लक्षणं प्रयोगज्ञैः ।

अभिनवभारती

यच्चेदृक्काव्यमात्रं सद्रसभावानुभावकम् ।
सामान्याभिनये प्रोक्तं वाच्याभिनयसंज्ञया (अ२२) ॥
एवंप्रकारं यत्किचिद्वस्तुजातं कथार्पितम् ।
अन्यूनाधिकसामग्रीपरिणामोन्मिषद्रसम् ॥
रसपोषाय तज्जातं लोकान्नाटचजगत्स्वयम् ॥
प्रतिभायाः प्रगल्भायाः सर्वस्वं कविवेधसः ।

इति संभावनाप्राणनाया हि यल्लोके संभाव्यते परमार्थतः वस्तुतो लोकोत्तरत्वेनैव संभारेण युक्ता कविवाणी हठादेव रसमयी भवति साधारणताप्राणत्वादिति तत्र तात्पर्यम् ॥१३६।१३७॥

ननु लास्याङ्गेभ्यो यान् भागानुपजीवति ते तावदिहोक्ताः, तेषां तु स्वरूपं

बालक्रीड़ा

(मूल) जिसके अङ्ग मदन रूपी अग्नि से सन्तप्त हैं ऐसी नायिका जहां प्रिय की आकृति फोटो माने चित्रको देखकर मन का विनोद करती है उसे चित्रपद कहते हैं ॥१३६॥

(मूल) जहां कामरूपी अग्नि से तपाई गई दुःखित की गई नायिका स्वप्न में प्रिय को देखकर विविध भावों को करती है उसे भाविक कहते हैं ॥१३७॥

उन सबको सामान्याभिनय में वाक्याभिनय नाम से कहा है। इस प्रकार की जो भी कुछ वस्तु है जो नाटकीय इतिवृत्त से प्राप्त है जहां न न्यून है और न अधिक है ऐसी समानरूप से उपस्थित सामग्री के परिणामस्वरूप फलस्वरूप रस का उन्मेष हो रहा है। इस तरह रस को पुष्ट करने के लिए जो नाट्य जगत् स्वयं ही लोक से उत्पन्न हुआ है। वह सब कवि प्रजापति की प्रगल्भ प्रतिभा का सर्वस्व है।

इस तरह की सम्भावना प्राणना है जो लोक में भी संभावित है। परमार्थतः वस्तुतः लोकोत्तर संभार से युक्त कवि वाणी जबरन् रसमयी हो जाती है क्योंकि साधारणतया से भावना प्राण है। यह वहां का तात्पर्य है ॥१३६।१३७॥

लास्य के अंगों से कवि एवं प्रयोक्ता जिन अंशो का उपजीवन करता है उनको यहां कह दिया। किन्तु उनके स्वरूप को नही कहा अतः उनके स्वरूप को कहना

तदिहैव तु यन्नोक्तं प्रसङ्गविनिवृत्तहेतोस्तु ॥१३८॥

पञ्चसन्धि चतुर्वृत्ति चतुःषष्टयङ्गसंयुतम् ।
षट्त्रिंशल्लक्षणोपेतं गुणालङ्कारभूषितम् ॥१३९॥
महारसं महा भोगमुदात्तवचनान्वितम् ।
महापुरुषसंचारं साध्वाचार जनप्रियम् ॥१४०॥
सुश्लिष्टसन्धिसंयोगं सुप्रयोगं सुखाश्रयम् ।

अभिनवभारती

वक्तव्यमित्याशंक्याह एतेषां लास्यविधाविति ॥१३८॥

एतद् दशरूपकलक्षणं कवीनां सुखग्रहणाय राशीकर्तुमाह पञ्चसन्धीत्यादि । नाटकमित्यभिनेयकाव्यमात्रम् । तत्र पञ्चसन्धीत्यादि संभवमात्रे मन्तव्यम् ॥१३९॥

महान्तो रसाः पुरुषोपयोगिनः यत्र । महान् भोगो रञ्जनाप्रधानो रसो यत्र आभोग इत्यन्ये । उदात्तवचनान्वितमिति गुणान् श्लेषप्रसादादीन् स्वीकुरुते ॥१४०॥

सुश्लिष्टसन्धिसंयोगमिति सन्ध्यन्तराणि (च), सुप्रयोगमिति लास्याङ्गानि,

बालक्रीड़ा

(मूल) अभिनय के प्रयोग के जानकारों को लास्य के विधान में उपयुक्त होने वाले इन गेयपदादि लास्याङ्गों को जानना चाहिए। जिनको यहां प्रकृत में नही कहा है। उनको समझना चाहिए कि प्रसङ्ग से निवृत्त करने के हेतु से नही कहा है ॥१३८॥

(मूल) जिसमें पांच सन्धियां हो, चार वृत्तियां हों, चौषठ अङ्ग हों, ३६ लक्षण हों, गुण एवं अलंकार भूषण हों, महान् परिपुष्ट रस हों, महान् भोग हो, उदात्त बचन हो, महापुरुषों का संचार हो, साधु आचार की प्रेमी जनता हो, सुश्लिष्ट सन्धियों का संयोग हो, सुन्दर प्रयोग हो, सुख का आश्रय हो और कोमल शब्दों का अभिधान हो ऐसे नाटक को कवि लोग करें ॥१३९।१४०।१४१॥

चाहिए इस न्यूनताका परिहार करने के लिए करते हैं—एतेषां लास्यविति ॥१३८॥

इस प्रकार कहे दशरूपक के लक्षणों को कवि लोग सुख से विना प्रयास के जान जाँय, इस लिए एक रूप में सङ्ग्रह करने के लिए पञ्चसन्धि इत्यादि कहते हैं । नाटक, यह अभिनेय काव्यमात्र का उपलक्षण है। उसमें पञ्चसन्धि इत्यादि कहना सम्भव है ऐसा मानना चाहिए ॥१३९॥

जहां महान् रस पुरुषों के उपयोगी हैं। जहां महान् भोग, रञ्जन प्रधान रस हैं । कोई आभोग पाठ यहां मानते हैं। उदात्त वचनों से अन्वित कहना श्लेषप्रसादादि गुणों को स्वीकार करता है सन्धियों का योग सुव्यवस्थित है सुश्लिष्ट माने सन्ध्यन्तर है । सुन्दर प्रयोग लास्याङ्गों का संकेत करता है। सुख का आश्रय है अर्थात् वृत्तों

मृदुशब्दाभिधानं च कविः कुर्यात्तु नाटकम् ॥१४१॥
अवस्था या तु लोकस्य सुखदुःखसमुद्भवा ।
नानापुरुषसंचारा नाटकेऽसौ विधीयते ॥१४२॥
न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला ।
न तत् कर्म न वा योगो नाट्येऽस्मिन्यन्न दृश्यते ॥१४३॥

अभिनवभारती

सुखाश्रयमिति वृत्तवैचित्र्यं मृदुशब्दैरभिधानं वर्णना विवक्षितस्यार्थस्य यत्रेति माधुर्यप्रसादार्थव्यक्तिगुणानां प्रकर्षणं सूचयति । एवं नाटकं कुर्यात् ॥१४१॥

यश्च नाटकं कुर्यात् स एव कविः । किं तेनेत्याह अवस्था यात्विति नानापुरुषेषु सञ्चार एको भावानुप्रवेशो रसात्मना यस्याः सा तादृशी यतो नाटके विधीयते संपाद्यते रसरूपतां नीयत इत्यर्थः । उक्तं चैतद्वितस्य ॥१४२॥

ननु सर्वे चात्र किमवस्थाना इत्याशंक्य प्रथमाध्यायोक्तमेव श्लोकद्वयं पठति न तद्ज्ञानमिति, ॥१४३॥

बालक्रीड़ा

(मूल) सुख एवं दुःख के कारणों से उत्पन्न होने वाली एवं नानापुरुषों के सञ्चार से युक्त जो लोक की जनता की अवस्था हैं उसका नाटक में विधान किया जाता है ॥१४२॥

(मूल) ऐसा कोई ज्ञान नही है, न वह शिल्प है, न वह विद्या है, न वह कला है, न वह कर्म है, और न वह योग है जो इस नाटक में न दिखाई पड़ता हो ॥१४३॥

छन्दों का वैचित्र्य है। जहां विवक्षित अर्थ का मृदु शब्दों से अभिधान माने वर्णन है। यह कथन माधुर्य, प्रसाद अर्थ व्यक्ति आदि गुणों के प्रकर्षण को सूचित करता है। इस प्रकार के नाटक को करें ॥१४१॥

जो नाटक का निर्माण करता है वही कवि है। इससे क्या है इस पर कहते हैं कि यह जो अवस्था है। जिसका नाना पुरुषों में सञ्चार है अर्थात् रस रूप से भावों का एक अनुप्रवेश है ऐसी अवस्था का नाटक में विधान करते हैं सम्पादन करते हैं अर्थात् रसरूपता को प्राप्त कराते हैं। इस को विस्तार के साथ कह दिया है ॥१४२॥

प्रश्न— ये सब किस अवस्था में हैं ऐसी आशंका करके प्रथम अध्याय में कहे हुए ही

योऽयं स्वभावो लोकस्य नानावस्थान्तरात्मकः ।
सोऽङ्गाद्यभिनयैर्युक्तो नाट्यमित्यभिधीयते ॥१४४॥
देवतानामृषीणां च राज्ञां चोत्कृष्टमेधसाम् ।
पूर्ववृत्तानुचरितं नाटकं नाम तद्भवेत् ॥१४५॥
यस्मात् स्वभावं संत्यज्य साङ्गोपाङ्गगतिक्रमैः ।
प्रयुज्यते ज्ञायते च तस्माद्वै नाटकं स्मृतम् ॥१४६॥

अभिनवभारती

योऽयं स्वभावो लोकस्येति । एतच्च तत्रैव व्याख्यातमिति किं पुनरुक्तेन ॥१४४।१४५॥

पूर्ववृत्तानुचरितं कथं नाटकशब्दस्यार्थ इत्याह यस्मात्स्वभावं संतज्येति नट नताविति नमनं स्वभावत्यागेन प्रह्वीभावलक्षणं, ये त्वन्ये नटो नतौ इति पठन्ति तन्मतेऽपीह नमते नटशब्दो जनिदाच्यु (उणा. ४-११५) सूत्रेण डटच् प्रत्ययेन

बालक्रीड़ा

(मूल) नाना अवस्थाओं वाला जो जनता का स्वभाव है धर्म है वह चौषठ अङ्गों वाले अभिनय से युक्त नाट्य है ऐसा कहा जाता है ॥१४४॥

(मूल) देवता ऋषि एवं उत्कृष्ट मेधाशाली राजाओं के द्वारा पूर्व में किया गया जो अनुचरित इतिवृत्त है उसी का नाम नाटक है ॥१४५॥

(मूल) क्योंकि अपने भाव महापुरुषत्व या महानुभावत्व को छोड़कर यानी नर्त्तन क्रिया को स्वीकृत करके अङ्ग उपाङ्ग एवं गति के क्रमों से प्रयुक्त किया जाता है और माना जाता है इसलिए इसे नाटक माना है ॥१४६॥

दो श्लोकों को पढते है इनकी व्याख्या वहां कर दी गई है अतः पुनः लिखने की आवश्यकता नही है ॥१४३।१४४।१४५॥

भविष्यति युगे माने वर्त्तमान में त्रेता युग है और भविष्य काल में द्वापर युग आयेगा अतः भविष्यत युग में माने द्वापर युग में अथवा कलियुग में भी है। पूर्व वृत्त का अनुचरित ही नाटक है ऐसा नाटक शब्द का अर्थ कैसे है ? इसको कहते है कि क्योंकि स्वभाव का सम्यक् प्रकार से त्याग करके नाटक, अभिनय किया जाता है। इसका आशय है कि नट शब्द नट नतौ धातु से बनता है। यहां नति नमन का अर्थ है। अभिनेता की क्रिया, नट अपनी स्वाभाविक अवस्था को छोडकर अनुकरणीय

सर्वभावैः सर्वरसैः सर्वकर्मप्रवृत्तिभिः ।
नानावस्थान्तरोपेतं नाटकं संविधीयते ।।१४७।।
अनेकशिल्पजातानि नैककर्मक्रियाणि च ।
तान्यशेषाणि रूपाणि कर्तव्यानि प्रयोक्तृभिः ।।१४८।।
लोकस्वभावं संप्रेक्ष्य नाराणां च बलाबलम् ।
संभोगं चैव युक्तिं च ततः कार्यं तु नाटकम् ।।१४९।।
भविष्यति युगे प्रायो भविष्यन्त्यबुधा नराः ।
ये चापि हि भविष्यन्ति ते यत्नश्रुतबुद्धयः ।।१५०।।

अभिनवभारती

व्युत्पादितो गृहीतव्य इति साङ्गोपाङ्गा ये पदक्रमा गतिवैचित्र्याणि । एतच्च समस्तं नाट्याङ्गोपलक्षणं प्रयुज्यत इति नटैर्ज्ञायते चेति सामाजिकैस्तेनोभयोरपि नमनमुक्तमिति संभावनाकृतमौचित्यम् ।।१४६।१४९।।

बालक्रीड़ा

(मूल) सभी भावों से सभी रसों से एवं सभी प्रकार के कर्मों के आचरण से नाना प्रकार की भिन्न २ अवस्थाओं से युक्त नाटक का संविधान किया जाता है ।।१४७।।

(मूल) जो भी अनेक प्रकार के शिल्प जात हैं और जो भी अनेक प्रकार के कर्मों के आचरण हैं उन सब स्वरूपों का प्रयोग प्रयोक्त लोगों को करना चाहिए ।।१४८।।

(मूल) पहले प्रयोग करने वाले अभिनेता लोग लोगों के स्वभाव, धर्म, गुण क्रिया जाति बलबत्ता दुर्बलता संभोग एवं युक्तियों को देखे समझें और बिचारे । उसके बाद नाटक का अभिनय करें ।।१४९।।

(मूल) आगे आने बाले युग में समय में प्रायः जनता मूर्ख बहुल होगी । और जो भी कोई होगा वह भी बड़े प्रयत्न करने के अनन्तर बहुश्रुत होगा और बुद्धिमान होगा ।।१५०।।

नायक या नायिका के स्वभाव का आश्रय करता है इसमें नट को अपनी प्रकृत अवस्था से अन्य अवस्था में स्थित होने के लिए दबना पड़ता है । जो तो नम नृतौ धातु से नट बनता है पढते हैं उनके मत में भी नमन अर्थ ही है । ज नि दाच्यु ५५४ संख्यक

कर्मशिल्पानि शास्त्राणि विचक्षणबलानि च।
सर्वाण्येतानि नश्यन्ति यदा लोकः प्रणश्यति ॥१५१॥
तदेवं लोकभावानां प्रसमीक्ष्य बलाबलम्।
मृदुशब्दं सुखार्थं च कविः कुर्यात्तु नाटकम् ॥१५२॥
चेक्रीडिताद्यैः शब्दैस्तु काव्यबन्धा भवन्ति ये।
वेश्या इव न ते भान्ति कमण्डलुधरैर्द्विजैः ॥१५३॥

अभिनवभारती

यदुक्तं तस्य प्रयोजनमाह भविष्यति त्रेतायुगापेक्षया द्वापरे कलौ वेत्यर्थः। सुखार्थमित्यर्थव्यक्तिः स्वीकृता ॥१५०।१५३॥

बालक्रीड़ा

(मूल) क्योंकि जब लोग ही नष्ट हो जायँगे तब कर्म शिल्प कारीगरी शास्त्र विचक्षणता एवं बल सभी कुछ नष्ट हो जायेंगे ॥१५१॥

(मूल) अतः लोगों के भावों का वलाबल को समझ कर कोमल शब्दों द्वारा अनायास से विना प्रयास किये ही समझने के योग्य अर्थ वाले नाटक की रचना को कवि लोग करें ॥१५२॥

(मूल) चेक्रीडित आदि अप्रयुक्त एवं कर्णकटु शब्दों से जो काव्य रचे गये हैं या रचे जाते हैं वे काव्य इस तरह सुन्दर नही होते हैं जैसे कमण्डलुधारी द्विजो से संम्पृक्त या संसृष्ट वेश्यायें सुशोभित नही होती हैं ॥१५३॥

इस उणादि सूत्र के द्वारा नम धातु से डट्च् प्रत्यय होने से बनता है। किन्तु नट धातु से बनना नही लिखा है। सूत्र में नमि धातु लिखा है न कि नट धातु। और डट् प्रत्यय नही होता है अपि तु डट्च् प्रत्यय होता है डट् होने पर तो ट् का लोप हो जायगा जैसे भृज् से भाट बनाने के लिए किए गये अटच् में च का लोप होता है। अतः उक्त सूत्र से व्युत्पादित नट शब्द को लेना चाहिए लिखना गडबड है अङ्ग एवं उपाङ्गों के सहित जो पद क्रम हैं यानी गति वैचित्र्य है। यह समस्त नाटयाङ्गों का उपलक्षण है। प्रयुज्य प्रयोग करता है इसका सम्बन्ध नट से है और ज्ञायते अनुभव करता है इसका सम्बन्ध सामाजिक से हैं अतः दोनों को नमन कहा है यह सब संम्भावना कृत औचित्य है। यदुशब्द और सुखार्थ शब्दों से अर्थ व्यक्ति नामक गुण का ग्रहण है ॥१४६।१५३॥

दशरूपविधानं च मया प्रोक्तं द्विजोत्तमाः ।
अतः परं प्रवक्ष्यामि वृत्तीनामिह लक्षणम् ।।१५४।।

इति भारतीये नाटचशास्त्रे सन्धिनिरूपणं
नामाध्याय एकोनविंशः ।।

अभिनवभारती

एतदुसंहरन्नन्यदासूत्रयन्नध्यायमध्यायान्तरेण सङ्गमयति दशरूपविधानं चेति शिवम् ।।१५४।।

द्विजवरतोतनिपितसन्ध्यध्यायार्थतत्त्वघटनेयम् ।
अभिवगुप्तेन कृता शिवचरणाम्भोजमधुपेन ।।

इति श्रीमहामाहेश्वराभिनवगुप्ताचार्यविरचितायां
नाट्यवेदविवृतावभिनवभारत्यामेकोनविंशः
सन्ध्यध्यायः समाप्तः ।।

बालक्रीड़ा

(मूल) हे द्विजोत्तमाः । मैंने आप लोगों के लिए दश रूपको के विधान को निर्माण की प्रक्रिया को कहा अब इसके बाद में वृत्तियों के लक्षण को कहूंगा ।१५४।।

इस प्रकृत १९ वें अध्याय का उपसंहार और अगले अध्याय के विषय में सूत्र रूप से कहते हुए अगले अध्याय का सङ्गमन करते हैं दशरूप के विधान को कहेंगे । इति शिवम् यह इति शब्द अध्याय की समाप्ति सूचक है और शिवं यह अध्यायान्त में मंगल है ।।१५४।।

इस प्रकार आचार्य मधुसूदन शास्त्री की कृति नाट्यशास्त्र के १९ वें अध्याय की बालक्रीडा हिन्दी टीका समाप्त हुई ।

श्रीः

नाट्यशास्त्रम्

विंशोऽध्यायः

समुत्थानं तु वृत्तीनां व्याख्यास्याम्यनुपूर्वशः ।

अभिनवभारती—विंशोऽध्यायः

वृत्त्यध्यायः

निश्शेषशब्दव्यवहारवृत्ति वैचित्र्यमभ्येति यतः प्रतिष्ठाम् ।
श्रोत्रात्मकं तत्परमेश्वरस्य वन्देतमां रूपमरूपधाम्नः ॥

वृत्तिभेदात्काव्यभेदा भवन्तीत्युक्तं दशरूपकारम्भे (१८-५) । तत्र वृत्तयो न ज्ञाता इति तदवधारणार्थमाह समुत्थानं त्विति ।

यद्यपि कायवाङ्मनसां चेष्टा एव सह वैचित्र्येण वृत्तयः ताश्च समस्त जीवलोकव्यापिन्योऽनिदंप्रथमताप्रवृत्ताः प्रवाहेन वहन्ति, तथापि विशिष्टेन हृदयावेशेन युक्ता वृत्तयो नाट्योपकारिण्यः। आवेशश्च तारतम्यलक्षणो द्विधा

बालक्रीड़ा

अरूपधाम रूप रहित परमात्मा के उस श्रोत्रात्म रूप की वन्दना करता हूं जिससे निःशेष शब्दों के व्यवहार की मूल वृत्तियों का वैचित्र्य प्रतिष्ठा को प्राप्त करता है प्रतिष्ठित होता है।

१८ वें अध्याय के पांचवें श्लोक में कहे हैं कि वृत्तियों के भेद से काव्यों के भेद होते हैं। उस समय यह प्रश्न हुआ था कि वृत्तियाँ क्या हैं उनको हम नही जान पाये हैं। इसके निश्चय करने के लिए वृत्तियों के समुत्थान को कहते हैं समुत्थानम् ।

यद्यपि विचित्रता को लिए हुए शरीर वाणी एवं मन की चेष्टाएं ही वृत्तियां हैं जो समस्त जीव लोक में व्याप्त हैं और अनिदं प्रथमता से प्रवृत्त होकर प्रवाह रूप से बह रही है। अर्थात् इन वृत्तियों में यह नही कहा जा सकता है कि यही पहली है। इनमें प्राथम्य का प्रत्यय नही होता है तद्यपि एक विशेष प्रकार हृदय के आवेश से युक्त ये वृत्तियां होती हैं जो नाट्य की विशेष उपकारिणी हैं। आवेश का स्वरूप हृदय का तारतम्य अर्थात् किसी वस्तु की तरफ हृदय का कम या वेशी

यथा वस्तूद्भवं चैव काव्यानां च विकल्पनम् ॥१॥
एकार्णवं जगत् कृत्वा भगवानच्युतो यदा ।
शेते स्म नागपर्यङ्के लोकान् संक्षिप्य मायया ॥२॥
अथ वीर्य बलोन्मत्तावसुरौ मधुकैटभौ ।
तर्जयामासतुर्देवं तरसा युद्धकाङ्क्षया ॥३॥

अभिनवभारती

लौकिकोऽन्यश्च । तत्र लौकिक आवेशः सुखदुःखतारतम्यकृतो न रसागमास्वाद्यो ह्यसावित्युक्तं रसाध्याये (अ६) ॥१॥

अलौकिकस्त्वनावेशोऽप्यावेशमयः कवेरिव सामाजिकस्येव । क्वाप्यवसरे हृदयसंवादसरसस्यैव यो भासते स एव साधारणे चमत्कारगोचर व्यापारविशेषो रसस्योपकरणीभवति । तादृशश्च प्रथमतः कृतयुगारम्भे भगवतो वासुदेवस्यैव । तस्य हि

बालक्रीड़ा

(मूल) अथ अब मैं अभिनवगुप्त क्रमशः वृत्तियों के समुत्थान की व्याख्या करूंगा । जैसे २ वस्तुओं का उद्भव होता है तथा उसी के आधार पर काव्यों के विकल्प होते हैं उन सबका व्याख्यान करूंगा ॥१॥

(मूल) भगवान् अच्युत जब अपनी माया से लोकों का संक्षेप करते हैं तब जगत् में चारों तरफ जलप्लावन के द्वारा एकार्णव करके शेषनाग रूपी पर्यंक पर सोते हैं ॥२॥

(मूल) तब पराक्रम एवं बल उन्मत्त हुए राक्षस मधु और कैटभ युद्ध की इच्छा से बड़े वेग से भगवान् अच्युत की तर्जना करने लगे ॥३॥

झुकाव, अनुकूल एवं प्रतिकूल संयोग । वह आवेश दो प्रकार का है एक लौकिक दूसरा अलौकिक । इनमें लौकिक आवेश सुख एवं दुःख के तारतम्य से ही कमी वेशी के कारण से ही होता है रस के आगम से आस्वाद्य नही होता है इस तथ्य को पहले छठवें रसाध्याय में कह आये हैं ॥१॥

अलौकिक तो आवेश नही होने पर भी आवेशमय है जो कवि की तरह सामाजिक को भासित होता है एवं सामाजिक की तरह कवि को भासित होता है । परस्पर हृदय सादृश्य है ।

किसी अवसर विशेष पर हृदयों के संवाद से हृदयों के परस्पर में मिलन से सरस हुए व्यक्ति को जो भासित होता है वही साधारण जन में चमत्कारकारी व्यापार विशेष के रूप में रस का उपकरण होता है । ऐसा अलौकिक सबसे पहले कृत युग के आरम्भ में भगवान् वासुदेव को ही हुआ था । उसको उस आवेश से

निजबाहू विमृद्नन्तौ भूतभावनमक्षयम् ।
जानुभिर्मुष्टिभिश्चैव योधयामासतुः प्रभुम् ।।४।।
बहुभिः परुषैर्वाक्यैरन्योन्यसमभिद्रवम् ।
नानाधिक्षेपवचनैः कम्पयन्ताविवोदधिम् ।।५।।
तयोर्नानाप्रकाराणि वचांसि वदतोस्तदा ।

अभिनवभारती

स्वफलसिद्धये न किंचित् कर्तव्यमस्ति लोकानुग्रहं मुक्त्वा । यथा हि "न मे पार्थास्ति कर्तव्यं (गीता ३-२२)" इति तेन साधारणस्य भावेन प्रविष्टानावेशेऽप्यावेश-मयो, भगवानेव प्रथमतः नान्यः, पूर्वसर्गगामिनो व्यापारस्य प्रलयमहारजनी-प्रस्तावेन भ्रष्टसंसारत्वात् । अत एवाह—

एकार्णवं जगत्कृत्वा भगवानच्युतो यदा ।
शेते स्म नागपर्यङ्के लोकान् संक्षिप्य मायया ।। इति ।।२-५।।

त्रेतायुगे च नान्यं प्रपत्स्यति । यद्यपि चादिकविर्वाल्मीकिरिति प्रवाद-स्तथापि प्रलयानन्तरं कृतयुगे भाविनि सन्ध्यवसरप्रतिबन्धदर्पदलनजनित-

बालक्रीड़ा

(मूल) वे असुर अपने बाहुओं का मर्दन करते हुए अक्षय कभी क्षीण नही होने वाले और अच्युत कभी नही डिगने वाले प्रभु समर्थ भगवान् मधुसूदन के साथ जानुओं का प्रहार एवं मुष्टियों को मार कर कर के युद्ध करने लगे ।।४।।

(मूल) वे दोनों परस्पर में एक गुट होकर ऐसे दौडते हुए आते हैं जिससे समुद्र भी काँप जाता हैं । बड़ी कठोर वाणी बोलते हैं एवं नाना प्रकार के अधिक्षेप प्रधान वचन कहते हैं ।।५।।

अपने मतलव को प्राप्त करने के हेतु कुछ कर्त्तव्य नही है सिवाय लोकानुग्रह के— जैसा कि गीता के तीसरे अध्याय के २२ वें श्लोक में कहा है 'हे पार्थ ! मेरा कोई कर्त्तव्य नही है । इस तरह साधारण भाव से आवेश में प्रविष्ट नही हुआ । भगवान् ही अन्य कोई नही सर्वप्रथम आवेशमय प्रतीत होता है क्योकि पूर्व में सृष्टि के अन्त कालिक व्यापार के सम्बन्ध से होने वाले प्रलय महारात्रि के प्रस्ताव से संसार भ्रष्ट हो जाता है । इसीलिए कहा है कि एकार्णवम् ।।२।।५।।

त्रेता युग में भगवान् के सिवाय किसी दूसरे को प्रपत्ति नही होती है। यद्यपि यह प्रवाद है कि वाल्मीकि आदि कवि हुए हैं तद्यपि प्रलय के वाद भावी कृत युग में सन्धि के अवसर में होने वाले प्रतिबन्धकों के दर्प को दलन कर देने से

श्रुत्वा त्वभिहतमना द्रुहिणो वाक्यमब्रवीत् ।।६।।

अभिनवभारती

विघ्नापसरण पुरस्सरसृष्टिसम्पत्तौ चिरेण वाल्मीकिमुनेः प्रादुर्भावो भविष्यतीति साधारण्याशयेनैव च भगवानेव वृत्तीनां स्रष्टोक्तः न तौ तु मधुकैटभौ, तयोरावेशेन लौकिकेन व्याप्तत्वात्, उद्रिक्ततमतमस्सन्तानितस्वांतत्वेनाविद्यामयत्वात् । विद्यावकाशवशविकसितहृदयकमलपरिमलरूपत्वाच्च, आनन्दसाररसोपयोगिनो व्यापारावेशस्य भगवत्येव सम्भावनं न तु दैत्ययोः । अतएवाह भगवन् किमियं भारतीवृत्तिर्वाग्भिरेव प्रवर्तते इत्यनेनेमुक्तं भगवानेव हि वृत्तीनां प्रवर्तयिता नटनावेशदर्शनात्, न तु मधुकैटभौ । (तयोः) लौकिकेनैव व्यप्तत्यादिति । द्रुहिणोऽभिहतमना वाक्यमब्रवीदित्यनेन प्रेक्षकत्वं ब्रह्माणः प्रदर्शयन् सामाजिकहृदये विश्रान्तिप्राधान्यं वृत्तीनामाह । तन्निष्ठत्वाद्रसचर्वणाया ।।६।।

बालक्रीड़ा

(मूल) उसी अवसर में नाना प्रकार का उच्चारण करने वाले उन लोगों के वचनों को सुनकर ब्रह्माजी ने कुछ कांपने से असावधान हुए सनसे भगवान् मधुसूदन को कहा ।।६।।

विघ्नों का अपसरण हो जाता है । उसके बाद सृष्टि की सम्पत्ति सृष्टि का निर्माण हुआ तब कहीं बहुत दिनों के वाद बाल्मीकि मुनि का प्रादुर्भाव हुआ । इस तरह साधारण आवेश से युक्त भगवान् ने ही इन वृत्तियों की सृष्टि की है । अतः भगवान् को ही वृत्तियों का सृष्टिकर्त्ता कहा है । न कि मधु एवं कैटभ को वृत्तियों के सृष्टि कर्त्ता कहा है । उन दैत्यों को वृत्ति-सृष्टिकर्त्ता क्यों नही कहा ? इसका हेतु है कि वे दैत्य लौकिक आवेश से व्याप्त थे अत एव घनघोर मात्रा में उद्रिक्त होने वाले तमो गुण से अन्तःकरण के सन्तानित होने से वे अविद्याग्रस्त थे ।

इस लिए विद्या के अवकाश से विकसित होने वाले हृदय कमल के परिमल रूप सौरभस्वरूप आनन्दसार रस के उपयोगी व्यापारावेश की सम्भावना भगवान् में ही की जा सकती है न कि उन दैत्यों में । जिससे कहा है कि हे भगवान् ! क्या यह भारती वृत्ति वाणी से ही प्रवृत्त होती है । इसका आशय है कि नटन के आवेश को देखकर मालूम होता है कि वृत्तियों का प्रवर्त्तयिता भगवान् ही है । न कि मधु और कैटभ । क्योंकि वे लौकिक आवेश से ही व्याप्त थे ।

आघात युक्त मन वाले ब्रह्मा जी ने वाक्य कहा इससे यह दिखाया कि ब्रह्मा केवल प्रेक्षक थे वृत्तियों का प्रधानतया विश्रान्तिस्थान सामाजिकों का हृदय है । क्योकि रस की चर्वणा समाजिक ही करता है । अतः वह चर्वणा सामाजिक निष्ठ ही है ।।६।।

किमियं भारतीवृत्तिर्वाग्भिरेव प्रवर्तिता ।
उत्तरोत्तरसंबद्धा नन्विमौ निधनं नय ।।७।।
पितामहवचः श्रुत्वा प्रोवाच मधुसूदनः ।
कार्यहेतोर्मया ब्रह्मन् भारतीयं विनिर्मिता ।।८।।
वदतां वाक्यभूयिष्ठा भारतीयं भविष्यति ।
तस्मादेतौ निहन्म्यद्येत्युवाच वचनं हरिः ।।९।।

अभिनवभारती

वाक्यग्रहणेन कार्यद्वारको वृत्तीनां नाट्योपयोग इति सूचयति वाग्भिरेवेति । वाचिकप्राधान्ये भारतीवृत्तिः । भारतीशब्देन हि वागुच्यत इति ।।७।।

कार्यहेतोरित्युक्तं तत्कार्यं दर्शयति वदतामिति कवीनामिति यावत् ।।८।९।।

बालक्रीड़ा

(मूल) कि हे मधुसूदन ! क्या केवल वाणी से ही उत्तर प्रत्युत्तरमयी भारती वृत्ति का प्रवर्त्तन करते हैं ? अजी साहब इनका खातमा करिये । अब देरी नही करिये इनको मार डालिए ।।७।।

(मूल) इस प्रकार पितामह ब्रह्माजी की बात को सुनकर भगवान् मधुसूदन ने कहा कि हे ब्रह्मन् ! मैंने अभिनय के उपयोगी इस भारती वृत्ति का निर्माण किया है ।।८।।

(मूल) उत्तर प्रत्युत्तर बहुल वाक्यों के प्रयोग करने वालों की यह भारती वृत्ति होगी । अस्तु । अब मैं इन दोनों को मार डालता हूं । ऐसा भगवान् हरि ने कहा है ।।९।।

वाचमब्रवीत न कह कर जो वाक्यमब्रवीत् कहा इस तरह वाच की वाक्य के ग्रहण से यह सूचित करते हैं कि किसी कार्य के द्वारा नाटच में वृत्तियों का उपयोग होता है । क्योंकि प्रवृत्ति या निवृत्ति रूप कार्य वाक्य से ही होता है । इसी को स्पष्ट करते हैं कि वाग्भिरेव । वाचिक अभिनय में भारती वृत्ति की प्रधानता है । क्योंकि भारती शब्द से वाणी ही कही जाती है ।।७।।

कार्य के द्वारा नाट्य में वृत्तियो का उपयोग होता है । इसमें जो कार्य कहा था उस कार्य को दिखाते हैं । वदतामिति । अर्थात् कहने वाले कवियों के लिए ।।८।९।।

शुद्धैरविकृतैरङ्गैः साङ्गहारैस्तथा भृशम् ।
योधयामासतुर्दैत्यौ युद्धमार्गविशारदौ ॥१०॥
भूमिसंयोगसंस्थानैः पदन्यासैर्हरेस्तदा ।
अतिभारोऽभवद् भूमेर्भारती तत्र निर्मिता ॥११॥

अभिनवभारती

शुद्धैरिति स्वोत्प्रेक्षितवैचित्र्यशून्यैः । अङ्गानां हारान्नयतामिति भृशं युद्धमार्गे विशारदाविति संबन्धः ॥१०॥

भूमि संयोगेन संस्थानमुद्घटितसङ्कुचितादिरूपं येषां, पदन्यासानां न्यस्यमानानां पदानाम् । अतिभार इत्यक्षरसाम्यादपि निर्वचनं दर्शयन् नटव्यापारयोगेऽपि आन्तरविकल्पात्मकाभिः (वाग्भिः) संजल्पबाहुल्ये भारत्येव वृत्तिरिति प्रादर्शयत् ॥११॥

बालक्रीड़ा

(मूल) युद्ध मार्ग में युद्ध की प्रक्रिया में भृश माने अत्यन्त विशारद वे दैत्य शुद्ध एवं अविकृत अङ्गों के द्वारा अङ्गों के साथ नाटकीय अभिनयों की प्रक्रिया के साथ युद्ध करने लगे ॥१०॥

(मूल) हरि के उन पदन्यासों चरणों के उन विन्यासों—जिनमें भूमि पर रखने से चिन्ह बन गये हैं—से भूमि को बड़ा भारी भार मालूम हुआ तब वहां भारती वृत्ति का निर्माण हुआ । अर्थात् युद्धकालिक पदन्यास के भार के बोझे के तनन से विस्तार से भारती वृत्ति बनी । अथ च बहुत अनाप सनाप वाक्यों के प्रयोग के करने से भारती वृत्ति बनी । इस तरह भारती वृत्ति के बनने के दो हेतु बतलाये ॥११॥

शुद्धैः । शुद्ध माने स्वोत्प्रेक्षित अत एव विचित्रता से शून्य आडम्बर रहित । अङ्गों को हार बनाते हुए, इससे यह कहा कि मधु और कैटभ युद्ध मार्ग में युद्ध कला में भृशं माने अत्यन्त विशारद हैं ऐसा अन्वय यहाँ है ॥१०॥

भूमिसंयोगसंस्थान माने भूमि पर पैरो के रखने से संयोग के कारण संस्थान हो जाते हैं लम्बाई चौड़ाई, संकोच एवं विकाश के रूप चिन्ह उद्घटित हो जाते हैं स्फुटित हो जाते हैं । पदन्यास माने रखे जाने वाले पैर । अतिभार 'भारः अभूत' इसमें जो 'भा' 'र' इन अक्षरों के साम्य से तथा अभूत इस पद के अर्थ से लब्ध भवन रूप भाव के साम्य से भार के तनन विस्तार होने के सादृश्य से भारती पद के निर्वचन को दिखाते हुए समझाया कि नरों के व्यापार के संयोग होने पर भी आन्तर बिकल्पात्मक वाणियों के संजल्पन के वाहुल्य में भी भारती ही वृत्ति होती है ॥११॥

वल्गितैः शाङ्‌र्गधनुषस्तीव्रै र्दीप्ततरैरथ ।
सत्त्वाधिकैरसंभ्रान्तैः सात्त्वती तत्र निर्मिता ॥१२॥
विचित्रैरङ्गहारैस्तु देवो लीलासमन्वितैः ।
बबन्ध यच्छिखापाशं कैशिकी तत्र निर्मिता ॥१३॥

अभिनवभारती

सत्वाधिकैरिति मनोव्यापाराधिक्ये सात्त्वतीवृत्तिरित्याह सत्सत्त्वरूपं विद्यते येषां तत्त्वं तेषामियमिति । सत्त्वं च तत्र परच्छिद्रान्वेषणोपायमप्रतितानवैचित्र्योत्प्रेक्षणप्रकाशलाघवात्मकम् ॥१२॥

अत एवाह विचित्रैरिति । स्वोत्प्रेक्षितेन हि वैचित्र्येण विना कथं युद्धविशारदौ जय्यौ स्याताम्, द्वयोर्ह्येकागमानुसन्धानेन युध्यमानयोः सम्बुद्धिकयोः कस्य जयः कस्य पराजयो वा भवेदिति, शिखापाशं पट्टबन्धम्, तुर्हेतौ शृङ्गारस्थानलक्ष्मीसम्भोगादिस्मरणात्, लीलया विलासेन अन्वितः शिखापाशमयेन आबध्योदासीनो वर्तत इति ॥१३॥

बालक्रीड़ा

(मूल) शाङ्‌र्ग धनुष की तीव्रतर दीप्तियों से एवं सत्वगुण बहुल असंभान्त निर्भय वलानों वचनों से वहां उस समय सात्वती वृत्ति का निर्माण किया ॥१२॥

(मूल) लीला समन्वित विचित्र अङ्गहारों को करते हुए भगवान् मधुसूदन ने जो सुन्दर प्रकार से शिखा को बांधा उसके अनुसार कैशिकी वृत्ति का वहां निर्माण हुआ ॥१३॥

सत्त्वाधिकैः । मन के व्यापार की अधिकता में सात्त्वती वृत्ति होती है ऐसा कहते हैं कि सत् मान सत्वरूप तत्त्व जिनके होते हैं उनकी यह सात्त्वती वृत्ति है। उसमें तत्त्व का स्वरूप है प्रकाश और लाघवा जिसका दूसरों के छिद्र मर्मस्थल के अन्वेषण के प्रति तानव वैचित्र्य । यानी विचित्र क्षीणता से उत्प्रेक्षण होता है ॥१२॥

इसी लिए कहा कि विचित्रैः । स्वोत्प्रेक्षित वैचित्र्य के विना युद्ध में विशारद एवं जय्य कैसे हो सकते हैं। एक अर्थ के आगम प्राप्ति का अनुसन्धान निश्चय करके युद्ध करने वाले अथच सम्बुद्धिक युद्ध के लिए ललकारने वालों में किसका जय एवं किसका पराजय हो सकता है। शिखापाश माने पट्ट बन्धन । अङ्गहारैस्तु में कहे हुए तु का अर्थ हेतु है। अतः शृङ्गार की स्थानभूत लक्ष्मी के साथ किये गये सम्भोगादि के स्मरण से । लीला मानो विलास से अन्वित है शिखापाशमयेन आबद्धच, इसमें तृतीया अभेद में है। अतः शिखापाशमय आबन्धन करके उदासीन हो गया है ॥१३॥

संरम्भावेगबहुलैर्नानाचारी समुत्थितैः ।
नियुद्धकरणैश्चित्रै रुत्पन्नारभटी ततः ॥१४॥
यां यां देवः समाचष्टे क्रियां वृत्तिषु संस्थिताम् ।

अभिनवभारती

चारीभिः प्रायेण निश्शङ्कं प्रवर्तमानौ दैत्यौ सुखं निपात्येते मय्येव परिश्रमापनयनं सम्पद्यत इति ॥१४॥

देव इति लोकवदनाविष्टः। यां यामिति वीप्सया सर्वैव क्रिया वृत्तिचतुष्टय-व्याप्तेत्याह न हि वाङ्मनश्चेष्टातोऽतिरिक्तंकर्मास्ति। न च क्रियाशून्यः कश्चिदप्यंशोऽस्ति। मूर्छामोहमरणादावपि सूक्ष्मप्राणपरिस्पन्दाद्यनुमेयसञ्चितपरिस्पन्दसम्भावना। मृतस्तु ताम्रपाषाणप्रख्यो न तस्य वृत्तिकथनेन किंचित्स्वपरम्, अन्यस्य शोकादि-विभावनां प्रतिपाद्यमानः काव्याङ्गतामेति स च तदानीं करुणादिरसाक्रान्तः काव्ये व्यावर्णनीयो भवति। रसभावपर्यवसितो हि सर्वः कार्यसंदर्भः। रसभावाश्च चेतनेष्वेव, तेषु च न व्यापारत्रयशून्यः कश्चिदपि कालांशोऽस्ति। तेन पञ्च वृत्तयो द्वे वृत्ती इत्यादयोऽसंविदितभरताभिप्रायपण्डितसहृदयम्मन्यपरिकल्पि-तसद्भावाः प्रवादा निरस्ता भवन्ति। एतच्च पूर्वमेवास्माभिः प्रदर्शितम्।

बालक्रीड़ा

(मूल) संरम्भ एवं आवेग जहां अधिक मात्रा में है एवं जिनमें नाना प्रकार की चारियों का समुत्थान है ऐसी विलक्षण नियुद्ध प्रक्रिया यानी हाथा पाई की क्रियाओं से, मल्लयुद्ध से वहां उस अवसर में आरभटी वृत्ति उत्पन्न हुई ॥१४॥

चारियो से निशंक प्रवृत्ति करने वाले ये दैत्य सुख से गिराये जा सकते हैं जिससे मेरे ही परिश्रम का अपनयन सम्पन्न होगा ॥१४॥

देव इससे यह प्राप्त होता है कि भगवान् मधुसूदन देव है अर्थात् साधारण लोक की तरह अनाविष्ट है। आवेशवाला नही है। यां यां इस वीप्सा से बतलाया कि सभी क्रियायें इन चार वृत्तियों से व्याप्त हैं। क्योंकि वाणी मन एवं चेष्टा से अतिरिक्त कुछ कर्म नही है। और न क्रिया शून्य कोई अंश है। न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत। प्रश्न—कोई भी अंश क्रिया शून्य नही है यह कैसे हो सकता है क्योंकि मूर्च्छा मोह एवं मरण आदि में कहां क्रिया है। उत्तर! उनमें भी प्राण के सूक्ष्मपरिस्पन्द से जिसका अनुमान किया जा सकता है ऐसे सञ्चित परिस्पन्दनरूप क्रिया की सम्भावना है। जो मर गया है वह ताम्रादि धातु एवं पाषाण तुल्य है अतः उसका वृत्तियों के कथन से कौन उसका स्वरूप निखरेगा। अन्य जो जीवित है उसका वृत्तियों के कथन से शोकादि की विभावना को प्राप्त हुआ अर्थ काव्य का अङ्ग बन जाता है। शोकादि की विभावता को प्राप्त हुआ वह अर्थ भी उस समय करूणादि रस से आक्रान्त हुआ काव्य में विशिष्ट रूप से आसमन्तात् वर्णनीय होता है।

तां तदर्थानुगैर्जप्यैर्हिणः प्रत्यपूजयत् ॥१५॥
यदा हतौ तावसुरौ हरिणा मधुकैटभौ ।
ततोऽब्रवोत् पद्मयोनिर्नारायणन्नरिदमम् ॥१६॥
अहो विचित्रैर्विषमैः स्फुटैः सललितैरपि ।
अङ्गहारैः कृतं देव त्वया दानवनाशनम् ॥१७॥

अभिनवभारती

जप्यैरिति भक्त्यावेशमात्रवृत्ति च दर्शयन् कवेर्मुख्यं रसा(विष्ट)त्वमेव रूपं विस्तारणात्मकवर्णनाप्राधान्यं चेति दर्शयति ॥१५।१६॥

(विषमैः) शस्त्रागममार्गात्मना गम्यप्रकारैः तथा स्फुटैरपि सर्वलक्षण-प्रसिद्धैरपि विचित्रैः स्वार्थोत्प्रेक्षितवैचित्र्यवद्भिः (अद्भु)तैरपि, सललितैरिति लोचनगोचरवर्तित्वेनातिरम्यै-रित्यर्थः ॥१७॥

बालक्रीड़ा

(मूल) भगवान् मधुसूदन ने अपनी वृत्तियों में संस्थित जिस जिस क्रिया को कहा उस उस क्रिया के अनुकूल अर्थ वाले जाप स्तोत्रमय वाक्य से प्रतिपूजन किया ॥१५॥

(मूल) जब हरि ने उन मधु एवं कैटभ नामक असुरों को मारा तब पद्म योनि ब्रह्माजी ने शत्रुओं का दमन करने वाले नारायण को यह कहा ॥१६॥

(मूल) अहो विषम उलझे हुए तथा कठोर होते हुए भी स्फुट एवं ललित अत एव विचित्र अङ्गहारों के द्वारा आपने इन दानवों का नाश किया है ॥१७॥

सभी कार्य सन्दर्भ यानी यावत् क्रियाकलाप रस एवं भाव में पर्यवसित होता है। रस एवं भाव चेतनों में ही होते हैं। चेतनों में भी कोई भी कालांश कोई भी क्षण इन पूर्वोक्त वाणी मन एवं शारीरिक चेष्टारूप व्यापारत्रय से शून्य नही होता है। अतः भरत के अभिप्राय को नही समझने वाले सहृयमान्य पण्डितों ने जिनके सद्भाव की कल्पना कर रखी है—ऐसी वृत्तियां पाँच है, वृत्तियां दो हैं इत्यादि जो प्रवाद हैं वे सब निरस्त हो गये। इस तथ्य को हमने पहले ही दिखा दिया है।

जप्यैः इससे केवल भक्ति के आवेश से होने वाली वृत्ति को दिखाते हुए कवि का रसाविष्ट होना मुख्य रूप है और उसमें विस्तारणा रूप वर्णना का प्राधान्य है। इसको दर्शाया है ॥१५॥१६॥

विषमैः। विषम माने शास्त्र और आगम के मार्गों से आगम्य हैं। तथा स्फुट होते हुए भी, सम्पूर्ण लक्षणों से सिद्ध होते हुए भी विचित्र है अपने अर्थ के लिए प्रयोजन के विषय में उत्प्रेक्षित वृत्तियों से युक्त हुए अद्भुततर हैं। ललितै इससे बतलाया कि लोचनो को दृश्य होते हुए भी अतीव रमणीय हैं ॥१७॥

तस्मादयं हि लोकस्य नियुद्धसमयक्रमः ।
सर्वशस्त्रविमोक्षेषु न्यायसंज्ञो भविष्यति ॥१८॥
न्यायाश्रितैरङ्गहारैर्न्यायाच्चैव समुत्थितैः ।
यस्माद्युद्धानि वर्तन्ते तस्मान्न्यायाः प्रकीर्तिताः ॥१९॥

अभिनवभारती

अयमिति भवदुपज्ञातवैचित्र्यबृंहित इत्यर्थः । नियुद्धसमयक्रम इति समयग्रहणेन वैचित्र्ययोगेऽपि शस्त्रागमापरित्यागमाह । क्रमः परिक्रमणं वा । शत्रुविक्रमणयोगे गतातेस्य निभृतं शस्त्रादिशून्यं नियुद्धं मल्लयुद्धं, तद्गतमपि यदेतद्रूपं तदुत्प्रेक्ष्यवैचित्र्ययोगात्सर्वेषु शस्त्रास्त्रयुद्धेष्वप्युपयोगि भविष्यति । विमोक्षग्रहणात् क्षेप्तव्यकुन्तचक्रादिविषयत्वमेव केचिदाहुः ।

बालक्रीड़ा

(मूल) इसलिए नियुद्ध के मल्ल युद्ध के समय का सिद्धान्तों का यह क्रम सब प्रकार के शास्त्रों के प्रयोग के विषय में लोक का उपयोगी न्याय नाम से व्यवहृत होगा ॥१८॥

(मूल) जब कि ये युद्ध न्याय से समुत्थित है और न्यायाश्रित अङ्गहारों से किये जाते हैं अतः इनको न्याय कहते हैं ॥१९॥

अयमिति । यह प्रत्यक्ष में अनुभूयमान आपके उपज्ञात वैचित्र्य से बृंहित है। ऐसा इसका अर्थ है । नियुद्ध समय क्रमः । इसमें समय पद के ग्रहण करने का आशय है कि नाना प्रकार की विचित्रताओं के योग में भी माने रहने पर भी शास्त्र के आगम का सिद्धान्त का परित्याग नही किया गया है । क्रम माने परिक्रमण है । अथवा क्रम है परिपारी है । शत्रु के द्वारा किये गये विक्रमण के योग के समय में भी गतागत में निभृत माने शास्त्र एवं अस्त्र से शून्य नियुद्ध माने मल्लयुद्ध । इसमें भी जो यह रूप है वह उत्प्रेक्षणीय विचित्रताओं के योग से सभी शास्त्र एवं अस्त्र युद्धों में उपयोगी होगा । विमोक्ष पद के ग्रहण से बतलाया कि फेंकने के योग्य चक्र आदि के द्वारा किये जाने वाले युद्ध के बारे में ही यह वक्तव्य है । ऐसा कोई कहते हैं । वह ठीक नही है क्योकि क्षिप का अर्थ है केवल गिरा देना । अतः खड्गादि युद्धों में भी उसके अर्थ की योजना अप्रतिहत है ॥१८॥

१८ वें श्लोक में 'न्याय संज्ञो भविष्यति' इसमें न्याय शब्द का उपासन भरत मुनि ने किया । तब शिष्य की जिज्ञासा हुई कि न्याय शब्द का क्या अर्थ है । इस जिज्ञासा के शमन के लिए १० वें अध्याय में ७५ वें श्लोक में किये हुए न्याय शब्द के

चारीषु च समुत्पन्नो नानाचारीसमाश्रयः ।
न्यायसंज्ञः कृतो ह्येष द्रुहिणेन महात्मना ॥२०॥
ततो वेदेषु निक्षिप्ता द्रुहिणेन महात्मना ।
पुनरिष्वस्त्रजाते च नानाचारीसमाकुले ॥२१॥
पुनर्नाट्यप्रयोगेषु नानाभावसमन्विताः ।
वृत्तिसंज्ञाः कृता ह्येताः काव्यबन्धसमाश्रयाः ॥२२॥
चरितैर्यस्य देवस्य जप्यं यद्यादृशंकृतम् ।

अभिनवभारती

तच्चासत्, क्षिपेः पातमात्रपर्यवसायिनः खड्गादियुद्धेष्वप्यप्रतिहतार्थयुक्तत्वात् । न्यायशब्दनिर्वचनमाङ्गिकाभिनयनिरूपणायां कृतं स्मारयति न्यायाश्रितैरिति एतच्च तत्रैव व्याख्यातम् ॥१८।२२॥

एवं वृत्तीनामुत्पत्तिर्व्याख्याता । आसामेव नाट्यं प्रत्यवार्णं कर्तुमाह चरितैर्यस्येति भगवद्विश्वचरितैर्गर्भाधेयभूतैः उपलक्षितं यत् पूर्वं ब्रह्मणा

बालक्रीड़ा

(मूल) नाना प्रकार की चारियों का आश्रयण करके चारियों में, व्यवहारों में जो युद्ध हुआ है अतः ब्रह्माजी ने इसकी संज्ञा न्याय की है ॥२०॥

(मूल) उसके बाद ब्रह्माजी ने इन वृत्तियों का वेदों में निक्षेप किया। उसके बाद नाना तरह की चारियों से समाकुल इष्वस्त्र के धनुष के प्रयोग में उपन्यस्त किया। और फिर नाट्य के प्रयोगों में रूपकों के अभिनयों में नाना भावों से समन्वित और काव्यों की रचना का आधारभूत इन न्यायों को वृत्ति की संज्ञा दी ॥२१।२२॥

निर्वचन की याद दिलाते हैं न्यायाश्रितैः। इसकी व्याख्या वहां यों की है कि अपने २ विषय के अनुकूल अङ्गों का युगपत् प्रचार नृत्तमातृका होती है। उनमें दो तीन या चार मातृकारों अविच्छिन्न रूप से की जाने वाली क्रियाओं की तरह करण हो जाती हैं। करणों का अविच्छिन्न प्रयोग अङ्गहार है। उसी प्रकार अन्यस्थलों की तरह युद्धादिक में भी नृत्तमातृका के स्थान में स्थानकादि क्रिया विशेष की न्याय संज्ञा है। अङ्गों के अनुकूल क्रियाओं के द्वारा दुश्मन को ध्वस्त करने की एवं अपनी सुरक्षा करने की प्रक्रिया से युद्ध करने वाले योद्धाओं की पारस्परिक क्रिया विशेष की संज्ञा न्याय है ॥१९॥२०॥२१॥२२॥

इस प्रकार वृत्तियों की उत्पत्ति का व्याख्यान कर दिया। अब इन्हीं को नाट्य के प्रति अवतारण करने के लिए कहते हैं कि चरितैर्यस्य। गर्भसन्धि में आधान करने के लिए आधेयभूत एवं विश्वव्यापक भगवान के चरितों से उपलक्षित जैसा

ऋषिभिस्तादृशी वृत्तिः कृता पाठ्यादिसंयुता ॥२३॥

नाट्यवेदसमुत्पन्ना वागङ्गाभिनयात्मिका ।

मया काव्यक्रियाहेतोः प्रक्षिप्ता द्रुहिणाज्ञया ॥२४॥

अभिनवभारती

जप्यं स्तोत्रकाव्यरूपं कृतं, तादृशं भावादिचेष्टाप्रधानं, तादृश्येव वृत्तिः । ऋषिभिः ब्रह्मपुत्रैः पाठ्यादिभिः सम्यग्युक्ता कृता अनुसृता । तद्यथा पाठ्यप्रधाना भारती, अभिनयप्रधाना सात्त्वती, अनुभावाद्यावेश[स]मय-रसप्रधानारभटी, गीतवाद्योपरञ्जकप्रधाना कैशिकीति । अत एव वक्ष्यति ऋग्वेदाद्भारतीत्यादि नाट्यवेदोत्पत्तौ प्रथमाध्याये व्याख्याता या सा ॥२३॥

द्रुहिणाज्ञा कैशिकीमपि योजय (१-४२) इत्यादिका या यया । काव्यस्य काव्यरूपतापादनं, तदेव हेतुः, ततः । प्रकर्षेण क्षिप्ता येनाभिनेयानभिनेय-काव्यवैलक्षण्यमित्यर्थः ॥२४॥

बालक्रीड़ा

(मूल) जिस देव के चरितों से उपलक्षित जैसा जो जप्य द्रुहिण ने किया यानी स्तोत्रमय काव्य बनाया । उसी का अनुसरण करने वाले ऋषियों ने अभिनेताओं के उपयोगी पाठ्यों से संयुक्त वैसी वृत्ति बनाई ॥२३॥

(मूल) नाट्य वेद से उत्पन्न हुई इन वाणी एवं अङ्गों के अभिनय स्वरूप वृत्तियों को ब्रह्माजी की आज्ञा से मैंने नाटकों के निर्माण हेतु काव्यों में रख दिया ॥२४॥

ब्रह्माजी ने पहले स्तोत्र काव्यरूप जप्य को किया था भावादि चेष्टा प्रधान वैसे ही जप्य और वैसी ही वृत्ति का ब्रह्मा पुत्र ऋषियों ने पाठ्य आदि की सम्यक् योजना करके अनुसरण किया ॥२३॥

वे जैसे पाठ्य जहां प्रधान है ऐसी भारती है, मनोरञ्जन करने वाले गीत एवं वाद्य जहां प्रधान है ऐसी कैशिकी है । अभिनयों की प्रधानता वाली सात्वती वृत्ति है । अनुभावादि के आवेश से मय माने प्राप्त होने वाले (यहाँ तत आगतः आधि-कार में विहीत आगतार्थक मयट् प्रत्यय है ।) रस जहां प्रधान है ऐसी आरभटी वृत्ति है । अत एव आगे चलकर कहेंगे कि ऋग्वेद से भारती वृत्ति को लिया इत्यादि नाट्यवेद की उत्पत्ति के समय में प्रथम अध्याय में जिनका व्याख्यान किया वे वृत्तियां है । द्रुहिण ब्रह्मा जी की आज्ञा से कैशिकी वृत्ति की भी योजना करे ॥२३॥

इत्यादि जो व्याख्यान किया या निर्देश किया उसके अनुसार काव्य की जो क्रिया है काव्य रूपता का आपादन है वही हेतु है । इसी हेतु के आधार पर प्रकर्ष से प्रक्षेपण किया जाता है जिससे अभिनेय एवं अभिनेय काव्यों का वैलक्षण्य होता है ॥२४॥

ऋग्वेदाद्भारती क्षिप्ता यजुर्वेदाच्च सात्वती ।
कैशिकी सामवेदाच्च शेषा चाथर्वणादपि ॥२५॥

या वाक्प्रधाना पुरुषप्रयोज्या स्त्रीवर्जिता संस्कृतपाठ्ययुक्ता ।

अभिनवभारती

ननु भगवतां वासुदेवेनाप्यंशावतारत्वात्संभाविता यास्ताः काव्यक्रियोदये मुनिना कुत इमा वृत्तय आनीता इत्याशङ्क्याह ऋग्वेदादित्यादि । छन्दोमयश्च परमेश्वरो नान्यत इति भावः ॥२५॥

अथासां परस्परसङ्कीर्णतया लक्ष्ये बहुरूपतां वहन्तीनां यत्र यत्प्राधान्येनान्यतमरूपावभासनं तत्प्रदर्शयितुमुत्तरो ग्रन्थः । वाङ्मःनकायचेष्टांशेषु न ह्येकः कश्चिदपिचेष्टांशोऽस्ति । यथा कायचेष्टा अपि हि मानसीभिः सूक्ष्माभिश्च

बालक्रीड़ा

(मूल) उनमें ऋग्वेद से भारती को, यजुर्वेद से सात्वती को, सामवेद से कैशिकी को एवं अवशिष्ट आरभटी को अथर्ववेद से आक्षिप्त किया आकृष्ट किया ॥२५॥

भगवान् वासुदेव कभी तूर्णावतार लेते हैं कभी अंशावतार लेते हैं। उनमें नृसिंह १, राम २, कृष्ण ३, ये तूर्णावतार हैं। पृथु परशुराम वामनादि अंशावतार हैं। जैसा कि लिखा है—

भगवतोऽवतारा द्विविधाः अनुप्रवेशावताराः १ स्वरूपावताराः। अकर्महेतुत्वा विशेषादुभयत्रावतार शब्द प्रयोगः । तत्रानुप्रवेशावतारोनाम जीवेषु स्वस्यानुपवेशेन स्वीयज्ञानशक्त्यादी नायाविष्करणं स एवांशावतार इति च कथ्यते। इत्यपि कथ्यते।

प्रश्न—भगवान् वासुदेव ने जिन वृत्तियों की अंशावतार रूप में सम्भावना की थी उन वृत्तियों को ये भरत मुनि काव्य क्रिया के उदय में कहां से ले आये। इसके उत्तर में कहते है कि ऋग्वेद आदि से। परमेश्वर भगवान् वासुदेव छन्दोमय हैं अतः छन्द से अन्य कहां से ले आते। अतः वेद से ही लाये हैं अन्य से नही ॥२५॥

अब परस्पर में संकीर्ण यानी मिश्रित होने से बहुरूपता को धारण करने वाली इन वृत्तियों में जहां जिसका प्रधान रूप से अवभास होता है उसको दिखाने के लिए अगले ग्रन्थ को लिखते हैं। वाक्चेष्टा, मनश्चेष्टा एवं कायचेष्टा ये तीन चेष्टांश है इनमें कोई भी चेष्टांश अकेला नही रहता है अर्थात् एक चेष्टांश दूसरे चेष्टांश से मिलाजुला रहता है। जैसे—काय चेष्टाएँ भी मानसी चेष्टाओं एवं सूक्ष्मवाचिकी

अभिनवभारती

वाचिकीभिश्चेष्टाभिर्व्याप्यन्त एव । "न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते" (वाक्यपदीयं १-१२४) इति न्यायात्, मानस्यपि वाचिक्यपि चेष्टा अवश्यं सूक्ष्मं कायपरिस्पन्दमन्दप्राणव्यापाररूपं नाति वर्तते । तदुक्तम्—

अर्थक्रियासु वाक् सर्वाः समीहयति देहिनः ।
तदुत्क्रान्तौ विसंज्ञोऽयं दृश्यते काष्ठकुड्यवत् ।। (सङ्ग्रहः)

न च रसोपयोगिलालित्यभागशून्यः कोऽपि नाट्ये परिस्पन्द इत्यन्योन्यं संवलिता वृत्तयः केवलं क्वचित्किंचिदधिकमिति प्राधान्येन व्यपदेशः परिवर्तते ।

तत्र भारत्याः प्राधान्यं दर्शयति या वाक्प्रधानेति । स्त्रीवर्जितेति कैशिकीप्राधान्यावकाशं गमयति । संस्कृतेति वचसा प्राकृतपाठ्यलालित्यात्

बालक्रीड़ा

चेष्टाओं से व्याप्त रहती हैं वह ऐसा कोई भी प्रत्यय लोक में नही है जो शब्द के अनुगम के बिना हो सकता है। इस वाक्यपदीय न्याय के अनुसार सभी जगहों की चेष्टाओं में वाचिकी चेष्टाएँ अवश्य रहती है। इसी तरह मानसी एवं वाचिकी चेष्टाएँ भी अवश्य ही काय के सूक्ष्म परिस्पन्द से होने वाले मन्द प्राण व्यापार रूप का अतिवर्त्तन यानी अतिक्रमण नही करती है । जैसा कि कहा है—

यह वाक् देही की अर्थ सम्बन्धी सभी क्रियाओं में चेष्टाओं में व्याप्त है सभी क्रियाओं का समीहन करती है। अतः वाणी के उत्क्रमण होने पर यह काष्ठ एवं कुड्य की तरह विसंज्ञ निश्चेष्ट दिखाई पड़ता है। इस श्लोक को महावैयाकरण भर्तृहरि ने व्याडि के संग्रह ग्रन्थ से उद्धृत करके अपने वाक्यपदीय ग्रन्थ की वृत्ति में उदाहरण के तौर पर लिखा है।

नाट्य में ऐसा कोई भी परिस्पन्द नही है जो रस के उपयोगी लालित्य एवं औचित्य के भाग से रहित हो अतः ये वृत्तियां परस्पर में संवलित हैं। फरक इनमें केवल इतना ही है कि कहीं कोई अधिक है कहीं कोई कम है। जहां जो अधिक है वही वहां प्रधान है अतः उसी प्रधान के नाम से व्यवहार चलता है ।

उनमें भारती का प्राधान्य दिखलाते हैं या वाक् प्रधाना। वाणी की प्रधानता के निर्देश करने का आशय है कि अन्य चेष्टाएँ भी हैं किन्तु अप्रधान रूप से वे हैं। क्योंकि प्रधानाप्रधान भाव परस्पर सापेक्ष होता है । स्त्रीवर्जिताः कहना अपने विषय में कैशिकी की प्रधानता के लिए अवकाश को सूचित करता है। 'संस्कृत' यह वचन सूचित करता है कि प्राकृत पाठ्य के लालित्य के अनुसार कैशिकी का

स्वनामधेयैर्भरतैः प्रयुक्ता सा भारती नाम भवेत्तु वृत्तिः ॥२६॥

भेदास्तस्यास्तु विज्ञेयाश्चत्वारोऽङ्गत्वमागताः ।
प्ररोचनामुखं चैव वीथी प्रहसनं तथा ॥२७॥

लोकाभ्युदयिनी चैव मङ्गल्या विजयावहा ।
सर्वपापप्रशमनी पूर्वरङ्गे प्ररोचना ॥२८॥

अभिनवभारती

कैशिकीमवश्यमाक्षिपेदिति सूचयति । भरतैरिति नटैः स्वतो वंशकरं नामधेयं येषां (तैः), भरतसंतानत्वाद्धिते भरताः ॥२६॥

भेदा इति अंशामित्यर्थोऽत्र न तु प्रकाराः, त्रैलोक्यव्यापिन्या हि भारत्याः कश्चिदंशः प्ररोचनारूपः, एवमामुखस्वभाव इत्यादि । अत एवाह अङ्गत्वमिति अंशत्वं प्राप्ता इत्यर्थः, अन्यथा यदि रूपकस्याङ्गत्वं प्राप्ता इत्युच्यते तदा वीथी प्रहसनं च रूपक भेदः, न तु रूपकस्याङ्गम् । तथा नाट्यस्याङ्गत्वं प्राप्ता नाट्यमिति

बालक्रीड़ा

(मूल) शब्द प्रधान, पुरुषों के द्वारा प्रयोज्य, स्त्री पात्रों से रहित एवं संस्कृत पाठ्य से युक्त जो वृत्ति है वह भारती वृत्ति होनी चाहिए इस वृत्ति का प्रयोग वे लोग करें को जो अपने को भरत नाम से विख्यात करते हैं ॥२६॥

(मूल) उस वृत्ति के प्ररोचना, आमुख, वीथी तथा प्रहसन रूप से अङ्गत्व को प्राप्त होने वाले चार भेदों को विद्वान् लोग समझें ॥२७॥

(मूल) दशरूपकों में प्ररोचना का प्रयोग पूर्व रङ्ग में किया जाना चाहिए । यह प्ररोचना लोक का जनता का अभ्युदय करने वाली है मंगल कारिणी एवं विजयावहा है । तथा अभिनेताओं के दोषों का प्रशमन करने वाली है ॥२८॥

अवश्य ही आक्षेप करना चाहिए। भारतैः से सूचित होता है जिनका स्वतः वंश परम्परा प्राप्त यह भरत या नट नाम है । भरत की सन्तान होने से वे भरत हैं ॥२६॥

भेदाः । यहां भेदाः का अर्थ अंश है न कि प्रकार । यह भारती त्रैलोक्य व्यापिनी है इसका कोई अंश प्ररोचना रूप है इस प्रकार आमुख भी स्वभावतः अंश है । इसी लिए कहते हैं कि अङ्गत्व को अंशत्व प्राप्त हो गये यह अर्थ है । अन्यथा यदि अंशत्व को प्राप्त हो गये ऐसा अर्थ नही मानेंगे और रूपक के अङ्गत्व को प्राप्त हो गये ऐसा अर्थ करेंगे तब वीथी और प्रहसन रूपक के भेद हुए न कि रूपक के अङ्ग । अतः नाट्य के अङ्गत्व को प्राप्त हो गये का आशय है कि नाट्य एक समुदाय हैं उसके ये अंश है ।

उपक्षेपेण काव्यस्य हेतुयुक्तिसमाश्रया ।
सिद्धेनामन्त्रणा या तु विज्ञेया सा प्ररोचना ॥२९॥
नटी विदूषको वापि पारिपार्श्विक एव वा ।
सूत्रधारेण सहिताः संलापं यत्तु कुर्वते ॥३०॥
चित्रैर्वाक्यैः स्वकार्योत्थैर्वीथ्यङ्गैरन्यथापि वा ।
आमुखं तत्तु विज्ञेयं बुधैः प्रस्तावनापि वा ॥३१॥

अभिनवभारती

समुदायः यदि । वा एकैकमपि काव्यं दशरूपभित्युक्तं प्राक् । पूर्वरङ्ग इति तद्विषये, प्ररोचना पूर्वमुक्ता तत्र च कृते या प्ररोचना सा भारत्यंश इत्यर्थः ॥२७।२८।२९॥

नटीत्यादिना आमुखं लक्षयति । वा शब्देन व्यस्तानां नटीप्रभृतीनां सूत्रधारेण सङ्घातमाह । अपिशब्देनात्मना समस्तानां द्वितीयो वा शब्दः समस्तव्यस्तां विकल्पयति । एवशब्दः सूत्रधारस्यावश्यंभावं दर्शयति ॥३०॥

बालक्रीड़ा

(मूल) काव्य के उपक्षेप करने में अर्थात् काव्य के नाम रखने में हेतु और युक्ति का आश्रयण करने वाली तथा सिद्ध के द्वारा जिसमें आमन्त्रण किया जाता हो उसे प्ररोचना समझना चाहिए ॥२९॥

(मूल) नटी विदूषक और पारिपार्श्विक जो तो सूत्रधार के साथ स्वकार्योत्थ नटों की अपनी क्रिया के अनुसार किये जाने वाले चित्र आश्चर्यमय वाक्यों से अथवा भिन्न भिन्न प्रकार के वाक्यों से अथवा बीथी के अङ्गों के आधार पर तथा अन्य प्रकार से संलाप करते हैं वार्त्तालाप करते हैं उसको बुध लोग आमुख अथवा प्रस्तावना समझें ॥३०।३१॥

यदि वा एक एक काव्य दशरूप है ऐसा कि पहले कहा है। पूर्व रङ्ग के विषय में प्ररोचना को पहिले कहा है। उसके लिए जो प्ररोचना है वह भारती का अंश है। ऐसा इसका अर्थ है ॥२७॥२८॥२९॥

नटी इत्यादि श्लोक से आमुख का लक्षण लिखते हैं। वा शब्द से नटीप्रभृति व्यस्त पात्रों का सूत्रधार के साथ होने वाले संघात को कहते हैं। अपि शब्द से अपने सहित समस्त पात्रों के संघात को कहते हैं। एक वा शब्द है—'नटी विदूषको वा' इसमें और दूसरा वा शब्द है—'पारिपार्श्विक एव वा' में यह दूसरा वा शब्द विकल्यार्थक है अतः व्यस्त एवं समस्त पात्रों के विकल्प को कहता है। और इसी में कहा हुआ एव शब्द सूत्रधार का अवश्य होना बतलाता है ॥३०॥

अभिनवभारती

चित्रैरिति भाविरूपकार्थानुकूलविषयानुसारिभिः, स्वं कार्यं नटव्यापारं, वीथ्यङ्गैरिति श्लिष्टवक्रोक्तिप्रत्युक्तिप्रायैरित्यर्थः, यथा प्रतिमानिरुद्धे "पीताम्बरगुरु शक्त्या हरत्युषां प्रसभमनिरुद्धः" इत्यादि । अन्यथेति स्पष्टोक्तिप्रत्युक्तिभिः, यथा नागानन्दे "नाटयितव्ये किमित्यकारणमेव रुद्यते" इत्यादि । आमुखमिति मुखसन्धेर्निवर्तते यत्रः, आङ्मर्यादायाम्, यदि वात्रामुखं प्रारम्भमीषन्मुखं वा प्रस्ताव्यतेऽनयेति (प्रस्तावना) बाहुलकेन तच्छीलसंज्ञयोरिति निकारो न भवति । तत्र कदाचित्कार्याभिमुखं नीयते पूर्वरङ्गविधिः, तदभिमुखं वा कार्यारम्भः तन्नीयते, सा द्विधेति (५-१८०) पूर्वरङ्गाध्याये दर्शितमस्माभिः । एवं च यदा स्थापकोऽपि सूत्रधारतुल्यगुणाकारो रामादिवदेव प्रयुज्यते तदेदं कविकृतमामुखं भवति ।

बालक्रीड़ा

कर्णिका कर्णवलयं तथा स्यात्पत्रकर्णिका ।
कुण्डलं कर्णमुद्रा च कर्णोत्कीलकमेव च ॥२५॥
नानारत्नविचित्राणि दन्तपत्राणि चैव हि ।

अभिनवभारती

सन्धानतया चित्ररचनानि वर्तुलानि पत्राणि पिण्डीपत्राणि चूडामणि: शिरोमध्ये, ततो मकरपत्रं (मकरिका), ततो ललाटान्तमुक्ताजालिका तोरणं जालिकादिरूपेण प्रसिद्धा । सर्पस्यैव वा शिरस एकमेव सुवर्णमुक्तामणि-चित्रितम् । खेला (डोला) प्रायं शीतर्षः ज़ोलकं भूषणं शिखिपत्रं मयूरपि-

बालक्रीड़ा

(मूल) शिखापाश शिखाव्याल पिण्डीपत्र चूडामणि मकरिका मुक्ताजालगवाक्षक और शीर्षजोलक ये विचित्र शिराभूषण हैं ॥२२॥

(मूल) कण्डक शिखिपत्र वेणीपुच्छ एवं दोरक ये नाना प्रकार कारीगरी से बनाये गये ललाट भूषण हैं जो ललाटतिलक की तरह शोभावायक हैं ॥२३॥

(मूल) कुसुम की अनुकृति करने वाला माने पुष्प के सदृश गुच्छा जिसको हिन्दी में गुलदस्ता कहते हैं यह भ्रुकुटियों का भूषण है ॥२४॥

(मूल) कर्णिका कर्णवलय पत्रकर्णिका कुण्डल कर्णमुद्रा कर्णोत्कीलक ॥२५॥

(मूल) नाना प्रकार के रत्नों से सुन्दर दन्तपत्र और कर्णपूर ये कानो के भूषण हैं ॥२६॥

जहां सिन्दूर लगाया जाता है, वहाँ चूडामणि पहनी जाती है। ललाट के समीप ये मछली के आकार के पत्र में मोतियों का गुच्छा तोरण में लगी हुई मुक्ताजालिका की तरह प्रसिद्ध है ॥२२॥

शिर का एक रूप वाला मणियों का बना भूषण शिर्षजोलक और चित्रक नाम से जाना जाता है जो प्रायः शिर के समीप में ही धारण किया जाता है। यह नाना प्रकार के रंग वाली मणियों से बना हुआ मयूर के पिच्छ के आकार का होता है ॥२३।२४॥

कर्णयोर्भूषणं ह्येतत्कर्णपूरस्तथैव च ॥२६॥
तिलकाः पत्रलेखाश्च भवेद्गण्डविभूषणम् ।
त्रिवणी चैव विज्ञेयं भवेद्वक्षोविभूषणम् ॥२७॥
नेत्रयोरञ्जनं ज्ञेयमधरस्य च रञ्जनम् ।
दन्तानां विविधो रागश्चतुर्णां शुक्लतापि वा ॥२८॥
रागान्तरविकल्पोऽथ शोभनेनाधिकोज्ज्वलः ।
मुग्धानां सुन्दरीणां च मुक्ताभासितशोभनाः ॥२९॥
सुरक्ता वापि दन्ताः स्युः पद्मपल्लवरञ्जनाः ।
अश्मरागोद्द्योतितः स्यादधरः पल्लवप्रभः ॥३०॥

अभिनवभारती

ञ्छाकारो विचित्रवर्णमणिरचितः । कर्णावतंसकः । कर्णिक्रेत्यादिना विकल्पतः कर्णाभरणान्यपि तु स्थानान्तरभेदात्समुच्चयेनेत्याहुः ।

बालक्रीड़ा

(मूल) तिलक और पत्रलेखा ये कपोल के भूषण हैं। त्रिवेणी वक्षःस्थल का भूषण है ॥२७॥

(मूल) नेत्र का भूषण अञ्जन है और अधर का भूषण रञ्जन रंगना है। दांतो का भूषण विविध राग है। आगे के मुख्य चार दांतो की शोभा शुक्लता है ॥२८॥

(मूल) विभिन्न रागो से बनाये जाने के बदौलत जिसमें विकल्प होता है अर्थात् ऐसा भी यह हो सकता है या ऐसा भी हो सकता है। और जिसको सजाने पर अधिक उज्ज्वल हो जाता है। जिससे मुग्धाषोडशवार्षिकी सुन्दरी नायिकाओं के कमल पल्लवों के सदृश रंगे हुए दांत मोती की चमक की तरह सुन्दर मालूम होने लगते हैं ॥२९॥

(मूल) अश्मराग से उद्द्योतित हुआ अधार कोमल नवीन पत्र की तरह प्रतीत होता है। इन आभूषणों के धारण करने के फलस्वरूप उनमें शृङ्गारमय निरीक्षण के साथ विलास माने क्रीडायें होने लगती हैं ॥३०॥

कर्णेत्यादि से कर्ण भूषणों को प्रादेशिक भेद से नाना प्रकार से कर्ण भूषणो को समुच्चय कर के कह दिया ॥२५-३०॥

विलासश्च भवेत्तासां सविभ्रान्तनिरीक्षितम् ।
मुक्तावली व्यालपङ्क्तिर्मञ्जरी रत्नमालिका ।।३१।।
रत्नावली सूत्रकं च ज्ञेयं कण्ठविभूषणम् ।
द्विसरस्त्रिसरश्चैव चतुस्सरकएवच ।।३२।।
तथा शृङ्खलिका चैव भवेत्कण्ठविभूषणम् ।
अङ्गदं वलयं चैव बाहुमूलविभूषणम् ।।३३।।
नाना शिल्पकृताश्चैव हारा वक्षोविभूषणम् ।
मणिजालावनद्धं च भवेत् स्तनविभूषणम् ।।३४।।
खर्जूरकं सोच्छितिकं बाहुनालीविभूषणम् ।।
कलापी कटकं शङ्खो हस्तपत्रं सपूरकम् ।।३५।।

अभिनवभारती

विलासः । तेनायमर्थः—एवं भूतेन दन्ताधररागवैचित्र्ये सति, सविभ्रान्त-

बालक्रीड़ा

(मूल) मुक्तावली व्यालपंक्ति मकरी रत्नमालिका रत्नावली और सूत्रक ये कण्ठ के विभूषण हैं ।।३१।।

(मूल) दो लडवाली तीन लडवाली एवं चार लडवाली शृंखलिका भी कंठ का भूषण होती है ।।३२।।

(मूल) अङ्गद और वलय भी बाहुमूल में पहिरने के योग्य भूषण होते हैं ।।३३।।

(मूल) नाना प्रकार की कारीगरी से तैयार किये गये हार वक्षःस्थल के भूषण होते हैं । बहुत सी मणियां जिसमें जडी हुई है गुम्फित है ऐसे आभूषण स्तनों के शोभाधायक होते हैं ।।३४।।

(मूल) उच्छिति के सहित माने उच्छाय से युक्त खजूर के जैसा गहना बाहुनाल में माने कूहनी से नीचे और मणिबन्ध के ऊपर पहिरने के योग्य भूषण होता है । कलापी कटक शंख हस्तपत्र पूरक और मुद्रा के आकार वाला अंगुलीयक अंगुलियों का गहना है ।।३५।।

विलास—उससे इसका यह अर्थ है कि दांतो एवं अधर की लाली से वैचित्र्य होने पर सविभ्रम अर्थात् शृङ्गार चेष्टाओं के साथ निरीक्षण करते हुए जो हाथ है वह अत्यन्त हृद्य अर्थात् मनोहर है इस प्रकार के हास्य से विलास सम्पन्न होता है ।

मुद्राङ्गुलीयकं चैव ह्यङ्गुलीनां विभूषणम् ।
मुक्ताजालाढ्यतलकं मेखला काञ्चिकापि वा ॥३६॥
रशना च कलापश्च भवेच्छ्रोणीविभूषणम् ।
एकयष्टिर्भवेत्काञ्ची मेखला त्वष्टयष्टिका ॥३७॥
द्विरष्टयष्टी रशना कलापः पञ्चविंशकः ।
द्वात्रिंशच्च चतुःषष्टिः शतमष्टोत्तरं तथा ॥३८॥
मुक्ताहारा भवन्त्येते देवपार्थिवयोषिताम् ।
नूपुरः किङ्किणीकाश्च घण्टिका रत्नजालकम् ॥३९॥

अभिनवभारती

निरीक्षितं यत् स्मितं तद्भवेदतीवहृद्यं (विलासः) संपाद्यत इति तावत् । तलकमिति कवाटद्वययोजितम् ।

यष्टिरिति लता । नूपुरो जान्वधः । किङ्किणीका घण्टिकालग्ना

बालक्रीड़ा

(मूल) जिसके तल में अनेक मुक्ताएँ जडी हों ऐसी मेखला, काञ्चिका, रशना और कलाप ये कमर के भूषण हैं ॥३६॥

(मूल) इन कमर के गहनों में एक लडवाली काञ्ची आठ लडवाली मेखला सोलह लडवाली रशना एवं पच्चीस लडवाली कलाप है ॥३७॥

(मूल) ३२ मोतियों का ६४ मोतियों का १०० मोतियों का और १०८ मोतियों का हार होता है। ये गहने देवाङ्गनाओं के और राजाङ्गनाओं के होते हैं ।३८।

(मूल) भूपुर, किंकिणीक, घण्टिका, रत्न जालक एवं घोषयुक्त कटक ये विभूषण गुल्य के ऊपर पहिरने के लिए होते हैं ।३९

तलक—अर्थात दो कपाटों (दरवाजों के पल्लों) को मिला देना ॥३१-३६॥

यष्टि माने लता ॥३७-३८॥

नूपुर—अर्थात् बिछुवा, जानु के नीचे पहने का भूषण है ।

किङ्किणीका—नूपूर जिसमें घुंघरु लगे हुए हों ।

प्रपद माने पाद के अग्र भाग को आच्छादित करने वाला जालीदार बिछुआ ॥३९॥

सघोषे कटके चैव गुल्फोपरिविभूषणम् ।
जङ्घयोः पादपत्रं स्याद ङ्गुलीष्वङ्गुलीयकम् ।।४०।।
अङ्गुष्ठतिलकाश्चैव पादयोश्च विभूषणम् ।
तथालक्तकरागश्च नानाभक्तिनिवेशितः ।।४१।।
अशोकपल्लवच्छायः स्यात् स्वाभाविक एव च ।
एतद्विभूषणं नार्या आकेशादानखादपि ।।४२।।
यथाभावरसावस्थं विज्ञेयं द्विजसत्तमाः ।

अभिनवभारती

रत्नजालकं (प्रपदा) च्छादकम् । सघोषे सशब्दे कटके । (अङ्गुष्ठ) तिलका इति विचित्ररचनाकृताः । आकेशादिति शिखापाशः शिखाव्याल इत्यतः प्रभृतीत्यर्थः । आनखादिति अलक्तकरागपर्यन्तमिति यावत् । आगम इत्युपादान-

बालक्रीड़ा

(मूल) जंघाओं में पादपत्र और अंगुलियों में अंगुलीयक तथा अंगुष्ठतिलक भूषण होते हैं ।४०

(मूल) नाना प्रकार की रचनाओं से बना हुआ अलक्तक राग यानी महावर पैरों का भूषण होता है ।४१

(मूल) अशोक के पत्रों की कान्ति की तरह कान्ति वाला होता है या स्वाभाविक ही यह इस महावर का रंग होता है। ये ऊपर बतलाये हुए आभूषण केशो से नखपर्यन्त अवयवो में स्त्रियों के भूषण होते है ४२

(मूल) हे ब्राह्मणो ! आगम जिनसे गहने बनते हैं वह उपादान वस्तु प्रमाण अंगुली प्रभृति अवयवों का माप एवं स्वरूप का निर्वर्णन इन सबको भाव रस एवं अवस्था के अनुसार समझना चाहिए ४३

सघोषे—अर्थात् ऐसे वलय जो ध्वनि उत्पाक हो ।।४०।।

अङ्गुष्ट तिलक वे होते है जिस अंगूठे पर नाना प्रकार की विधाओं से महावर लगाया गया हो ।।४१।।

आकेश—अर्थात् पूर्व वर्णित केश माने शिखापाश शिखाव्याल इत्यादि ।

आनखा—आनख माने महावर लगे हुए अंगूठे तक ।।४२।।

आगम—आगम माने उपादान-कारण, प्रमाण माने अंगुलियों से किया गया

आगमश्च प्रमाणं च रूपनिर्वर्णनं तथा ।।४३।।
विश्वकर्ममतात्कार्यं सुबुद्धयापि प्रयोक्तृभिः ।
न हि शक्यं सुवर्णेन मुक्ताभिर्मणिभिस्तथा ।।४४।।
स्वाधीनमिति रुच्यैव कर्तुमङ्गस्य भूषणम् ।
विभागतोऽभिप्रयुक्तमङ्गशोभाकरं भवेत् ।।४५।।
यथा स्थानान्तरगतं भूषणं रत्नसंयुतम् ।
न तु नाट्यप्रयोगे तु कर्तव्यं भूषणं गुरु ।।४६।।
खेदं जनयते तद्धि सव्यायतविचेष्टनात् ।
गुरुभावावसन्नस्य स्वेदो मूर्छा च जायते ।।४७।।

अभिनवभारती

कारणीमिति यावत् । प्रमाणमिति अङ्गुल्यादिपरिमाण (संमितत्वम् । रूपनिर्वर्णन) मिति शुल्कादि निर्वर्तनं (यथास्वभावम्) । विश्वकर्मणा प्रोच्यते यादृङ्निर्दिष्टं तादृक्कार्यमित्यर्थः । सुबुद्धये ति लोकप्रसिद्धयापीत्यर्थः ।

बालक्रीड़ा

(मूल) प्रयोक्ता लोग उपरि निर्दिष्ट आभूषणों का निर्माण बुद्धि पूर्वक विश्वकर्मा के बतलाये हुए सिद्धान्तों के अनुसार ही करें। यह नही होना चाहिए कि हम स्वाधीन है स्वतन्त्र हैं इसलिए अपनी रुचि के अनुसार सुवर्ण मुक्ता एवं रत्नों से अंगो के भूषण बना लें। क्योंकि विभागों के अनुसार निर्मित किये गये ही ये आभूषण अगों की शोभा करने वाले हो सकते हैं ।।४४-४५।।

(मूल) विभिन्न स्थानों के अनुकूल विधि से बनाये गये रत्नजटित भूषण अलंकार कहलाते हैं अतः नाटकों के अभिनयों में पहिरे जाने वाले भूषणों को कभी भी भारी नही बनावें ।।४६।।

(मूल) क्योंकि वजनदार भारी भूषण बांये दांये एवं विस्तृत रूप से चेष्टा करने में खेद जनक हो जाता है। भारी गहनों के पहिरने से अभिनेता थक जाता है और उसे पसीना और मूछित हो जाता है ।।४७।।

परिमाण। रूप निर्वणन—अर्थात् काले पीले विभिन्न रंगो में वस्तुओं के अनुरूप रंगा गया ।।४३।।

विश्वकर्मणा—अर्थात् विश्वकर्मा ने जैसा कहा वैसा कार्य, और अपनी बुद्धि से किया गया कार्य, सुबुद्धयेति अर्थात् लोक प्रसिद्धी के अनुसार किया गया ।।४४-५०।।

गुर्वाभरणसन्नो हि चेष्टां न कुरुते पुनः ।
तस्मात्तनुत्वसुकृतं सौवर्णं भूषणं भवेत् ॥४८॥
रत्नवज्जतुबद्धं वा न खेदजननं भवेत् ।
स्वेच्छया भूषणविधिर्दिव्यानामुपदिश्यते ॥४९॥
यत्नभावविनिष्पन्नं मानुषाणां विभूषणम् ।
वेष्टितं विततं चैव सङ्घात्यं ग्रन्थिमं तथा ॥५०॥
लम्बशोभि तथा चैव माल्यं पञ्चविधं स्मृतम् ।
आच्छादनं बहुविधं नानापत्तनसंभवम् ॥५१॥
तज्ज्ञेयं त्रिप्रकारं तु शुद्धं रक्तं विचित्रितम् ।
दिव्यानां भूषणविधिर्य एष परिकीर्तितः ॥५२॥

अभिनवभारती

पत्तनं देशः शुद्धमिति शुल्कवर्णकम् । रक्तमिति कुसुम्भनील्याद्यन्यतमोपरक्तम् । विचित्रमिति बहुवर्णम् । विभक्तिः विभागः ।

बालक्रीड़ा

(मूल) भारी भूषणों को पहिर कर अभिनय करने वाला पुरुष या अंगना थक जाती है अतः चेष्टा अंगों का संचालन भी नही कर सकती है। अतः सुन्दरता से बनाये गये हलके ही भूषण सोने के होने चाहिए ॥४८॥

(मूल) लाही में जटित रत्नवाले भूषण खेद जनक नही होते हैं । स्वेच्छा से भूषणों के निर्माण की विधि का उपदेश देवताओं के लिए दिया जाता है ॥४९॥

(मूल) मनुष्यों के उपयोगी भूषणों की निष्पत्ति यत्न से ही भावानुसार की जाती है । वेष्टित, वितत, संघात्य, ग्रन्थिम तथा लम्बित ये पांच प्रकार की मालाएँ शोभाशाली होती हैं ॥५०॥

(मूल) विभिन्न नगरों में होने वाले आच्छादन यद्यपि बहुत प्रकार के होते हैं । किन्तु तब भी शुद्ध, रक्त एवं चित्र इस तरह तीन प्रकार वालों को तो समझना ही चाहिए ॥५१॥

(मूल) यह जो भूषणों के निर्मांण की विधि कही है उसे देवताओं के उपयोगी समझें ॥५२॥

पत्तनं—अर्थात् पुरी, देश इत्यादि ॥५१॥

शुद्धमिति—अर्थात् सफेद वर्ण का रक्त—अर्थात् कुसुम्भ, नीला आदि में से किसी एक से रंगा गया ।

विचित्र—अर्थात् अनेक रंगों वाला विभक्तिः अर्थात् हिस्सा, भाग ॥५२।५८॥

मानुषाणां च कर्तव्यो नानादेशसमाश्रयः ।
भूषणैश्चापि वेषैश्च नानावस्थासमाश्रयैः ॥५३॥
दिव्याङ्गनानां कर्तव्या विभक्तिः स्वस्वभूमिजा ।
विद्याधरीणा यक्षीणामप्सरोनागय ताम् ॥५४॥
ऋषिदैवतकन्यानां वेषैर्नानात्वमिष्यते ।
तथा च सिद्धगन्धर्वराक्षसासुरयोषिताम् ॥५५॥
दिव्यानां नरनारीणां तथैव च शिखण्डकम् ।
शिखापुटशिखण्डं तु मुक्ताभूयिष्ठभूषणम् ॥५६॥
विद्याधरीणां कर्तव्यः शुद्धो वेषपरिच्छदः ।
यक्षिण्योऽप्सरसश्चैव कार्या रत्नविभूषणाः ॥५७॥
समस्तासां भवेद्वेषो यक्षीणां केवलं शिखा ।

अभिनवभारती

तासामिति (श्लो-५६) नागयोषिताम् ।

बालक्रीड़ा

(मूल) भिन्न २ देशों के आश्रय के अनुसार मनुष्यों की भूषण विधि को करना चाहिए। नाना अवस्थाओं के आधार पर किये जाने वाले वेष एवं भूषाओं से दिव्याङ्गनाओं की अपनी अपनी भूमिकाओं का निर्वाह करने वाली रचनाओं को करना उचित है ॥५३॥

(मूल) जिस प्रकार विद्याधरी यक्षिणी अप्सरा सर्पिणी एवं ऋषि तथा देव कन्याओं का भेद अलगाव वेष एवं भूषा से होता है ॥५४॥

(मूल) उसी प्रकार सिद्ध गन्ध व राक्षस एवं असुरों की स्त्रियों में भी भेद होता है ॥५५॥

(मूल) जिस तरह दिव्याङ्गनाओं का शिखण्डक होता है उसी तरह मानुषियों का भी वह होता है। किन्तु शिखा के पुट से किया गया शिखण्ड नामक भूषण तो मुक्ता बहुल होता है ॥५६॥

(मूल) विद्याधरियों की वेष भूषा शुद्ध करनी चाहिए और यक्षिणी तथा अप्सराओं की वेष-भूषा तो रत्नजटित सुवर्ण से करनी चाहिए ॥५७॥

तासां—अर्थात् नागिनियां नागपत्नियां ॥५६-६६॥

दिव्यानामिव कर्तव्यं नागस्त्रीणां विभूषणम् ॥५८॥
मुक्तामणि लताप्रायाः फणस्तासां तु केवलाः ।
कार्यं तु मुनिकन्यानामेकवेणीधरं शिरः ॥५९॥
न चापि भूषणविधिस्तासां वेषो वनोचितः ।
मुक्तामरकतप्रायं मण्डनं सिद्धयोषिताम् ॥६०॥
तासां चैव तु कर्तव्यं पीतवस्त्रपरिच्छदम् ।
पद्मरागमणिप्रायं गन्धर्वीणां विभूषणम् ॥६१॥
वीणाहस्तश्च कर्तव्यः कौसुम्भवसनस्तथा ।
इन्द्रनीलैस्तु कर्तव्यं राक्षसीनां विभूषणम् ॥६२॥
सितदंष्ट्रा च कर्तव्या कृष्णवस्त्रपरिच्छदम् ।
वैडूर्यमुक्ताभरणाः कर्तव्या सुरयोषिताम् ॥६३॥

बालक्रीड़ा

(मूल) वेष तो उन सब स्त्रियों का समान ही होता है किन्तु यक्षिणियों की शिखा भिन्न प्रकार की होती है। नागिनियों के विभूषण दिव्याङ्गनाओं के सदृश करने चाहिए ॥५८॥

(मूल) किन्तु फणा उनकी केवल लता के आकार वाली मुक्तामणि बहुल होनी चाहिए। मुनि कन्याओं का शिर एक वेणी वाला करना चाहिए ॥५९॥

(मूल) उनका वेष वनोचित होना चाहिए किन्तु भूषणविधि वनोचित नही होनी चाहिए। सिद्ध स्त्रियों का मण्डन मुक्ता मरकत बहुल करना चाहिए ॥६०॥

(मूल) किन्तु इनका परिच्छद पहिरने का वस्त्र पीत होना चाहिए। गन्धर्वियों के विभूषणों में पुखराज मणियों का प्रयोग अधिक होना चाहिए ॥६१॥

(मूल) उनके हाथ में वीणा रहनी चाहिए और कुसुम्भी रंग का वस्त्र होना चाहिए। राक्षसियों का गहना इन्द्रनीलमणि का करना चाहिए ॥६२॥

(मूल) दंष्ट्रा जाड सफेद करनी चाहिए और पहिरने का कपड़ा काले रंग का करना चाहिए। देवाङ्गनाओं के आभरण में विद्दामणि और मोति अधिक रहने चाहिए ॥६३॥

शुकपिञ्छनिभैर्वस्त्रैः कार्यस्तासां परिच्छदः ।
पुष्यरागैस्तु मणिभिः क्वचिद्वैडूर्यभूषितैः ॥६४॥
दिव्यवानरनारीणां कार्यो नीलपरिच्छदः ।
एवं शृङ्गारिणः कार्या वेषा दिव्याङ्गनाश्रयाः ॥६५॥
अवस्थान्तरमासाद्य शुद्धाः कार्याः पुनस्तथा ।
मानुषीणां तु कर्तव्या नानादेशसमुद्भवाः ॥६६॥
वेषाभरणसंयोगान् गदतस्तान्निबोधत ।
आवन्त्ययुवतीनां तु शिरस्सालककुन्तलम् ॥६७॥
गौडीनामलकप्रायं सशिखापाशवेणिकम् ।
आभीरयुवतीनां तु द्विवेणीधर एव तु ॥६८॥

अभिनवभारती

(सालककुन्तलमिति) सालकाः अलकसहिताः कुन्तलाः कुञ्चिताः केशा यत्र

बालक्रीड़ा

(मूल) इनके पहिरने के वस्त्रों को सुग्गे के पंख के जैसे हरित वर्ण के करने चाहिए। विद्दर मणियों से युक्त पुष्प राग मणियों के गहने होने चाहिए ॥६४॥

(मूल) दिव्य गुण सम्पन्न वानरियों एवं नारियों के पहिरने के वस्त्र नीले रंग के करने चाहिए और इस प्रकार दिव्याङ्गनाओं के वेष शृंगारमय करना चाहिए ॥६५॥

(मूल) किन्तु अवस्थान्तर के प्राप्त करने पर उनके वेष शुद्ध होने चाहिए। मानुषियों के वेष भिन्न २ देशों के अनुसार करने चाहिए ॥६६॥

(मूल) वेष और आभरण के संयोग को कहता हूं उनको समझो। अवन्ती देश उज्जयिनी की युवतियों का शिर कुन्तल माने कुञ्चित अलक माने केशवाला करना चाहिए ॥६७॥

(मूल) गौडाङ्गनाओं का शिर अलक बहुल करना चाहिए जिसमें शिखा का बन्धन होने से वेणी के सहित हो जाता है। आभीर युवतियों को दो वेणी वाला होना चाहिए ॥६८॥

मांग लगाने के स्थान पर कुंचित केश अर्थात् घुंघराले बाल है जिसमें। ऐसा शिर अवन्ति युवतियों का शिर होता है ॥६७-६८॥

शिरः परिगमः कार्यो नीलप्रायमथाम्बरम् ।
तथा पूर्वोत्तरस्त्रीण समुन्नद्धशिखण्डकम् ।।६९।।
आकेशाच्छादनं तासां देशकर्मणि कीर्तितम् ।
तथैव दक्षिणस्त्रीणां कार्यमुल्लेख्यसंश्रयम् ।।७०।।
कुम्भी बन्धकसंयुक्तं तथावर्तललाटिकम् ।
गणिकानां तु कर्तव्यमिच्छाविच्छित्ति मण्डनम् ।।७१।।
देशजातिविधानेन शेषाणामपि कारयेत् ।

अभिनवभारती

तत्तथोक्तम् । नीलप्रायं वस्त्रमित्याभीरीणामेव ।

हृदयं व्याप्नोति हृद्यः एवेति वेषः केशरचनादिः । आ समन्तात् भ्रियते पोष्यते कान्तिर्येन तदाभरणं शिखाव्यालादि । क्षुरकर्म अलकादियोजना ।

बालक्रीड़ा

(मूल) पूर्वोत्तर प्रदेश की स्त्रियों का शिर परिगम होना चाहिए अर्थात् शिर के केशों का परिगम स्वच्छत्व ऐसा होना चाहिए या करना चाहिए जिससे शिखण्डक केशों का जूडा ऊपर उठा हुआ रहे। और-वस्त्र नीले अधिक रहने चाहिए ।।६९।।

(मूल) इन स्त्रियों के देश सम्बन्धी क्रिया कलापों के निरूपण के समय में केशों एवं वस्त्रों के सम्बन्ध में कह दिया है। उसी प्रकार दक्षिण देश की स्त्रियों के विषय में जो लिख दिया गया है उसी के आश्रय से केश और आच्छादन को करना चाहिए ।।७०।।

(मूल) कुम्भी बन्धक माने कलशी के आकार में केशों का बन्धन होना चाहिए। जिससे ललाट में आवर्त्त की भौंरी की आकृति बन जाय। गणिकाओं का तो मण्डन इच्छा के चमत्कार का परिचायक होना चाहिए यानी इच्छानुसार करना चाहिए ।।७१।।

(मूल) इन कथित स्त्रियों से बची हुई स्त्रियों के वेष और आभरण भिन्न २ अवस्थाओं के आश्रय से देश प्रान्तीय व्यवहार एवं जातिगत व्यवस्था के अनुसार करना कराना चाहिए ।।७२।।

नीलप्राय—आभिरि माने अहिरों की स्त्रियों के वस्त्र प्रायः नीले रंग के होते है ।।६९-७१।।

वेष केश रचना वगैरह हृदय में व्याप्त हो जाती है अतः हृद्य ही है। पूर्ण रूप से या अच्छे रूप से अंगों की सुन्दरता को पुष्ट करते हैं वे आभरण हैं जैसा शिखाव्यालादि। क्षुर कर्म अलकादि की योजना माने केशों को सजा देने वाले पराग

वेषं तथा चाभरणं क्षरकर्म परिच्छदः ॥७२॥
आगमं चापि नैपथ्ये नाटचस्यैवं प्रयोजयेत् ।
अदेशयुक्तो वेषो हि न शोभां जनयिष्यति ॥७३॥
मेखलोरसि बद्धा तु हास्यं समुपपादयेत् ।
तथा प्रोषित कान्यासु व्यसनाभिहतासु च ॥७४॥
वेषो वै मलिनः कार्य एकवेणीधरं शिरः ।
विप्रलम्भे तु नार्यास्तु शुद्धो वेषो भवेदिह ॥७५॥
नात्याभरणसंयुक्तो न चापि मृजयान्वितः ।
एवं स्त्रीणां भवेद्वेषो देशावस्थासमुद्भवः ॥७६॥
पुरुषाणां पुनश्चैव वेषान्वक्ष्यामि तत्त्वतः ।

अभिनवभारती

परिच्छदः विचित्रवस्त्रयोगः । एतद्वेषादि प्रलम्भेन ॥७२॥

देशोऽवन्त्यादिः, अवस्था रतिशोकाद्याः । तत्रेति पुरुषेष्वेव । अङ्गानां

बालक्रीड़ा

(मूल) नेपथ्य के विषय में यानी वेषभूषा के संजोवने के बारे में नाटचशास्त्रीय आगम का भी इसी प्रकार प्रयोग करे । क्योंकि प्रान्तीय एवं जातीय व्यवहार एवं व्यवस्था से रहित वेष शोभा का जनक नही होता है ॥७३॥

(मूल) क्योंकि मेखला कमर में पहिरने के योग्य करधनी को छाती में बांधना हास्य ही करायेगा । प्रोषित कन्याओं का तथा विपत्तियों में पड़ी हुई औरतों के वेष को मलिन करना चाहिए और उनके शिर के बालों की एक वेणी होनी चाहिए यानी केशों को गूहन नही करना चाहिए ॥७४॥

(मूल) विप्रलम्भ में तो खास तौर से अभिनय में वेष शुद्ध चाकचक्य से रहित करना चाहिए ॥७५॥

(मूल) न तो इसमें आभरणों की अत्यन्त योजना होनी चाहिए और न इसमें सफाई की ओर विशेष ध्यान रहना चाहिए इस प्रकार स्त्रियों का देश एवं उनकी रति शोकादि अवस्था का आधार अवश्य होना चाहिए ॥७६॥

विशेष से केशों को सजा देना । परिच्छद नाना रंगों के वस्त्रों को पहिरना ॥७२॥

देशायानी अवन्ती आदि । अवस्था रति एवं शोकादि ॥७६॥

उन पुरुष पात्रों के ही अंगों के रूप बदलने के लिए रंगों से रचना करनी

तत्राङ्गरचना पूर्वं कर्तव्या नाटययोक्तृभिः ॥७७॥
ततः परं प्रयोक्तव्या वेषा देशसमुद्भवाः ।
सितो नीलश्च पीतश्च चतुर्थो रक्त एव च ॥७८॥
एते स्वभावजा वर्णा यैः कार्यं त्वङ्गवर्तनम् ।
संयोगजाः पुनश्चान्ये उपवर्णा भवन्ति हि ॥७९॥
तानहं संप्रवक्ष्यामि यथाकार्यं प्रयोक्तृभिः ।
सितनीलसमायोगे कारण्डव इति स्मृतः ॥८०॥

अभिनवभारती

रूपपरिवर्तनसंपादनात्मकवर्णवर्तना कर्तव्या न स्त्रीपात्रेष्विति यावत् । संयोगजा इति वर्णद्वयश्लेषेणोत्थापिताः, उपवर्णास्तु बहुवर्णमिश्रणेनेत्यर्थः ॥७९॥

बलस्थ इत्यभिभवनकारी, ततोऽन्यो वर्णो द्विगुण इति, अस्यापवादमाह

बालक्रीड़ा

(मूल) अब पुरुषों के समुचित वेषों का तत्वत यानी व्यवस्थित रूप में कहूंगा । सबसे प्रथम अभिनेताओं को अपने अंग की रचना करनी चाहिए ॥७७॥

(मूल) इसके वाद देश एवं जाति में व्यवहार में आने वाले वेषों को प्रयोग करना चाहिए । जो सफेद है नील है पीत है और चतुर्थ लाल रंग का है ॥७८॥

(मूल) जिन्हें अंगों का उद्वर्त्तन करना है उनके ये स्वाभाविक वर्ण हैं । और जो देशान्तर एवं जात्यन्तर के संयोग के सम्बन्ध से होते हैं वे उपवर्ण होते हैं ॥७९॥

(मूल) उन उपवर्णो को मैं कहूंगा । उसी के अनुसार अभिनेताओं को प्रयोग करना चाहिए । श्वेत और नील वर्ण के समन्वय में कारण्डव वर्ण होता है ॥८०॥

चाहिए । स्त्री पात्रों में नही ॥७७॥

पात्रों के रंग तीन प्रकार के होते हैं एक स्वाभाविक, दूसरे संयोगजन्य जो कि दो तीन रंगों के मेल से होते हैं । तीसरे उपवर्ण जो बहुत प्रकार के रंगो की योजना से बनते हैं या बनाए जाते हैं ॥७९॥

बलस्थ माने बलवान् वर्ण वह होता जो दूसरे रंगों को अभिभूत करे उससे अन्य दुर्बल द्विगुण कहलाता है । इसके अपवाद को कहते हैं । नीलं मुक्त्वा यानी नील

सितपीतसमायोगात्पाण्डुवर्णः प्रकीर्तितः ।
सितरक्तसमायोगे पद्मवर्णः प्रकीर्तितः ॥८१॥
पीतनीलसमायोगाद्धरितो नाम जायते ।
नीलरक्तसमायोगात्कषायो नाम जायते ॥८२॥
रक्तपीतसमायोगाद्गौरवर्ण इति स्मृतः ।
एते संयोगजा वर्णा ह्युपवर्णास्तथापरे ॥८३॥
त्रिचतुर्वर्णसंयुक्ता बहवः संप्रकीर्तिताः ।
बलस्थो यो भवेद्वर्णस्तस्य भागो भवेत्ततः ॥८४॥
दुर्बलस्य च भागौ द्वौ नीलं मुक्त्वा प्रदापयेत् ।

अभिनवभारती

नीलवर्णादृते इति ॥८४॥ तत्र तु यो भागविधिस्तं दर्शयति नीलस्यैक इति

बालक्रीड़ा

(मूल) श्वेत और बीज के समायोग से पाण्डु वर्ण कहलाता है। और सफेद और लाल वर्ण के संयोग से पद्म वर्ण कहलाता है ॥८१॥

(मूल) पीले एवं नीले वर्णो के संयोग से हरा रंग पैदा होता है। नीले एवं लाल रंग के संयोग से कषैला रंग हो जाता है ॥८२॥

(मूल) लाल एवं पीले के संयोग से गौर वर्ण माना जाता है। ये ही संयोग से पैदा होने वाले वर्ण उपवर्ण बनते है ॥८३॥

(मूल) इनसे अपर और बहुत से वर्ण तीन एवं चार प्रकार के वर्णो के संयोग से बने हुए कहे जाते है। इनमें जो वर्ण बल शाली है माने तेज है तीव्र है उसका एक भाग एक हिस्सा होना चाहिए अर्थात् पूरी मात्रा में उसका उपयोग नही करना चाहिए ॥८४॥

(मूल) जो तो तीखा रंग है ऐसे नील रंग को छोड़कर दुर्बल रंग के दो हिस्से होने चाहिए। क्योकि नील का एक भाग होता है। अन्य वर्णो में चार हिस्से होते हैं ॥८५॥

वर्ण से ऋत माने अतिरिक्त सभी वर्ण दुर्बल हैं नील वर्ण बलबान् है। उस बलवत्ता के हेतु भूत जो भागविधि है। उसको कहते हैं कि नील रंग का एक हिस्सा ही अन्य

नीलस्यैको भवेद्भागश्चत्वारोऽन्यत्र वर्णके ॥८५॥
बलवान्सर्ववर्णानां नील एव प्रकीर्तितः ।
एवं वर्णविधिं ज्ञात्वा नानासंयोगसंश्रयम् ॥८६॥
ततः कुर्याद्यथायोगमङ्गानां वर्तनं बुधः ।
वर्तनाच्छादनं रूपं स्ववेषपरिवर्जितम् ॥८७॥
नाटस्यधर्मप्रवृत्तं तु ज्ञेयं तत्प्रकृतिस्थितम् ।
स्ववर्णमात्मनश्छाद्यं वर्णकैर्वेषसंश्रयैः ॥८८॥

अभिनवभारती

वर्णके नीलस्य भाग इत्यर्थः ॥८५।८६॥

वर्तनाशब्दं पर्यायैर्व्याचष्टे वर्तनाच्छादनमिति प्रकृस्थितमिति देवमानुषादि-स्वभावविभागेनावस्थितमित्यर्थः ॥८८॥

बालक्रीड़ा

(मूल) इन सब वर्णो में नील वर्ण सबसे तेज होता है। इस प्रकार नानावर्णो के संयोग से बनने वाले वर्णो को जाने ॥८६॥

(मूल) उसके बाद युक्ति के अनुसार अङ्गो का वर्त्तन समझदार लोग करें। इस वर्त्तन एवं आच्छादन से बनने वाले रूप को अपने स्वाभाविक वेष से परिवर्जित करना चाहिए ॥८७॥

(मूल) नाटच धर्म की नाटकीय अभिनय की प्रवृत्ति के अनुसार होने वाले वर्त्तन एवं आच्छादन को तो उस उस प्रकृति में भिन्न २ व्यक्ति में रहने वालों को ही समझना चाहिए। वेष के अनुसार किये जाने वाले वर्णकों से रंगों से अपने वर्ण का आच्छादन करना चाहिए ॥८८॥

वर्णो को दुर्बल करने में पर्याप्त है वर्ण के माने नीलवर्ण के हिस्से में ॥८५॥

पहले वर्णवर्त्तना में जिस वर्त्तन शब्द को कहा था, उसके पर्याय शब्दों को कहते हैं कि वर्त्त आच्छादन होता ॥८७॥

प्रकृति स्थित माने देवता और मनुष्यों के स्वभाव के अनुसार विभक्त होकर अवस्थित है ॥८८॥

आकृतिस्तस्य कर्त्तव्या यस्य प्रकृतिरास्थिता ।
यथा जन्तुः स्वभावं स्वं परित्यज्यान्यदैहिकम् ।।८९।।
तत्स्वभावं हि भजते देहान्तरमुपाश्रितः ।
वेषेण वर्णकैश्चैव च्छादितः पुरुषस्तथा ।।९०।।
परभावं प्रकुरुते यस्य वेषं समाश्रितः ।
देवदानवगन्धर्वक्षराक्षसपन्नगाः ।।९१।।

अभिनवभारती

वर्तनस्य प्रयोजनमाह यथा जन्तुः स्वभावं स्वमिति । जन्तुरिति जीवात्मेत्यर्थः स च शुद्धनिर्मलानन्तचिदानन्दप्रकाशः स्वातन्त्र्यरूपं स्वमनपायिनमपि स्वभावं परित्यज्यान्यद् व्यतिरिक्तमपि दैहिकं देहभवं शरीरकरणोचितं तत्स्वभावं भजते, यतो देहान्तरं तद्देहविशेष उपसमीपे आ समन्तात् श्रितः अतिनैकटचेन तदात्मवृत्त्या प्रतिपन्न इत्यर्थः ।।८९।९१।।

बालक्रीड़ा

(मूल) अभिनेता को उसकी आकृति बनानी चाहिए जिस प्रकृति का जिस अभिनयनीय व्यक्ति का अभिनय उसे करना है। जैसे पैदा होने वाला जन्तु अपने पूर्व देह के स्वभाव को छोड़कर दूसरे देह के स्वभाव को धारण करता है ।।८९।।

(मूल) जैसे देहान्तर का उपाश्रयण करने वाला व्यक्ति उसके स्वभाव का भजन करता है उसी प्रकार अभिनेता पुरुष भी वेष और वर्णक से आच्छादित हुआ करता है ।।९०।।

(मूल) क्योंकि जिसके वेष का आश्रयण करता है उसके भाव को करता है देव, दानव, गन्धर्व, यक्ष राक्षस एवं सर्प तथा और भी जो जीवधारी हैं वे सब प्राणियों में समझे जाते हैं ।।९१।।

वर्त्तन के प्रयोजन को कहते हैं जैसे जन्तु माने जीवात्मा शुद्ध निर्मल अनन्त चित् एवं प्रकाश स्वरूप है अत एव स्वातन्त्र्य सम्पन्न है। अर्थात् अनपायी स्वभाव वाला है बदली नही जा सकने वाली प्रकृति वाला है तब भी अपने स्वभाव को छोड़कर अन्य व्यतिरिक्त दैहिक माने देह में होने वाले शरीर एवं करण माने इन्द्रियां उनके अनुसार उचित उनके स्वभाव को ग्रहण करता है। क्योकि देहान्तर माने वह देह विशेष। उप माने समीप में। आसमन्तात् अच्छे प्रकार से श्रित माने अत्यन्त निकट भाव से उसके स्वरूप को प्राप्त कर लेता है।

प्राणिसंज्ञाः स्मृता ह्येते जीवबन्धाश्च येऽपरे ।
स्त्रीभावाः पार्वताः नद्यः समुद्रा वाहनानि च ॥६२॥
नानाशस्त्राण्यपि तथा विज्ञेयाः प्राणिसंज्ञया ।
शैलप्रासादयन्त्राणि चर्मवर्मध्वजास्तथा ॥६३॥

अभिनवभारती

एतदुक्तं भवति—यथा परमात्मा स्वचैतन्यप्रकाशमत्यजन्नपि देहकञ्चुकोचितचित्तवृत्तिरूषितमिव स्वरूपमादर्शयति, तथा नटोऽपि आत्मावष्टम्भमत्यजन्नेव स्थाने लयतालाद्यनुसरणाद्यायोगाद् देहस्थानीयेन वर्तनादिवेष परिवर्तने (न) तदुचितस्वभावालिङ्गितमिव स्वात्मानं सामाजिकान् प्रतिदर्शयति, प्रेक्षकपक्षे न नटाभिमानस्तत्र हि रामाभिमान इति दर्शयति। एतदाशये नैवास्माभिस्तत्र तत्र प्रतीतिरेव व्याख्याता रसाध्मायादौ ॥६२॥

सजीवमाहार्यभेदं व्याचष्टे देवदानवगन्धर्वेत्यादिना, शैलप्रासादादीनि निर्जीव-

बालक्रीड़ा

(मूल) पर्वतो से समुद्भूत नदियों का स्वभाव स्त्रियों के जैसा होता है। समुद्र वाहन और नाना प्रकार के शास्त्रों की भी प्राणिसंज्ञा है ॥६२॥

(मूल) शैल प्रासाद यन्त्र चर्म वर्म (कवच) ध्वजाएँ तथा नाना प्रकार के जिनसे प्रहार किया जाता है वे आयुध, ये सब अप्राणी हैं ॥६३॥

इससे यह कहा कि जैसे परमात्मा अपने धर्म चेतनता एवं प्रकाश स्वरूपता को नही छोडता हुआ देहरूपी कञ्चुक आवरण के उचित चित्तवृत्तियों से रूषित हुआ अन्तःकरण में वृत्ति रहने वाले नाना धर्मो से युक्त हुए की तरह अपने आपको प्रकट करता है वैसे ही नट भी अपने अवष्टम्भ को धारणा को न छोड़ता हुआ भी अवसर पर संगीत लय वाद्य के ताल का अनुसरणादि व्ययोग से देहान्तर स्थानी अर्थात् दूसरे देह में रहने वाले वेषों के परिवर्तन के द्वारा उसके स्वभाव से आलिङ्गित हुआ सा आच्छादित हुआ सा अपने रूप को समाजिको के प्रति दिखाता है। इसी आशय से ही हमने उस तालाध्याय में ऐसी प्रतीति वाली व्याख्या की ॥६२॥

देव दानव गन्धर्व इत्यादि सजीव जीवो के कृत्रिम, आहार्य अभिनय की व्याख्या करते हैं। शैल प्रसादादि से निर्जीव रूप में प्रस्तुत शैलप्रसादादि की परिगणना

नानाप्रहरणाद्याश्च तेऽप्राणिन इति स्मृताः ।
अथवा कारणोपेता भवन्त्येते शरीरिणः ॥९४॥
वेषभाषाश्रयोपेता नाटचधर्ममवेक्ष्य तु ।
वर्णानां तु विधिं ज्ञात्वा वयः प्रकृतिमेव च ॥९५॥
कुर्यादङ्गस्य रचनां देशजातिवयः श्रिताम् ।
देवा गौरास्तु विज्ञेया यक्षाश्चाप्सरसस्तथा ॥९६॥
रुद्रार्कद्रुहिणस्कन्दास्तपनीयप्रभाः स्मृताः ।
वोमो वृहस्पतिः शुक्रो वरुणस्तारकागणाः ॥९७॥

अभिनवभारती

त्वे प्रस्तुतत्वेन परिगणितान्यपि अवस्थाविशेषेषु नाटचधर्मेण सजीवत्वेऽपीत्याह शैलेत्यादिना, अथवा कारणोपेता इत्यादिना च ॥९३।९४॥

अङ्गरचनानि विभजति वर्णानामिति गौरादीनाम् ॥९५।९६॥

बालक्रीड़ा

(मूल) अथवा ये भी कारण विशेष के प्राप्त होने पर प्राणियों के सदृश शरीरधारी हो जाते हैं या माने जाते है ॥९४॥

(मूल) वेष और भाषा के आश्रय से उपेत यानी उनका आश्रय करने वाले भी अभिनेता लोग नाटच के धर्म अभिनय को समझकर आचरण करें। किन्तु चारों वर्णो की विधि अवस्था एवं स्वभाव को समझ कर देश प्रान्त जाति एवं वय के आधार पर अंगों की रचना करनी चाहिए ॥९५॥

(मूल) देवता यक्ष तथा अप्सराओं को मोर समझे ॥९६॥

(मूल) एकादश रुद्र, द्वादश आदित्य, द्रुहिण ब्रह्मा, स्कन्द सोम, वृहस्पति, शुक्र एवं तारागण सुवर्ण सदृश कान्ति वाले माने गये हैं ॥९७॥

की गई है किन्तु नाट्य में उनको सजीव रूप में वर्णन किया जाता है नाट्य धर्म के अनुसार उनको सजीव रूप में ही वर्णन किया जाता है। अथवा कारण से युक्त होने से सजीव हो जाते हैं ॥९३।९४॥

श्वेत पीत रक्त आदि रंगो से अंगों की रचना का विभाग कहते हैं अंगो की रचना का विभाग दिखाते है ॥९५।९६॥

समुद्रहिमवद्गङ्गाः श्वेता हि स्युर्बलास्तथा ।
रक्तमङ्गारकं विद्यात् पीतौ बुधहुताशनौ ॥६८॥
नारायणो नरश्चैव श्यामो नागश्च वासुकिः ।
दैत्याश्च दानवाश्चैव राक्षसा गुह्यका नगाः ॥६६॥
पिशाचा जलमाकाशमसितानि तु वर्णतः ।
भवन्ति षट्सु द्वीपेषु पुरुषाश्चैव वर्णतः ॥१००॥
कर्तव्या नाटययोगेन निष्टप्तकनकप्रभाः ।
जम्बूद्वीपस्य वर्षे तु नानावर्णाश्रया नराः ॥१०१॥
उत्तरांस्तु कुरूंस्त्यक्त्वा ते चापि कनकप्रभाः ।
भद्राश्वपुरुषाः श्वेताः कर्तव्या वर्णतस्तथा ॥१०२॥

अभिनवभारती

नगाः पर्वताः। जलमाकाशमिति तदधिष्ठात्री देवतेह विवक्षिता। जम्बूद्वीपस्य वर्ष इति भारते। ते चापीति उत्तरकुरवः।

बालक्रीड़ा

(मूल) समुद्र हिमवान् पर्वत और गङ्गा ये श्वेत रंग वाले हैं तथा बलशाली हैं। मंगल लाल है बुध और हुताशन अग्नि पीले हैं ॥६८॥

(मूल) नारायण और नर श्यामवर्ण वाले होते हैं। वासुकिनाग दैत्य दानव राक्षस गुह्यक पर्वत पिशाच यम आकाश इनका वर्ण काला है ॥६६॥

(मूल) जम्बूद्वीप से भिन्न द्वीपों में पुरुष किसी भी वर्ण के रहें परन्तु नाटय के अभिनय के सम्बन्ध से उनको तपाये हुए सोने की कान्ति वाले करना चाहिए ॥१००॥

(मूल) किन्तु जम्बूद्वीप में तो पुरुषों को भिन्न २ वर्णों वाले करने चाहिए ॥१०१॥

(मूल) उत्तर कुरवों को छोड़कर जम्बूद्वीपवासी नरो को भी सोने के सदृश प्रभाव वाले करने चाहिए। और भद्राश्ववर्ष के नरों को वर्णतः श्वेत करना चाहिए ॥१०२॥

नगा माने पर्वत कहा है। जल एवं आकाश शब्द से यहां पर उनकी अधिष्ठात्री देवताएँ विवक्षित हैं ॥१००॥

जम्बूद्वीप वर्ष में यानी भारत वर्ष में। ते वे माने उत्तर कुरु ॥१०२॥

केतु माले नरा नीला गौराः शेषेषु कीर्तिताः ।
नानावर्णाः स्मृता भूता गन्धर्वा यक्षपन्नगाः ।।१०३।।
विद्याधरास्तथा चैव पितरस्तु समा नराः ।
पुनश्च भारते वर्षे तांस्तान्वर्णान्निबोधत ।।१०४।।
राजानः पद्मवर्णास्तु गौराः श्यामास्तथैव च ।
ये चापि सुखिनो मर्त्या गौराः कार्यास्तु वै बुधैः ।।१०५।।
कुकर्मिणो ग्रहग्रस्ताः व्याधितास्तपसि स्थिताः ।
आयस्तकर्मिणश्चैव ह्यसिताश्च कुजातयः ।।१०६।।
ऋषयश्चैव कर्तव्या नित्यं तु बदरप्रभाः ।

अभिनवभारती

पितरस्तु समा नरा इति तुः स्वार्थे पितरो नराश्च तुल्या इत्यर्थः । कुकर्मिण इति कुत्सितं निन्दितं कर्म येषाम् । आयस्तं शरीरक्लेशबहुलं कर्म येषामित्यर्थः । कुजायो धीवरडोम्बाद्याः ।।१०६।।

बदरप्रभावत्त्वेऽप्यपवादमाह तपः स्थिता असिता इति । अनेन तु ऋषीणामपि

बालक्रीड़ा

(मूल) केतुमाल द्वीप में नरों को नील कहा है और अवशिष्ट द्वीपों में गौर कहा है । भूत प्रेत गन्धर्व यक्ष एवं पन्नग नाना वर्णो वाले माने गये हैं ।।१०३।।

(मूल) विद्याधर पितर एवं नर ये सब समान वर्ण वाले होते हैं । किन्तु भारत वर्ष में किन किन वर्णों के होते हैं उन उन वर्णो को समझो ।।१०४।।

(मूल) राजा लोग पद्म गौर वर्ण के तथा श्याम वर्ण के भी होते हैं । और जो भी सुखी मानव हैं उन्हें भी बुध लोग गौर करें ।।१०५।।

(मूल) कुकर्म करने वाले, ग्रहों से पीड़ित, व्याधिग्रस्त, सूर्य के ताप में बैठने वाले, आयास वहुल कर्म करने वाले तथा कुत्सित जाति वाले रंग के काले होते हैं ।।१०६।।

पितर और नर ये दोनों अपने अर्थ में समान हैं । कुकर्मी माने जिनके कर्म आचरण कुत्सित हैं निन्दित हैं । आयस्त माने जिनके कर्म बहुत क्लेषों से युक्त हैं । कुजाति माने मल्लाह नाव चलाने वाले मछुए एवं डोम आदि हैं ।।१०३-१०६।।

पहले जो ऋषियों को बदर की कान्ति के समान कान्ति वाला कहा था उसके अपवाद में बदर प्रभावत्वेपि से अपवाद को कहते है जो तपःस्थित ऋषि असित वर्ण

तपः स्थिताश्च ऋषयो नित्यमेवासिता बुधैः ॥१०७॥

कारणव्यपदेशेन तथा चात्मेच्छया पुनः ।
वर्णस्तत्र प्रकर्तव्यो देशजातिवशानुगः ॥१०८॥

देशं कर्म च जातिं च पृथिव्युद्देशसंश्रयम् ।
विज्ञाय वर्तना कार्या पुरुषाणां प्रयोगतः ॥१०९॥

किरातबर्बरान्ध्राश्च द्रविडाः काशिकोसलाः ।
पुलिन्दा दाक्षिणात्याश्च प्रायेण त्वसिताः स्मृताः ॥११०॥

शकाश्च यवनाश्चैव पह्लवा बाह्लिकश्च ये ।

अभिनवभारती

तपोनिरतानामसितत्व मित्यपौनरुक्त्यम् ॥१०७॥

व्यापकं लक्षणमाह कारणव्यपदेशेनेति। कारणं यथा क्लेशबहुला क्रिया कृष्णत्वे आत्मेच्छयेति कविबुद्ध्यनुसारेणेत्यर्थः ॥१०८॥

बालक्रीड़ा

(मूल) ऋषियों को सर्वदा बदर के समान पीत कान्ति वाले करना चाहिए। जो तो सूर्य के घाम में बैठकर तपस्या करते है उन ऋषियों को अवश्य ही बुध लोग आसित वर्ण वाले करें ॥१०७॥

(मूल) किसी कारण के व्यपदेश से तथा फिर अपनी इच्छा से देश एवं जाति कें अनुसार उन ऋषियों के वर्णो को करना चाहिए ॥१०८॥

(मूल) देश कर्म जाति तथा जिस भूमि पर पैदा हुए हैं उसके उद्देश को स्थान को समझ कर प्रयोग में अभिनय के प्रसङ्ग में पुरुषों की वर्त्तना करनी चाहिए ॥१०९॥

(मूल) किरात वर्वर आन्ध्र द्रविड काशिक कौसल पुलिन्द और दाक्षिव्य तामिलनाडु मद्रासी लोग प्रायः असित ही माने गये हैं ॥११०॥

वाले होते हैं। इससे यह कहा कि तपस्या में लगे ऋषि उज्ज्वल वेष वाले न होकर असित कृष्ण वर्ण के होते हैं ॥१०७॥

कारण के व्यपदेश इससे ब्यापक लक्षण को कहते हैं। काला रंग होने का कारण क्लेष बहुल कर्म है यानी कष्ट कर कर्म करने से मनुष्य काला पड़ जाता है। आत्मेच्छया का अर्थ कवि भी अपनी इच्छा से उसका रंग बदल सकता है। यानी जैसा

प्रायेण गौराः कर्तव्या उत्तरां ये श्रिता दिशम् ॥१११॥
पाञ्चालाः शौरसेनाश्च माहिषाश्चौण्ड्रमागधाः ।
अङ्गा बङ्गाः कलिङ्गाश्च श्यामाः कार्यास्तु वर्णतः ॥११२॥
ब्राह्मणाः क्षत्रियाश्चैव गौराः कार्यास्तथैव हि ।
वैश्याः शूद्रास्तथा चैव श्यामाः कार्यास्तु वर्णतः ॥११३॥
एवं कृत्वा यथान्यायं मुखाङ्गोपाङ्गवर्तनाम् ।
श्मश्रुकर्म प्रयुञ्जीत देशकालवयोऽनुगम् ॥११४॥
शुद्धं विचित्रं श्यामं च तथा रोमशमेव च ।
भवेच्चतुर्विधं श्मश्रु नानावस्थान्तरात्मकम् ॥११५॥

अभिनवभारती

तत्रेति भारते। शुद्धामिति क्षुरेण, सर्वथा चासितं, श्यामं पूर्वं क्षुरकर्म योजितमपीदानीं निवारितं तद्योजनाङ्कम् । विचित्रमिति क्षुरकर्त्रितकर्मणोत्पादनकर्मणा च रचितविचित्रसंनिवेशम् । रोमशमिति यथोत्पन्नम् ।

बालक्रीड़ा

(मूल) शक यवन पह्लव वाह्लीक और जो उत्तर दिशा में रहते हैं उन सबको प्रायः गौर ही करना चाहिए ॥१११॥

(मूल) पाञ्चाल शौरसेन माहिष औण्ड्रमागध अङ्ग बङ्ग और कलिङ्गों को रंग में काले करने चाहिए ॥११२॥

(मूल) ब्राह्मण तथा क्षत्रियों को गौर करना चाहिए। वैश्य और शूद्रों को रंग में श्याम करना चाहिए ॥११३॥

(मूल) इस तरह नीति के अनुसार मुख्य अङ्ग एवं उपाङ्गों की वर्त्तना को कर के देश काल द्वय के अनुगामी हजामत क्षौर कर्म का प्रयोग करे ॥११४॥

(मूल) भिन्न २ अवस्थाओं के स्वरूप में शुद्ध, विचित्र श्याम तथा रोमश ये चार प्रकार के क्षौर कर्म होते हैं ॥११५॥

रंग चाहे वैसा वर्णन कर सकता है। तत्रेति माने भारत में ॥१०८-११४॥

शुद्ध छुरे से काट कर साफ कर दिया गया। तब भी सर्वथा काला है। श्याम पहले जिसमें क्षुर कर्म योजित है किन्तु अब इसमें उसकी योजना के अंक को निवारित कर दिया। विचित्र—क्षुर कर्त्रित कर्म और उत्पादन कर्म से विचित्र सन्निवेश से रचित रोमश काट देने पर भी जिसके बाल पैदा हो गये वह रोग वाला पुरुष ॥११५॥

शुद्धं तु लिङ्गिनां कार्यं तथामात्यपुरोधसाम् ।
मध्यस्था ये च पुरुषा ये च दीक्षां समाश्रिताः ॥११६॥
दिव्या ये पुरुषाः केचित्सिद्धविद्याधरादयः ।
पार्थिवाश्च कुमाराश्च ये च राजोपजीविनः ॥११७॥
शृङ्गारिणश्च ये मर्त्या यौवनोन्मादिनश्च ये ।
तेषां विचित्रं कर्तव्यं श्मश्रु नाट्यप्रयोक्तृभिः ॥११८॥

अभिनवभारती

लिङ्गिनामपि ब्रह्मचारिवानप्रस्थादीनाम् ।

"मध्यस्था ये च पुरुषा ये च दीक्षां समाश्रिताः"

इत्यर्धं —

"शुद्धं तु लिङ्गिनां कार्यं तथामात्यपुरोधसाम्"

इत्यर्धस्यानन्तरं योज्यम् लेखकदोषात्तु स्थानान्तरे दृश्यते। मध्यस्थ इति नोत्तमानामधमानामित्यर्थः । यौवनोन्मादिन इति अमात्यपुरोधसोऽपीति भावः ।

बालक्रीड़ा

(मूल) उनमें लिङ्गियों माने संन्यासियों तथा अमात्य एवं पुरोहितों का शुद्ध श्मश्रु करना चाहिए। जो तो मध्यस्थ हैं और जो दीक्षा लिये हुए है तथा जो कोई सिद्ध विद्याधर प्रभृति दिव्य पुरुष हैं। पार्थिव है कुमार हैं राजोपजीवी हैं शृङ्गारी हैं और जो यौवन से उन्मत्त हैं उन सबका श्मश्रु क्षौर कर्म, नाट्य के संचालकों को चाहिए कि विचित्र करे ॥११६-११७-११८॥

लिङ्गी सन्यासी तथा ब्रह्मचारी एवं वानप्रस्थादि का वर्ण शुद्ध करना चाहिए। यहाँ—

'मध्यस्था ये च पुरुषा ये च दीक्षां समाश्रिताः'—जो मध्यस्थ पुरुष हैं और जो दीक्षा का समाश्रयण कर चुके हैं अर्थात् दीक्षित हैं। इस आधे श्लोक को—

शुद्धं तु लिङ्गिनां कार्यं तथामात्यपुरोधसाम्—

सन्यासियों अमात्य एवं पुरोहितों का वेष शुद्ध करना चाहिए इस अर्ध श्लोक के बाद में योजना करनी चाहिए। किन्तु लेखक के दोष से यह अर्ध श्लोक स्थानान्तर में दिखाई दे रहा है। मध्यस्था जो न तो उत्तम है और जो न अधम है वे मध्यम स्थिति वाले होते हैं ॥११६।११७॥

यौवन के उन्माद से युक्त, यह अमात्य और पुरोहित को भी कह सकते हैं ॥११८-१२३॥

अनिस्तीर्णप्रतिज्ञानां दुःखितानां तपस्विनाम् ।
व्यसनाभिहतानां च श्यामं श्मश्रु प्रयोजयेत् ।।११९।।
ऋषीणां तापसानां च ये च दीर्घव्रता नराः ।
तथा च चीरबद्धानां रोमशं श्मश्रु कीर्तितम् ।।१२०।।
एवं नानाप्रकारं तु श्मश्रु कार्यं प्रयोक्तृभिः ।
अत ऊर्ध्वं प्रवक्ष्यामि वेषान्नानाप्रयोगजान् ।।१२१।।
शुद्धो विचित्रो मलिनस्त्रिविधो वेष उच्यते ।
तेषां नियोगं वक्ष्यामि यथावदनुपूर्वशः ।।१२२।।
देवाभिगमने चैव मङ्गले नियमस्थिते ।
तिथिनक्षत्रयोगे च विवाहकरणे तथा ।।१२३।।
धर्मप्रवृत्तं यत्कर्म स्त्रियो वा पुरुषस्य वा ।
वेषस्तेषां भवेच्छुद्धो ये च प्रायत्निका नराः ।।१२४।।

अभिनवभारती

शुद्ध इति शुक्लवस्त्रादिः प्रायः । प्रायत्निका इति प्रयत्ने भवा विनीता इत्यर्थः ।

बालक्रीड़ा

(मूल) जो प्रतिज्ञा को पूरा नही कर पाये है या दुःख मग्न है या तपस्या में निरत हैं और जो व्यसन से नष्ट हो गए हैं उनका श्मश्रु का प्रयोग काले रंग में करना चाहिए ।।११९।।

(मूल) ऋषि तपस्वी और जो दीर्घ व्रत वाले नर हैं तथा चीरबद्ध है माने फटे वस्त्रों को धारण करते हैं उनका श्मश्रु रोमश कहा है ।।१२०।।

(मूल) इस प्रकार अभिनेताओं को नाना प्रकार के श्मश्रुओं को करना कराना चाहिए । अब इसके बाद भिन्न प्रयोग के अनुसार वेषों को कहूंगा ।।१२१।।

(मूल) शुद्ध विचित्र एवं मलिन ये तीन प्रकार के वेष कहे हैं । अब इनके विनियोग को क्रमशः कहूंगा ।।१२२।।

(मूल) देवों के अभिगमन में यानी देवदर्शन के उद्देश्य से की जाने वाली यात्रा में नियम की स्थिति में मांगलिक कार्य में, तिथि विशेष एवं नक्षत्र विशेष के योग में विवाह प्रकरण में और भी जो स्त्री एवं पुरुष के धार्मिक कर्म है उसमें प्रवृत्त हैं तथा और जो उद्योग में व्यस्त नट हैं उनका वेष शुद्ध होना चाहिए ।।१२३-१२४।।

शुद्ध माने प्रायः जिनके वस्त्रादि शुक्ल हैं । प्रायत्निक वे हैं जो प्रयास से विनीत हुए हैं ।।१२४-१३०।।

देवदानवयक्षाणां गन्धर्वोरगरक्षसाम् ।
नृपाणां कर्कशानां च चित्रो वेष उदाहृतः ॥१२५॥
वृद्धानां पुरुषाणां च श्रेष्ठचमात्यपुरोधसाम् ।
वणिजां काञ्चुकीयानां तथा चैव तपस्विनाम् ॥१२६॥
विप्रक्षत्रियवैश्यानां स्थानीया ये च मानवाः ।
शुद्धो वस्त्रविधिस्तेषां कर्तव्यो नाटकाश्रयः ॥१२७॥
उन्मत्तानां प्रमत्तानामध्वगानां तथैव च ।
व्यसनोपहतानां च मलिनो वेष उच्यते ॥१२८॥
शुद्धरक्तविचित्राणि वासांस्यूर्ध्वाम्बराणि च ।
योजयेन्नाटचतत्त्वज्ञो वेषयोः शुद्धचित्रयोः ॥१२९॥
कुर्याद्वेषे तु मलिने रक्तं वासो विचक्षणः ।
मुनिनिर्ग्रन्थशाक्येषु यतिपाशुपतेषु च ॥१३०॥
व्रतानुगस्तु कर्तव्यो वेषो लोकस्वभावतः ।

अभिनवभारती

चीरमिति अवितता स्थूला च वृक्षत्वक्, वल्कलं तु तद्विपरीतम्, यथा बालक्रीड़ा

(मूल) देव दानव यक्ष गन्धर्व सर्प राक्षस और कर्कश राजा इनका वेष विचित्र कहा है ॥१२५॥

(मूल) वृद्ध पुरुष का सेठ मंत्री पुरोहित कञ्चुकी तपस्वी ब्राह्मण क्षत्रिय वैश्य तथा जो स्थानीय मानव हैं तथा वणिक् माने वाणिज्य व्यापार करने वाले किसी भी जाति का पुरुष है उन सब का नाटक के आश्रय से शुद्ध वेष वस्त्र विधान को करना चाहिए ॥१२६-१२७॥

(मूल) उन्मत्त उन्माद रोग वाले प्रमत्त असावधान मुसाफिर और जो व्यसन से उपहत है उनका वेष मलिन कहा है ॥१२८॥

(मूल) नाटच के तत्त्व के जानकार लोग शुद्ध और विचित्र वेषों में शुद्ध रक्त एवं विचित्र अधो वस्त्रों का और ऊर्ध्व वस्त्रों का माने उत्तरीय पटों का प्रयोग करें ॥१२९॥

(मूल) विचक्षण लोग मुनि निर्ग्रन्थ शाक्य यति एवं शैवों के मलिन वेष में रक्त वस्त्र को करे ॥१३०॥

चीर माने जो विस्तृत नही है किन्तु स्थूल है ऐसी वृक्ष की छाल। वल्कल

चीरवल्कलचर्माणि तापसानां तु योजयेत् ॥१३१॥
परिव्राण्मुनिशाक्यानां वासः काषायमिष्यते ।
नानाचित्राणि वासांसि कुर्यात्पाशुपतेष्वथ ॥१३२॥
कुजातयश्च ये प्रोक्तास्तेषां चैव यथार्हतः ।
अन्तः पुरप्रवेशे च विनियुक्ता हि ये नराः ॥१३३॥
काषायकञ्चुकपटाः कार्यास्तेऽपि यथाविधि ।
अवस्थान्तरतश्चैवं नृणां वेषो भवेदथ ॥१३४॥
वेषः सांग्रामिकश्चैव शूराणां संप्रकीर्तितः ।
विचित्रशस्त्रकवचो बद्धतूणो धनुर्धरः ॥१३५॥

अभिनवभारती

भूर्जपत्रत्वक्, मृगादेश्चर्म ।

बालक्रीड़ा

(मूल) जिस व्यक्ति का जो व्रत है उस व्रत के अनुसार लोक स्वभाव को या लोक प्रसिद्धि को जानकर तापसों के वेष में चीर वल्कल एवं चर्म की योजना करे ॥१३१॥

(मूल) परिव्राजक संन्यासी मुनि एवं शाक्य बौद्धों को काषाय वस्त्र इष्ट हैं। पाशुपत व्रत वालो में तो नाना रंग वाले वस्त्रों को करना चाहिए ॥१३२॥

(मूल) जो कुजाति कहे जाते हैं उनका वेष उनकी योग्यता के अनुरूप करना चाहिए। और जो अन्तः पुर में प्रवेश करने के योग्य नर हैं। उनका भी यथा विधि काषाय वस्त्र या कञ्चुकी के धारण के योग्य पटों को करे। इस तरह भिन्न अवस्थाओं के सम्बन्ध से मनुष्यों का वेष होता है ॥१३३-१३४॥

(मूल) शूरों का वेष संग्राम द्योतक कहा गया है जिसमें शूरवीर विचित्र शस्त्रों को धारण करते हैं कवच को पहिनते हैं तूणीर को पृष्ठ पर बांधते हैं और धनुष को धारण करते हैं ॥१३५॥

तो उसके विपरीत होती है जैसे भूर्जपत्र की त्वचा तथा मृगचर्म ॥१३१।१३५॥

चित्रो वेषस्तु कर्तव्यो नृपाणां नित्यमेव च ।
केवलस्तु भवेच्छुद्धो नक्षत्रोत्पातमङ्गले ।।१३६।।
एवमेष भवेद्वेषो देशजातिवयोऽनुगः ।
उत्तमाधममध्यानां स्त्रीणां नृणामथापि च ।।१३७।।
एवं वस्त्रविधिः कार्यः प्रयोगे नाटकाश्रये ।
नानावस्थाः समासाद्य शुभाशुभकृता स्तथा ।।१३८।।
तथा प्रतिशिरश्चापि कर्तव्यं नाटकाश्रयम् ।
दिव्यानां मानुषाणां च देशजातिवयः श्रितम् ।।१३९।।
पार्श्वागता मस्तकिनस्तथा चैव किरीटिनः ।
त्रिविधो मकुटो ज्ञेयो दिव्यपार्थिवसंश्रितः ।।१४०।।

अभिनवभारती

नक्षत्रेति नक्षत्रोत्पातप्रशमनार्थं यन्मङ्गलं, एतच्च नैमित्तिकस्य श्राद्धदेवार्चनादेरप्युपलक्षणम् । प्रकृतिरूपं शिरः प्रतिशिरः ।

बालक्रीड़ा

(मूल) राजाओं का नित्य का प्रतिदिन का वेष भिन्न २ होना चाहिए। केवल जन्म नक्षत्र सामयिक मंगल में अथवा नाक्षत्रिक उत्पात के शमन के लिए किये गये मंगल में शुद्ध वेष होना चाहिए ।।१३६।।

(मूल) इस प्रकार उत्तम मध्यम एवं अधम स्त्रियों का और पुरुषों का यह वेष देश प्रान्त जाति एवं वय के अनुगामी होता है ।।१३७।।

(मूल) इस प्रकार नाटकाश्रित प्रयोग में नाना अवस्थाओं को आप्त कर के शुभ एवं अशुभ वस्त्रों की विधि को करे ।।१३८।।

(मूल) प्रत्येक दिव्य पुरुष एवं मनुष्यों को शिर के केशों को भी प्रान्त जाति एवं अवस्था के अनुकूल नाटक सम्बन्धी प्रयोग में करना चाहिए ।।१३९।।

(मूल) दिव्य पुरुषों तथा राजाओं के मुकुट को पार्श्वागत माने बायें पार्श्व में झुका हुआ अथवा दायें पार्श्व में झुका हुआ और मस्तकी माने मस्तक की ओर झुका हुआ तथा किरीटी अपने स्थान पर स्थित इस तरह तीन प्रकार का जानना चाहिए ।।१४०।।

नक्षत्रोत्पातमंगल माने नक्षत्र के कारण होने वाले उपात के शमन के लिए किया गया मंगल । यह नैमित्तिक श्राद्ध एवं देवताओं की अर्चना का भी उपलक्षण कारी है ।।१३६-१३८।।

प्रकृति रूप शिर ही प्रतिशिर है ।।१३९-१५४।।

देवगन्धर्वयक्षाणां पन्नगानां सरक्षसाम् ।
कर्तव्या नैकविहिता मुकुटाः पार्श्वमौलयः ।।१४१।।
उत्तमा ये च दिव्यानां ते च कार्याः किरीटिनः ।
मध्यमा मौलिनश्चैव कनिष्ठाः शीर्षमौलिनः ।।१४२।।
नराधिपानां कर्तव्या मस्तके मकुटा बुधैः ।
विद्याधराणां सिद्धानां चारणानां तथैव च ।।१४३।।
ग्रन्थिमत्केशमकुटाः कर्तव्यास्तु प्रयोक्तृभिः ।
रक्षोदानवदैत्यानां पिङ्गकेशेक्षणानि हि ।।१४४।।
हरिच्छ्मश्रूणि च तथा मकुटास्थानि कारयेत् ।
उत्तमाश्चापि ये तत्र ते कार्याः पार्श्वमौलिन ।।१४५।।
कस्मात्तु मुकुटाः सृष्टाः प्रयोगे दिव्यपार्थिवे ।
केशानां छेदनं दृष्टं वेदवादे यथाश्रुति ।।१४६।।

बालक्रीड़ा

(मूल) देव गन्धर्व यक्ष पन्नग राक्षसों के बायें या दायें पार्श्व में झुकी हुई मौलि वाले मुकुटों को अनेक विधानो से करने चाहिए ।।१४१।।

(मूल) दिव्यो में जो उत्तम है उनको किरीटधारी करे । उनमें जो मध्य श्रेणीक हैं उनको पार्श्वागत माने दाये मौलिवाले या बायें मौलिवाले करे । तथा जो कनिष्ठ हैं उनको शीर्षमौली माने मस्तक की ओर झुकी हुई नोक वाले करें ।।१४२।।

(मूल) मनुष्यों में राजाओं के, देवताओं में विद्याधर सिद्ध तथा चारणों के मस्तक पर बुध लोग मुकुट को करें ।।१४३।।

(मूल) प्रयोक्ता लोग राक्षस दानव एवं दैत्यों के मुकुट ग्रन्थि युक्त केशों को करें और उनके पिंगल वर्ण केश तथा नेत्रों को करे ।।१४४।।

(मूल) तथा उक्त लोगों के मुकुट में हरे रंग के केशों को करें । उनमें भी जो उत्तम हैं उनको पार्श्व मौलिवाले करें ।।१४५।।

(मूल) दिव्यों एवं राजाओं के प्रयोग में मुकुटों की सृष्टि क्यों की यह प्रश्न है । उत्तर है कि सुना जाता है कि वैदिक प्रयोगों में केशों का छेदन देखा गया है ।।१४६।।

भद्रीकृतस्य वा यज्ञे शिरसश्छादनेच्छया ।
केशानामप्यदीर्घत्वात्स्मृतं मुकुटधारणम् ॥१४७॥
सेनापतेः पुनश्चापि युवराजस्य चैव हि ।
योजयेदर्धमकुटं महामात्राश्च ये नराः ॥१४८॥
अमात्यानां कञ्चुकिनां तथा श्रेष्ठिपुरोधसाम् ।
वेष्टनाबद्धपट्टानि प्रतिशीर्षाणि कारयेत् ॥१४९॥
पिशाचोन्मत्तभूतानां साधकानां तपस्विनाम् ।
अनिस्तीर्णप्रतिज्ञानां लम्बकेशं भवेच्छिरः ॥१५०॥
शाक्यश्रोत्रियनिर्ग्रन्थपरिव्राड्दीक्षितेषु च ।
शिरोमुण्डं तु कर्तव्यं यज्ञदीक्षान्वितेषु च ॥१५१॥
तथा व्रतानुगं चैव शेषाणां लिङ्गिनां शिरः ।
मुण्डं वा कुञ्चितं वापि लम्बकेशमथापि वा ॥१५२॥

अभिनवभारती

वेष्टनेति वेष्टनार्थमाबद्धं पट्टमुष्णीषप्रायं येषु । त्रिखण्डाश्चूलिकाः त्रिशिखण्डम् ।

बालक्रीड़ा

(मूल) अतः यज्ञ में भद्र किये मुण्डित मस्तक को ढाँपने की इच्छा से तथा केशों के छोटे होने से भी मुकुट धारण माना गया है ॥१४७॥

(मूल) सेनापति युवराज एवं महामात्र नर इनके अर्धमुकुट की योजना करें ॥१४८॥

(मूल) अमात्य कञ्चुकी सेठ लोग तथा पुरोहितों के शिर वेष्टन के रूप में आवद्ध पट्ट वाले करे ॥१४९॥

(मूल) पिशाच उन्मत्त भूत साधक तपस्वी तथा जो अपनी स्वीकृत प्रतिज्ञा पूर्ण नही कर चुके हैं ऐसे मानवों के शिर लम्बकेश वाले होने चाहिए ॥१५०॥

(मूल) शाक्य श्रोत्रिय निर्ग्रन्थ परिव्राजक मंत्र दीक्षित एवं यज्ञ करने के लिए दीक्षा लेने वालों के मस्तक को मुण्डित करे ॥१५१॥

(मूल) इनसे बचे हुए लिङ्गियों के मस्तक व्रत के अनुसार मुण्डित केश कुञ्चित केश या लम्बकेश करें ॥१५२॥

धूर्तानां चैव कर्तव्यं ये च राजोपजीविनः ।
शृङ्गारचित्ताः पुरुषास्तेषां कुञ्चितमूर्धजाः ॥१५३॥
बालानामपि कर्तव्यं त्रिशिखण्डविभूषितम् ।
जटामकुटबद्धं च मुनीनां तु भवेच्छिरः ॥१५४॥
चेटानामपि कर्तव्यं त्रिशिखं मुण्डमेव वा ।
विदूषकस्य खलतिः स्यात्काकपदमेव वा ॥१५५॥
शेषाणामर्थयोगेन देशजातिसमाश्रयम् ।
शिरः प्रयोक्तृभिः कार्यं नानावस्थान्तराश्रयम् ॥१५६॥
भूषणैर्वर्णकैर्वस्त्रैर्माल्यैश्चैव यथाविधि ।
एवं नानाप्रकारैस्तु बुद्ध्या वेषान्प्रकल्पयेत् ॥१५७॥

अभिनवभारती

काकपदमिति काकपक्षवद्यत्र केशविच्छेदः ।

बालक्रीड़ा

(मूल) जो धूर्त पुरुष हैं या जो राजोपजीवी हैं शृङ्गार रस के रसिक हैं उनके केशों को कुञ्चित माने वक्र करना चाहिए ॥१५३॥

(मूल) बालकों के शिर को तीन शिखाओं से विभूषित करें। मुनियों के शिर में मुकुट जटाओं से बद्ध होना चाहिए ॥१५४॥

(मूल) चेटों के शिर को या तो तीन शिखाओं वाला करें या मुण्ड करें। विदूषक के या तो खञ्जा करे या फिर कौए के पैर की तरह जगह में छिन्न केश करे ॥१५५॥

(मूल) प्रयोक्ता लोग अन्य लोगों के शिर के अर्थ योग से माने प्रयोजन से देश जाति एवं नाना अवस्थाओं के अनुसार शिर को करे ॥१५६॥

(मूल) भूषणों से वर्णकों से (रंगों से) वस्त्रों से एवं मालाओं से तथा बुद्धि से सम्भावित अन्य प्रकारों से विधि पूर्वक वेषों की कल्पना करे ॥१५७॥

काकपद वह है काक पक्ष की तरह जहां केशों का विच्छेद है ॥१५५-१६३॥

पूर्वं तु प्रकृतिं स्थाप्य प्रयोगगुणसंभवाम् ।
स्त्रीणां वा पुरुषाणां वाप्यवस्थां प्राप्य तादृशीम् ॥१५८॥
सर्वे भावाश्च दिव्यानां कार्या मानुषसंश्रयाः ।
तेषां चानिमिषत्वादि नैव कार्यं प्रयोक्तृभिः ॥१५९॥
इह भावरसाश्चैव दृष्टिभिः संप्रतिष्ठिताः ।
दृष्टयैव स्थापितो ह्यर्थः पश्चादङ्गैर्विभाव्यते ॥१६०॥
एवं ज्ञेयाङ्गरचना नानाप्रकृतिसंभवा ।
सजीव इति यः प्रोक्तस्तस्य वक्ष्यामि लक्षणम् ॥१६१
यः प्राणिनां प्रवेशो वै सजीव इति संज्ञितः ।
चतुष्पदोऽथ द्विपदस्तथा चैवापदः स्मृतः ॥१६२॥
उरगानपदान् विद्याद् द्विपदान्खगमानुषान् ।
ग्राम्या आरण्याः पशवो विज्ञेयाःस्युश्च तुष्पदाः ॥१६३॥

बालक्रीड़ा

(मूल) पहले प्रयोक्ता लोग प्रयोग सम्बन्धी गुणों की संभावना अथवा वैसी अवस्था को प्राप्त करके स्त्री एवं पुरुष की प्रकृति को स्वभाव को स्थिर करे यानी हम लोगों को इस स्वभाव वाले स्त्रियों और पुरुषों का अभिनय करना है तदनुसार ही दिव्य पुरुषों एवं स्त्रियों की सभी क्रियायें करे। केवल एक निर्निमेषनेत्रत्व को नही करे ॥१५८-१५९॥

(मूल) यहां नाटच प्रयोग में रस एवं भाव दृष्टियों से सम्यक् प्रतिष्ठित है। अतः पहले अर्थ को दृष्टि से स्थिर कर ले कि ऐसा २ करना है फिर उनका अङ्गो से विभावित करे ॥१६०॥

(मूल) इस प्रकार नाना प्रकार की प्रकृतियों से होने वाली अङ्ग रचनाओं को समझें। अब तो जिसको सजीव कहते हैं उसके लक्षण को कहूंगा ॥१६१॥

(मूल) नाटच में रंग मंच पर जो प्राणियों का प्रवेश है उसकी सजीव यह संज्ञा है। वह सजीव चतुष्पद होता है द्विपद होता है और अपद होता है ॥१६२॥

(मूल) उनमें अपद उरगों को समझे। द्विपद पक्षियों एवं मनुष्यों को समझें। और चतुष्पद ग्रामीण एवं जंगली पशुओं को समझें ॥१६३॥

ये ते तु युद्धसंफेटैरुपरोधैस्तथैव च।
नानाप्रहरणोपेताः प्रयोज्या नाटके बुधैः ॥१६४॥
आयुधानि च कार्याणि पुरुषाणां प्रमाणतः।
तान्यहं वर्तयिष्यामि यथापुस्तप्रमाणतः ॥१६५॥
भिण्डिर्द्वादशतालः स्याद्दश कुन्तो भवेदथ।
अष्टौ शतघ्नी शूलं च तोमरः शक्तिरेव वा ॥१६६॥
अष्टौ ताला धनुर्ज्ञेय मायामोऽस्य द्विहस्तकः।
शरो गदा च वज्रं च चतुस्तालं विधीयते ॥१६७॥

अभिनवभारती

प्रहरणोपेता इति युद्धोपयोगिन इत्यर्थः। तथा च नागास्त्रे दृश्ये सर्पाकृतिः प्रदर्शनीया, एवं नृसिंहास्त्रे तदाकृतिरित्यादि। आयुधानां प्रमाणं दर्शयति भिण्डिरिति। वज्रं चतुस्तालम्।

बालक्रीड़ा

(मूल) जो स्वभावानुसार हर समय नाना प्रकार के प्रहरणों से आयुधों से युक्त हैं उनका नाटच में प्रयोग बुध लोग युद्ध के लिए किये जाने वाले संफेट से एवं उपरोधों से करे ॥१६४॥

(मूल) आयुधों का उपयोग पुरुषों के प्रमाण के अनुसार करे। पुस्तानुसारी प्रमाण से मैं उनको कहूंगा। पुस्त के लक्षण को पहले कह दिया है ॥१६५॥

(मूल) बारह ताल के प्रमाण की भिण्डी होती है उतने ही ताल का कुन्त भाला होता है। और शतघ्नी (तोब) शूल तोमर एवं शक्ति अष्ट ताल की होती है ॥१६६॥

(मूल) धनुष को आठ तालवाला समझें इसका आयाम विस्तार दो हाथों का होता है। शर गदा और वज्र चार ताल के किये जाते हैं ॥१६७॥

प्रहरणों से आयुधों से उपेत युक्त अर्थात् युद्ध के उपयोगी। हाँ यदि प्रयोक्ता को नागास्त्र ग्रहण करना हो तो वैसी (सर्पाकृति) आकृति दिखा देनी चाहिए, इसी प्रकार नृसिहास्त्र के विषय में भी समझें ॥१६४-१६५॥

आयुधों के प्रमाण को दिखाते हैं। भिण्डि ॥१६६॥

वज्र चार ताल का होता है ॥१६७॥

अङ्गुलानि त्वसिः कार्यश्चत्वारिंशत्प्रमाणतः ।
द्वादशाङ्गुलकं चक्रं ततोऽर्धं प्रास इष्यते ॥१६८॥
प्रासवत्पट्टसं विद्याद्दण्डश्चैव तु विंशतिः ।
विंशतिः कणयश्चैव ह्यङ्गुलानि प्रमाणतः ॥१६९॥
षोडशाङ्गुलविस्तीर्णं सबलं संप्रघण्टिकम् ।
त्रिंशदङ्गुलमानेन कर्तव्यं खेटकं बुधैः ॥१७०॥
जर्जरो दण्डकाष्ठं च तथैव प्रतिशीर्षकम् ।
छत्रं च चामरं चैव ध्वजो शृङ्गार एव च ॥१७१॥
यत्किंचिन्मानुषे लोके द्रव्यं पुंसां प्रयोजकम् ।
यच्चोपकरणं सर्वं नाट्ये तत्संप्रकीर्तितम् ॥१७२॥
यद्यस्य विषयप्राप्तं तेनोह्यं तस्य लक्षणम् ।

अभिनवभारती

चक्रमिति खड्गादियुद्धेऽपवारणम् ।

यद्यस्येति । यस्य शास्त्रस्य यद्विषयीभूतं पुरुषस्य वा तदनुसारेण तस्य वस्तुनो

बालक्रीड़ा

(मूल) ४० अंगुलियो के प्रमाण का तलवार, १२ अंगुल के प्रमाण का चक्र इससे आधे ६ अंगुलियों के प्रमाण का प्रास तथा प्रास के प्रमाण का पट्टिश या पट्टश बीस अंगुलियों के प्रमाण का दण्ड और कणय भी समझा जाता है ॥१६८-१६९॥

(मूल) बुध लोगों को बलशाली घण्टिक का निर्माण सोलह अंगुलियों से, विस्तीर्ण तथा खेटक का निर्माण तीस अंगुलियों के प्रमाण से करना चाहिए ॥१७०॥

(मूल) जर्जर दण्डकाष्ठ प्रतिशीर्षक, छत्र, चामर, ध्वज एवं शृङ्गार का भी निर्माण करता है ॥१७१॥

(मूल) इस मानुष लोक में जो कोई भी द्रव्य तथा जो कोइ भी उपकरण पुरुषों का उपयोगी है प्रयोजक है उस सब का नाटच में कथन कर दिया है ॥१७२॥

चक्र खड्गादि के द्वारा किये जाने वाले युद्धों में अपवारण स्थानीय होता है ॥१६८-१७२॥

यद् यस्य । जिस शास्त्र अथवा जिस पुरुष के विषय में प्राप्त है उसी के अनुसार उस वस्तु के प्रमाण को समझना चाहिए । उह्यशब्द से यह कहा कि प्रमाण के विषय में

जर्जरे दण्डकाष्ठे च संप्रवक्ष्यामि लक्षणम् ।।१७३।।
माहेन्द्रा वै ध्वजाः प्रोक्ता लक्षणैर्विश्वकर्मणा ।
एषामन्यतमं कुर्याज्जर्जरं दारुकर्मतः ।।१७४।।
अथवा वृक्षयोनिः स्यात्प्ररोहो वापि जर्जरः ।
वेणुरेव भवेच्छ्रेष्ठस्तस्य वक्ष्यामि लक्षणम् ।।१७५।।
श्वेतभूम्यां तु यो जातः पुष्यनक्षत्रजस्तथा ।
संग्राह्यो वै भवेद्वेणुर्जर्जरार्थे प्रयत्नतः ।।१७६।।
प्रमाणमङ्गुलानां तु शतमष्टोत्तरं भवेत् ।
पञ्चपर्वा चतुर्ग्रन्थिस्तालमात्रस्तथैव च ।।१७७।।

अभिनवभारती

लक्षणमूह्यमिति । ऊह्यशब्देनेदमाह, परिपूर्णलक्षणमुपजीव्यम्, यथा खड्गलक्षणेऽप्युपजीव्यमाने लोहादिनिर्मितत्वमप्यूह्यते । तच्च तस्मान्नाट्योपयोगिरूपमूहापोहाभ्यां कर्तव्यमिति । लक्षणैरिति विश्वकर्ममते बहुभेदं महेन्द्रध्वजस्य लक्षणमुक्तमित्यर्थः ।

बालक्रीड़ा

(मूल) जिसका—जो विषय के अनुसार प्राप्त है उसका लक्षण उसी विषय से समझना चाहिए । जर्जर और दण्डकाष्ठ के लक्षण को कहूंगा ।।१७३।।

(मूल) विश्वकर्मा ने जिन लक्षणों से इन्द्र की ध्वजा को कहा है उनमें से किसी एक लक्षण वाले जर्जर को लकडी के ऊपर क्रिया करके करें ।।१७४।।

(मूल) अथवा वृक्ष की जड जो अंकुर है वही जर्जर है । वस्तुतः बांस ही जर्जर होता है उसके लक्षण को कहूंगा ।।१७५।।

(मूल) श्वेत भूमि में पुष्पनक्षत्र में पैदा हुआ जो बाँस है । उसको जर्जर के लिए प्रयत्न से ग्रहण करना चाहिए ।।१७६।।

(मूल) जर्जर का प्रमाण १०८ अङ्गुलियों का होता है । पांच जिसमें पर्व हैं और चार जिसमें ग्रन्थियाँ है वह ताल है ।।१७७।।

परिपूर्ण लक्षण का उपजीवन करना चाहिए । जैसे खड्ग के लक्षण को कहना है वहाँ यह भी कहा जा सकता है कि खड्ग, तलवार लोहे वगैरह से बनती है । इन सबको नाटच के उपयोगी पदार्थों के निर्माण में ऊहापोह से करना चाहिए ।।१७३।।

लक्षणेः—विश्वकर्मा के मत में इन्द्र के ध्वज में बहुत प्रकार के भेद होते हैं । अतः उनके लक्षण भी भिन्न-भिन्न होते हैं ।।१७४-१७७।।

स्थूलग्रन्थिर्न कर्तव्यो न शाखी न च कीटवान् ।
न कृमिक्षतपर्वा च न हीनश्चान्यवेणुभिः ॥१७८॥
मधुसर्पिस्सर्षपाक्तं माल्यधूपपुरस्कृतम् ।
उपास्य विधिवद्वेणुं गृहणीयाज्जर्जरं प्रति ॥१७९॥
यो विधिर्यः क्रमश्चैव माहेन्द्रे तु ध्वजे स्मृतः ।
स जर्जरस्य कर्तव्यः पुष्यवेणुसमाश्रयः ॥१८०॥
भवेद्यो दीर्घपर्वा तु तनुपत्रस्तथैव च ।
पर्वाग्र तण्डुलश्चैव पुष्यवेणुः स कीर्तितः ॥१८१॥
विधिरेष मया प्रोक्तो जर्जरस्य प्रमाणतः ।
अत ऊर्ध्वं प्रवक्ष्यामि दण्डकाष्ठस्य लक्षणम् ॥१८२॥

अभिनवभारती

न हीनश्चेति अन्यवेणुसंघर्षेऽपूर्णोऽवयवतः स नेष्यत इत्यर्थः ।

पुष्यवेणुं व्याचष्टे—भवेद्वेणुर्दीर्घपर्वेति ।

बालक्रीड़ा

(मूल) स्थूल ग्रन्थि जिसमें न हो न शाखा हो न जिसमें कीडे लगे हो, न कृमियों से जिसके पर्व नष्ट कर दिये हों और न अन्य वेणुओ से हीन हो ऐसा वेणु का जर्जर बनता है ॥१७८॥

(मूल) सरसों से मिश्रित मधु एवं घी के लेप तथा माला एवं धूप के पुरस्कार से विधि पूर्वक उपासना किये वेणु को जर्जर के लिए ग्रहण करे ॥१७९॥

(मूल) जो विधि और जो क्रम इन्द्र की ध्वजा के विषय में किया गया है या किया जाता है वही विधि और वही क्रम जर्जर के निर्माण के लिए संगृहीत पुण्य वेणु के लिए भी करने चाहिए ॥१८०॥

(मूल) जो दीर्घ पर्व वाला तथा तनु पत्रे वाला है जिसके पर्व अग्रभाग में तण्डुल माने पराग के कण हों वह वेणु पुण्यवेणु कहलाता है ॥१८१॥

(मूल) प्रमाण के अनुसार जर्जर के सम्बन्ध में यह विधि मैंने कही है । अब इसके बाद दण्डकाष्ठ के लक्षण को कहूंगा ॥१८२॥

न हीनः । अर्थात् अन्य वेणुओं के संघर्ष में जो अवयवों से अपूर्ण है वह इष्ट नही है ॥१७८।१८०॥

पुष्प वेण को कहते हैं जिसके पर्व दीर्घ हो वह पुष्यवेणु होता है ॥१८१॥

कपित्थबिल्ववंशेभ्यो दण्डकाष्ठं भवेदथ ।
वक्रं चैव हि कर्तव्यं त्रिभागे लक्षणान्वितम् ॥१८३॥
कीटैर्नोपहतं यच्च व्याधिना न च पीडितम् ।
मन्दशाखं भवेद्यच्च दण्डकाष्ठं तु तद्भवेत् ॥१८४॥
यस्त्वेभिर्लक्षणैर्हीनं दण्डकाष्ठं सजर्जरम् ।
कारयेत्स त्वपचयं महान्तं प्राप्नुयाद् ध्रुवम् ॥१८५॥
अथ शीर्षविभागार्थं घटी कार्या प्रयत्नतः ।
स्वप्रमाणविनिर्दिष्टा द्वात्रिंशत्यङ्गुलानि वै ॥१८६॥

अभिनवभारती

लक्षणेन अन्वितम् लक्षणान्वितम् । शीर्षविभागा इति यत्र द्विशिरास्त्रिशिरा इत्यादि दृश्यते, यत्र वा निजशिर एवाच्छाद्य शिरोऽन्तरं प्रदर्श्यते । प्रतिपादंप्रतिहस्तामेष एव कल्पः ।

बालक्रीड़ा

(मूल) कपित्थ विल्व एवं वंश से दण्डकाष्ठ का निर्माण होना चाहिए । इसको वक्र करना चाहिए तथा तीनों भागों में इसे लक्षणों से अन्वित होना चाहिए ॥१८३॥

(मूल) जो कीटों से उपहित नही हो तथा जो किसी प्रकार के रोगों से पीड़ित भी न हो और जिसकी शाखा मन्द हो छोटी हो ऐसा वेणु दण्डकाष्ठ के लिए होना चाहिए ॥१८४॥

(मूल) जो प्रयोक्ता इन लक्षणों से हीन वेणु का दण्डकाष्ठ एवं जर्जर बनवाता है वह महान् अपचय को प्राप्त करता है । यह ध्रुव है निश्चित है ॥१८५॥

(मूल) वेणु के शीर्षस्थानीय शाखा के आधे विभाग की प्रयत्न से घड़ी वनवाये । ३२ अंगुलियां इसका प्रमाण कहा गया है ॥१८६॥

लक्षण से अन्वित, युक्त लक्षणान्वित है । जहां दो या तीन सिर दिखाई पड़ते हैं अथवा अपने सिर को ही वस्त्र से आच्छादित कर के दूसरा सिर दिखाया जाता है तो उसको शीर्ष विभाग कहते हैं यह कल्प, प्रक्रिया हाथ पैर से भी हाथ पैर दिखाने के लिए भी होती है ॥१८४-१८६॥

बिल्वमध्येन कर्तव्या घटी सिरसमाश्रया ॥
स्विन्नेन बिल्वकल्केन द्रवेण च समन्विता ॥१८७॥
भस्मना वा तुषैर्वापि कारयेत्प्रतिशीर्षकम् ।
संछाद्य तु ततो वस्त्रैर्बिल्वदिग्धैर्घटाश्रयैः ॥१८८॥
बिल्वकल्केन चीरं तु दिग्ध्वा संयोजयेद्धटीम् ।
न स्थूलां नानतां तन्वीं दीर्घां चैव न कारयेत् ॥१८९॥
तस्यामातपशुष्कायां सुशुष्कायामथापि वा ।
छेद्यं बुधाः प्रकुर्वन्ति विधिदृष्टेन कर्मणा ॥१९०॥

अभिनवभारती

बिल्वस्य मध्यं मज्जा सिरश्च वृक्षत्वगादिः । कथं सा कर्तव्येत्याह स्विन्नेनेति भस्मना तुषचूर्णेन वा सुसमाहिता छादितच्छिद्रेत्यर्थः । न स्थूलामिति गुरुत्वभयात् ।

बालक्रीड़ा

(मूल) इस शीर्ष स्थानीय शाखा के आधे विभाग के आश्रय से बनने वाली घटी को बिल्व के मध्यभाग से भी बनवा सकते हैं। इसमें बिलक के द्रवीभूत कल्क को स्विन्न करके थोड़ा गरम करके उसमें मिलाना चाहिए ॥१८७॥

(मूल) घटी के शिरोभाग पर भस्म या तुषों को गिरा दे। उसके बाद उस घटी को विल्व के कल्प में भिगोये हुए वस्त्र से ढांप दे ॥१८८॥

(मूल) विल्व के कल्क से भीगे हुए चीर से घटी को संजोय दे। वह घटी न तो स्थूल न आनता न तन्वी और न दीर्घा होनी चाहिए ॥१८९॥

(मूल) आतप में सूर्य के घाम में थोड़ी सुखाई गई अथवा एकदम सुखाई गई उसमें बुध लोगों को विधि दृष्ट कर्म से छेद करना चाहिए ॥१९०॥

विल्व का मध्य माने मज्जा। सिर माने वृक्ष की त्वचा आदि। उस घटी को कैसे करना चाहिए इस पर कहते हैं स्विन्नेन माने विल्व के कल्क को उसना देना स्विन्न होता है ॥१८७॥

भस्म माने पत्तो को जलाकर बनाया गया चूरा अथवा तुष चूर्ण से सुसमाहित माने उसके छिद्र को आच्छादित कर दिया गया है ॥१८८॥

न स्थूलां माने स्थूल नही हो इसका आशय है स्थूल होगी तो भार अधिक हो जायगा अतः बोझ माने गुरुता के भय से स्थूल नही करना चाहिए। न आनतां माने जो झुकी हुई न हो आनत वही होती हैं जो पेलव कोमल होती हैं ॥१८९॥

सुतीक्ष्णेन तु शस्त्रेण अर्धार्धं प्रविभज्य च ।
स्वप्रमाणविनिर्दिष्टं ललाटकृतकोणकम् ॥१९१॥
अर्धाङ्गुलं ललाटं तु कार्यं छेद्यं षडङ्गुलम् ।
अर्धार्धमङ्गुलं छेद्यं कटयोर्द्व्यङ्गुलं भवेत् ॥१९२॥
कटान्ते कर्णनालस्य छेद्यं द्व्यधिकमङ्गुलम् ।
त्र्यङ्गुलं कर्णविवरं तथा स्याच्छेद्यमेव हि ॥१९३॥
ततश्चैवावटुः कार्या सुसमा द्वादशाङ्गुला ।
घट्यां ह्येतत्सदा च्छेद्ये विधानं विहितं मया ॥१९४॥
तस्योपरिगताः कार्या मुकुटा बहुशिल्पजाः ।
नानारत्नप्रतिच्छन्ना बहुरूपोपशोभिताः ॥१९५॥

अभिनवभारती

नानतामिति पेलवात्, छेद्यमित्यवयवच्छिद्रोत्पादनार्थम् ॥१९०।१९३॥

अवटुरिति कर्णशष्कुली ॥१९४।१९९॥

बालक्रीड़ा

(मूल) सुतीक्ष्ण शस्त्र से उसके आधे आधे खण्ड करके निर्दिष्ट प्रमाण के अनुसार ललाट कोण को करें ॥१९१॥

(मूल) उसमें अर्धाङ्गुल प्रमाण का ललाट होना चाहिए। किन्तु छेद्य भाग षड़ङ्गुल का होना चाहिए । उसमें यद्यपि छेद्य आधा आधा अङ्गुल का होता है तद्यपि करों मैं द्वयंगुल छेद्य होना चाहिए। यहां कट का अर्थ कोण है ॥१९२॥

(मूल) कर्ण नाल के कटान्त में दो अंगुल का छेद्य होना चाहिए। कर्ण विवर छेद्य तीन अंगुल का होना चाहिए ॥१९३॥

(मूल) उसके बाद वारह अंगुल की सुसमा कर्णशष्कुली बनानी चाहिए। घटी में छेद्य के बिषय में मैंने सदा यही माप बतलाया है ॥१९४॥

(मूल) उसके ऊपर जिसमें बहुत प्रकार के शिल्प किये गये हैं तथा जिसमें बहुत से रत्न जडे हुए हैं ऐसे बहुरूपों से उपशोभित मुकुट बनाने चाहिए ॥१९५॥

अवयव में छिद्र का उत्पादन करने के लिए छेद्य कहा गया है ॥१९३॥

अवटु माने कर्ण-शष्कुली ॥१९४॥

तथोपकरणानीह नाट्ययोगकृतानि वै ।
बहुप्रकारयुक्तानि कुर्वीत प्रकृतिं प्रति ॥१९६॥
यत्किंचिदस्मिन् लोके तु चराचरसमन्विते ।
बिहितं कर्म शिल्पं वा तत्तूपकरणं स्मृतम् ॥१९७॥
यद्यस्य विषयं प्राप्तं तत्तदेवाभिगच्छति ।
नास्त्यन्तः पुरुषाणां हि नाट्योपकरणाश्रये ॥१९८॥
यद्येनोत्पादितं कर्म शिल्पयोगक्रियापि वा ।
तस्च तेन कृता सृष्टिः प्रमाणं लक्षणं तथा ॥१९९॥
या काष्ठयन्त्रभूयिष्ठा कृता सृष्टिर्महात्मना ।
न सास्माकं नाट्ययोगे कस्मात्खेदावहा हि सा २००॥
यद् द्रव्यं जीवलोके तु नानालक्षणलक्षितम् ।
तस्यानुकृतिसंस्थानं नाट्योपकरणं भवेत् ॥२०१॥

अभिनवभारती

महात्मनेति विश्वकर्मणा । विभाव इति भावनामात्रमित्यर्थः ॥२००।२०४॥

बालक्रीड़ा

(मूल) प्रकृति के विषय में नाटच प्रयोग में किये गये बहुत प्रकार के उपकरणों को करना चाहिए ॥१९६॥

(मूल) चराचर से समन्वित इस लोक में जो कुछ भी कर्म या शिल्प है वह सब उपकरण है ॥१९७॥

(मूल) जिसका जो विषय है उसको वह अभिगत होता है पुरुषों के नाटच सम्बन्धी उपकरण के विषय में अन्त नही है ॥१९८॥

(मूल) जिसने जिस कर्म की और शिल्प की योग क्रिया को उत्पन्न किया हैं उसने उसकी सृष्टि की है तथा प्रमाण एवं लक्षण को भी किया है ॥१९९॥

(मूल) उस महात्मा ने जिसमें काष्ठ के यन्त्र बहुत है ऐसी सृष्टि की है वह सृष्टि हमारे नाटच प्रयोग के उपयोगी नही है, क्योंकि वह बहुत कष्टा वह है ॥२००॥

(मूल) जीव लोक में जो नाना प्रकार के लक्षणों से लक्षित द्रव्य है। उसका अनुकरण के रूप में संस्थान नाटच का उपकरण है ॥२०१॥

महात्मा माने विश्वकर्मा । विभाव अर्थात् भावना मात्र है ॥२००-२०४॥

प्रासाद गृहयानानि नानाप्रहरणानि च ।
न शक्यं तानि वै कर्तुं यथोक्तानीह लक्षणैः ।।२०२।।
लोकधर्मी भवेत्त्वन्यो नाट्यधर्मी तथापरः ।
स्वभावो लोकधर्मी तु विभावो नाट्यमेव हि ।।२०३।।
आयसं तु न कर्त्तव्यं न च सारमयं तथा ।
नाट्योपकरणं तज्ज्ञैर्गुरुखेदकरं भवेत् ।।२०४।।
काष्ठचर्मसु वस्त्रेषु जतुवेणुदलेषु च ।
नाट्योपकरणानीह लघुकर्माणिकारयेत् ।।२०५।।

अभिनवभारती

लघुकर्माणीति येषु क्रियमाणेषु लाघवेन क्रिया संपद्यते ।।२०५।।

बालक्रीड़ा

(मूल) जीव लोक के द्रव्य का अनुकरण नकल नाट्य का उपकरण होता है ऐसा क्यों । यह प्रश्न होता है । उत्तर ! ब्रह्माजी ने जिस प्रकार के लक्षणों से समन्वित, नाना प्रकार के प्रहरण प्रासाद यान एवं शस्त्र अस्त्र वगैरह बनाये हैं उसी प्रकार के लक्षणों से युक्त उनको मनुष्य के द्वारा बनाना शक्य नही है अतः ये अनुकरणीय यहां हैं ।।२०२।।

(मूल) क्योंकि लोकधर्मी पदार्थ भिन्न है और नाट्य धर्मी पदार्थ अपर है । उनमें स्वभाव लोक धर्मी है और विभाव नाट्य धर्मी है ।।२०३।।

(मूल) विद्वानों को नाट्य के उपकरण को कभी लौहमय नही बनाना चाहिए और न सारमय बनाना चाहिए । क्योंकि वह उनसे बना हुआ उपकरण उपयोग में बड़ा कष्ट कर होता है ।।२०४।।

(मूल) काष्ठ चर्म वस्त्र लाही एवं बांस के पत्तों से बने हुए उपकरण जिनके निर्माण में हलकी हलकी क्रियाएँ की जाती है या की गई हैं नाट्य में उपयोगी होते हैं ।।२०५।।

जिन वस्तुओं को करने में लाघव माने अनायास क्रिया हो जाय वह लघु कर्म होता है ।।२०५।।

चर्मवर्मध्वजाः शैलाः प्रासादा देवतागृहाः ।
हयवारणयानानि विमानानि गृहाणि च ॥२०६॥

पूर्वं वेणुदलैः कृत्वा कृतीर्भावसमाश्रयाः ।
ततः सुरङ्गैराच्छाद्य वस्त्रैः सारूप्यमानयेत् ॥२०७॥

अथवा यदि वस्त्राणामसान्निध्यं भवेदिह ।
तालीयैर्वा किलिञ्जैर्वा श्लक्ष्णैर्वस्त्रक्रिया भवेत् ॥२०८॥

तथा प्रहरणानि स्युस्तृणवेणुदलादिभिः ।
जतुभाण्डक्रियाभिश्च नानारूपाणि नाटके ॥२०९॥

प्रतिपादं प्रतिशिरः प्रतिहस्तं प्रतित्वचम् ।
तृणैः किलिञ्जैर्भाण्डैर्वा सारूप्याणि तु कारयेत् ॥२१०॥

अभिनवभारती

तालीयैरिति तालपत्रैः । भाण्डैरिति अलाबुदलपात्रादिभिः ॥२१०।२१३।

बालक्रीड़ा

(मूल) चर्म वर्म शैल प्रासाद देवताओं के गृह हाथी घोड़े विमान एवं गृह सभी उक्त प्रकार के ही उपयोगी होते हैं ॥२०६॥

(मूल) अपने भावों के अनुसार पहले वेणु के दलों से आकृतियों को बना ले उसके बाद उनको सुन्दर रंगे हुए वस्त्रों से आच्छादित करके सस्तपता में लावे ॥२०७॥

(मूल) अथवा यदि प्रयोग की वेला में वस्त्रों का अभाव हो तो ताल के या किलिञ्ज के चिकने चिकने पत्तों से वस्त्र क्रिया को करे ॥२०८॥

(मूल) उसी प्रकार शस्त्र क्रिया को भी तृण एवं वेणु दलों से करें। जतु भाण्ड क्रियाओं से भी नाट के नाना रूपों वाले उपकरणों को करें ॥२०९॥

(मूल) आकृतियों के प्रत्येक पाद शिर हस्त एवं त्वचा के प्रासण्य को तृणों किलिञ्जों एवं भाण्डों से करे या करवाये ॥२१०॥

तालीयैं माने ताल पत्रों से की गई ॥२०८।२०९॥

भाण्डैः माने अलाबु को लौकी को कद्दू को दलन करके बनाया गया पात्र ॥२१०-२१३॥

यद्यस्य सदृशं रूपं सारूप्यगुणसंभवम् ।
मृण्मयं तत्तु कृत्स्नं तु नानारूपं तु कारयेत् ॥२११॥
भाण्डवस्त्रमधूच्छिष्टैर्लाक्षयाभ्रदलेन च ।
नागास्ते विविधाः कार्या ह्यतसीशणबिल्वजैः ॥२१२॥
नानाकुसुमजातीश्च फलानि विविधानि ।
भाण्डवस्त्रमधूच्छिष्टैर्लाक्षया वापि कारयेत् ॥२१३॥
भाण्डवस्त्रमधूच्छिष्टैस्ताम्रपत्रैस्तथैव च ।
सम्यक्च नीलीरागेणाप्यभ्रपत्रेण चैव हि ॥२१४॥
रञ्जितेनाभ्रपत्रेण मणीश्चैव प्रकारयेत् ।
उपाश्रयमथाप्येषां शुल्बवङ्गेन कारयेत् ॥२१५॥

अभिनवभारती

मधूच्छिष्टं सित्थकम् ॥२१४।२२४॥

बालक्रीड़ा

(मूल) समान रूपता वाले गुणों के कारण जो रूप जिसके सदृश हो उन सभी नाना रूपों को मृन्मय करे या कराये ॥२११॥

(मूल) भाण्ड वस्त्र मधूच्छिष्ट (शहद के निवालने के बाद बचा हुआ करकट) लाक्षा अभ्रक खण्ड अतसी शण एवं विल्वों से विविध हाथियों को बनाये ॥२१२॥

(मूल) नाना जाति के पुष्प और विविध फलों को भाण्ड वस्त्र मधूच्छिष्ट तथा लाक्षा से बनवाये ॥२१३॥

(मूल) भाण्डवस्त्र मधूच्छिष्ट तथा ताभ्रपत्रों से और सम्यक् तरीके से नीली राग में रंगे हुए अभ्रक वत्र से भी ये बनाये जा सकते हैं ॥२१४॥

(मूल) रंगे हुए अभ्रक के पतों से मणियों को बनवाये और वे मणियां जिसमें जडी जाती हैं उन आश्रयों को शुल्व वंग से बनवाये ॥२१५॥

मधूच्छिष्ट माने सित्थक सहद निकाला हुआ जाला ॥२१४-२२४॥

विविधा मुकुटा दिव्या पूर्वं ये गदिता मया ।
तेऽभ्रपत्रोज्ज्वलाः कार्या मणिमालोपशोभिताः ।।२१६।।
न शास्त्रप्रभवं कर्म तेषां हि समुदाहृतम् ।
आचार्यबुध्या कर्तव्यमूहापोहप्रयोजितम् ।।२१७।।
एष मर्त्यक्रियायोगो भविष्यत्कल्पितो मया ।
कस्मादल्पबलत्वं हि मनुष्येषु भविष्यति ।।२१८।।
मर्त्यानामपि नो शक्या विभावाः सर्वकाञ्चनाः ।
नेष्टाः सुवर्णरत्नैस्तु मुकुटा भूषणानि वा ।।२१९।।
युद्धे नियुद्धे नृत्ते वा नृत्यव्यापारकर्मणि ।
गुरुभावावसन्नस्च स्वेदो मूर्छा च जायते ।।२२०।।
स्वेदमूर्छाक्लमार्तस्च प्रयोगस्तु विनश्यति ।
प्राणात्ययः कदाचिच्च भवेद्व्यायतचेष्टया ।।२२१।।

बालक्रीड़ा

(मूल) विविध प्रकार के दिव्य पुरुषों के मुकुट जिनको मैं पहले कह चुका हूं । अभ्रक खण्ड के तरह उज्ज्वल उनको माणिमाला से उप शोभित करे ।।२१६।।

(मूल) उनके निर्माणोचित कर्म को क्रिया को शास्त्रों में कही नही कहे हैं । उनको आचार्य जन अपनी बुद्धि से अहापोह करके करते हैं ।।११७।।

(मूल) भविष्य में जिसकी कल्पना की जा सकती है उस मानुष क्रियायोग को मैंने कह दिया है । क्योंकि अल्प सामर्थ्य वाले मनुष्य आगे होगे ।।२१८।।

(मूल) सभी भावों को पदार्थो को काञ्चन के बना देना मनुष्यों के लिए शक्य नही है । सुवर्ण में जटित रत्नों से निर्मित मुकुट अथवा अन्य भूषण इष्ट नही है ।।२१९।।

(मूल) युद्ध में माने सामान्य युद्ध में और नियुद्ध में द्वन्द्व युद्ध में एवं नृत्त में तथा नृत्यव्यापार के नृत्यक्रियया के करने में होने वाले गुरुभाव से अधिक परिश्रम से अवसन्न हुए पुरुष को पसीना एवं मूर्छा हो जाती है ।।२२०।।

(मूल) स्वेद मूर्च्छा एवं क्लम से आर्त्त व्याकुल मनुष्य के द्वारा क्रियमाण प्रयोग अभिनय नष्ट हो जाता है । कदाचित् अधिक चेष्टा से प्राणात्यव भी हो सकता है ।।२२१।।

तस्मात्ताम्रमयैः पत्रैरभ्रकै रञ्जितैरपि ।
खण्डैरपि मधूच्छिष्टैः कार्याण्याभरणानि तु ॥२२२॥

एवं लोकोपचारेण स्वबुद्धिविभवेन च ।
नाटयोपकरणानीह बुधः सम्यक् प्रयोजयेत् ॥२२३॥

न भेद्यं नैव च च्छेद्यं न प्रहर्तव्यमेव च ।
रङ्गे प्रहरणैः कार्यं संज्ञामात्रं तु कारयेत् ॥२२४॥

अथवा योगशिक्षाभिर्विद्यामायाकृतेन वा ।
शस्त्रमोक्षः प्रकर्तव्यो रङ्गमध्ये प्रयोक्तृभिः ॥२२५॥

एवं नानाप्रकाराणि आयुधाभरणानि च ।
नोक्तानि यानि च मया लोकाद् ग्राह्याणि तान्यपि ॥२२६॥

अभिनवभारती

सुधामकोक्ता विद्या हस्तलघवादिः । माया चक्षुर्बन्धादिका ॥२२५।२२६॥

बालक्रीड़ा

(मूल) लोहे के या अन्य धातुओं के वजनदार भारी आभरणो को नही बना कर ताम्बे के रंग के अभ्रक के पत्तों से अथवा रंजित मधूच्छिष्ट खण्डों से आभरणों को बनवाये ॥२२२॥

(मूल) लोक व्यवहार से अपनी बुद्धि के विभव से नाट्य के उपकरणों को बनाकर बुधगण सम्यक् प्रकार से प्रयोग करते हुए अभिनय करें ॥२२३॥

(मूल) रंग में अभिनय मंच पर प्रहरणों माने अस्त्रों से न तो भेदन करना है प्रहरणों माने शस्त्रों से न लेदन करना है और प्रहरण माने आयुधों से न प्रहार करना है किन्तु संज्ञा मात्र यानी इशारा भर करना कराना है ॥२२४॥

(मूल) शिक्षा से गुरु की प्रदत्त या दीयमान शिक्षा के द्वारा किये गये अभ्यास से अथवा योगप्रक्रिया से विद्या से माया के बल से प्रयोक्ता अभिनेता लोग नाट्य मञ्च पर रंग में शस्त्र को छोड़ें ॥२२५॥

(मूल) इस प्रकार विभिन्न आयुध एवं आभरणों को जिनको मैंने कहा नही है उनको भी लोक से ग्रहण कर लेना चाहिए ॥२२६॥

सुधामक के द्वारा कही हुई विद्या हस्तलाघवादि होती है। माया माने चक्षुर्बन्धादि आंखो को बांध देना है जिससे दीखता कुछ और दिखाना कुछ ॥२२५-२२६॥

आहार्याभिनयो ह्येष मया प्रोक्तः समासतः ।
अत ऊर्ध्वं प्रवक्ष्यामि सामान्याभिनयं प्रति ।।२२७।।

इति भरतीये नाट्याशात्रे आहार्याभिनयो
नामैकविंशोऽध्यायः ।

अभिनवभारती

एनमध्यायमुपसंहरन्नभिनये वक्तव्यशेषमासूत्रयति आहार्याभिनयो ह्येष इति शिवम् ।।२२७।।

आहार्याभिनयाध्याये वृत्तिरेषा यथाक्रमम् ।
कृताभिनवगुप्तेन ग्रन्थिस्थानेषु तत्त्वतः ।।

इति श्रीमहामाहेश्वराभिनवगुप्ताचार्यविरचितायां
नाट्यवेदविवृतावभिनवभारत्यामाहार्या-
भिनयाध्याय एकविंशः ।।

बालक्रीड़ा

(मूल) यह मैंने आप लोगों के प्रति संक्षेप में आहार्य अभिनय को कहा है । अब इसके थाद सामान्य अभिनय के विषय में कहूंगा ।।२२७।।

इस प्रकार आचार्य मधुसूदन शास्त्री की कृति भरतीय नाट्यशास्त्र के आहार्य अभिनय सम्बन्धी २१ वें अध्याय के मूल की हिन्दी टीका बालक्रीड़ा सम्पूर्ण हुई ।

इस इक्कीसवें अध्याय का उपसंहार करते हुए अभिनय के विषय में कथनीय अंश की सूचना देते हैं आसूत्रण करते हैं कि यह आहार्य अभिनय है ।

ग्रन्थिस्थानों अर्थात् जहां ग्रन्थकार ने गूढाभिप्राय वाले शब्दों का प्रयोग किया है उन शब्दों का तात्विक अर्थ बतलाते हुए यथाक्रमम् माने क्रमानुसार आहार्य अभिनय नाम २१ वें अध्याय में इस टीका को अभिनव गुप्त ने बनाया ।

इस प्रकार अचार्य मधुसूदन शास्त्री की कृति नाटचशास्त्र के आहार्याभिनय नामक इक्कीसवें अध्याय की अभिनवभारती की हिन्दी टीका बालक्रीडा समाप्त हुई ।

श्रीः

नाट्यशास्त्रम्

द्वाविंशोऽध्यायः.

सामान्याभिनयो नाम ज्ञेयो वागङ्गसत्त्वजः ।

अभिनवभारती द्वाविंशोऽध्यायः

भेदेनात्माभिमुखतां नयन्तं भेदकारणम् ।
सामान्याभिनयाकारगर्वमूर्ति शिवं नुमः ।।

बालक्रीड़ा

अब वाईसवें अध्याय की अभिनवभारती की हिन्दी टीका बालक्रीड़ा का आरम्भ करते हैं। जिसमें षट्त्रिंशत्तत्त्वात्मक शिव के २२सवें स्वरूप अहंकार की वन्दना करते हैं। अहंकार और गर्व दोनों में विषय विषयिभाव है। अतः यहां गर्व मूर्ति शिव की वन्दना करते हैं। क्योंकि विषय और विषयी में भी अभेद हो सकता है।

वह अहंकार जहां रहता है वहां अपने में महत्त्व का भाव रहता है और दूसरे में तुच्छत्व बुद्धि रहती है अत एव भेद उनमें होना अनिवार्य है इसी लिए भेद कारणम् लिखा है। अहंकार भेद का जनक है। परन्तु भगवान् प्राणियों के स्वभावतः हितकारी हैं इस लिए अनिवार्य भिन्नता में भी जीव को अपने अभिमुख करके कल्याण करते हैं इस सिद्धान्त के अनुसार अभिनवगुप्त उनको प्रणाम करते हैं उनकी स्तुति करते हैं कि-भेदेन।

गंगा जल एवं कूप जल दोनों समान होते हैं महिषी घृत एवं गोघृत दोनों समान होते हैं अतः दोनों मिलकर घुलकर भेद शून्य हो जाते हैं। परन्तु जो भिन्न है, वे भेद शून्य नही होते है। लोक कल्याणकारी भगवान् भेद से भी यानी भेद के द्वारा भी अपने अभिमुख में जीव को ले रहे हैं। भेद के द्वारा भी कहने का आधार है कि अहंकार रूप भाव भेद का कारण होता है अतः भेद कारण अहंकार मूर्ति शिव को कहा है। और अहंकार गर्वात्मक है। यानी अहंकार विषयी है और गर्व विषय है। जैसा कि कहा है—

अभिनवभारती

इहान्यदित्युपरञ्जकं च अभिनयं चान्याभिनयं समं च तदिति तत्र भवः सामान्याभिनय इति परमार्थः। कोहलमतानुसारिभिर्वृद्धैः सामान्याभिनयस्तु षोढा भण्यते। तथा हि कोहलः—

शिष्टं कामं मिश्रं वक्रं संभूतमेकयुक्तत्वम्।
सामान्याभिनये यत् षोढा विदुरेतदेव बुधाः ।।इति।।

बालक्रीड़ा

मनो बुद्धिरहंकारश्चित्तं करणमात्तरम्।
संशयो निश्चयो गर्वः स्मरणं विषया इमे।

अतः संशयात्मक मन होता है निश्चयात्मिका बुद्धि होती है गर्वात्मक अहंकार एवं स्मरणात्मक चित्त होता है। यह सिद्धान्त है।

सर्वं खलु इदं ब्रह्म। ब्रह्मैवेदमखिलं जगत् नेह नानास्ति किञ्चित्। इन श्रुतियों के अनुसार ब्रह्म शिव विशेषाकार नही होकर सामान्याकार ही है। अतः भेद से भी अपने अभिमुख लेने वाले भेद के कारण सामान्याकार गर्व मूर्ति शिव की हम अभिनव गुप्त स्तुति करते है नुति करते है। णु स्तुतौ का नुमः बनता है। आचार्य अभिनव गुप्त अभिनव भारती में सामान्याभिनय इस पद की व्याख्या करते हैं—

इसमें सम अन्य और अभिनय ये तीन शब्द है। ऐसा मानकर लिखते हैं कि यहाँ नाटच शास्त्र के २२ वें अध्याय में अन्य इसका अर्थ उपरञ्जक है। अतः अन्य और अभिनय इसका द्वन्द्व समास हुआ जिससे अन्याभिनय शब्द वना। फिर सम और अन्याभिनय का द्वन्द्व समास किया तब समान्याभिनय शब्द बना इससे भव अर्थ में अण् प्रत्यय होने पर पूर्व पद में वृद्धि होकर सामान्याभिनय शब्द बना। इस लिए लिखते हैं कि यह परमार्थ है।

यहां विचार है कि अभिनय शब्द व्यञ्जकाभिनयौ समौ इस अमरकोष के अनुसार पुल्लिङ्ग ही है। किन्तु अभिनव भारती में अन्यच्च अभिनयं च अन्याभिनयम्। समश्च अन्याभिनयञ्चेति समान्याभिनयम् इस तरह अभिनय शब्द को नपुंसक लिखा है। कैसे लिखा। मूल में भी सामान्याभिनयः और स्वयं ने भी अभिनव भारती में सामान्याभिनयस्तु ऐसा पुंल्लिङ्ग लिखा है। जो हो।

कोहलमत का अनुसरण करने वाले वृद्धों ने सामान्याभिनय को तो छः प्रकार का कहा है। जैसा कि कोहल कहते हैं शिष्ट, काम, मिश्र, वक्र, सम्भूत एवं एकयुक्तत्व जो सामान्याभिनय में छ प्रकार हैं इसी को बुध पण्डित लोग जानते हैं।

अभिनवभारती

तत्र सामान्यमिति साधारणमुच्यते तेन सर्वेष्वभिनयेषु यद्रूपमवशिष्टं पूर्वं नोक्तमवश्यं वक्तव्यं च कविनटशिक्षार्थं तद्येनाध्यायेनाभिधीयते स सामान्याभिनयः, साऽभिनयेषु सामान्यभूतः साधारणभूतोऽभिनयविषयत्वात् स्ववाच्याभिमुख्यनयनाद्वाभिनय इति व्युत्पत्त्या । तथा हि सात्त्विकस्य हावभावहेलादिना विशेषः पूर्वमनुक्तोऽभिधीयते । विषयश्चैवं 'षडात्मकः शारीरः' (२२-४१) इत्यादिना 'आलापश्च प्रलापश्च' (२२-४६) इत्यादिनाङ्गिकवाचिकयोः ।

ननु 'अङ्गाद्यभिनयस्यैव यो विशेषः' (२५-१) ईत्यतः चित्राभिनयात् कोऽस्य विशेषः, उच्यते—तत्र वागङ्गसत्त्वव्यामिश्रत्वेन चित्रता । इह तु प्रत्येकनियतस्यानुक्तस्य विशेषान्तरस्याभिधानमिति । तथा हि तत्र चित्रशब्दं

बालक्रीड़ा

तत्र उनमें साधारणन्तु सामान्यम् इस अमरकोष के अनुसार सामान्यम् यह साधारण को कहता है । यहां आचार्य अटर का पटर लिखते हैं । पहले समं च अन्याभिनयञ्च इस तरह समको और अन्याभिनय को जोड़ा है किन्तु यहां समको और अन्य को एक मान लिया है । जो हो बड़े लोग हैं ।

इससे सम्पूर्ण अभिनयों में जो रूप अवशिष्ट है बचा है जिसे कवि और नट की शिक्षा के लिए अवश्य वक्तव्यमा न कर कहना चाहिये किन्तु पहले नही कहा है उसको इस अध्याय के द्वारा कहते हैं कि वह सामान्याभिनय है । वह सामान्याभिनय अभिनय का विषय होने से सभी अभिनयों में सामान्य हैं अर्थात् साधारण है । अथवा स्व माने अभिनय के वाच्य प्रतिपाद्य अर्थात् शिक्षणीय कवि एवं नट को अभिमुख में नयन है इस व्युत्पत्ति के कारण अभिनय शब्द बना है । जैसा कि सात्त्विक अभिनय का हाव भाव हेला आदि के द्वारा जो वैशिष्टय है जिसको पहले नही कहा है उसको कहते हैं । और इसी प्रकार षडात्मा शारीरः इत्यादि से आंगिक अभिनय के विषय को और आलापश्च प्रलापश्च इत्यादि से वाचिक अभिनय के विषय को कहते हैं ।

प्रश्न—अङ्गाद्यभिनय का ही जो वैशिष्ट्य है इस चित्राभिनय से इस सामान्याभिनय का कौन भेद है अर्थात् क्या भेद है । उत्तर—कहते हैं कि वहां वाचिक आङ्गिक एवं सात्त्विक अभिनयों के व्यामिश्रण से चित्रता होती है और यहां तो प्रत्येक अभिनय में जो नियत है जिसको यहां कहा नही है उस विशेषान्तर को कहते हैं ।

अभिनवभारती

पठिष्यति 'अनुक्त उच्यते चित्रः' इति (२५-२) तथा चेह तु सामान्याभिनयः कामोपचारः, स हि सकलप्राणिवर्गसाधारण, आभिमुख्यं नयति च सर्वं जन्तु-वर्गमिति वागङ्गसत्त्वलक्षणेन सकलेन सामान्यात्मना चाभिनयेन अभिनीयत इति । तत्कामोपचारः स्त्रीपुरुषस्वभावः तदवस्थाभेदेनेहाभिनीयत इति सामान्य-भिनयोऽयमध्यायः । अत एवैतदध्यायशेषभूतकामोपचारप्रतिपादकमेवाध्यायं वैशि-कोपचाराख्यं मन्तव्यम् । तथा सामान्यमिति समानानां कर्म; सामान्यं च तदभिनयनं च । तत्तेनैकमेवाभिनयं गमयितुं यथासम्भवं बहूनामभिनयानां याभिनयक्रिया एकं तदेवाभिनयनक्रियारूपं कर्म समानानां सताम् ।

नन्वेवमेकत्राभिनये किं बहुभिरभिनयैः । तत्र केचिदाहुः—स्वोपस्थानेषु साध्येषूपस्कारांँशों व्यापार इति । तच्चासत्, नहि नाटकादौ सूत्रेष्विवोपस्कारो

बालक्रीड़ा

जैसे कि वहां चित्र शब्द को पढ़ेंगे जो अनुक्त है वह चित्र है । और यहां तो सामान्या-भिनय है जिसमें ऐच्छिक उपचार है । वह सामान्याभिनय सकल प्राणि वर्ग के साधा-रण है और वह सकल जन्तु वर्ग को अभिमुख में नयन भी करता है अतः वाणी अङ्ग एवं सत्त्वलक्षण सकल सामान्य अभिनय शब्द से कहा जाता है । वह कामोपचार स्त्री और पुरुष का स्वभाव है जिसका अवस्था के भेद से यह अभिनय किया जाता है । इस लिए यह सामान्याभिनय नामक अध्याय है । इसलिए ही इस बाईसवें अध्याय को २१ वे अध्याय के अंगभूत कामोपचार के प्रतिपादक अध्याय को वैशिकोपचार नाम वाला मानना चाहिए । तथा सामान्य यह समानों का कर्म है । अतः सामान्य भी है और अभिनयन भी है । इससे एक ही अभिनय को समझाने के लिए यथासम्भव बहुत से अभिनयों की जो अभिनयन क्रिया है वही अभिनयन क्रिया रूप एक कर्म समान होने वाले सभी का है ।

प्रश्न—इस प्रकार जब बहुतों का एक ही अभिनय हैं तब बहुत से अभिनयों की क्या जरूरत है । इस पर कोई कहते हैं कि अभिनयों में साध्य कर्त्तव्य जो अपना उपस्थान है अभिनय करने के लिए पात्रों का उपस्थित होना है उनमें उपस्कारांश है सामाजिकों को उपस्कृत करना है वही व्यापार है अभिनयन क्रिया है । यह असत् है । जैसे पट के निर्माण में सूत्रों का तान एवं वान माने तनन विस्तीर्ण करना और वयन करना उपस्कार है वैसे नाटकादि रूपकों में उपस्कार नही है । नाटकादि में सामा-

अभिनवभारती

युक्तः। स ह्यत्र प्रत्युत दोषाय, यथाह—"काव्यान्यपि यदीमानि व्याख्यागम्यानि शास्त्रवत्" इत्यादिना। प्रविस्पष्टपराश्चनं तत्र निमित्तं स्पष्टार्थेन वाक्यमात्रेण तत्सिद्धेः।

तत्रोक्तं श्रीशङ्कुकादिभिः—इह लोकानुसारिनाटचात् लोके सुखदुःखाद्यावेशविवशो वक्ता, तत एव स्तम्भस्वेदादिभिर्बृंहितं अवधानबन्धोऽपि गुण क्रियादि-स्वरूपसाहचर्याभ्मासंस्कृत तं शब्दप्रयोगः गं तदुपचिताङ्गोपाङ्गविकारसंकीर्णमेव कुर्वाणो दृश्यते—इति।

(१) अत्र त्व(त्सत्यतो) वक्तव्यं तदस्य निरुक्तमष्टमेऽध्याये—

विभावयति यस्माद्धि नानार्थार्थप्रयोगतः।
शाखाङ्गोपाङ्गसंयुक्तं तस्मादभिनयः स्मृतः॥

बालक्रीड़ा

जिकों को अभिनेताओं के द्वारा अभिनेतव्य वस्तु के अभिमुख करना है। और पटों में सूत्रों से पट ही उपस्कृत होता है अतः यह उपस्कारांश युक्त नही है। प्रत्युत वैसा उपस्कारांश नाटकादि में दोषाधायक है क्योंकि पट की तरह पात्र अभिनेता ही उपस्कृत हुए सामाजिक नही हुए। किन्तु होना चाहिए सामाजिकों को। 'जैसा कि अगर ये काव्य भी शास्त्र की तरह व्याख्या गम्य हुए तो आनन्दानुभूति जो उनसे होती है वह कैसे होगी। यानी सामाजिकों को उनसे क्या लाभ होगा। रूपको में पराश्चन सामाजिको को अश्चन करना मृक्षण करना ही प्रकर्षेण स्पष्ट निमित्त है। वह निमित्त सिद्ध होता है स्पष्ट अर्थ वाले केवल वाक्यों से।

इस विषय में श्री शंकुक वगैरह ने कहा भी है कि यहां रंगमञ्च पर किया जाने वाला नाटच माने अभिनेय रामादिकी अवस्था का अनुकरण लोकानुसारी होता है। लोक में वक्ता सुख दुःख के आवेश से विवश रहता है अत एव विवश होने के फल स्वरूप ही अवधान में एकाग्रता में बंधा हुआ भी माने सावधान हुआ भी वक्ता स्तम्भ एवं स्वेदादि से बृंहित प्रत्यक्ष अनुभूयमान गुण एवं क्रियादि के साहचर्य से किये गये अभ्यास से संस्कृत और उस संस्कार से उपचित पुष्ट हुए अङ्ग एवं उपाङ्गभूत विकारों से संकीर्ण शब्द प्रयोग को करता हुआ दिखाई पड़ता है।

(१) इस विषय में जो अपने सत्य सिद्धान्त से कहना चाहिए उशको इस नाटचशास्त्र के अष्टम अध्याय में विभावयति इस श्लोक पर्यन्त श्लोकों की व्याख्या करते हुए कह दिया है।

अभिनवभारती

इत्येवमन्तं श्लोकं व्याचक्षाणैः। न तथा सामान्यस्य समानीकृतसकलाङ्गोपाङ्गकर्मणा सतोऽभिनयनं येनालातचक्रप्रतिमता प्रयोगस्य जायते। यथोक्तं 'प्रयोगश्चास्य कीदृश' इति, यद्वक्ष्यते—

'शिरोहस्तकटीवक्षोजङ्घोरुकरणेषु तु।
समः कर्मविभागो यः सामान्याभिनयस्तु सः॥ (अ २२) इति

(२) सामान्य इत्यनेनाशेषाभिनयविशेषा आङ्गिकादिगता उपलक्षिताः तत्कृतोऽभिनयः। यद्वक्ष्यति—

कृत्वा साचीकृतां दृष्टिं शिरः पार्श्वे नतं तथा।
तर्जनीं कर्णदेशे च बुधः शब्दं विनिर्दिशेत्॥ इति (२२-७६)

(३) अत्र हि दृष्टिविशेषः शिरोविशेषो हस्तविशेषश्च संभूयैकमभिनयं प्रत्येकोऽभिनयः संपद्यते।

(४) एकैकेन तु शब्दाभिनयस्य कापि मात्रा निष्पद्येत, एवमेव तृतीय-

बालक्रीड़ा

सामान्य माने समानीकृत अर्थात् सन्तुलित रूप से की गई जो अङ्ग एवं उपाङ्गों की क्रिया उससे विद्यमान का अभिनयन होता है यानी अभिनय किया जाता है। जिसके द्वारा प्रयोग अलातचक्र के तुल्य दिखाई पड़ता है। जैसा कि कहा है। इसका प्रयोग कैसा है। आगे कहेंगे—

शिर हस्त कटि वक्षःस्थल जंघा एवं ऊरू इन इन्द्रियों में जो समान रूप से क्रिया का विभाग है वह सामान्य अभिनय है।

(२) सामान्य इससे आंङ्गिकादि गत सम्पूर्ण अभिनयों की विशेषताएं उपलक्षित की गई है तथा उपलक्षणों से किया गया अभिनय भी उपलक्षित हो गया है। जैसा कि कहेंगे—कृत्वा। इसकी व्याख्या आगे पढ़ें।

(३) जहां एक अभिनय के प्रति दृष्टि विशेष शिरो विशेष एवं हस्त विशेष मिलकर रहते है उससे एक अभिनय सम्पन्न होता है।

(४) इन एक एक दृष्टि विशेष वगैरह से शब्दाभिनय की कोई मात्रा निष्पन्न हो जाती है। यही यहां तृतीय पक्ष से इसकी विशेषता है। वहां अभिनयन क्रिया

अभिनवभारती

पक्षादस्य विशेषः । तत्र हि एकैकस्याप्यभिनयनेऽस्य संभूतत्वेन सामर्थ्यम् ।

(५) तथा विघ्नसंभावनाविहीनसकलसाधारणस्पष्टभावसाक्षात्कारकल्पाध्यवसायसंपत्तये सर्वेषां प्रयोग इत्युक्तम् ।

(६) तथाभिनय इति तद्विशेषो यत्न उच्यते, स च साधारणरूपः सामान्याभिनयः । तथा हि—प्रकटाक्षप्रेक्षणाद्यं यत्नं कुशलः प्रयोक्ता गृह्णाति तेनैव तदुचितशिरःकर्मान्तिमस्य संपाद्यम् इति षोढा गुरुभिर्निर्दशितः ।

वयं तु मन्महे—रसभावाध्याययोर्वागङ्गसत्त्वजास्त(त्त)द्रसभावेषु दर्शितास्ते कथं प्रयोज्या इत्ययमध्यायः । यथा हि किराटगृहाद् गन्धद्रव्याण्यानीय गान्धिकेन समानीक्रियते अस्येयान् भाग इदं पूर्वमिति, एवमत्राध्यायेऽभिनयाः । तत्र

बालक्रीड़ा

में इस एक एक विशेषता का सामर्थ्य सम्भूत हो जाता है माने सम्भूय उपस्थित या प्राप्त हो जाता है ।

(५) तथा विघ्नों के होने की संभावना से विहीन अत एव सकल साधारण जन को भी स्पष्ट होने वाले भावों के साक्षात्कार कल्प अध्यवसाय की सम्पत्ति के लिए उन सब का प्रयोग होता है ऐसा कहा ।

(६) ऐसा अभिनय है इससे जहां उसकी विशेषता कही जाती है वह साधारण रूप सामान्य अभिनय है । जैसा कि कहते है—प्रयोक्ता अभिनेता इन्द्रियों से प्रकट माने साक्षात् प्रेक्षण करके जिस जिस कुशल यत्न को करता है उसी यत्न से प्रयोगक उचित शिरो विशेष की क्रियाओं को सम्पन्न करना चाहिए । इस प्रकार इसके छ रूपों का निर्देश गुरुओं ने किया है ।

हम तो मानते हैं कि रसाध्याय नामक षष्ठ अध्याय में और भावाध्याय नामक सप्तम अध्याय में जिन वाचिक आंगिक एवं सात्विकों का कथन किया है उनका अभिनय कैसे किया जाय इसको बतलाने के लिए यह २२ वां अध्याय है । जैसे किराट के घर से गान्धिक गन्ध द्रव्यों को ले आता है और उनका समानीकरण करता है कि इसका इतना भाग यह हिस्सा पहले लेना है और इसका इतना भाग पीछे । इत्यादि । उसी प्रकार इस अध्याय में अभिनयों का समानीकरण है । उनमें शृंगार

अभिनवभारती

शृङ्गारस्य प्राधान्यात् तत्रैवाभिनयानां भागयोगेन पौर्वापर्ययुक्त्या च समीकरणं सत्त्वातिरिक्त इति तेन सामान्यानां कर्म समानीकरणं भावनप्रायमभिनयविषयं स्वयं चाभिनयरूपं सामान्याभिनयं शृङ्गारमुखेन चान्यदुपनेयमिति। तदेतत्सर्वं हृदये कृत्वा मुनिराह सामान्याभिनयो नाम ज्ञेय इति। नाम्नैव ज्ञातुं शक्योऽन्वर्थत्वादस्येति भावः। तत्तु व्याख्यातम्।

नन्वेवं तत्र न किंचिदवशिष्यते वक्तव्यमित्याशङ्क्यावृत्याह सामान्याभिनयो नाम ज्ञेय इति। नामशब्दः प्रसिद्धिद्योतकः। तदयमर्थः—यद्यपि ज्ञेयः। सामान्याभिनयः प्रसिद्धोऽपि वाक्यार्थबलात्, तथापि यो वागङ्गसत्त्वेभ्यो जातः तद्विषयः सामान्याभिनयो व्याख्यातव्यः। तत्रेति विषये तन्निरूपणायामस्माकं प्रयासः कार्य एव। आहार्यो हि यद्यप्याभिनयान्तरेभ्यो न्यूनस्तथापि तस्य सिद्धस्वरूपत्वान्नात्रोपादानम्। आङ्गिकादिक्रियाणां हि पूर्वापरीभूतरूपंतया सम्भावनीयवि

बालक्रीड़ा

का प्राधान्य है अतः उसी में अभिनयों के भागों का पूर्वापर की व्यवस्था से योग कर के समीकरण सात्विकता का अतिरेक है। इससे सामान्यों का कर्म भावनाप्रधान अभिनय विषयक समानीकरण है और स्वयं वह भिन्न २ अभिनय रूप सामान्याभिनय का शृङ्गार की प्रधानता से उपनेय है ग्राह्य है। इस सबको हृदय में रखकर मुनि कहते हैं कि सामान्याभिनय को जानना चाहिए। सामान्याभिनय इस नाम से ही इसको जान सकते है क्योंकि यह इसका अन्वर्थ नाम है अर्थात् अर्थ के अनुगत नाम इसका यह है। क्यों ऐसा है इसकी तो व्याख्या हमने कर दी है।

प्रश्न—जब अन्वर्थ नाम है तब कुछ भी वक्तव्य अंश अवशिष्ट नही है। ऐसी आशंका करके आवृत्ति से उत्तर देते हैं कि सामान्याभिनय को जानना आवश्यक है। यहां नाम शब्द प्रसिद्धि का द्योतक है। इस लिए यह अर्थ है कि यद्यपि जानने योग्य सामान्याभिनय वाक्यार्थ बल से अर्थात् अन्वर्थ नाम से प्रसिद्ध भी है तब भी जो वाणी अङ्ग एवं सत्त्व से उत्पन्न होता है उसका विषय सामान्याभिनय व्याख्यातव्य है व्याख्या करने के योग्य है। उस विषय में यानी उसके निरूपण के लिए हम को प्रयास करना चाहिए। यद्यपि आहार्य अभिनय वाचिकादि अभिनयों से कमजोर है तब भी उसका स्वरूप सिद्ध है अतः यहां उसका उपादान नही किया है।

अभिनवभारती

शेषभावनादेकीकारात्मा सामान्याभिनयो यत्नसंपाद्य एव। आहार्यस्य तु तन्मध्ये स्थिरत्वेनावस्थानाद्यत्नसिद्ध एवासौ। अत एवाहार्येऽपि भविष्यति सामान्याभिनय-चिन्ता। न तु सर्वथैवास्य तत्र त्यागः। तथा हि "वागङ्गालङ्कारैः" (२२-१४) इति लीलायां, "माल्याच्छादनविलेपनभूषणानां" (२२-१७) इति विच्छित्तौ, "वागङ्गाहार्यसत्त्ववेगेन" (२२-१७) इति विभ्रमे, तस्य सातिशयनिरूपणं भविष्यति।

अन्ये त्वाहुः—आन्तरभावानपेक्ष एवाहार्यो दण्डकमण्डल्वक्षसूत्रादिव्रत विशेषादिमात्रं गमयति, न तु भावं कंचित्। उज्ज्वलो हि वेषो न रतिं गमयति नापि मलिनः शुचम्। तदभावेऽपि हि ते भवत एव। औचित्यमात्रं ह्येतद्व्रता-

बालक्रीड़ा

आङ्गिकादि अभिनयक्रिया रूप है और क्रियाएँ एक साथ हो नही सकती है अतः क्रियाओं के पूर्वापरीभूत रूप होने से विशेष भावना सम्भाव्य है जिससे एकीकरण या समानीकरण न होकर भिन्नता हो जाती है अतः सामान्याभिनय को एकीकारात्मा का सम्पादन यत्न से ही हो सकता है। आहार्याभिनय का तो सामान्याभिनय के मध्य में स्थिरता से अवस्थान है अतः वह प्रयत्न से सिद्ध ही है। अतः आहार्याभिनय के विषय में भी सामान्याभिनय के विषय की चिन्ता होगी ही। न कि सर्वथा ही उसका उसकी चिन्ता के समय में त्याग कर दिया जायगा। फलतः 'वागङ्गालंकारैः' इस प्रकार लीला में माल्याच्छादनविलेपनभूषणानाम् इस प्रकार विच्छित्ति में वागङ्गाहार्यसत्त्ववेगेन इस प्रकार विभ्रम में उसका सातिशय निरूपण होगा ही।

और लोग तो कहते हैं कि आहार्य बाह्य वेषभूषा स्वरूप है अतः उसमें आन्तरिक भावों की अपेक्षा नही है उनसे वह शून्य ही होता है। अतः दण्ड कमण्डलु अक्ष-जपमाला एवं सूत्र यज्ञोपवीत आदिपदग्राह्य मृगचर्म प्रभृति ये केवल ब्रह्मचर्य व्रत विशेष के बोधक होते हैं। क्योंकि बाह्य वस्तुएँ हैं। किन्तु किसी भाव के बोधक नही होते। उज्ज्वल वेष रति का गमक नही होता है और न मलिन वेष शोक का गमक होता है। वे तो उनके विना भी होते हैं।

अभिनवभारती

वुज्ज्वलो वेषः, शुचि मलिन इति । ये त्वेते गुणद्रव्यादिबाह्याभिनयाः सुखदुःखादि-भावा निश्चयाश्च ते चित्तवृत्तीनाँ बाह्यार्थाना च कार्यकारणभावस्य नियतत्वात् नियतव्यक्तिगतत्वाद् भावापेक्षा इति । वागङ्गसत्वाभिनया अन्योन्यसहचर्यमाणाः, नत्वेवं तेष्वाहार्य इत्यस्यानुपादानक्रिया । एतच्च न मुनेर्मतमित्यावेदितमस्माभिरु-पाङ्गाभिनयाहार्याभिनयाध्यायो (८,२२) रित्यास्ताम् ।

नन्वेवं त्रितयनिष्ठो यद्यपि यत्नस्तथाप्यभिहितत्वेन किमिह वक्तव्यमित्याह नाट्यं सत्व इति । तुशब्दः सत्वशब्दानन्तरं द्रष्टव्यः । सात्विके त्वभिनये नाट्यं प्रतिष्ठितम् । रसमयं हि नाट्यं रसे चान्तरङ्गः सात्विकस्तस्मात् स एवाभ्यर्हित इति तद्गतमेव वक्तव्यं पूर्वमभिधेयमित्याशयमशेषचिरन्तना आक्षेपपूर्वकं समाद-

बालक्रीड़ा

रति के समय में उज्ज्वल वेष नायक एवं नायिका का होना उचित है और शोक में मलिन वेष होना उचित है इस तरह औचित्यमात्र का गमक होता है। जो तो ये रूप रसादि गुण और पृथिव्यादि द्रव्य और आदिपदग्राह्य संचलनादि क्रियाएँ बाह्य वस्तुएँ हैं और सुख दुःख तथा आदिपदग्राह्य द्वेषादि भाव हैं इन चित्तवृत्तियों के साथ बाह्य पदार्थों का कार्यकारणभाव नियत है। क्योकि ये नियतव्यक्तिगत भाव हैं। सभी उनसे सुखी हों या सभी उनसे दुखी हों ऐसा कोई नियम नही है। कोई किसी को सुखद है कोई किसी को दुःखद है। वाचिक आङ्गिक एवं सात्त्विक अभिनयों में परस्पर में साहचर्य है किन्तु आहार्य का और उनका साहचर्य नही है अतः उनका उनमें उपादान नही किया। यह मुनिसम्मत अर्थ नही है ऐसा हमने उपाङ्गाभिनयाध्याय एवं आहार्याभिनया अध्यायों में कह दिया है। अतः वस किया जाय।

प्रश्न—यद्यपि यह यत्न वाणी अङ्ग एवं सत्त्व इन तीनों में भी रहता है तद्यपि यहां उस चतुर्थ को क्यों नही कहा अभिहित करना चाहिए था। इस पर उत्तर देते हैं कि 'नाट्यं सत्त्वे' इति। यहां यत्नस्तु इसमें उपात्त तु शब्द को सत्त्व शब्द के अनन्तर समझना चाहिए। सात्त्विक अभिनय में नाट्य प्रतिष्ठित है। क्योंकि नाट्य रसमय है और रस में सत्त्व अन्तरङ्ग है। इसलिए सत्त्व ही अभ्यर्हित है। अतः सत्त्वगत कहना चाहिए और पहले ही कहना चाहिए था। यही यहां का आशय है ऐसा अशेष चिरन्तन आक्षेप पूर्वक समाधान देते हैं।

तत्र कार्यः प्रयत्नस्तु नाट्यं सत्त्वे प्रतिष्ठितम् ।।१।।

अभिनवभारती

धति—त्रिषूद्दिष्टेषु वक्तव्यं वागङ्गसत्वेषु नाट्यं प्रतिष्ठितमिति सोऽयमाक्षेपः। प्रतिसमाधानं तु यदि वागङ्गजमेव स्यात् प्रयत्नं विनापि सिद्धिः स्यात्, वागङ्गसत्वजोऽसौ सत्वे च नाट्यं प्रतिष्ठितम्, सत्वं च मनस्समाधानजम्। तस्माद्भूयसा प्रयत्नेन विना न सिध्यतीति एतत्तु चोद्यसममेवोत्तरं सत्वस्य हि प्रयत्नाधिक्यमुपयोगीति वागङ्गयोरुपादानमलमेवेति—अलमनेन ।।१।।

ननु कोऽत्र हेतुः सत्वे नाट्यं प्रतिष्ठितमित्याशङ्क्याह सत्वातिरिक्तोऽभिनय इति। सत्वमिति सात्विकोऽभिनयः, तेन वागङ्गाभिनययोर्यत्रैकत्रैवाभिनये क्रमेण

बालक्रीड़ा

(मूल) अब बाइसवें अध्याय को व्याख्या करते हैं आहार्याभिनय के निरूपण करने के बाद वाचिक आङ्गिक एवं सात्विक अभिनयों को समझना चाहिए। अभिनयों में आहार्याभिनय विशेष अभिनय है और ये वाचिकादि सामान्य अभिनय है। इनमें प्रयत्न करना चाहिए किन्तु नाटच तो सत्त्व में प्रतिष्ठित है ।।१।।

आक्षेप क्या है उसको बतलाते हैं कहना चाहिए था कि वाणी अङ्ग एवं सत्त्व इन तीनों में ही नाटच प्रतिष्ठित है। अन्य में नही यह आक्षेप है। ये ही उद्दिष्ट हैं पूर्व में कथित हैं।

इसका प्रतिसमाधान तो यह है कि यदि वाणी और अङ्ग से ही नाट्य का अभिनय होता हो तो बिना प्रयत्न के भी उसकी सिद्धि हो सकती है। यह नाट्य वाक् अङ्ग एवं सत्त्व से जन्य है। और सत्त्व में नाट्य प्रतिष्ठित है। तथा सत्त्व मनःसमाधान से जन्य है। अतः अधिक प्रयत्न के बिना सिद्ध नही होता है। यह तो चोद्य के समान ही उत्तर है। सत्त्व में अधिक प्रयत्न का उपयोग है इसलिए वाक् एवं अङ्ग में प्रयत्न का उपादान व्यर्थ है। अब बस किया जाय ।।१।।

प्रश्न—इसमें कौन हेतु है कि सत्त्व में नाटच प्रतिष्ठित है। ऐसी आशंका करके उत्तर कहते हैं कि नाटच में सत्त्व का अतिरेक होता है। सत्त्व का मतलब है सात्त्विक अभिनय। फलतः वाचिक एवं आङ्गिक अभिनयों में से किसी एक अभिनय में क्रमशः या एक साथ सात्त्विक अभिनय किया जाता है वहां परद्वय की अपेक्षा से सात्त्विक

सत्त्वातिरिक्तोऽभिनयो ज्येष्ठ इत्यभिधीयते ।
समसत्त्वो भवेन्मध्यः सत्त्वहीनोऽधमः स्मृतः ।।२।।

अभिनवभारती

युगपद्वा प्रयुज्यते तत्र परं सात्त्विकस्यान्यद्वयापेक्षयाधिक्यं भवति। तत्प्रशस्यतमाभिनयक्रियाज्येष्ठा भवति। सुष्ठु सम्यगभिमुखीभावं सौष्ठवं नीतो भवति रसपर्यन्तत्वात्प्रतीतेरिति भावः।

अथ सात्विकोऽन्यतुल्य एव, तदभिनयनं प्रशस्यं संपद्यते परमिति यावत्। यदि त्वितरापेक्षया सात्विको न्यूनस्तर्हि अभिनयक्रिया स्वरूपेणापूर्णा संपद्यत इत्यर्थः। सात्विकाभावे ह्यभिनयक्रियाणां नामापि नोन्मीलति। अभिनयनं हि चित्तवृत्तिसाधारणतापत्तिप्राणसाक्षात्कारकल्पाध्यवसायसंपादनमिति, अत एवोक्तं सत्वे नाट्यं प्रतिष्ठितमिति ।।२।।

बालक्रीड़ा

(मूल) सत्त्व से अतिरिक्त अभिनय का ज्येष्ठ इस नाम से अभिधान किया जाता है। सम रूप से जहाँ सत्त्व होता है वह अभिनय मध्यम कोटि का है और सत्त्व हीन अभिनय अधम माना है ।।२।।

का आधिक्य होता है। इसलिए उसमें अभिनयक्रिया प्रशस्यतमा होती है। अतः सत्त्व के अतिरेक से युक्त अभिनय ज्येष्ठ उत्तम माना गया है। सम् माने सम्यक् अभिमुखी भाव को सौष्ठव को नीत माने प्राप्त किया जाता है। क्योंकि प्रतीति रस पर्यन्त होती है यह यहां का भाव है।

सात्त्विक अभिनय भी अन्य अभिनयों के तुल्य ही होता है। परन्तु सात्त्विक अभिनयन प्रशस्य होता है। यदि इतर अभिनयों की अपेक्षा सात्त्विक अभिनय न्यून है र्तहि इसमें अभिनयक्रिया अपने रूप से अपूर्ण हैं अधूरी है। यह इसका अर्थ है। सात्त्विक के अभाव में अभिनयक्रिया का नाम भी उन्मीलित नही होता है। अभिनेता लोग रंग मञ्च पर राम का अभिनय करते हैं अर्थात् राम के जो भाव है नट उनको ठीक वैसे ही रूप में सामाजिकों के अभिमुख नयन उपस्थित कर देता है जिससे सभ्यों को राम के भावों का साक्षात्कार होता है। इसको आचार्य लिखते हैं कि अभिनयनक्रिया साक्षात्कारकल्प अध्यवसाय है ज्ञान है जिसमें अभिनेय के चित्त वृत्तियों की साधारणतापत्ति साधारणीक्रिया प्राण है प्रधान है। इसी लिए कहा कि सत्त्व पर नाट्य प्रतिष्ठित है ।।२।।

अव्यक्तरूपं सत्त्वं हि विज्ञेयं भावसंश्रयम् ।
यथास्थानरसोपेतं रोमाञ्चास्त्रादिभिर्गुणैः ॥३॥

अभिनवभारती

अव्यक्तरूपमित्यादिकं प्रबन्धं श्रीशङ्कुकादय इत्थं नयन्ति—कस्मात् पुनः सत्वं प्रयत्नातिशयमपेक्षते। उच्यते—रामाद्यनुकार्यगतं भावसंश्रयं तद्भावना प्रकर्षजं रोमाञ्चादिसंपादकं यदान्तरं नाट्यस्य सत्वं तदव्यक्तं अस्फुटं केवलं रोमाञ्चादिभिर्गमकत्वाद् गुणभूतैर्विज्ञेयं, अन्यथा हि सुखाद्यभावे कुत एषामुद्भव इत्यहेतुकं स्यात्। तत्र सत्वं भावस्य स्थाने प्रसङ्गतो यो मुख्यो रसस्तेनोपेतं, रसेनानुकार्ये च प्रकृष्टेन यत्ने ज्ञेयं सुखादि तस्य ये रोमाञ्चादयः कार्यास्तत्तत्साध्यभावे यतः सत्त्वात्प्रवर्त्यन्ते तन्मयः प्रयोगः कथं प्रकृष्टयत्नमन्तरेण सिध्येदिति तात्पर्यम्। न केवलं रोमाञ्चादावभिनये संपाद्ये नटस्य सत्त्वमुपयुज्यते

बालक्रीड़ा

(मूल) सत्त्व का रूप अव्यक्त है। क्योंकि यह भाव का संश्रय करता है अर्थात् भाव के अधीन होता है। और भाव मनःस्थ होते हैं अत वे अव्यक्त है इनके आश्रित सत्त्व भी अव्यक्त है। यह सत्त्व रोमाञ्च एवं अश्रु आदि गुणों के बदौलत औचित्य के अनुसार भिन्न-भिन्न रसों से युक्त होता है ॥३॥

अव्यक्त रूप इत्यादि प्रबन्ध की व्याख्या श्रीशंकुक आदि इस तरह करते है= प्रश्न-क्यों क्या सिद्धान्त है कि सत्त्व अतिशय प्रयत्न की अपेक्षा करता है। उत्तर= कहते हैं कि रामादि अनुकार्य में जो भावों का संश्रय है संस्थान है वह उन भावों की भावना के प्रकर्ष के जन्य है जिससे रोमाञ्चादि का सम्पन्न होना स्वाभाविक है वह आन्तर सत्त्व नाट्य में अव्यक्त है अस्फुट है केवल रोमाञ्चादि उनके गमक ज्ञापक हैं अतः हेतु होने से गुणभूत उन रोमाञ्चादि से उनको जानना चाहिए। क्योंकि सुख या दुःखादि के अभाव में कारणों के विना उनका उद्भव कहां से होगा। यदि कारण के विना उद्भव होगा तो अहेतुक होगा। वहां भाव की सत्ता है। यह स्थाने माने ठीक है। अतः प्रसङ्ग से माने भाव की सत्ता होने के कारण जो मुख्य रस है उससे उपेत युक्त वे हैं। रस के द्वारा अनुकार्य रामादि में प्रकृष्ट यत्न से ज्ञेय सुखादि हैं। उसके जो रोमाञ्चादि कार्य हैं वे जब साध्य भाव में सत्त्व से ही प्रवृत्त होते हैं तब तन्मय प्रयोग प्रकृष्ट यत्न के विना कैसे सिद्ध होगा यह यहां तात्पर्य हैं। जहां अभिनय

अभिनवभारती

यावदङ्गनानां येऽलङ्कारास्तेष्वपि । तथा हि ते तावत् कटककेयूरादयः सामाजिकेभ्योऽप्यभिमुखं विकारानयनेऽभिनये रूवलावण्यादिवत् स्तनकेशादिवच्च युवतेरिति प्रतीयते, न त्वभिनेयं तेषां किंचिदस्ति केवलमलङ्कारत्वमेषाम् । न च प्रयोगाभिनिविष्टत्वाद्युवतेरपि प्रयोज्यास्ते प्रयोक्तुं शक्या मनस्समाधानमन्तरेण । तत्र मनसो देहवृत्तित्वात् समाधानं सत्त्वमुपचाराद्देहात्मकम् । देहे हि मनस्समाधातव्यम्, तत ईषद्विकारो भावः स एव प्रौढतायां तदतिशये च हावो हेला च । तथा च भावः तत्र कटकादाविव हेमः स्थितः । तत्र तु मदनानपेक्षी विकारो भावः येना-

बालक्रीड़ा

में रोमाञ्चादि सम्पाद्य हैं वहां ही केवल नट में सत्त्व का उपयोग होता है ऐसी बात नही है जब कि स्त्रियों के जो अलंकार हैं उनमें भी उसका उपयोग है । स्त्रियों को अलंकार पहिने हुए देख कर अर्थात् सजी हुई देखकर कामी को रोमाञ्चादि हो जाते हैं । वे कटक केयूरादि अलंकार अभिनय में सामाजिकों के अभिमुख रोमाञ्चादि विकारों के आनयन में उत्पन्न कर देने में युवति के रूप लावण्य की तरह एवं स्तन केशादि की तरह हैं सदृश है यह प्रतीत होता है अर्थात् जैसे युवति के रूप लावण्य या स्तन केशादि रोमाञ्चादि विकारों के आनायक है वैसे ही युवति के अलंकार भी हैं । यह ज्ञान होता है कि उन अलंकारों का अभिनय वहां कुछ भी नही है उनका तो केवल अलंकारत्व ही है । युवति का प्रयोग में अभिनिवेश होने के कारण उसके द्वारा भी उनका प्रयोग नही हो सकता है क्योंकि मन के समाहित हुए विना उनका प्रयोग करना सर्वथा मुश्किल है । मन चैतन्यविशिष्ट देह में रहता हैं । अतः मन के समाधान रूप सत्त्व को भी उपचार से लक्षणा से देहात्मक देहस्वरूप कह देते हैं । देह के रहते ही मन का समाधान किया जा सकता है अतः कहते हैं कि मन में देह का समाधान करना चाहिए । वहां निर्विकारात्मके चित्ते भावः प्रथमविक्रिया इस कोष के अनुसार मन में जो ईषद् विकार है वह भाव है । और उस विकार के प्रौढ होने पर हाव होता है और तथा अतिशय होने पर हेला । अतः मन में भाव की वैसी स्थिति है जैसे कटक में हेम की स्थिति है । यहां हेमः स्थितः कहने वाले आचार्य हेम शब्द को पुंल्लिग मानते हैं । हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि व इसमें हेमन् नपुंसक शब्द माना है ।

उनमें मदन की अपेक्षा के विना भी पैदा होने वाला विकार भाव है ।

अभिनवभारती

कामयमानापि तरुणी कामयमानेव लक्ष्यते, तस्यैव तु मदनापेक्षत्वेन प्रौढतायां हेलात्वमेव, यौवने क्रमादुपचीयमाने स्वात्मेन्द्रियमनःस्वास्थ्ये हावः हेला शरीरविकारः धात्वादिवैषम्यात्तु तदवसादे प्रविलय इति हेलातो मुक्तो हावः, हावतो मुक्तो भाव इति। नानपेक्षितहेत्वन्तरा यौवनकृताः शरीरविकारा अपि प्राधान्येन वक्त्रगात्रगता रागा इव गुणा इव भावा इव नाभिनयाः। किं त्वीषद्भिद्यमानैर्वागाद्यभिनयैर्मुखरागेण च संभवत्तया प्रतीता अप्रतीता अलङ्कारा उच्यन्ते। तदेतदुक्तमव्यक्तरूपमित्यादिना समाख्याता बुधैर्हेला ललिताभिनयात्मिका (२२-११) इत्यन्तेन। एतेभ्यस्त्वङ्गजेभ्योऽन्ये शीलकृता इति स्वाभाविका दश लीलाद्याः सत्त्वबलेनैव प्रयोज्याः। अन्ये तु निसर्गजत्वेनायत्नजाः सप्त शोभाद्या उक्ताः (२२-३२)। तत्रैते शोभाद्याः स्त्रीगताः

बालक्रीड़ा

जिसके कारण नायिका कामयमान नही भी है तब भी कामयमान की जैसी प्रतीत होती है। बदन की अपेक्षा से होने वाला वही विकार प्रौढ होने पर हेला ही है। यौवन जब क्रमशः बढने लगता है और उस समय अपनी आत्मा इन्द्रियां एवं मन की स्वस्थता भी रहती है तब हाव हेला ये शरीर में विकार होने लगते हैं। धातुओं के वैषम्य से यौवन के एवं स्वात्मेन्द्रिय मन के अवसाद में उनका प्रविलय होना है।

इस तरह अवसाद हो जाने पर हेला से मुक्त हाव और हाव से मुक्त भाव ही रह जाता है। अतः हेत्वन्तर की अपेक्षा नही करने वाले ये शरीर विकार यौवन में होते हैं। यद्यपि ये प्रधानतया शरीर के विकार है तब भी केवल मुख गत राग की तरह या गुण की तरह या भाव की तरह ही है अभिनय नही है। किन्तु परस्पर में ईषद् भिन्न होने वाले वागादि अभिनय और मुखराग से संभव होने के बदौलत प्रतीत हुए या प्रतीत नही हुए ये विकार अलंकार कहलाते हैं। इसी को अव्यक्त रूप इत्यादि से समाख्याता बुधैर्हेला ललिताभिनयात्मका: यहां तक के ग्रन्थ से कहा है। इन शारीर विकारों से अन्य जो भाव लीलादि है वे शील से होते हैं अतः स्वाभाविक है। इन शीलकृत दश स्वाभाविक लीलादि का प्रयोग सत्त्व के बल से ही करना चाहिए। इन शीलादि से अन्य शोभादि सात भाव निसर्गज होने से अयत्नजन्य है ऐसा कहा है। ये शोभादि स्त्रियों में अन्य हैं और पुरुषों में अन्य हैं। इन सब का

अभिनवभारती

पुरुषगताश्चान्ये। सर्वे चैते अतत्स्वभावेनापि नटेन सत्त्वबलात्प्रयोक्तव्या इति बहुप्रदर्शनविलसितं व्याख्यानं न ग्रन्थज्ञेभ्यो रोचते।

तथा हि—किमिदमनुकार्यगतं कवेः शिक्षार्थमुपदिश्यते, तथानुकर्तृगतं नटस्य। प्रथमस्तावद्यदि पक्षस्तदव्यक्तरूपं सत्त्वमिति सत्त्वस्य कथं प्रयोक्तरि स्थितिः, सत्त्वाद्भावः समुत्थित इति ह्युक्तम्। नटे च सत्त्वं, अनुकार्ये च भाव इति किं केन संगच्छते। अनुकार्ये च प्रस्तुते प्रागल्भ्यमाधुर्ये परत्र अनुकर्तृगते उच्येते इति किमंतत्, प्रतिलव विलय क्रमेण भावहावहेलानां परस्परकार्यकरत्वं प्रथमं तावद्व्याख्यातम्, तदप्यसत्। नहि प्रतिसंहारे कारणता कार्यस्य व्यपदिश्यते। न हि पृथिव्यादिभूतानि प्रविलयतन्मात्राणां कारणानि, तानि चाहंकारस्य, सोऽपि च

बालक्रीड़ा

प्रयोग अनुकार्यादि से भिन्न स्वभाव वाले नटको सत्त्व के बल से करना चाहिए। इत्यादि बहुत प्रदर्शन से विलसित व्याख्यान ग्रन्थ के जानकारों को रुचि कर नही है।

वह रुचिकर क्यों नही है इस पर विचार करते हैं कि क्या कवि को शिक्षा देने के लिए इसका अनुकार्य में उपदेश करते हैं। अथवा नट को शिक्षा देने के लिए अनुकर्त्ता में। उनमें यदि प्रथम पक्ष है तब जिस सत्त्व को अव्यक्त रूप बतलाया है उस सत्त्व की स्थिति प्रयोक्ता में कैसे रहेगी। क्योंकि सत्व से भाव का उत्थान होता है ऐसा आपने कहा है। तब नट में सत्त्व है और भाव अनुकार्य में यह कैसे ? क्या संगत होगा। एक बात और भी है कि प्रस्तुत अनुकार्य है अतः प्रागल्भ्य एवं माधुर्य भी प्रस्तुत अनुकार्य में ही रहने चाहिए किन्तु कहते हैं कि वे परत्र अनुकर्त्ता में हैं यह क्या है। और प्रविलय क्रम से माने हेला से मुक्त हुआ तो हाव है हाव से मुक्त हुआ तो भाव है इस तरह प्रविलय क्रम से भाव हाव एवं हेला में परस्पर प्रति कार्यकरत्व पहले कहा गया है। वह भी असत् है। क्योंकि प्रति संहार में माने प्रविलय क्रम में कार्य की कारणता का व्यपदेश किया जाता है। जिसमें जिसका लय हो वह उसका कारण है ऐसा नही कहा जाता है। क्योंकि स्थूल पृथिवी आदि पंच महाभूतों का प्रविलय सूक्ष्म पृथिवी तन्मात्रा में होता है। इस लिए वे भूत तन्मात्राओं के कारण है तन्मात्राए अहंकार की कारण है अहंकार भी बुद्धि का, बुद्धि भी प्रकृति का। अथवा

अभिनवभारती

बुद्धेः, सा च प्रकृतेः, प्रकारो वा तदहङ्करणमिति व्यवहारः। प्रति संहार इव प्रकृतेः कार्यदशायामपि संभवान्न पूर्वं प्रादुर्भावः तत्कथं कार्यता तदहंकारादेः कारणत्वमेतदिति चेत् समानमेतदिहापि। यदि हि भावो हावतां प्राप्तः सोऽपि हेलात्वं च ततो हेला विलीयते। आख्यास्था दोषात् तदा हावः स्थित एव, न हेलया हेला। परे कार्यकारणभावव्यवहारस्यावकाशः। किंचैते देहविकाराः प्रयत्नेन निर्वर्त्या इति साक्षिण इति यदुच्यते तस्मिन्नाटचस्य संसारे नाम तदस्ति यत्प्रयत्नेन निर्वर्त्य इति सात्त्विकाद्वैतम्। किं च विभावानुभावव्यभिचारिव्य-तिरिक्तमपि यद्यत्रोपयोगि संभवति तद्वृथैव प्रतिज्ञातं तत्संयोगाद्रसनिष्पत्तिरिति, नृत्य गीतातोद्यरङ्गादिबलेनेदं व्यवस्थितं सामान्याभिनय इत्यभिधानात् अनभिनयवत्त्वे

बालक्रीड़ा

जो प्रकार है वह अहंकरण है ऐसा व्यवहार नही होता है। यह भी बात नही है कि जिसका जिसमें लय होता है वह उसका कार्य है इस तरह प्रतिसंहार की तरह कार्य की दशा को मानने पर संभव हो तव भी प्रकृति का सबसे पहिले प्रादुर्भाव नही होता है प्रकृति तो अनादि है। तब वह कैसे कार्य हो तथा अहंकारादि कैसे कारण हों। जब यह नही हो सकता है तब वह भी नही हो सकता है यह वह तो समान ही है।

अगर कहें कि भाव हावता को प्राप्त हो गया है वह हाव भी हेलात्व को प्राप्त हो जाता है। उसके बाद हेला का विलय हो जाता है। ऐसी आख्या ऐसा कहना या ऐसी आस्था ऐसा मानना दोष है। यदि ऐसी आख्या या आस्था दोष से है तदा तब हाव का लय हुआ नही हैं अतः हाव स्थित ही है। हेला से हेला का उद्भव नही है अर्थात् हेला से पर में कार्यकारण भाव का व्यवहार होने के लिए अवकाश नही है। किंच और भी बात है कि ये जो देह विकार हैं वे भी प्रयत्न से निर्वर्त्य हैं। ऐसा जो कहते हैं उस विषय में कहना है कि संसार में नाटच का वह नाम है जो प्रयत्न से निर्वर्त्य है इस तरह सात्त्विक का अद्वैत हो गया।

और भी बात है कि विभाव अनुभाव एवं व्यभिचारियों से जो व्यतिरिक्त हैं वह भी जहां उपयोगी हो सकता है तब विभावादि के संयोग से रस निष्पत्ति होती है यह प्रतिज्ञा करना व्यर्थ ही है। यह सामान्याभिनय नृत्य गीत आतोद्य एवं रङ्गादि के

अभिनवभारती

चास्य सत्त्वनिर्वर्त्यस्यापि को नाटचे उपयोगः, कथं च सामान्याभिनयेनेत्यपरामृ-ष्टाभिधानम् । एतत्सर्वं मुनिमताननुप्रविष्टैः परं श्रद्धीयते नामेत्यास्तां तावत् ।

प्रकृतव्याख्यानमुच्यते—इहोक्तं सत्त्वे नाटचं प्रतिष्ठितं तेन सात्त्विक भावानुनयो वक्तव्यः तस्य च किंचिदुक्तमिति दर्शयति अव्यक्तरूपं सत्त्वं हि विज्ञेयमिति । इह चित्तवृत्तिरेव संवेदनभूमौ संक्रान्ता देहमपि व्याप्नोति । सैव च सत्त्वमित्युच्यते । तत्र चाव्यक्तं संवित्प्राणभूमिद्वयानिपतितं यत्सत्त्वं तद्भावाध्यायसंश्रयत्वेनैव विज्ञेयम् । तस्य च ये गुणा देहपर्यन्ततां प्राप्ता घर्मरोमाञ्चादयः तेऽपि तत्रैवोक्ताः किंचित् । यथास्थानमिति यस्य रसस्य यत् स्थानं, तद्यथाश्रृङ्गारस्य उत्तमौ स्त्रीपुंसौ, रौद्रस्य रक्षोदानवादिः, भयानकस्याधमप्रकृतिः, तदनतिक्रमेण रसेषूपेतं सम्बद्धं तत्सत्त्वम् । भावशब्देनात्र भावाध्याये निर्दिष्टा भावाः ।

बालक्रीड़ा

बल से ही व्यवस्थित है ऐसा कहने से अभिनय से रहित होने पर इस सत्त्वनिर्वर्त्य का नाट्य में कौन उपयोग है । और कैसे विना परामर्श किये ही सामान्याभिनय के द्वारा ऐसा कथन हो रहा है । यह सब मुनि के मत में प्रवेश नही करने वालो के लिए भले ही श्रद्धेय हो हमारे लिए तो नही है अतः रहने दिया जाय ।

अब प्रकृत व्याख्यान को कहते हैं कि यहां जो कहा है कि सत्त्व पर नाट्य प्रतिष्ठित है इससे प्राप्त होता है कि सात्त्विकभावों का अनुनय अभिनय वक्तव्य है उसके विषय में कुछ कहा है उसको दिखाते हैं कि अव्यक्त रूप वाले सत्त्व को जानना चाहिए । यहां चित्तवृत्ति ही संवेदन भूमि में संक्रान्त हुई देह को भी व्याप्तकर लेती है । अतः वह चित्तवृत्ति ही सत्त्व है ऐसा कहते हैं । उसमें अव्यक्त संवित् भूमि में अनिपतित अर्थात् संवेदन भूमि में असंक्रान्त तथा चित्तवृत्तियों के साधारणीकरण प्राणभूमि में अप्राप्त जो सत्त्व है उसको भावाध्याय नाम नाट्यशास्त्र के सप्तम अध्याय के संशय से जानना चाहिए । उसके गुण घर्म (पसीने) रोमाञ्चादि हैं जो देह में पर्यन्त तक प्राप्त हैं उनका भी वहां कुछ कहा है । यथा स्थानम् माने जिस रस का जो स्थान है वह जैसे श्रृङ्गार के स्थान उत्तम स्त्री और पुरुष हैं रौद्र के स्थान राक्षस एवं दानव वगैरह हैं । भयानक का अधम प्रकृति है इनको अतिक्रमण किये बिना जो रसों में उपेत है सम्बद्ध है वह सत्त्व है । भाव शब्द से यहां भावाध्याय में निर्दिष्ट भाव है ।

अलङ्कारास्तु नाटचज्ञैर्ज्ञेया भावरसाश्रयाः ।

अभिनवभारती

एतदुक्तं भवति—चित्तवृत्तिरूपं यत्सत्त्वं तद्भूतकार्यसंक्रान्तप्राणदेहधर्मतावशाद् भवदपि भावाध्याये रसाध्याये च बितत्य निरूपितमिति पुनः किं तदभिधानेन ।।३।।

किं तस्य भूतकार्यदेहधर्मतावशात्सम्भूतसत्त्वस्य रूपं वक्तव्यमित्याह अलङ्कारास्तु नाटचज्ञैरित्यादि । अयमभिप्रायः—संवेदनरूपात्प्रसृतं यत्सत्त्वं तद्विचारितम् । अन्यत्तु देहधर्मत्वेनैव स्थितं सात्विकं यतः सात्विकेष्वेवोत्तमेषु दृश्यते, तत्र स्त्रीणामुत्तमत्वं शृङ्गाररसपर्यन्तमेव, पुरुषाणां तु वीररसविश्रान्तम् । शान्तस्तु प्रधानत्वेनैव प्रयोगार्ह इत्युक्तप्रायम् । स्त्रीगतेन शृङ्गारेण पुरुषनिष्ठेन वीरेण च सार्वलौकिकः पुमर्थो व्याप्तः । न च सत्वमयमुत्तमस्त्रीरूपं विमुच्यान्यत्रामी चेष्टाल-

बालक्रीड़ा

यहां यह कहा कि चित्तवृत्ति रूप जो सत्त्व है वह पंच महाभूतों के कार्य तथा जिसमें प्राण संक्रान्त है उस देह का धर्म होने से उत्पन्न होता है—इत्यादि का विस्तार कर रसाध्याय और भावाध्याय में कह दिया है अतः पुनः कहने की आवश्यकता नही है ।।३।।

'क्षिति जल पावक गगन समीरा पँचत्तत्व यह रचा शरीरा'—इस तुलसीदासीय चौपाई के अनुसार यह देह पंचभूतों का कार्य है । इसके धर्म रोमाञ्चादि सत्त्विक भाव है । इस सिद्धान्त के अनुसार कहते हैं पंचभूतों के कार्य देह के क्षमता वश से प्राप्त सत्त्व का क्या रूप है कहना चाहिए । इस पर कहते हैं कि अलंकारास्तु नाट्यज्ञैः । यहां यह अभिप्राय है । संवेदन रूप से प्रसृत जो सत्त्व है उसका विचार किया और दूसरा सात्त्विक है वह देह के धर्म के रूप में स्थित है । क्योंकि वह उत्तम सात्त्विकों में ही दिखाई देता है । स्त्रियों में उसकी उत्तमता शृंगार रस पर्यन्तता है । पुरुषों की उत्तमता वीर रस में विश्रान्त है । शान्त रस का प्रयोग तो प्रधानता ही से करने के योग्य है—शान्ताद्भावाः प्रवर्त्तन्ते भिन्न हेतु समाश्रयात् । भावा विवारा रत्याद्याः शान्तस्तु प्रकृतिर्मत इत्यादि सब कुछ कहा जा चुका है । स्त्रीगत शृङ्गार से पुरुष गत वीर से सम्पूर्ण सार्वलौकिक पुरुषों के अर्थनीय धर्म अर्थ काम एवं मोक्ष व्याप्त है । सत्त्व प्रम उत्तम स्त्री रूप को छोड़ कर अन्यत्र कहीं पर ये चेष्टालंकार वगैरह विनि-

अभिनवभारती

ङ्कारा विनिवेशं लभन्ते सात्विकास्तावद्राजसतामसशरीरेत्वसंभेवात्। चाण्डालीनामपि रूपलावण्यसंपदो दृश्यन्ते ननु चेष्टालङ्कारास्तासामपि भवन्त उत्रमतामेव सूचयन्ति स्ववर्गापेक्षया वा संपद्भ्रंशादिना। एतदुक्तं भट्टतोतेन—न चालङ्कृतीनामत्र लक्षणं महदाश्रयमिति—ते च दृष्टाः सन्तः संस्पर्शशून्यं विशेषबिरहितमेव सामान्यरूपं शृङ्गारमभिनयन्ति, सामान्याभिनया न तु लावण्यादिवनभिनय एव वं शरीरविकार अनुभावा एव तेन विभावानुभावव्यभिचारिसंयोगादित्येवमेवैतत्। एवं पुरुषगता अपि शोभादय उत्साहप्रकृतिरयमित्येतावन्मात्रं गमयन्तः सामान्याभिनया एव। किं च यत्किंचिदङ्गनानां शृङ्गारोचितं चेष्टितमभिनीयते तत्रैव चेष्टालङ्कारा अवश्य मभिनेया इति सामान्यवत्सर्वावस्थानुया-

बालक्रीड़ा

वेश को स्थान को प्राप्त कर सकते हैं। सात्विक भावों का राजस एवं तामस शरीरों में अवकाश प्राप्त करना असंभव ही है। रूप एवं लावण्यादि की सम्पत्तियां चाण्डाली स्त्रियों में भी दिखाई देती हैं। वे चेष्टालंकार उनमें भी होते हुए उनकी अपने वर्ग की अपेक्षा से उत्तमता को ही सूचित करते हैं। ये अलंकार सम्पत्ति से युक्त हैं वे उस से भ्रंशित हो गई हैं। आचार्य भट्टतौत ने ऐसा कहा है कि किसी महान् के आश्रय को लेकर अलंकारों का लक्षण यहां किया गया है। वे चेष्टालंकार जिस स्त्री में दिखाई पड़ते हैं उसमें यह भाव हो जाता है कि वह उत्तमा है शृङ्गार के योग्य है विभावादि के सुन्दर विवेक से पार्थक्य से विहीन अर्थात् उससे युक्त व्यभिचारी रूप की जो भिन्न दशा है उसके संस्पर्श से शून्य अर्थात् विभाव अपने स्वरूप से च्युत होकर व्यभिचारी नही हो गया है अतः विशेषता रहित अर्थात् साधारणीकरण प्राण होने से सामान्य रूप शृङ्गार का अभिनय करते हैं। किन्तु इसका यह आशय नही है कि वह साधारणीकृत सामान्याभिनय रूप लावण्यादि की तरह अनभिनेय है। इस प्रकार विभाव नायक एवं नायिका प्रधान है और अनुभाव शरीर के विकार है जो सहायक है अतएव विभावानुभाव व्यभिचारी के संयोग से रस की निष्पत्ति होती है यह इसी प्रकार है। अतः पुरुष में रहने वाले शोभादि, वस इस बात की प्रतीति करा देते है कि यह पुरुष उत्तम प्रकृति है इसलिए ये भी सामान्यभिनय हैं।

एक बात और भी है कि अंगनाओं के जिस किसी भी शृंगारोचित चेष्टित का अभिनय किया जाता है वहां ही चेष्टालंकार अवश्य ही अभिनेय है। इस लिए सामान्य

अभिनवभारती

यित्वेनाभिनीयत इति च सामान्याभिनया एव प्रधानपुरुषस्य शोभादयः, तथैते वागङ्गसत्वाहार्याः स्वभेदसहिता यथासंभवं संभूयाभिप्रविष्टा यथा किलकिञ्चिते विच्छित्तौ विभ्रमे चेति साजान्याभिनया वागङ्गाहार्ययोगेऽपि च सत्वप्रधानतया सात्विका इत्युक्ताः ।

एव तैरेव सामान्याभिनयैः प्रधानप्रमदापुरुषद्वारेग विश्वमेव व्याप्तम् । ते चात्राध्याये वक्तव्याः, तदाह—अलङ्कारास्त्विति । तुर्व्यतिरेके, अन्ये भावाध्याय एवोक्ताः, एते तु वक्तव्याः ते तु तत्र नोक्ताः । यत एते केवलमलंकारा देहमात्रनिष्ठाः, न तु चित्तवृत्तिरूपाः । भावरसाश्रयो इति रतिभावामत्रमभिनयन्तीत्यर्थः । ते हि यौवने उद्रिक्ता दृश्यन्ते वाल्ये त्वनुद्भिन्ना वार्धके तिरोभूताः । यदाह—

यावन्त एते तरुणीजनस्य भावाः समे कुट्टमितादयोऽपि ।
रात्रावदृश्यानिव तान्घटादीन्कामप्रदीपः प्रकटीकरोति ।।इति।।

बालक्रीड़ा

की तरह सभी अवस्थाओं में अनुयायी के रूप से अभिनीत किये जाते हैं। इस लिए शोभादि प्रधान पुरुष के सामान्याभिनय ही है। तथा ये वाचिक आङ्गिक सात्त्विक एवं आहार्य आभिनय अपने भेदों के सहित यथासंभव मिलकर ऐसे प्रविष्ट हो जाते है जैसे किलकिञ्चित में विभ्रम में एवं विच्छिति में प्रविष्ट हो जाते है इस लिए वागङ्गाहार्य प्रयोग में भी सत्त्व की ही प्रधानता होने से सामान्याभिनय सात्त्विक है ऐसा कहा है। इस प्रकार उन सामान्याभिनयों से प्रधान प्रमदा एवं पुरुष के द्वारा विश्व ही व्याप्त है। अतः इसको यहां इस अध्याय में कहना है। इसलिए कहते हैं कि अलंकारास्तु। यहां का अर्थ व्यतिरेक है। इनसे अन्यों को भावाध्याय में कह दिया है इनको तो यहां कहना है। क्योंकि इनको वहां नही कहा है। क्योंकि ये अलंकार केवल देह में ही रहते हैं अतः चित्तवृत्ति रूप नही है। भावरसाश्रया माने रति भाव का ही केवल अभिनय करते हैं। वे रति वगैरह यौवन में उद्रिक्ता दिखाई देते हैं बचपन में तो अनुद्भिन्न रहते हैं। और वार्धक में तिरोहित हो जाते हैं। जिसको कहते हैं।

जितने ये तरुणियों के कुट्टमितादि सभी भाव है। उनको कामप्रदीप रात्रि में अदृश्य घटादि की तरह प्रकट कर देता है।

यौवनेऽभ्यधिकाः स्त्रीणां विकारा वक्त्रगात्रजाः ॥४॥
आदौ त्रयोऽङ्गजास्तेषां दश स्वाभाविकाः परे ।

अभिनवभारती

वक्त्रगात्रजा इति देहविकारमात्ररूपा एव परं न हि यथा वाष्पादीनामन्तः प्राणभुवि कण्ठरोधादिरूपं लक्ष्यते, तथा चेष्टालङ्काराणाम् वक्त्रगात्राणि वक्त्रं प्राधान्यात् पुनरुपात्तम् ॥४॥

तत्र देहविकाराः केचन क्रियात्मका अपि ते च प्राग्जन्माभ्यन्तरिता भावसंस्कारमात्रेण सत्वेनोद्बुद्धेन देहमात्रे सति भवन्ति, त एवाङ्गजा उच्यन्ते, तथा भावो हावो हेला च । अन्ये त्वद्यतनजन्मसमुचितविशिष्टविभावानुप्रवेशस्फुटीभवद्रतिभावानुविद्धे देहे परिस्फुरन्ति । ते स्वाभाविकाः स्वस्माद्रतिभावात् हृदयगोचरीभूताद् भवन्तीति । तथा कस्याश्चित् कश्चिदेव स्वभावबलाद् भवति, अन्यस्या अन्यः, कस्याश्चित् द्वौ त्रय इत्यादि, अतोऽपि स्वाभाविकाः ।

बालक्रीड़ा

(मूल) नाट्य के विद्वान् लोग रस एवं भावों के अनुसार अलंकारों को समझें। स्त्रियों के वाचिक एवं आंगिक विकार युवावस्था में अधिक होते हैं ॥४॥

वक्त्रगात्रजा इति अर्थात् ये केवल देह के विकार ही हैं परन्तु वाष्पादिक जैसे अन्तः प्राणभूमि में कण्टावरोध रूप लक्षित होता है वैसे चेष्टालंकारों के. वक्त्र गात्र नही लक्षित होते हैं। प्रश्न होता है कि क्या वक्त्र, गात्र से भिन्न हैं जो इसको अलग कहा और गात्र को भी कहा। उत्तर देते हैं वक्त्र की प्रधानता बतलाने के लिए अलग से उपादान किया है ॥४॥

कुछ देह विकार क्रियात्मक होते हुए भी प्राग्जन्म के बदौलत अन्तरित हैं अतः वे भाव केवल संस्कार रूप से उद्बुद्ध हुए सत्त्व से देह में ही होते हैं। वे ही अङ्ग जन्य भाव हाव और हेला कहलाते हैं। इनसे भिन्न जो हैं वे तो अद्यतन जन्म में समुचित किसी विशिष्ट नायक एवं नायिका रूप विभाव के अनुप्रवेश माने सम्बन्ध से स्फुट होने वाले रति भाव से अनुविद्ध संयुक्त देह में परिस्फुरित होते हैं वे स्वाभाविक हैं क्योंकि हृदय में प्रतिभात अपने रति भाव से होते हैं। अतः किसी नायिका का कोई बिभाव होता है दूसरी का दूसरा विभाव होता है। किसी-किसी नायिका के दो या तीन नायक होते है ये स्वभाव बल से होते है अतः स्वाभाविक है।

अयत्नजाः पुनः सप्त रसभावोपबृंहिताः ॥५॥

अभिनवभारती

भावहावहेलास्तु सर्वा एव सर्वास्वेव सत्वाधिकासूत्तमाङ्गनासु भवन्ति। तथा शोभादयः सप्त। एवमङ्गजाः स्वाभाविकाश्च क्रियाजन्मानः, अन्ये तु गुणस्वभावाः शोभादयः ते चायत्नजाः। यत्नजाताः क्रियात्मका उच्यन्ते प्राग् ज्ञानं तत इच्छा इच्छातो यत्नस्ततो देहक्रियेति हि पदार्थविदः। ततोऽन्येऽयत्न जाताः। तदेतदाह—आदौ त्रयोऽङ्गजा इति। तेषामलङ्कारणां मध्ये। आदा-विति प्राच्यवासनानुविद्धदेहमात्रप्रभवित्वात् पूर्वमेव भवन्तीति यावत्। रस भावोपबृंहिता इत्युभयशेषः। स्वाभाविका अयत्नजा स्वरतिभावेन प्राणिता भवन्ति। पुनरिति सत्त्वानां, पुस्तचित्रालेख्यलिखितानामेव नैते भवन्ति ॥५॥

बालक्रीड़ा

(मूल) उन विकारों में पहले आंगिकविकार तीन प्रकार के होते हैं। बाद में वे स्वाभाविक दश प्रकार के होते हैं। पुनः वे विना प्रयत्न के ७ प्रकार के होते हैं। क्योंकि इनका वृंहण इनकी वृद्धि रस और भाव के ऊपर निर्भर है ॥५॥

भाव हाव एवं हेला ये सभी, जिनमें सत्त्व अधिक है ऐसी सभी उत्तम अङ्गनाओं में होते हैं। उसी प्रकार शोभादि सात होते हैं। इस प्रकार अङ्गज एवं स्वाभाविक भाव क्रिया से पैदा होते हैं। गुण स्वरूप शोभादि तो इनसे अन्य है वे तो बिना यत्न से पैदा होते है। जो यत्न से होते हैं वे क्रियात्मक कहलाते हैं। क्योंकि जानता है तब इच्छा करता है तब यत्न करता है फिर देह की क्रिया होती है ऐसा पदार्थवित् कहते हैं। इनसे अन्य अयत्मज है। इसको कहते हैं कि आरम्भ में यह तीन अङ्गज है उन अलंकारों के मध्य में। आदौ कहने का आशय है कि प्राचीनभावना से अनुविद्ध देह मात्र से इनका प्रभव है अतः पहले ही होते हैं रस एवं भावों के उपवृंहण से होते हैं इतना अंश दोनों जगहों में अवशिष्ट है किन्तु अन्वय उसका दोनों में होता है। स्वाभाविक का अर्थ है विना यत्न से होने वाले। वे अपनी रति से अनुप्राणित होते हैं।

पुनः कहने का आशय है कि सत्त्वों के ही, प्राणियों के ही ये विकार होते है पुस्तक चित्र आलेख्य एवं लिखित के ये नही होते हैं ॥५॥

देहात्मकं भवेत्सत्त्वं सत्त्वाद्भावः समुत्थितः ।
भावात्समुत्थितो हावो हावाद्धेला समुत्थिता ॥६॥
हेला हावश्च भावश्च परस्परसमुत्थिताः ।

अभिनवभारती

तत्र त्रयाणां तावदुपक्षेपकर्तृ पीठबन्धमाह देहात्मकं भवेत्सत्त्वमिति । शरीरस्वभावं तावत्सत्त्वं संभाव्यते उत्तमशरीरताँ प्राप्तमित्यर्थः । ततो भावः ततोऽपि हावः तस्मादपि हेला । एवं तीव्रतरसत्वे देह एव । यदा तु तथाविद्धं सत्त्वं न भवति तदा प्राक्तनरतिबासनोत्थम् ॥६॥

अत्र सहकार्यन्तरमपेक्षणीयं वर्तत इति दर्शयति—

हेला हावश्च भावश्च परस्परसमुत्थिताः ।
सत्त्वभेदे भवन्त्येते शरीरे प्रकृतिस्थिताः ॥ इति

एकश्चशब्दोऽपिशब्दार्थे, अपरः समुच्चये । प्रत्येकं हि समुच्चये द्योत्ये तृतीयोपि चः पठितव्यः स्यात् । तंदयमर्थः—प्रकृतिस्थिताः देहस्वभावमात्रापेक्षा अप्येते परस्परसमुत्थिता भवन्ति । तथा हि कुमारीशरीरे प्रौढतमकुमार्यन्तरगत-

बालक्रीड़ा

(मूल) सत्व देहात्मक होता है सत्व से भाव का समुत्थान होता है । भाव से हाव का और हाव से हेला का समुत्थान होता है ॥६॥

त्रयोऽङ्गजा में कहे हुए क्रम के उपकारी पीठ बन्ध को कहते हैं । देह, शरीर स्वभाव सत्त्व है । अर्थात् संभावना करते हैं कि उत्तम शरीर को प्राप्त हुआ है । सत्त्व से भाव । भाव से हाव । हाव से हेला । इस प्रकार तीव्रता सत्त्व वाले देह में ही ये हैं । जब उस प्रकार से आविद्ध सत्त्व नही होता हैं तब प्राकलन रति वासना से उत्थित सत्त्व होता है । यहां भिन्न २ सहकारी की अपेक्षा होती हैं इसको दिखाते हैं । हेला !

यहाँ हावश्च में जो एक च शब्द है वह अपि के अर्थ में हैं और भावश्च में जो दूसरा च शब्द है वह समुच्चय में है । प्रत्येक से यदि समुच्चय द्योत्य होता तो तीसरे च का भी पढना जरूरी हो जाता । इस लिए यह अर्थ है कि प्रकृति में रहने वाले ये देह के स्वभाव की ही केवल अपेक्षा करते हुए भी परस्पर से समुद्भूत होते हैं । जैसे कुमारी के शरीर में यदि पहले से भाव उल्लसित है तब अन्य प्रौढ कुमारी

सत्त्वभेदे भवन्त्येते शरीरे प्रकृतिस्थिताः ॥७॥

वागङ्गमुखरागैश्च सत्त्वेनाभिनयेन च ।

अभिनवभारती

हेलावलोकने सति हावोद्भवो भावश्चेदुल्लसितपूर्वः, अन्यथा हि भावस्यैवोद्भवः । एवं हावेऽपि दृष्टे भावो हेला वा । यदा तु हावावस्थोद्भिन्ना पूर्वं परत्र च हेला दृश्यते तदा हेलातोऽपि हेला । एवं हावाद्धावो भावाद्भाव इति च वाच्यम् । एवं परकीयभावादिश्रवणात् तथाविधेयाभिधेयरमणीयकाव्याकर्णनादेरपि हेलादीनां प्रबोधो भवतीति मन्तव्यम् । एतदन्योन्यसमुत्थितत्वम् ॥७॥

ननु यद्येते प्रकृतिस्थितास्तत एवाङ्गजास्तत्किमन्यापेक्षणेनेत्याह वागङ्गेत्यादिना । वागङ्गमुखरागेणेत्यादिपाठः परं भावाध्यायश्लोको नास्य तुल्यो

बालक्रीड़ा

(मूल) इस उक्त कार्यकारण भाव के अतिरिक्त इनमें परस्पर भी कार्य कारण भाव है। अतः भाव हाव सब हेला का परस्पर से माने एक दूसरे से एक दूसरे का समुत्थान होता है। क्योंकि शारीरिक प्रकृति के माने स्वाभाविक स्थिति के प्रभाव से सत्त्व के भेद होने से होते हैं ॥७॥

में हेला के देख लेने पर हाव का उद् भव होता है। अन्यथा माने उसके नही देखने। पर भाव का ही उद्भव होता है। इसी तरह हाव के देखने पर ही भाव अथवा हेला होती है अगर पहले हाव की अवस्था उद्भिन्न हुई दिखाई दे और बाद में हेला दिखाई दे तब तो हेला से भी हेला का उद्भव होता है। जब हेला से हेला होती है तब हाव से हाव और भाव से भाव होता है ऐसा भी कहना चाहिए। इस प्रकार परकीय भावादि के श्रवण से तथा विधेयमूत अभिधेय से रमणीय काव्य के सुनने से भी हेलादि का प्रबोध होता है ऐसा समझना चाहिए। यही इनमें परस्पर समुत्थितत्त्व ॥७॥

प्रश्न—यदि ये प्रकृति स्थित है इसीलिए अङ्गज है तब अन्य की अपेक्षा करने की क्या जरूरत है। इस पर कहते हैं। कि वागङ्गमुखेतिर। यहां वागङ्गमुखरागेण ऐसा पाठ है। परन्तु भावाध्याय का श्लोक इसके तुल्य नही है अतः अर्थ भी अन्य ही है।

कवेरन्तर्गतं भावं भावयन्भाव उच्यते ॥८॥

भावस्यातिकृतं सत्वं व्यतिरिक्तं स्वयोनिषु ।

अभिनवभारती

ऽर्थस्त्वन्य एव, न तु श्रीशङ्कुकेन एकार्थो मन्तव्यः । एवं चित्तवृत्तिलक्षणं देहधर्मइति सर्वसंमतम् । तस्मादयमर्थः—वागङ्गमुखरागैः सत्त्वेन च लक्षितो भावः वागङ्गसत्त्वविशेष एव बालिकाया भाव इत्युच्यत इति । किमपि विशेषो नेत्याह । किं त्वन्तर्गतं वासनात्मतया वर्तमानं रसाख्यं भावं भावयन्सूचयन् किं सर्वस्य, नेत्याह - कवेः सूक्ष्मसूक्ष्मानपि योऽर्थान् पश्यति तस्य सहृदयस्येत्यर्थः ।

एतदुक्तं भवति—उत्तमाधमरूपे कुमारीद्वितये व्यवहरति सति तयो एकायाः वाक्स्पन्दनं चक्षुरादिव्यापारं क्रोडनकावहारखेदजनितमुखवैवर्ण्यं वाष्पादि च पश्यतः सहृदयस्य भवति तावद्विशेषोल्लासिनी अभिनयजनिते-

बालक्रीड़ा

(मूल) इनको भाव इसलिए कहते है कि ये वाणी शब्द से, अङ्ग उपाङ्ग की चेष्टा से मुख पर अभिलक्षित होने वाले राग से, सत्त्व के अभिनय से ये कवि के आन्तरिक भाव की, कवि के मनः स्थिति की जानकारी कराते हैं ॥८॥

श्रीशंकुक के साथ एकार्थ नही मानना चाहिए । इस तरह चित्तवृत्तिलक्षण देह भाव का धर्म है यह सर्वसम्मत है। इसलिए यह अर्थ है—वाक् अङ्ग एवं मुख राग और सत्त्व से लक्षित होने वाला भाव वाक् अङ्ग मुख राग एवं सत्त्व विशेष ही बालिका का भाव है ऐसा कहते हैं। कुछ भी विशेष नही हैं। ऐसा कहा है। किन्तु अन्तर्गत माने वासना रूप से अन्तःकरण में वर्त्तमान रस भाव की भावना कराने वाला । क्या यह सबके उन्मुख नही है इस पर कहते हैं कि जो कवि सूक्ष्म से सूक्ष्म अर्थों की भावना करता है उस सहृदय का है। यह अर्थ है।

यह यहां कहा। कहीं पर उत्तम एवं अधम दो कन्यायें अपना २ व्यवहार कर रही है उनमें एक के वाक्स्पन्दन को माने कथन को सुनकर तथा चक्षुरादि इन्द्रियों के व्यापार को क्रीडन के अवहरण से हुए, खेद से होने वाले मुख वैवर्ण्य एवं रोने को देखने वाले सहृदय की मति विशेषता से उल्लसित होकर अभिनय से अनुमान करती हुई भी खास तत्त्व का निश्चय करने वाली होती है कि यह कुमारी कोई बहुत

नैकावस्थान्तरकृतं भावं तमिह निर्दिशेत् ॥९॥

वक्त्राक्षिभ्रूविकाराढ्यः श्रृङ्गाराकारसूचकः ।

सग्रीवारेचको ज्ञेयो हावः स्थितिसमुत्थितः ॥१०॥

अभिनवभारती

वानुमातृरूपा अपि विशेषाध्यवसायिनी मतिः, महतीयं काचिन्नायिका भविष्यतीति। तथाविधं यद्वागादेरान्तररतिवासनासद्भावसमुपनतं किंचिद्विशिष्टरूपत्वं स देहविकारविशेषो भावः। चशब्द एक इवशब्दार्थे, अभिनयतुल्यो वागादिभिर्लक्षितो भाव इत्यर्थः ॥८।९॥

तत्रेति तत्पुरुष एव उत्तमाङ्गनापात्रलक्षणेन चोद्भ्रूतारकचिबुकग्रीवादेः सातिशयो विकाररूपो धर्मः, अत एव श्रृङ्गारोचितमाकारं सहृदया सहृदयसर्वजनहृदयवेद्यं सूचयतीति। हावः—एष हि स्वचित्तवृत्तिं परत्र जुहतीं

बालक्रीड़ा

(मूल) भाव का अतिरेक सत्वं है जो अपने २ कारणों में भिन्न भिन्न है माने अतिरिक्त है। जो अनेक प्रकार की भिन्न-भिन्न अवस्थाओं से किया जाता है उसको यहां नाटच में भाव कहना चाहिए ॥९॥

(मूल) नेत्र एवं वक्त्र के विकारों से तथा भ्रूकुटि के संचालन से श्रृंगारमय आकार को सूचित करने वाला तथा ग्रीवा के रेचन से, भङ्गियों से युक्त जो भाव पुरुषादि में होता है उसे हाव समझना चाहिए। यह हाव परिस्थिति के वश से स्वयं समुत्थित होता है ॥१०॥

बड़ी नायिका होगी। इस प्रकार का जो वाक् वगैरह से आन्तरिक रतिवासना के सद्भाव से कुछ विशिष्ट रूप समुपनत हुआ वह देह विकार विशेष भाव है। यहां एक च शब्द इव के अर्थ में हैं। अतः अभिनय के तुल्य वागादि से समुत्थित भाव है ऐसा इसका अर्थ है ॥८।९॥

पुरुष में उत्तमाङ्गना पात्र के लक्षित करने से उत्कट भ्रूकुटि आंख के तारे चिबुक गुड्डी एवं ग्रीवा आदि से जो सातिशय विकार नामक धर्म हो जाता है। वह धर्म सहृदय एवं असहृदय सभी जनों के वेद्य श्रृंङ्गारोचित आकार को सूचित कर देता है इससे हाव है ॥१०॥

यह हाव प्रेमी के लिए अपनी चित्तवृत्ति की आहुति देती हुई समर्पण करती

यो वै हावः स एवैषा शृङ्गाररससंभवा ।

अभिनवभारती

ददतीं तां कुमारीं हावयति । स्थितिसमुत्थित इति स्थितिवशात् स्वयं समुत्थितः स्वतः उद्भिद्योद्भिद्य विश्राम्यन् हावः, स तु प्रसरणैकधर्मकः, ततो हि हेला स्यात्, अत एवायं सुकुमारपरिकरसब्रह्मचारीति दर्शितम् । हावावस्थयां यत्स्वयं रतेः प्रबोधनं न मन्यते केवलं तत्संस्कारबलात्तथाविकारान् करोति । यँदृ्ष्टा तथा कल्पयति । यदा तु रतिवासनाप्रबोधात्तां प्रबुद्धां रतिमभिमन्यते केवलं समुचितविभावोपग्रहविरहान्निर्विषयतया स्फुटीभावं न प्रतिपद्यते तदा तज्जनितो देहविकारविशेषो हेला । 'हिल भावकरण' इति धातुपाठे पठ्यते । भावस्य संबन्धादिति या प्रसरता वेगवाहित्वमित्यर्थः । वेगेन गच्छत् हेलतीत्युच्यते लोके । तदाह श्रृङ्गारेति श्रृङ्गाररसो रतिः ततो हृदये स्थिता या हेला संभवतीत्यर्थः । तथा श्रृङ्गारस्य रसस्य मानतायां

बालक्रीड़ा

हुई कुमारी का आह्वान सूचित करता है । यह कार्य स्थितिवश से स्वतः होता है । उसके लिए कोई प्रेरणा नही देता है कि हे कुमारि ! तुम ऐसा करो किन्तु उठ उठकर विश्रान्त होने वाला हाव है । यह प्रसरण धर्म वाला है । यह फैलने वाला है । उससे हेला होती है अतएव यह हाव सुकुमार परिकरों का साथी है यह दिखा दिया है । हावा वस्था में जो स्वयं रति के प्रबोधन को प्रबुद्ध होने को नही मानते है वह तो संस्कारों के वश से उस तरह के विकारों को करता है ।

कामुकों के द्वारा देखी गई वह वैसी कल्पना करती है । जब तो रति वासना के प्रबोध से रति प्रबुद्ध मालूम पड़ती है किन्तु केवल समुचित विभाव नायक के लिए नायिका की प्राप्ति नही हुई और नायिका के लिए नायक की प्राप्ति नही हुई तब रति के विषय समुचित पात्र के अभाव में वह रति स्फुट नही हो रही है उस समय उस वासना से उत्पन्न हुआ विकार हेला है । हिल भाव करणे ऐसा धातु पढा है । भाव के सम्बन्ध से जो प्रसरता है अर्थात् वेग से वहना है । क्योंकि जो वेग से चलता है लोक में उसे हेलता है ऐसा कहते हैं । अतः इस हेला से श्रृङ्गार रस संभव है । श्रृंगार रस की कारण रति जो उसके हृदय में स्थित है वह हेला हो जाती है यह उसका अर्थ है । श्रृंगार रस की मान्यता में जैसा साधारणसा रूप है

अभिनवभारती

यादृक्साधारणमिव रूपं तस्य संभवः संभावना स्यात् या सामाजिकशृङ्गार रसास्वादसदृशरूपैव संभावना चमत्कारमात्रप्राणा। तथा हि तस्या यावद्विष याजंनं किंचिदवभाति विभावविशेषपरिस्फुरणादिति वरसुन्दररूपोत्कीर्णं ग्राव-कल्पशैशवदशोत्तीर्णतारुण्योन्मीलना अत एव ललिता चेष्टा अभिनयरूपतामिव अस्यां विकाकावेशातिशयवशात् न प्रतिलभते। क्रमेणोदाहरणान्येषाम्—

उत्तालालकसञ्जनानि कबरीभारोऽथ पुष्पोद्ग्रहः
दन्तानां परिकर्म नीविनहनं भ्रूलास्ययोग्याग्रहः।
तिर्यग्लोचनवल्गितानि वचसां छेकोक्तिसंक्रान्तयः
स्त्रीणां म्लायति शैशवे प्रतिपलं कोऽप्येष केलीक्रमः॥ (विद्ध १)
स्मितं किंचिन्मुग्धं तरलमधुरो दृष्टिविभवः
परिस्पन्दो वाचामभिनयविलासोक्तिसरसः।

बालक्रीड़ा

सम्भव है कि उसकी संभावना हो सकती है जो संभावना सामाजिक को शृङ्गार रस का आस्वाद होता है उसके सदृश रूप वाली है तथा केवल चमत्कार ही उसका प्राण है। विभाव विशेष के परिस्फुरण से जितना जो कुछ प्रवृत्त हुआ मालूम पड़ता है। जैसे पाषाण में चतुर कलाकार के द्वारा सुन्दर आकर्षक रूप का उत्कीर्णन कर दिया जाता है उसी तरह शैशव दशा से उत्तीर्ण होने पर तारुण्य का उन्मीलन होता है अत एव जिससे विकारों के अतिशय आवेश से ललित चेष्टाएँ अभिनय रूपता को प्राप्त करती हैं। अब इनके क्रमशः उदाहरण देते हैं।

नायिकाओं का शैशव ज्यों ज्यों म्लान होता है यानी तरुणाई का विकास होता है त्यों त्यों प्रतिक्षण कौन यह विलक्षण केली क्रम है जो उलझे हुए अलकों का सञ्जन माने सजाना कवरी भार में पुष्पों का उत्कृष्ट रूप से ग्रहण, दोनों का सजाना नीवी का बन्धन योग्यता के साथ भ्रुओं के सञ्चालन में आग्रह नयनों का तिर्यग्वलन और वाणी में विदग्धों की उक्ति का संक्रमण होने लगा है।

तारुण्य का स्पर्श करने वाली नायिका की कौन सी ऐसा वस्तु है जो रमणीय नही है। कुछ थोड़ी सी मुस्कान अतीव मुग्ध है मोहक है। दृष्टियों का विभव माने ताकना तरल चञ्चल एवं मधुर है वाणी का परिस्पन्द अभिनय सामयिक विलासमयी

अभिनवभारती

गतानामारम्भः किसलयितलीलापरिकरः
स्पृशन्त्यास्तारुण्यं किमिव हि न रम्यं मृगदृशः ॥
कुरङ्गीवाङ्गानि स्तिमितयति गीतध्वनिषु यत्
सखीं कान्तोदन्तं श्रुतमपि पुनः प्रश्नयति यत् ।
अनिद्रं यच्चान्तः स्वपिति तदहो वेद्म्यभिनवां
प्रवृत्तोःस्याः सेक्तुं हृदि मनसिजः प्रेमलतिकाम् ॥

अत्र हि भावान्तर्गतरतिप्रबोधमात्रमुक्तम् । न त्वभिलाषः शृङ्गार इति मन्तव्यम् । तत्परं ब्राह्मणस्योपनयनमिव भविष्यत्समस्तपुरुषार्थसद्मपीठबन्धत्वेन योषितां परमो ह्युत्सवः लोकोत्तरोऽलङ्कारः सातिशयमानन्दस्थानं परं पवित्रमित्युपश्रूयते । यद्यपि चैते पुरुषस्यापि भवन्ति तथापि योषितां त एवालङ्कारा इति तद्गतत्वेनैव वर्णिताः । पुंसस्तूत्साहवृत्त्यात एव परमालङ्काराः,

बालक्रीड़ा

उक्तियों से सरस है गतियों का उपक्रम ऐसा है जिसमें लीलायें स्निग्ध मधुर चेष्टायें किसलयित है विसलय की तरह नूतन हैं कोमलता के साथ विकासोन्मुख हैं ।

जो गीत की ध्वनियों को सुनकर कुरङ्गी की तरह अंगों को स्तिमित करती है अर्थात् संगीत के सुनने के बाद जिसके अंगों में सात्त्विक भावों का उद्गम होने लगता है । कान्त के वृत्तान्तों को जान लिया है खूब जानती है तब भी आनन्द का अनुभव करने के लिए सखी से पुनः पुनः पूछती है क्या कहा कैसा हुआ । और अनिद्र अन्तःकरण के साथ शयन करती है अहो इससे जानता हूं कि कामदेव इसके हृदय में प्रेम लता को सिञ्चित करने के लिए प्रवृत्त हो गया है ।

यहां बहुत प्रकार के भावों में से केवल रति के प्रबोध को कहा है । न कि अभिलाषा श्रृंगार को ही कहा है ऐसा समझना । परन्तु हां यह ब्राह्मण के लिए उपयन आगामी जीवनोपयोगी समस्त पुरुषार्थ रूप भवन की पृष्ठ भूमि की रचगा होने से परम उत्सव है उसी तरह स्त्रियों के लिए अलंकार लोकोत्तर सातिशय उत्सव का स्थान है परम पवित्र है ऐसा उपश्रुत है । उप माने अधिक श्रूयते माने सुना जाता है ।

यद्यपि ये हावादि पुरुष को भी होते हैं किन्तु स्त्रियों के वे ही अलंकार हैं इस लिए स्त्रियों में ही इनका वर्णन किया है । पुरुषों में तो उत्साह वृत्ति के बदौलत

समाख्याता बुधैर्हेला ललिताभिनयात्मिका ॥११॥
लीला विलासो विच्छित्तिर्विभ्रमः किलिकिञ्चितम् ।
मोट्टायितं कुट्टमितं विब्बोको ललितं तथा ॥१२॥
विहृतं चेति विज्ञेया दश स्त्रीणां स्वभावजाः ।
पुनरेषां स्वरूपाणि प्रवक्ष्यामि पृथक्पृथक् ॥१३॥

अभिनवभारती

तथा च सर्वेष्वेव नायकभेदेषु धीरत्वमेव विशेषणतयोक्तम् । तदाच्छादितास्तु श्रृङ्गारादयः धीरललित इत्यादौ ॥११॥

एवं त्रीनङ्गजान् व्याख्याय स्वाभाविकान्दशोद्दिशति लीला विलास इत्यादिना । विशिष्टविभावलाभे रतौ सविशेषत्वेन स्फुटीभूतायां तदुपबृंहण कृता देहविकारा लीलादयः शाक्याचार्यराहुलकादिभिर्यन्मतं विशेषसौक्ष्म्यादनुपलक्ष्य हेलाहावादीन् लीलादिमध्य एव पठद्भिश्चेष्टैवालङ्कारभूतेति, एतावन्मात्रे विश्रम्य सामान्येन चेष्टा अलङ्कार इति, तदयुक्तम् ॥१२।१३॥

बालक्रीड़ा

(मूल) जब इससे श्रृङ्गार रस की संभवना प्रतीति होने लगती है तब जो भाव है उसी को बुध लोग हेला कहते है। इससे अभिनय का लालित्य सौन्दर्य माधुर्य होता है ॥११॥

(मूल) लीला विलास विच्छित्ति विभ्रम किलकिञ्चित मोट्टायित कुट्टमित विब्वोक ललित तथा विहृत ये दश विकार स्त्रियों के स्वाभाविक हैं। यहां आदौ त्रयोऽगजाः इस रूप में कहे हुए प्राथमिक तीन विकारों को नही कहा उनको छोड़ दिया। आगे इनके अलग अलग स्वरूपों को कहुंगा ॥१२।१३॥

ही वे परम अलंकार है इस प्रकार सभी नायकों में धीरता को ही विशेषण के रूप में कहा है। और इस धीरता से आच्छादित श्रृंगारादि में धीरललित नायक होता है ॥११॥

इस तरह अंगोद्भूत तीन अलंकारों की व्याख्या करके स्वाभाविक दश अअंकारों को कहते हैं लीला विलासः। विशिष्ट विभाव माने मन के अनुकूल प्रिया या प्रिया के मिलने से रति विशेष रूप से स्फुट हो जाती है अतः उसके उपवृंहण से किये हुए लीलादि देहविकारों को बौद्ध मत के आचार्य राहुलक वगैरह ने जो माना फिर इनकी बिशेष सूक्ष्मता को नही समझकर हेला हाव बगैरह को लीलादि में पढ़ कर चेष्टा ही अलंकार है ऐसा माना है और इतने पर ही विश्राम करके सामान्य तौर से चेष्टा अलंकार है ऐसा जो कहा वह अयुक्त है ॥१२।१३॥

वागङ्गालङ्कारैः शिष्टैः प्रीतिप्रयोजितैर्मधुरैः ।
इष्टजनस्यानुकृतिर्लीला ज्ञेया प्रयोगज्ञैः ॥१४॥

अभिनवभारती

अत्रैषां दशानां क्रमेण लक्षणान्याह वागङ्गालङ्कारैरिति। प्रियतमगतैः प्रीत्या तं प्रति बहुमानाशयेन स्वात्मनि योजितैः मधुरैः सुकुमारैः न तु तदीयैरेवोद्धतैः मधुरैरपि विशिष्टैः न तु कल्पितत्वेनाभिमानैः अत एवानुकृतिनो द्घट्टकरूपेणाविष्कृतं ततः बहुमानः स्वात्मनि तत्स्वात्मीकरणेन । एते च दश प्राप्तसंभोगत्वेऽपि भावयन्त्येव। शोभादयस्तु सप्त भाविनोऽप्राप्तसंभोगतायामेव। एतान् लीलादीन् कवयो लोकवाचोऽत्र कीदृशा साङ्कर्येण प्रयुञ्जते। यथा— "गतेषु लीलाञ्चितविभ्रमेषु" (कुमा १-३३) इति। 'तत्रोपचारोऽन्वर्थत्वं लौकिकी प्रसिद्धिर्वा प्रमाणीकर्तव्या। तन्त्रज्ञैरेवं पठितव्यम्—"गतेषु लीलाञ्चितसुन्दरेषु" इति, तदसदिति भट्टेन्दुराजशिष्याः, यतो ये लीलाविभ्रमप्रभृतयो भविष्यन्त्यस्तदुचिततया तदानीं शिक्ष्येत इव। अभ्याहृत्य नीयते स हि अभिनयप्रयोग कालो लीलादेरिति विनयस्य तु राजहंसकर्तृत्वमुत्प्रेक्ष्यते ॥१४॥

बालक्रीड़ा

(मूल) शिष्टों के द्वारा प्रीति से बोले गये आनन्द दायक मधुर आलंकारिक शब्दों से इष्टजन की जो अनुकृति है वह लीला है ॥१४॥

यह उन दशों का क्रम से लक्षणों को कहते हैं। वागङ्ग। प्रियतम के पहिने हुए अलंकारों को प्रीति से प्रियतंम के प्रति अतिशय बहुमान के कारण अपने शरीर पर धारण कर लिये मधुर सुकुमार न कि प्रियतम के पुरुष होने के कारण उद्धत और मधुर होते हुए भी विशिष्ट यानी मुख्य है न कि कल्पित तथा कल्पना से मान लिये अतएव अपनी आत्मीयता के कारण जिनके प्रति अनुकर्ता ने अपने में उद्घट्टक रूप से घटना के क्रम से संयोजक के रूप में बहुमान का आविष्कार किया है। संभोग कर लेने के बाद भी ये दश भाव संयोजक को भावित करते ही हैं। शोभादि सात तो ऐसे हैं जो सम्भोग के प्राप्त नही होने पर भी भावित करते हैं। इन अलंकारो का कवि लोग यहां लोक भाषा के किस प्रकार के सोकर्य से प्रयोग करते हैं। जैसे— लीला से जिनमें विभ्रम शृंगार चेष्टाएं अञ्चित है ऐसी गतियों में। वहां उपचार अन्वर्थता या लौकिकी प्रसिद्धि को प्रमाण करना चाहिए। इत्यादि। किन्तु इसी जगह में तन्त्रज्ञों को ऐसा पढना चाहिए 'लीला से अञ्चित युक्त अत एव सुन्दर गतियों में।' यह पढ़ना असत् है ऐसा भट्टेन्दु राज के शिष्य कहते है। क्योंकि ये जो लीला विभ्रम होंगे उनको तदुपयोगी औचित्य से सिखाये जायेंगे मानो। अभ्याहरण करके ले जाते हैं वह लीलादि के अभिनय प्रयोग का समय है। गमन में लीलाञ्चित विभ्रम से राजहंसों के विनय की उत्प्रेक्षा की जाती है ॥१४॥

स्थानासनगमनानां हस्तभ्रूनेत्रकर्मणां चैव ।
उत्पद्यते विशेषो यः श्लिष्टः स तु विलासः स्यात् ॥१५॥
माल्याच्छादनभूषण विलेपनानामनादरान्यासः ।

अभिनवभारती

स्थानासनेति स्थानमूर्ध्वता, आसनमुपविष्टता ।

स्थानादावप्रयत्नशिक्षितमपि शृङ्गारवलादुपनीयं तद्रूपं विलासः, श्लिष्ट इत्यनुल्बणम् । यथा—

बाले डअंणस्सु विमण्णमआसणु—इत्यादौ ॥१५॥

स्वल्पोऽपि परामित्यल्पतयैव परां शोभां जनयति सौभाग्यगर्वमहिमा ह्यसौ । यया—

कच उपरब्भउ सस्सर इसिणिअत्थ—इत्यादौ ।

यत्तु सरसिजमनुविद्धं शैवलेनापि रम्यं (शाकु)–इत्युदाहृतं तदसत् । ह्यत्रानाद-

बालक्रीड़ा

(मूल) स्थान खडे होना आसन बैठना गमन चलना हस्तों का प्रसारण विसारण भ्रुकुटियों का संचालन नेत्र का स्पन्दन कराक्षनिरीक्षण एवं मुख का संकोचन विकोचन । इन उक्त क्रियाओं से जो श्लिष्ट माने आकर्षक कोई विशेष वैलक्षण्य उत्पन्न होता है वह विलास है ॥१५॥

स्थान और आसन । यहां स्थान खड़े होना है और आसन बैठना है । कैसे खडे होना कैसे बैठना इत्यादि के सिखाने के लिए प्रयत्न नही किया है तब भी शृंगार के बल पर उसके स्वरूप को प्राप्त करने से विलास होता है । वह विलास श्लिष्ट माने अनुल्वण होना चाहिए यानी उद्धत नही होना चाहिए । जैसे बाले ! दर्शनीये विमनायमानेषु इत्यादि ॥१५॥

'स्वल्प भी उत्कृष्ट शोभा' को यहां पर बतलाते हैं अल्पता भी उत्कृष्ट शोभा को पैदा कर देता है । यह सौभाग्य की महिमा है । जैसे कुच इत्यादि में । जो तो सरसिज कमल शैवाल से सम्पृक्त हुआ भी रमणीय है यह उदाहरण दिया है । वह असत्

स्वल्पोऽपि परां शोभां जनयति यस्मात्तु विच्छित्तिः ॥१६॥

विविधानामर्थानां वागङ्गाहार्यसत्वयोगानाम् ।

मदरागहर्षजनितो व्यत्यासो विभ्रमो ज्ञेयः ॥१७॥

अभिनवभारती

रान्यासः सौभाग्यगर्वकृतः, अपि तु तपस्विसमुचितवेषपरिग्रहण प्रायमित्यलम् ॥१६॥

विविधानामिति योगो भेदः । तेन वागादिभेदेन बहुभेदानां च बहूनां च अर्थानां योऽन्यथा निवेशः पूर्ववत्सौभाग्यगर्वकृतः स विभ्रमः, तद्यथा, वचनेऽन्यथावक्तव्येऽन्यथाभाषणम्, हस्तेनादातव्ये पादेनादानम्, रशनायाः कण्ठे न्यासः इत्यादि । मद्येन कृतो रागः प्रियतमं प्रत्येव बहुमानो हर्षः । सौभाग्यगर्वो यथा—

चिरिअ बन्धिअ निच्चिप्पटणिच्चिअ बद्धजम्म अदेसि सहि ।

सोहग्गमत्थि एकें चिअरिअ किप्पिण वेण णाहिणेवउ ॥१७॥

बालक्रीड़ा

(मूल) माल्य वस्त्र भूषण एवं विलेपन के अनादर से थोड़ा सा भी पहिरना आच्छादन का धारण करना चन्दन तैल एव उवटन वगैरह का अनुलेपन करना उत्कृष्ट शोभा का जनक हो जाता है वह विच्छित्ति है यस्मात् क्योंकि इन क्रियाओं से बाह्य वस्तुओं से विच्छेद हो जाता है ॥१६॥

(मूल) वाचिक आङ्गिक आहार्यिक एवं सात्त्विक अभिनयों में जिनका योगदान हो सकता है उपयोग हो सकता है या होता है उन अर्थों में जो हर्ष के या मद के या राग के बदौलत व्यत्यास परिवर्त्तन होता है उसे विभ्रम समझना चाहिए ॥१७॥

है । क्योंकि यहां सौभाग्य के गर्व से अनादर करके न्यास नही किया है । अपि तु तपस्वियों के अनुकूल उचित वेष का ग्रहण है । अतः बस करो ॥१६॥

विविधानाम् । योग माने भेद है । इससे वागादि भेदों के बदौलत बहुत भेद वाले और बहुतों के अर्थों के पूर्व की तरह सौभाग्य के गर्व से जो अन्यथा निवेश कर दिया है वह विभ्रम है । वह जैसे—वचन को अन्यथा कहना चाहिए था उसे अन्यथा कह दिया । लेना देना हाथ से होना चाहिए वहां उसको पैर से लिया । रशना को कण्ठ में पहिरना और हार को करधनी बनाना इत्यादि । मदिरा पीने से होने वाला राग प्रियतम के प्रति बहुमान हर्ष ही है । उनमें सौभाग्य गर्व जैसे—विरिअ इत्यादि । यह गाथा अस्पष्ट है ॥१७॥

स्मितरुदितहसितभयहर्षगर्वदुःखश्रमाभिलाषाणाम् ।
सङ्करकरणं हर्षादसकृत् किलकिञ्चितं ज्ञेयम् ॥१८॥
इष्टजनस्य कथायां लीलाहेलादिदर्शने वापि ।
तद्भाव भावनाकृतमुक्तं मोट्टायितं नाम ॥१९॥

अभिनवभारती

स्मितरुदितहसितेति सङ्करेण संकीर्णतया हर्षाद्गर्वाद्यत्संकरणम् । यथा—

मह···तिमललमकलति हलहलन्ति सप्पदिओ
व ल्लवच्चर इव इ अणेकत्ति इत्यादौ ।

अत्र हि गर्वश्रमदुःखस्मितरुदितहसितानि देशीपदैः क्रमेणोक्तानि ॥१८॥

इष्टजनस्येति कथने दर्शने वा कान्तस्य यदुत्पद्यते योषितो लीलादि तद्भावभावनवशान्मदनाङ्गमर्दपर्यन्तं तदङ्गमोटनान्मोट्टायितम् । यथाह—

सिइऊणथणसक्कियहत्थऊरू ।—इत्यादौ ॥ १९ ॥

बालक्रीड़ा

(मूल) स्मित माने मुसकराना, रुदित रोना, हसित हंसना खिलाविला कर हंसना भयभीत होना मस्ती लेना, गर्व करना दुःख प्रगट करना या दुःखी होना थक जाना या नाना प्रकार के वस्तुओं की इच्छा अभिलाषा करना । इन क्रियाओं में जो आनन्दोद्रेक के बदौलत संकुतीकरण है वह किलकिञ्चित है ॥१८॥

(मूल) प्रेमी जनकी कथा में अथवा लीला हेला हाव भावों के देखने पर जो प्रेमी के भावों की या विशेषताओं की भावना करना है वह मोट्टायित कहलाता है ॥१९॥

स्मित । संकर से माने संकीर्णता से । संकर हर्ष से या गर्व से हो जाता है । जैसे—यह । यह गाथा अस्पष्ट है । यहां गर्व श्रम दुःख स्मित रुदित एवं हसित को देशीय भाषा के पदों के द्वारा क्रम से कहा है ॥१८॥

इष्ट । कान्त के कथन या दर्शन होने पर स्त्रियों को जो लीलादि भाव उत्पन्न होते हैं एवं उन भावों की भावना के वश से कामार्त्त होने के कारण अंगमर्दन कुच मर्दन पर्यन्त क्रियायें होती है वे अङ्गमोटन से अङ्गमोट्टायित है । जैसा कि कहा सिअण इत्यादि में ॥१९॥

केशस्तनाधरादिग्रहणादतिहर्षसंभ्रमोत्पन्नम् ।
कुट्टमितं विज्ञेयं सुखमपि दुःखोपचारेण ॥२०॥
इष्टानां भावानां प्राप्तावभिमानगर्वसंभूतः ।
स्त्रीणामनादरकृतो बिब्वोको नाम विज्ञेयः ॥२१॥
हस्तपादाङ्गविन्यासो भ्रूनेत्रोष्ठप्रयोजितः ।

अभिनवभारती

केशस्तनाधरग्रहशादिति प्रियतमेनेति शेषः । यथा—

देशिखणंमि णअथणहिअइआपडि अपुणहे तिहि अज्ज—

णहरग्गस उक्ति किं दुरपसमहणाहलबंधाहिं । इत्यादौ । २० ॥

इष्टानामिति वस्त्रालङ्कारादीनामिति अनादरकृत इति तद्विषय एव योऽनादरकृतःस विव्वोक : यथा—चन्दघसि नामकोप्पेस स तु किं दु आविलं उइआ को चण्ड इत्यादौ ॥ २१ ॥

हस्तपादाङ्गविन्यास इति कर्तव्यवशादायत एव हस्तादिकर्मणि यद्वैचित्र्यं स विलासः । ललिते तु यत्र बाह्यव्यापारयोग एव न किंचिदस्ति नादातव्यबुद्धिः ।

बालक्रीड़ा

(मूल) अपने प्रेमी के द्वारा केश के पकड़ लेने से स्तन के मर्दन कर देने से अधर के चुम्बन कर लेने से औपचारिक क्लेश होने पर भी हर्ष एवं संभ्रम माने आदर से जो सुख ही उत्पन्न होता है वह कुट्टामित समझने लायक है ॥२०॥

(मूल) अपने प्रेमीजन के द्वारा उपस्थित किये गये मनोवाञ्छित भावों की प्राप्ति में भी गर्व माने वडप्पन की उत्तेजना एवं अभिमान माने अहंभाव से स्त्रियों प्रमदाओं की अवहेलना है वह विव्वोक है ॥२१॥

केशादि का ग्रहण इसमें प्रियतम ने किया इतना अंश अवशिष्ट है। जैसा कि देशिवणंकि । इत्यादि में वह अस्पष्ट गाथा है ॥२०॥

इष्ट वस्त्र अलंकार वगैरह। अनादर से किया माने इष्ट वस्त्रालंकार के विषय में जो अनादर करना है। वह विव्वोक है। जैसे—चन्द। इत्यादि। यह अस्पष्ट है ॥२१॥

हस्त। कर्त्तव्य वश से आयत माने की गई हस्तादि क्रिया में जो वैचित्र्य है वह विलास है। ललित में जहां वाह्य व्यापार का योग कुछ भी नही है वहां

सौकुमार्याद्भवेद्यस्तु ललितं तत्प्रकीर्तितम् ॥२२॥
करचरणाङ्गन्यासः सभ्रूनेत्रोष्ठसंप्रयुक्तस्तु ।
सुकुमारविधानेन स्त्रीभिरितीदं स्मृतं ललितम् ॥२३॥
वाक्यानां प्रीतियुक्तानां प्राप्तानां यदभाषणम् ।
व्याजात्स्वभावतो वापि विहृतं नाम तद्भवेत् ॥२४॥

अभिनवभारती

अथ च सुकुमारकरव्यापारणं न दृष्टं किंचित्, अथ च चरणादिकमेति विशेषः । यथा—

कि अगि लोपललविअरुपकिसारे इचच्चा ए स बहुमजत्ति·········भराबहु-खिसिदुपुणाखिललविलूण अ अणललहिखणु अ ॥ इत्यादि ।

अन्ये तु 'लड विलास' इति · धातुपाठं प्रमाणयन्तो विलासमेव सातिशयं ललितसंज्ञं मन्यन्ते ॥ २२।२३ ॥

वाक्यानां प्रीतियुक्तानामिति । प्राप्तानामित्यवसरलाभेन कथने योग्या-नामित्यर्थः स्वभावत इति मौग्ध्याद्वाल्यादन्यचित्तत्वाद्वा ।

व्याजादिति । व्याजादिभिर्मौग्ध्यादिभिः प्रख्यापनातिशयेनेत्यर्थः ।

बालक्रीड़ा

(मूल) भ्रुकुटी नेत्र एवं अधरोष्ठ के द्वारा किये जाने वाले प्रयोगों के साथ सुकुमारता से जो पाणिपाद एवं उपस्थ अंगों का विन्यास है वह ललित कहलाता है ॥२२।२३॥

(मूल) प्रीतियुक्त वाक्यों के प्रेम में सने हुए वोलों के बोलने के अवसर के प्राप्त होने पर भी स्त्रियों का जो लज्जा से या छल से या स्त्री स्वभाव से नही बोलना वह विहृत होता है ॥२४।२५॥

आदातव्य की बुद्धि नही होती है। अथ च दृष्ट हस्त से कुछ सुकुमार व्यापार भी दृष्ट नही होता है। अथ च चरणादि से भी नही करता है यह विशेषता इसमें हैं। जैसे कि मणि इत्यादि । और लोग तो 'लड विलासे' इस धातु पाठ को प्रमाण मानते हुए सातिशय विलास की ललित संज्ञा मानते हैं ॥२२।२३॥

वाज । प्राप्तानां माने अवसर के मिलने से कहने में योग्य है। स्वभाव माने बाल्य मौग्ध्य एवं अन्यचित्तता से। व्याज से अर्थात् व्याजादि एवं मौग्ध्यादि के द्वारा

प्राप्तानामपि वचसां क्रियते यदभाषणं ह्रिया स्त्रीभिः ।
व्याजात्स्वभावतो वाप्येतत्समुदाहृतं विहृतम् ॥२५॥
शोभा कान्तिश्च दीप्तिश्च तथा माधुर्यमेव च ।
धैर्यं प्रागल्भ्यमौदार्यमित्येते स्युरयत्नजाः ॥२६॥
रूपयौवनलावण्यैरुपभोगोपबृंहितैः ।
अलङ्करणमङ्गानां शोभेति परिकीर्तिता ॥२७॥
विज्ञेया च तथा कान्तिः शोभैवापूर्णमन्मथा ।

अभिनवभारती

तत्प्रख्यापनमपि कासांचित् स्वभाव एव । यथा कविभिस्तु········लिललिकरन्ति अ इच्छिहि पुणच्छ मरणुकरन्ति अ—इत्यादौ ॥ २४।२५ ॥

अयत्नजा इति । शोभाकान्तिरित्यादि ॥ २६ ॥

एषां क्रमेण लक्षणानि । रूपयौवनलावण्यैरिति तान्येव रूपादीनि पुरुषेणोपभुज्यमानानि छायान्तरं श्रयन्ति । सा च्छाया मन्दमध्यतीव्रत्वं क्रमेण संभोगपरिशीलनादाश्रयति शोभां कान्तिं दीप्तिं चेत्यर्थः ॥ २७ ॥

आ समन्तात् पूर्णो मन्मथ इति कामोपभोगो हेतुर्यस्याः सा इत्यर्थः ।

बालक्रीड़ा

(मूल) शोभा कान्ति दीप्ति माधुर्य धैर्य प्रागल्भ्य एवं औदार्य ये सातवे विकार है जिनके करने में कोई प्रयत्न नही किया जाता है ॥२६॥

(मूल) आनन्दोद्रेक के जनक वस्तुओं के उपभोग से वृंहित समृद्ध रूप यौवन एवं लावण्य से जो अङ्गों का अलंकरण है वह शोभा है ॥२७॥

अतिशय प्रख्यापन करने से होता है । वह प्रख्यापन भी किसी स्त्रियों का स्वभाव ही है । जैसे कवियों में—लिलली इत्यादि मैं ॥२४।२५॥

शोभा कान्ति इत्यादि विना यत्न के होते हैं ॥२६॥

अब क्रम से इन शोभा वगैरह के लक्षणों को कहते है । रूप इति । वे ही रूपादि पुरुष के द्वारा उपभोग किये जाने पर विलक्षण छाया माने शोभा वाले हो जाते हैं । वही छाया माने शोभा संभोग के करने से क्रमशः मन्द मध्य एवं तीव्र भाव को प्राप्त करती है । अर्थात् मध्य शोभा है मध्य कान्ति है और तीव्र दीप्ति है ॥२७॥

आ समान्तात् माने चारों तरफ से जिसमें मन्यथ पूर्ण होता है । इस पूर्णता का हेतु है काम का उपभोग । वह जिसका हो जाता है वह शोभा है । यह अर्थ है ।

कान्तिरेवातिविस्तीर्णा दीप्तिरित्यभिधीयते ॥२८॥
सर्वावस्थाविशेषेषु दीप्तेषु ललितेषु च ।
अनुल्बणत्वं चेष्टाया माधुर्यमिति संज्ञितम् ॥२९॥
चापलेनानुपहता सर्वार्थेष्वविकत्थना ।
स्वाभाविकी चित्तवृत्तिर्धैर्यमित्यभिधीयते ॥३०॥

अभिनवभारती

अन्यस्तु अपूर्णमन्यथेति व्याचक्षाणः कान्तिदीप्तिशोभानां क्रमेण सातिशयत्वमाह । तच्चोपक्रमविरुद्धमित्युपाध्यायाः ॥ २८ ॥

दीप्तेष्विति क्रोधादिषु । चशब्द इवार्थे ललितेषु रतिक्रीडादिषु यथा-मासृण्यं चेष्टायास्तथा दीप्तेष्वपि यत्तन्माधुर्यम् ॥ २९ ॥

सर्वार्थेष्विति रूपयौवनादिषु वर्गत्वाच्चेयं क्रिया रूपेभ्यः पृथगेव धीरता पठिता ॥ ३० ॥

बालक्रीड़ा

(मूल) जिसमें मन को मथ देने वाले यानी विकल कर देने वाले काम का पूर्ण उद्रेक हो जाय वह शोभा ही कान्ति समझी जाती है । कान्ति ही अति विस्तार को प्राप्त हुई दीप्ति कहलाती है ॥२८॥

(मूल) दीप्त ललित कमनीयादि जितनी भी अवस्था ये हैं उन सभी विशिष्ट अवस्थाओं में चेष्टा का जो अनुल्वणत्व है विकासाभाव है वह माधुर्य संज्ञक है ॥२९॥

(मूल) चपलता रहित एवं सभी विषयों में यानी किसी भी विषय में अपने शौर्य का उद्गार नही करने की अवस्थावाली स्वाभाविकी जो चित्तवृत्ति है वह धैर्य कह लाती है ॥३०॥

अन्य तो आपूर्ण व्यवच्छेद न करके अपूर्ण ऐसा पाठ का व्यवच्छेद करता है । तदनुसार व्याख्या करता हुआ कहता है कि यहां कान्ति दीप्ति एवं शोभा का क्रमशः अतिशय है वह सब उपक्रम के विरुद्ध है ऐसा उपाध्यायजी पढाते हैं ॥२८॥

दीप्त क्रोधादि में । च शब्द इव के अर्थ में हैं । ललित रति क्रीडादि में जैसे चेष्टा की मसृणता है स्निग्धता है उसी प्रकार दीप्तों में उसे माधुर्य समझो ॥२९॥

सभी रूप यौवनादि अर्थो में वर्ग भेद से यह क्रिया हैं । धीरता का रूपादि से पृथक् ही पाठ किया है ॥३०॥

प्रयोगनिस्साध्वसता प्रागल्भ्यं समुदाहृतम् ॥

अभि नवभारती

प्रयोग इति कामकलादौ चातुःषष्टिक इत्यर्थः । यथाहुः—

अन्यदा भूषणं पुंसः शमो लज्जेव योषितः ।
पराक्रमः परिभवे प्रागल्भ्यं सुरतेष्विव ॥ इति ॥

यत्त्वनुकर्तृविषयमेतदित्यन्यैर्व्याख्यातं तत्पूर्वमेव दूषितम् । सर्वास्वमर्षेर्ष्याऽक्रोधाद्यवस्थास्वपि यत्परुषवचनाद्यनुदीरणं तदौदार्यम् । चित्तवृत्तिस्वभावा अपि केचिदेते विभावजन्यत्वाभावाद् भाववर्गे न पठिताः । रसान् प्रति भावकत्वाभावाच्च इत्याहुः । तच्चैतदयुक्तम् । या शोभाकान्तिदीप्तयः ता बाह्यरूपलावण्यगता एव विशेषाः । आवेगचापलत्रासामर्षा भावा एव । माधुर्याद्या न चित्तवृत्तिरूपभावा इति क एषु भावत्वाशङ्कावकाशः इत्यभावोऽपि भावान्तरतया तद्विशेषणतया प्रतिभासगोचर इति अतो भावरूपतैवेति चेदस्तु नामैवम् । तथाप्यलङ्कारत्वात्, सामान्याभिनयरूपत्वात्, बाह्यशरीरनिष्ठतापर्यवसानात्, शृङ्गारैकमात्रविषयत्वाच्च, अशेषरसविषयत्वात्, व्यभिचारिवर्गात् पृथक्त्वेनैषामभिधानम् ।

बालक्रीड़ा

प्रयोग माने कामकला आदि में चौंसठ प्रयोग होते हैं जैसा कि कहते हैं ।

अन्य समय में पुरुषों का शम भूषण है जैसे स्त्रियों का लज्जा भूषण है। परिभव होने पर पराक्रम करना आवश्यक होता है जैसे सुरत के समय में स्त्रियों की प्रगल्भता अतीव उपयोगी होती है ।

जो इसकी अन्य लोगों ने व्याख्या की है कि यह अनुकर्त्ता में होती है इसको पहले दूषित ठहरा दिया है । अमर्ष क्रोध ईर्ष्या आदि सभी अवस्थाओं में जो परुष वचन का अकथन है वह औदार्य है । यद्यपि ये चित्तवृत्ति स्वभाव हैं तब भी विभावों से ये उत्पन्न नही होते हैं और रस के प्रति भावकत्व भी उत्पादकत्व भी इनमें नही है अतः भाववर्ग में इनका पाठ नही किया है । यह सब अयुक्त है । क्योंकि जो शोभा कान्ति एवं दीप्ति हैं वे बाह्यरूप एवं लावण्य में रहने वाली विशेषता है । आवेग चपलता त्रास एवं अमर्ष भाव ही हैं । माधुर्य आदि चित्तवृत्ति रूप नही हैं इस लिए इनमें कौन भावत्व की आशंका को अवकाश है । इस लिए अभाव भी अन्य भाव होने के कारण और भावों का विशेषण होने के कारण प्रतिभास का विषय होता है । अतः अगर भाव रूप ही है तो होवें । तब भी अलंकार रूप होने से सामान्याभिनय स्वरूप होने से बाह्य शरीर में रहने में ही जिनका पर्यवसान होने से, केवल शृंगार के ही एक मात्र विषय होने से अशेष रसों के विषय होने से व्यभिचारी वर्ग से पृथक् ही इनका अभिधान किया है ।

अभिनवभारती

न च एतावत एवैत इत्यत्र नियमो विवक्षितः। तेन मौग्ध्यमदभावविकृतपरितपनादीनामपि शाक्याचार्यराहुलादिभिरभिधानं विरुद्धमित्यलं बहुना।

राहुलादिभिरिति, आदिशब्देन पद्मश्रीसागरनन्दिमातृगुप्तप्रभृतयो गृहीताः। तन्मते मौग्ध्यं यथा—

बाल्ये गते वचोभङ्गी रामाणां कान्तसन्निधौ।
हारिमौक्तिमयी या तु तन्मौग्ध्यं परिकीर्तितम्॥

मदो यथा—

तारुण्यातिशयोद्भूतः सुरापानविशेषितः।
विकारबहुलो यस्तु तं वदन्ति मदं बुधाः॥

भावो यथा—

कान्तस्य दृष्टिपथतस्तिरोधातुमिवेच्छति।
लज्जयाधोमुखी मौग्ध्यतिर्यग्विक्षिप्तलोचना॥
प्रियं पश्यत्यतिशयजातरोमाञ्चकञ्चुका।
तत्क्षणोद्भूतमदनाचार्यशिक्षोपदेशतः॥
यत्तस्यां जायते चेष्टा स भावः शाक्यसंमतः।

बालक्रीड़ा

ये भाव इतने ही हैं ऐसा कोई यहां विवक्षित नही है। इनसे मौग्ध्य मद भाव विकृत एवं परितपनादि के सम्बन्ध में जो बौद्ध आचार्य राहुलक आदि का अभिधान है वह विरुद्ध ही है अतः बहु कहना व्यर्थ है वस किया जाय।

राहुलक आदि में आदि शब्द से पद्मश्री सागर नन्दी मातृप्त प्रभृति का ग्रहण करना चाहिए। उनके मत में मौग्ध्य जैसे—वचपन के बीत जाने पर रामाओं की कान्त की सन्निधि में जो मनोहारी एवं मौक्तिमयी वचोभंगी है कथन की शैली है वह मौग्ध्य है।

मद जैसे—यौवन के अतिशय से अद्भूत हुआ और मदिरा के पीने से बढ़ गया जो अत्यधिक विकार है वह मद है।

भाव जैसे—कान्त के दृष्टि पथ से वचना जैसा चाहती है लज्जा से मुख को नीचे किये हुए रहती है भोले पन से तिरछा ताकती है प्रिय को देखती है तब अतिशय रूप से रोमाञ्च कञ्चुक उत्पन्न हो जाते हैं और उस क्षण में प्रकट होने वाले मदनाचार्य की शिक्षामय उपदेश से जो उसमें चेष्टा उत्पन्न होती है वह भाव है ऐसी शाक्यों की सम्मति है।

औदार्यं प्रश्रयः प्रोक्तः सर्वावस्थानुगो बुधैः ।।३१।।

सुकुमारे भवन्त्येते प्रयोगे ललितात्मके ।

अभिनवभारती

विकृतम्—

वचसा प्राप्तकालेऽपि प्रियया नाभिधीयते ।
क्रियया यदनुष्ठानं विकृतं तदुदाहृतम् ।।

परितपनम्—

क्षणमात्रमदृष्टे या प्रिये सन्तापसन्ततिः ।
विरहोत्थेव कामिन्याः परितापः स कथ्यते ।।

आदिशब्देन विक्षेपकेलिव्याजप्रतिभेदनादय ऊह्याः ।। ३१ ।।

अथैषां सामान्याभिनयत्वमुपपादयितुमाह-सुकुमारे भवन्त्येत इति । ललितात्मके प्रयोगे प्रयुज्यमाने शृङ्गारे यः सुकुमारोऽन्योपसंभोगविप्रलम्भादिभेदः तत्र । सर्वत्रैते न भवन्ति । किन्तु न ह्येतच्छून्यमङ्गानां चेष्टितं प्रयोगार्हम् । योऽपि तत्र शृङ्गारे ईर्ष्यामर्षदीप्तिप्रकारास्तत्रापि विलासं ललितं च वर्जयित्वा अवश्यमन्येषां

बालक्रीड़ा

(मूल) प्रयोगों में निःसाध्वसता निर्भयता प्रागल्भ्य कहलाता है। सभी अवस्थाओं में अनुगत होने वाला संश्लिष्ट होने वाला प्रश्रय प्रणय को बुध लोगों ने औदार्य कहा है ।।३१।।

विकृत जैसे—समय के अवसर के प्राप्त होने पर भी प्रिया वचन से जिस बात को नही कहती है कि क्रिया से जिसका अनुष्ठान करती है वह बिकृत है ।

परितपन जैसे—क्षणभर के लिए भी प्रिय को नही देखने से जो विरह काल में होने वाली तापसन्नति की जैसी तापसन्नति होती है वह परिताप कहलाता है ।

यहां आदि शब्द से विशेष एवं ब्याजभेदन आदि को समझें ।।३१।।

अथ अब इनके सामान्याभिनयत्व का प्रतिपादन करने के लिए कहते हैं सुकुमार प्रयोग में ये होते हैं। ललित प्रयोग में माने शृङ्गार का प्रयोग जब करने लगते हैं तब सुकुमार परस्पर के उपसंभोग एवं विप्रलम्भादि भेद होते है उन सब में ये नही होते हैं ।

ये सर्वत्र नही होते हैं यह ठीक है किन्तु इनसे शून्य अंगों की चेष्टाऐं प्रयोग के योग्य भी नही है और शृङ्गार में जो भी ईर्ष्या अमर्ष एवं दीप्ति का प्रकार हैं उनमें

विलासललिते हित्वा दीप्तेऽप्येते भवन्ति हि ।।३२।।
शोभा विलासो माधुर्यं स्थैर्यं गाम्भीर्यमेव च ।
ललितौदार्यतेजांसि सत्त्वभेदास्तु पौरुषाः ।।३३।।
दाक्ष्यं शौर्यमथोत्साहो नीचार्थेषु जुगुप्सनम् ।
उत्तमैश्च गुणैः स्पर्धा यतः शोभेति सा स्मृता ।।३४।।

अभिनवभारती

क्रमयौगपद्यादिना संभव इति शृङ्गारभेदेषु साधारणभूतो योऽभिनयस्तेन सामान्याभिनयतास्य युक्तेति तात्पर्यम् ।।३२।।

अथ पुरुषगतानुद्दिश्य लक्षयति-शोभा विलास इत्यादि ।।३३।।

यतः शरीरविकाराद् दाक्ष्यादि गम्यते सा शोभेति संबन्धः ।।३४।।

बालक्रीड़ा

(मूल) ये शोभादि अयत्नजन्य विकार ललितात्मक सुन्दरता युक्त सुकुमार प्रयोग में होते हैं । विलास एवं ललित को छोड़कर दीप्त में भी ये विकार होते हैं ।।३२।।

(मूल) पहले जो शोभा आदि विकारों को कहा है वे स्त्रियों के विकार थे । अब पुरुषों के शोभादि विकारों को कहते हैं । शोभा विलास माधुर्य स्थैर्य गाम्भीर्य लालित्य तेज एवं औदार्य ये सत्त्व के भेद से पुरुषों के विकार होते हैं ।।३३।।

(मूल) दक्षता शूरता उत्साह गन्दी वस्तुओं में जुगुप्सा यानी घृणा एवं उत्तम पुरुषों में महानुभावों में रहने वाले गुणों से स्पर्धा होड करना है वह शोभा है ।।३४।।

विलास और ललित को छोड़ कर अवश्य ही अन्यों की क्रम से या यौगपद्य से संभावना है । अतः शृङ्गार के भेदों में जो साधारण अभिनय है उससे इसकी सामान्यभिनयता युक्त है यह तात्पर्य है ।।३२।।

अब पुरुषों में रहने वालों के उद्देश्य से लक्षण कहते है—शोभा विलास इत्यादि ।।३३।।

जिस शरीर के विकार से दाक्ष्यादि व्यक्त होते है वह वहां शोभा है यह सम्बन्ध है अन्वय है ।।३४।।

धीरसंचारिणी दृष्टिर्गतिर्गोवृषभाञ्चिता ।
स्मितपूर्वमथालापो विलास इति कीर्तितः ॥३५॥
अभ्यासात्करणानां तु श्लिष्टत्वं यत्र जायते ।
महत्स्वपि विकारेषु तन्माधुर्यमिति स्मृतम् ॥३६॥
धर्मार्थकामसंयुक्ताच्छुभाशुभसमुत्थितात् ।

अभिनवभारती

गोवृषभः उत्तमा गौः ॥३५॥

महत्स्वपि विकारेष्वपि युद्धनियुद्धव्यायामादिष्वभ्यासकृतं, करणानां करचरणादिक्रियाणां श्लिष्टत्वं अनुल्वणत्वं यत्र शरीरविकारो स माधुर्यम् । नटगतमेतदिति त्वसत् प्रक्रमविरोधात्, प्रयोक्तृगुणानां च प्रकृत्यध्यावे भूमिकाविकल्पाध्याये च (अ ३५, ३६) वक्ष्यमाणत्वात् ॥३६॥

धर्मादयो यस्य फलं स तैः संयुक्त इत्युक्तम् । शुभाशुभसमुत्थितादिति । शुभ-

बालक्रीड़ा

(मूल) धीर पुरुष की तरह संचार करने वाली दृष्टि, गौओं में धर्मसांड की जो गति होती है उस तरह की गति, और स्मित पूर्वक वार्त्तालाय अर्थात् मुस्कुराते हुए बातचीत करना विलास कहलाता है ॥३५॥

(मूल) महान् भीषण विकारों, में भी अभ्यास के वदौलत इन्द्रियों में जो श्लिष्टता हो जाती है अर्थात् विरुद्ध पथ गामिता नही होकर एक क्रियाकारिता के रूप में सांगत्य हो जाता हैं वह माधुर्य माना गया है ॥३६॥

गोवृषभ माने उत्तम गौ ॥३५॥

बड़े २ विकारों में भी युद्ध नियुद्ध (द्वन्द्वयुद्ध) और व्यायाम आदि में अभ्यास के कारण करण इन्द्रियों में जो श्लिष्टता सघनता माने जब शरीर का विकार अनुल्वण है अस्पष्ट है वह माधुर्य है। यह माधुर्य नट में होता है ऐसा कहना असत् है क्योंकि प्रक्रम विरोध माने जैसा कहने का क्रम चला आ रहा है उसके विरुद्ध है। इसके सिवाय यह भी बात है कि प्रयोग करने वाले नटों के गुणों का कथन आगे चलकर प्रकृति नामक अध्याय में भूमिका किसकी कैसी भूमिका वेष भूषादि रहेंगे इसको बतलाने वाले अध्याय में कहेंगे ॥३६॥

धर्मादि जिसके फल है वह उनसे संयुक्त है ऐसा कहा है। शुभ एवं अशुभ से समुत्थित हैं माने शुभ संकल्प से शुभ पैदा होते है और अशुभ संकल्प से अशुभ पैदा होते

व्यवसायादचलनं स्थैर्यमित्यभिसंज्ञितम् ॥३७॥
यस्य प्रभावादाकारा हर्षक्रोधभयादिषु ।
भावेषु नोपलक्ष्यन्ते तद्गाम्भीर्यमिति स्मृतम् ॥३८॥
अबुद्धिपूर्वकं यत्तु निर्विकारस्वभावजम् ।

अभिनवभारती

संकल्पजा अशुभसङ्कल्पजाश्च । अशुभादपि हि सङ्कल्पोऽस्थिरान्निवर्तते । यथैलश्चातुर्वर्ण्यस्य सर्वस्वहारादर्थफलाद्याशयात् ।

अन्ये तु वीरस्यैतदनुचितमिति मत्वान्यथा व्याचक्षते शुभाशुभयोः समुत्थित इति । तेन यच्छास्त्रोक्तमुचितं चारभ्यते । तत्र क्रियमाणे शुभं सुलभतयार्थलाभः, अशुभं क्षयव्याधिरूपमनिष्टमस्तु तथापि तद्विषयाध्यवसायादविचलनं स्थैर्यं देहविकाररूपमेव ॥३७॥

आक्रियते चित्तवृत्तिरेभिरित्याकाराः, मुखरागदृष्टिविकारादयः । तेषामसत्ता

बालक्रीड़ा

(मूल) शुभ या अशुभ कर्मो के करने के लिए किये गये जो धर्म अर्थ एवं काम संयुक्त व्यवसाय से उद्योग से अचलन है विचलित नही होना है वह स्थैर्य नाम से कहा जाता है ॥३७॥

(मूल) जिसके प्रभाव से हर्ष क्रोध भय उग्रता एवं चिन्ता आदि भावों में हृष्ट होना क्रुद्ध होना भीत होना उग्र होना एवं चिन्तित होना नही दिखाई पड़े वह गाम्भीर्य माना गया है ॥३८॥

हैं । अशुभ कार्यो से भी संकल्प निवृत्त हो जाता है क्योंकि वह अस्थिर होता है । जैसे ऐल चातुर्वर्ण्य के उपसंहार से अर्थ के फल के आशय से एवं सर्वस्व आहरण से भी निवृत्त हो गया । और लोग तो वीर के लिए यह अनुचित है ऐसा मान कर अन्यथा व्याख्या करते हैं । शुभ एवं अशुभ कार्यो में समुत्थित होता है । अतः जो शास्त्र में कहा है और उचित भी है उसका आरम्भ करते हैं यानी उनके करने पर शुभ सुलभता से अर्थ का लाभ होता है । और अशुभ क्षय एवं व्यय रूप अनिष्ट होता है । अस्तु हो किन्तु उन शुभ एवं अशुभ कार्यो के करने में जो अध्यवसाय है उससे विचलित नही होना है वह शरीर का विकार स्थैर्य ही है ॥३७॥

चित्तवृत्तियाँ जिनसे आकृत करी जाती है वे आकार हैं वे मुखराग एवं दृष्टिविकार आदि हैं । जहां उनकी असत्ता है वह समग्र कारणता के व्यभिचरित होने का

श्रृङ्गाराकारचेष्टत्वं ललितं तदुदाहृतम् ॥३६॥

दानमभ्युपपत्तिश्च तथा च प्रियभाषणम् ।

स्वजने च परे वापि तदौदार्यं प्रकीर्तितम् ॥४०॥

अभिनवभारती

कारणसामग्रचव्यभिचरितफलेति हर्षादिसंभवेऽपि यत्कृतस्तत्कृतमुखरागाद्यभावः स एव निस्तिमितदेहस्वभावो गाम्भीर्यम् ॥३८।३६॥

परजनविषयं दानादिचेष्टाविकाररूपमेवौदार्यम् । स्वग्रहणन्तु लोकोक्तं यन्नानादररूपं रूपं चोभयन्त्वौदार्यमेव स्फुटयति । अभ्युपपत्तिः परित्राणार्थिनोऽङ्गीकरणम् ॥४०॥

परेणेति शत्रुणा, न तु गुरुणा मित्रादिना वा । प्राणात्ययेऽपीति न तु नीत्यनुवर्तनेन कथंचित् देशकालाद्यनुवर्तनेन सहनपूर्वकं निर्यातनम् । तथा च ममैव श्लोकः—

बालक्रीड़ा

(मूल) अबुद्धि पूर्वक यानी बुद्धि का उपयोग किये विना ही विकार रहित चित्तवृत्तियों की अपनी क्रिया के बदौल श्रृंगारमय आकार एवं श्रृंगार बहुल चेष्टाये हैं वह ललित है ॥३९॥

(मूल) यह स्वजन है यह परजन है ऐसे भेदभाव से रहित हो कर जब दान करता है अभ्युपत्ति माने अनुग्रह करता है एवं प्रिय भाषण करता है वह औदार्य कहाता है ॥४०॥

फल है । अतः हर्षादि के संभव में भी जिसके कारण कारणसामग्री के व्यभिचार से किया गया मुखरागादि का अभाव है वही निस्तिमित देह का अपना भाव गाम्भीर्य है ॥३८।३९॥

पर माने अन्य को दान देते समय जो शरीर की चेष्टा रूप विकार औदार्य है । स्वजन में जो स्वशब्द का ग्रहण है वह स्फुट करता है कि वे दोनों औदार्य ही है जिसको लोक स्व कहता है जिसका रूप अनादर रूप नही है । अभ्युयपत्ति का अर्थ है परित्राण चाहने वाले का अङ्गीकरण ॥४०॥

पर माने शत्रु है न कि गुरु या मित्रादि । प्राण के अत्यय में नाश में भी । न कि नीति का अनुवर्त्तन करके देश काल परिस्थिति का अनुवर्त्तन करके किसी प्रकार सहते हुए निर्यातन किया जाय । इस विषय में मेरा ही श्लोक है—

अधिक्षेपावमानादेः प्रयुक्तस्य परेण यत् ।
प्राणात्ययेऽप्यसहनं तत्तेजः समुदाहृतम् ॥४१॥
सत्त्वजोऽभिनयः पूर्वं मया प्रोक्तो द्विजोत्तमाः ।

अभिनवभारती

मूर्ध्ना कंचन पार्थिवं घृतवता च्छिद्रैः प्रविश्यान्तरं
स्वं रूपं विनिगूह्य तापमतुलं दत्त्वा चिराद् भ्रंशितः ।
यः शङ्कुर्जडरूपतापरिचितो नीत्येव वह्ले त्वया
तन्मन्येऽत्र कथासु तिष्ठति परं निर्वन्ध्यतेजस्विता ॥इति।४१॥

सात्त्विकः पूर्वमुक्त इत्यर्धस्यास्य केचिच्छङ्काशमनं प्रयोजनमाहुः—एवं हि शंक्यते सात्त्विकप्रङ्गेन कस्माद्रोमाञ्चादयो नोक्ता इति; तद्वारणार्थमाह पूर्वमिति भावाध्याय एव ते निरूपिता—इति । अयं च नार्षः, यतः सत्त्वे नाट्यं प्रतिष्ठितं अतो वागङ्गसत्त्व इत्यत्र पश्चान्निर्दिष्टः सात्त्विकः सामान्याभिनयो यस्मात् पूर्वमिति आदौ प्रोक्तः ततो हेतोर्यद्विलोमक्रमेण अनुपूर्वशः आनुपूर्व्यं क्रमप्राप्तं तेन क्रमेण

बालक्रीड़ा

(मूल) अन्य तुच्छ व्यक्ति के द्वारा किये गये या किये जाने वाले अधिक्षेप कटु वचन एवं अवमान या अपमान तिरस्कार को प्राणात्यय प्राणों के जीवन के अत्यय विनष्ट हो जाने की संभावना में भी जो नही सहन करना है वह तेज कहलाता है ॥४१॥

हे वह्ले ! किसी पार्थिव को मस्तक से धारण करने वाले तुमने जड़ रूपता से परिचित जिस शंकु को सहन किया वह नीति से ही सहन किया क्योंकि जो शंकु अपने रूप को छिपा कर छिद्र के जरिये भीतर घुसा और अतुल परिताप को देकर निकल गया ॥४१॥

सात्त्विक को पहले कह दिया इस अर्धाली का प्रयोजन है शंका को शमन करना ऐसा कोई लोग कहते हैं। शंका यह है कि सात्त्विक का जब प्रसङ्ग है तब रोमाञ्चादि को क्यों नही कहा। उसके वारण के लिए कहते हैं कि पहले भावाध्याय में ही उनका निरूपण कर दिया है।

यह आर्ष नही है। जब कि सत्त्व पर नाटच प्रतिष्ठित है। अतः वागङ्ग सत्त्व इस पद में पश्चात् निर्दिष्ट सात्त्विक सामान्याभिनय को जब कि पहले आरम्भ में कह दिया है इस हेतु से जो विलास अनुपूर्वशः आनुपूर्व्य क्रम प्राप्त है उस क्रम से

शारीरं चाभिनयं व्याख्यास्याम्यनुपूर्वशः ॥४२॥

षडात्मकस्तु शारीरो वाक्यं सूचाङ्कुरस्तथा ।

शाखा नाट्यायितं चैव निवृत्त्यङ्कुर एव च ॥४३॥

अभिनवभारती

शारीरं सामान्याभिनयं वक्ष्यते। सत्त्वानन्तरं हि विपरीतवृत्त्या आङ्गिकं आङ्गिकस्यानन्तरं वाचिकं वागङ्गसत्त्व इति। शारीरमित्यादि अत्र चशब्दो यस्मादर्थे, अपिशब्दस्तत इत्यत्रार्थे ॥४२॥

तत्रोद्देशमाह—षडात्मकस्त्विति। यः पूर्वं शारीरोऽभिनयो बहुना प्रकारवैचित्र्येणोक्तः तस्यावान्तरसामान्याभिनयरूपा हि षड् भवन्तीति, स एव षडात्मकतयाऽवान्तरजातियोगात् सात्त्विकवाचिकाभिनयैश्च संभूय क्रमतां प्राप्तैश्च व्यामिश्रतायां सामान्याभिनयः संपाद्यते इति तुशब्दस्यार्थः। वाक्यमिति वाक्यसहचरितः शारीरोऽभिनयो वाक्यम्। न हि शारीराभिनयमध्ये च निर्वर्तकानि गणितानीति चिरन्तनाः ॥४३॥

बालक्रीड़ा

(मूल) हे द्विजोत्तमो ! मैंने पहले सत्त्व जन्य सात्त्विक अभिनय को कहा है। अब मैं अनुक्रम से शारीर अभिनय को कहूंगा ॥४२॥

(मूल) यह शारीर अभिनय षडात्मक है ६ प्रकार का है। वाक्य १ सूचा २ अङ्कुर ३ शाखा ४ नाट्यायित ५ निवृत्यङ्कुर ६ ॥४३॥

शारीर सामान्याभिनय को कहेंगे कि वागङ्गसत्त्व में विपरीतवृत्ति से पहले सात्त्विक है सात्त्विक के अनन्तर आङ्गिक हैं और आङ्गिक के अनन्तर वाचिक है। शारीरं च अपि इसमें उपात्त च शब्द यस्मात् के अर्थ में है और अपि शब्द तत इस अर्थ में हैं ॥४२॥

उस उद्देश को कहते हैं षडात्मकस्तु। शारीर अभिनय ६ प्रकार का है। पहले जिस शारीर अभिनय को बहुत विचित्र प्रकारों से कहा है उसके अवान्तर सामान्याभिनय रूप छः होते हैं इस तरह अवान्तर प्रकारों के योग से वही षडात्मक हुआ। एकत्रित हो गया फिर क्रम प्राप्त सात्त्विक आंगिक एवं वाचिक अभिनयों की व्याभिश्रता होने पर सामान्याभिनय होता है। ऐसा तु शब्द के अर्थ से प्राप्त होता है। वाक्यम्। अर्थात् वाक्यसहचरित शारीर अभिनय वाक्य है यह नही है कि शारीर अभिनयों के मध्य में निर्वर्त्तकों की निवृत्यंकुरों में गणना की है ऐसा चिरन्तन कहते हैं ॥४३॥

नानारसार्थयुक्तैर्वृत्तनिबन्धैः कृतः सचूर्णपदैः।

अभिनवभारती

शारीरस्वरा (अ० २८) इति यद्व्यवहाराद्वा भावश्च शारीरत्वेन प्रसिद्धो, वाक्यमेवाभिनयान्तरनिरपेक्षमिति, सद्वृत्तभाषागुणः स्फुटतमां स्वार्थप्रतीतिं यदा विधत्ते तत एव रसभावानुभावकः, तदा स एव वाक्याभिनय इति तु काव्यकौतुक-ग्रन्थः। अत्र तु पाठ्यरूपः सामान्याभिनयः कथमिति चिन्त्यम्। शारीरानुप्रवेशा-दिति चेत् अभिनयान्तरनिरपेक्ष एव। न चाभिनयशून्याभिनेयकाव्ये वाक्यं किंचि-द्भवति। न चाभिनेये वाक्याभिनयव्यवहार इत्युपाध्यायेनायमेकीयोऽभिप्रायो दर्शितः न त्वस्यायं स्वपक्ष इति भ्रमितव्यम्।

तत्र वाक्याभिनयस्य लक्षणमाह –

नानारसार्थयुक्तैर्वृत्तनिबन्धैः कृतः स चूर्णपदैः।
प्राकृतसंस्कृतपाठो वाक्याभिनयो बुधैर्ज्ञेयः ॥इति॥

नानारसविशेषो वाक्यार्थः। तेन युक्तानि वाक्यानि यानि तानि च वृत्तरचितानि चूर्णपदात्मकानि वा पुनरपि संस्कृतानि वा प्राकृतानि वा तैर्युक्तः सहचरितः शारीरो

बालक्रीड़ा

अथवा शारीरस्वरा इस व्यवहार से जो शारीरतया प्रसिद्ध भाव है और अभि-नयान्तर निरपेक्ष वाक्य है। किन्तु काव्यकौतुक ग्रन्थ में तो कहा है कि सद्वृत्तों से सम्पन्न भाषा का जो गुण है वह जब अत्यन्त स्फुट रूप से अपने अर्थ की प्रतीति को करता है इसी लिए वह रस और भावों का अनुभावक है प्रत्यायक है तब वही वाक्या-भिनय है। इस विषय में चिन्तनीय है कि सामान्याभिनय पाठ्य रूप कैसे होगा। अगर कहें कि यहां शारीर का अनुप्रवेश है तो यह भी ठीक नही है क्योंकि पहले कह आये हैं अभिनयान्तर निरपेक्ष वाक्य है। और भी बात है कि अभिनय शून्य अभिनेय विशिष्ट काव्य में अभिनय निरपेक्ष वाक्य कुछ होता है अर्थात् कुछ नही होता है। अभिनेय पदार्थ है उसमें वाक्याभिनय का व्यवहार नही होता है ऐसा उपाध्याय जी ने एक किसी का अभिप्राय दिखाया है किन्तु यह उनका अपना पक्ष है ऐसा भ्रम नही करना चाहिए। यहां वाक्याभिनय का लक्षण स्वरूप कहते हैं नान्त।

नानारसविशेष वाला वाक्यार्थ है। अतः उससे युक्त जो वाक्य हैं वे वाक्य छन्दो-बद्ध है वृत्तों से रचित हैं अथवा बिखरे हुए पद स्वरूप हैं उसके बाद फिर वे संस्कृत भाषा मय हैं या प्राकृत भाषामय है। उन वाक्यों से युक्त सहचरित शारीर है इसका

प्राकृतसंस्कृतपाठो वाक्याभिनयो बुधैर्ज्ञेयः ॥४४॥

अभिनवभारती

वाक्येन सहैव प्रयुज्यमानः शारीरो वाक्याभिनय इति यावत्। प्राकृतः संस्कृतश्च पाठोऽस्मिन्निति बहुव्रीहिः। स चाय वाक्याभिनयश्चतुर्धा संस्कृतप्राकृतयोर्गद्य-पद्यभेदात्।

अत्र केचिदाहुः योऽर्थः सदैव हृदये वर्तते अत एव विमर्शानुबन्ध-नादिनिरपेक्ष एव स सततं स्फुरति। यथा भीमसेनस्य कुरुकुलविषयः क्रोधातिशयः तद्विषये वाक्ये "चञ्चद्भुजभ्रमित" वेणी—(अ० १) इत्यादौ पाठसमकालं यो भ्रुकु-टयादिमयः शारीरोऽभिनय इति। एतच्चासत्। सूचायां विमर्शपूर्वकवस्तु-विषयायामपि प्रवृत्तायां यद्वाक्यं बध्यते तत्सहचरितोऽपि शारीरः किमिति न वाक्याभिनयः तथापि चतुर्विधवाक्याभिनययोगात् सूचादीनां बहुभेदत्वं वक्ष्याम इत्यास्तां तावत् ॥४४॥

बालक्रीड़ा

(मूल) सचूर्ण पद माने जिस रचना में ऐसे पदों की योजना की गई हो जो सर्व विज्ञात हो अधिक रूप में प्रयुक्त हो। चूर्णन पेषण जिनका हो गया हो। नाना रस से ओत-प्रोत अर्थो से युक्त छन्दों की रचना जिसमें की गई हो तथा जिसमें प्राकृत एवं संस्कृत पाठ हो वह वाक्यार्थाभिनय है ॥४४॥

मतलब हुआ कि वाक्य के साथ प्रयुज्यमान शारीर ही वाक्याभिनय है। प्राकृत एवं संस्कृत पाठ जिसमें है ऐसा यहां बहुव्रीहि समास है। यह वाक्य चतुर्विध है। संस्कृत भाषा में निबद्ध गद्य और पद्य के भेद से तथा प्राकृत भाषा में निबद्ध गद्य और पद्य के भेद से चार प्रकार का है।

यहां कोई कहते हैं कि जो अर्थ हृदय में है इसीलिए विमर्श की अपेक्षा विना किये ही वह निरन्तर स्फुरित होता है। जैसे भीमसेन के हृदय में कुरुकुल के विषय में क्रोधातिशय है। उस विषय का वाक्य है चञ्चद्भुजभ्रमित इत्यादि वेणीसंहार नाटक का श्लोक वाक्य। इसे पढने के समय में ही भ्रुकुटी संचालन या तिरछापन शारीरा-भिनय होने लगता है। इस पर कहते हैं कि यह सब असत् है। क्योंकि वस्तु के विषय में विमर्श पूर्वक प्रवृत्त होने वाली सूचा में जो वाक्य का निबन्धन है और तत्सहचरित ही शारीर अभिनय है तब वह अभिनय वाक्याभिनय क्यों नही कहलायेगा। तब भी चार प्रकार के वाक्याभिनय के भेद से सूचा के बहुत भेदों को हम आगे कहेंगे ॥४४॥

वाक्यार्थो वाक्यं वा, सत्त्वाङ्गैः सूच्यते यदा पूर्वम् ।
पश्चाद्वाक्याभिनयः सूचेत्यभिसंज्ञिता सा तु ॥४५॥

अभिनवभारती

वाक्यार्थों वाक्यं वा सत्वाङ्गैः सूच्यते यदा पूर्वम् ।
पश्चाद्वाक्याभिनयः सूचेत्यभिसंज्ञिता सा तु ॥इति॥

यदा तु निपातः यदित्यत्रार्थे इह वर्तते । तेन यैः सात्त्विकाङ्गिकैः भाविवक्तव्यं सूच्यते, येषामन्तरोऽभिनयः प्रवर्तत एव सूचाभिनयः । "आत्माबुद्धया समेव्यार्था" निति हि न्यायो वा प्रसरेत् । तत्रोत्तमानां बाहुल्येनाभिसंधानविचारपूर्वकं एवमिति चिरतरोऽसावभिसन्धिकालः तत्राविष्ठस्यैवेहोपयोग इति—विचार्यमाणे तथाभूतवस्तुविशेषावेशजनितेन शरीरविकारेणावश्यं भवितव्यं सममेव सूचाभिनयः । तत्र च द्वयी गतिर्विद्यते, स्थितेनैवाभिसन्धानेन यादृक्क्रम आक्षिप्तस्तादृशैव क्रमेण परतः शब्दोच्चारणम् । यथा राज्यं निर्जिशत्रु योग्यसचिवन्यस्तः समस्तो भरः' (रत्ना—अ-४) इत्यादौ । तत्र हि पूर्वपूर्वान्तिरवाक्यांशाभिधेयभागप्रभावित एवोत्तरोत्तरावान्तरवाक्यार्थं इति यादृगभिसन्धानक्रमस्तादृगेव तत्र क्रमः ।

बालक्रीड़ा

(मूल) जब पहले से ही अंगों के संचालन के सत्त्व से श्रेष्ठता से वाक्यार्थ या वाक्य की, माने वक्तव्य की सूचना दे दी जाय फिर पीछे अभिनय किया जाय वह सूचासंज्ञक अभिनय है ॥४५॥

यहां यदा और तु निपात यत् इस अर्थ में है । अतः जिन सात्त्विक एवं आङ्गिकों से भावी वक्तव्य सूचित होता है जिनके अन्तर में अभिनय प्रवृत्त होता है वही सूचाभिनय है । अथवा यदा पाणिनीय शिक्षा में बतलाया हुआ आत्मा बुद्धि से अर्थों को संगृहीत करके यह न्याय प्रसक्त होता है । उसमें उत्तम पुरुषों का अधिकतर पूर्वापर के अभिसंधान के साथ विचार पुरःसर ऐसा कार्य होता है । यह प्राचीन अभिसन्धि काल है । उसमें आविष्ट का यहां उपयोग है । ऐसा जब विचार करते हैं तब उस तरह के वस्तु विशेष के आवेश से शरीर के विकार अवश्य होने चाहिए । अतः उनके साथ ही सूचाभिनय होता है । वहां दो जातियां हैं पूर्वोपस्थित अभिसन्धान से जैसा आक्षिप्त हो गया है उसी क्रम से परतः आगे शब्द का उच्चारण है । जैसे—निर्जितशत्रु राज्य है और उसका समस्त भार योग्य सचिव पर रख दिया है । इत्यादि में । यहां पूर्व पूर्व अवान्तर वाक्यांश के अभिधेय प्रतिपाद्य भाग से प्रभावित ही उत्तरोतर वाक्यार्थ है इस अभिसन्धान का जैसा क्रम है वही क्रम यहां है । यह एक गति है । जहां तो अभिसन्धान अन्य है और क्रम अन्य प्रकार का है वहां अभिधेय

अभि नवभारती

यत्र त्वन्यथाभिसन्धानमन्यथा च क्रमस्तत्र निर्विभागभेदकं सन्धानीयवाक्यार्थ-संधानम् । यथा मायापुष्पके सुग्रीवस्य—

दुर्गं भूमिरमात्यभृत्यसुहृदो दाराः शरीरं धनं
मानी वैरिविमर्दसौख्यममरप्रख्येन सख्येन किम् ।
यस्मात्सर्वमिदं प्रियाविरहितं तस्मादशक्ता वयं
न स्वेच्छासुलभैः पथोऽपि घटने शैलाश्मखण्डैरपि ॥

अत्र हि शरीरं दारा भूमिर्धनं भृत्या सुहृत् अमात्यो दुर्गं वैरिविमर्दसुखं रामस्य मित्रत्वमितिप्रसिद्धिरित्यभिसन्धानक्रम उचितो, निकटार्थपरामर्शक्रमेण प्रकरणावशादिदं लब्धं दूरं प्रसृत्य क्रमेण यद्वा इदं तावदास्तां, इदमपि तत इति न्यायेनान्तः प्रवेशः, तथापि रामस्य मित्रत्वमितिप्रसिद्धिरित्यादिना विलोमक्रमेण भाव्यम् । तत्र प्रथमे पक्षे वाक्यं सूच्यत इत्युक्तम्, क्रमो हि वाक्यमिति तद्विदो मन्यन्ते । 'एको नववच'''शब्दः क्रमो युध्यतः सुहृद्भि' (?) रित्यादौ । द्वितीयपक्षे तूक्तं वाक्यार्थः सूच्यत इति ।

बालक्रीड़ा

प्रतिपाद्य भाग से प्रभावित भेद नही हैं वहां अभिसन्धानीय वाक्यार्थ का सन्धान होता है । जैसे मायापुष्पक में सुग्रीव का वाक्य है ।

दुर्ग भूमि अमात्यभृत्य मित्र द्वारा शरीर धन मान वैरी के विमर्द से जनित सुख एवं अमरप्रख्य सख्य से क्या है अर्थात् कुछ भी नही है । क्योंकि यह सब सीता जो भगवान् राम की प्रिया है उससे रहित है अतः स्वेच्छा से सुलभ इन पर्वत के पाषाण खण्डों से मार्ग की रचना में भी हम लोग अशक्त हैं ।

यहां शरीर द्वारा भूमि धन भृत्य अमात्य सुहृत दुर्ग वैरिविमर्द सुख एवं राम का मित्रत्व ऐसी प्रसिद्धि है अतः यह क्रम उचित है क्योंकि निकटवर्त्ती अर्थो के परामर्श क्रम के द्वारा प्रकरण के जरिये मिलता है मिला है अथवा दूर जाकर फिर क्रम के द्वारा मिलता है इसे रहने दिया जाय । यह भी तो उसी वाक्य से मिलता है इस न्याय से अन्तः प्रवेश माने पदार्थो को बनाया जा सकता है तब भी राम का मित्रत्व इसकी प्रसिद्धि है इस विलोम क्रम से होना चाहिए वहां प्रथम पक्ष में वाक्य सूच्य होता है ऐसा कहा । क्रम वाक्य है—ऐसा क्रमवित् एवं वाक्यवित् जानते हैं । एक इत्यादि में है । द्वितीय पक्ष में तो कह दिया है कि वाक्यार्थ सूचित किया जाता है ।

'हृदयस्थो निर्वचनैरङ्गाभिनयः कृतो निपुणसाध्यः ।

अभिनवभारती

अन्यस्त्वाह—यदा स्वयमेव विमृश्यते तदा वाक्यार्थः सूच्यते इत्युचितः, यदा परवचनमाकर्ण्यते, यथा 'भो वयस्स पेक्ख पेक्ख' (रत्ना) इत्यादावुद्यानर्णनं पूर्यते तदा तदुक्तोऽर्थः सूच्यते तस्य पश्चाद्वचनाभिनयो भविष्यति 'वयस्य सम्यगुपलक्षित' मित्यादि तत्र सूचाभिनये वाक्यं सूच्यत इति। तच्चासत्—परवाक्यापेक्षया हि तत्र निवृत्त्यङ्कुराभिनयः भाविवाक्यापेक्षया तु ततोऽन्यैव सूचा। अनभिनेय एवाभिनयनलक्ष्यं प्रत्यपरिचयोऽयमपराध्यति। किंचिद्वाक्यार्थप्रग्रहणेन किमयमर्थो न स्वीकर्तुं शक्यो येन पुनर्वाक्यशब्दोपादानं स्यात्, तस्मात्परोदीरितवाक्यार्थ एव ह्यसौ सूचितो न तु वाक्यमित्यास्ताम् ॥४५॥

तदिदमुक्तपूर्वं संस्कृतप्राकृतयोर्गद्यपद्यभेदाचचतुःप्रकारं वाक्यं तदर्थसूचने भेदादष्टधासूचाभिनयादनुगतं षोडशधा युक्तम् । परवाक्यस्य न भिन्नाङ्गते- त्यधुनैवोपपादितम् ।

हृदयस्थो निर्वचनैरङ्गाभिनयः कृतो निपुणसाध्यः ।

बालक्रीड़ा

दूसरे लोग कहते हैं कि जब अपने स्वयं परामर्श करते हैं तब वाक्यार्थः सूच्यते यह उचित है। जब तो दूसरे के बचन को सुनते हैं जैसे—भो वयस्य ! देखो देखो इत्यादि उद्यान वर्णन की पूर्ति की जाती है तब वहां वाक्यार्थ सूचित होता है। उसके बाद वचनाभिनय होगा। जैसे वयस्य आपने सम्यक् समझा इत्यादि। वहां सूचाभिनय में वाक्य सूचित होता है। यह सब असत् है। परवाक्य की अपेक्षा से वहां निवृत्य- ङ्कुर का अभिनय होता है और भावी वाक्य के अपेक्षा से उससे भिन्न सूचा होती है। यह अनभिनेय है इसमें आपका अपराध नही है किन्तु अभिनयन के लक्ष्य के विषय में जो अपरिचय है वह अपराधी है। यहां 'वाक्यार्थो वाक्यं वा' इस रूप में जो कथन है वहां वाक्यार्थ के जान लेने से क्या इस अर्थ का जान लेना संभव नही है जो पुनः वाक्य शब्द का उपादान किया। इस लिए परोदीरित वाक्य का अर्थ ही यहां उचित है न कि वाक्य। अतः रहने दिया जाय ॥४५॥

यह जो पहिले कहा था कि वाक्यार्थाभिनय संस्कृत एवं प्राकृत में गद्य एवं पद्य के भेद से चार प्रकार का है वह अर्थ सूचन में भी उतने ही प्रकार का होने से आठ प्रकार का है और सूचाभिनय से अनुगत कर देने से अर्थात् मिला देने से १६ प्रकार

²सूचैवोत्पत्तिकृतो विज्ञेयस्त्वङ्कुराभिनयः ॥४६॥

अभिनवभारती

सूचैवोत्पत्तिकृतो विज्ञेयस्त्वङ्कुराभिनयः ॥ इति

अन्यपरेऽपि वाक्ये यद्गर्भीभूतं हृदयस्थं वस्तु तन्निष्ठो योऽभिनयोऽङ्गविकारैर्वचनशून्यैः सम्पादितः सूचातुल्यः सोऽङ्कुरो नाम शारीरः । यथा सागरिका—जाव अहं पि कुसुमाइं अवचाइअ कामदेवं पूअइस्सं—इत्यभिधायैतद्वाक्ये गर्भीभूतं कुसुमापचयमङ्गविकारैर्दर्शयति । यच्चायमङ्कुरो निपुणैरेव प्रयोक्तृभिः सामाजिकैश्च साध्यः आपाद्यः चेतसा ध्यात उद्भावितया स्वबुद्धिकल्पनयोपचितः । यद्यपि कविवाक्यान्येवात्रोपजीव्यानि, तथापि यादृक् कुसुमाचयकर्म सागरिकायाः सौभाग्यसौन्दर्यप्रेमसाध्वसादिगर्भं न तादृशं तापसस्य तदुभयविलक्षणं 'यः वेद्या ?' इत्येवमादि तत्सर्वं बचनेभ्य एवाकृष्यते तथा विस्पष्टं च न तथावचनतो लभ्यमेतत् । अपि तु पर्यालोचनातिशयम्यमिति निपुणसाध्यमित्युक्तम् ॥४६॥

बालक्रीड़ा

(मूल) जब निपुण अभिनेताओं के द्वारा हृदयस्थ किसी नाटकीय अङ्ग के अभिनय का निर्वचन कर दिया जाय। तब इस प्रकार निर्वचन कर देने के कारण सूचा अभिनय ही निवृत्यङ्कुर अभिनय कहलाता है ॥४६॥

का होना युक्त है। अन्य परक अन्यार्थक वाक्य में जो गर्भीभुत हृदयस्थ वस्तु है तद्विषयक जो वाचिक अभिनय से रहित अंगविकारों से सम्पन्न किया सूचातुल्य अभिनय है वह अङ्कुर नामक शारीर है।

जैसे सागरिका—मैं भी कुसुमों का अवचयन कर कामदेव की पूजा करूंगी—ऐसा कहकर इस वाक्य में गर्भीभूत कुसुमावचयना को अङ्गविकारों से दिखाती है। यह जो अंकुर अभिनय है वह निपुण प्रयोक्ता एवं सामाजिकों का साध्य है आपाद्य है चित्त से ध्यात है और अपनी बुद्धि के द्वारा उद्भावित कल्पना से उपचित किया गया है। यद्यपि यहां कवियों के वाक्य ही उपजीव्य हैं तद्यपि जैसा कुसुमावचय कर्म सागरिका के सौभाग्य सौन्दर्य प्रेम एवं साध्वसादि से गर्भीकृत है वैसा तापस का नही है। जो सहृदय वैद्य है वह तो तदुभय विलक्षण है—इस प्रकार के इत्यादि सब कुछ वचनों से ही आकृष्ट किया जाता है अतः स्पष्ट यह उस प्रकार के वचन से लभ्य नही है। अपितु पर्यालोचन लभ्य है इस लिए कहा कि निपुण से साध्य है। और लोग तो कहते हैं कि यह सूचा के उत्पत्ति भाग के तुल्य ही अङ्कुर है क्योंकि उसके पहले यह वचगशून्य है। अतः नही कहने के समान है इसका अर्थ निर्वचन शब्द से कहा गया है ॥४६॥

यत्तु शिरोमुखजङ्घोरुपाणिपादैर्यथाक्रमं क्रियते।
शाखादर्शन मार्गः शाखाभिनयः स विज्ञेयः ।।४७।।

अभिनवभारती

अन्ये तु सूचाया उत्पत्तिभागेन तुल्योऽङ्कुरस्तस्याः प्रागभावे वचनशून्यत्वादिति। इदं त्वनुक्तसमानं निर्वचनशब्देनोक्तत्वादर्थस्य।

यत्तु शिरोमुखजङ्घोरुपाणिपादैर्यथाक्रमं क्रियते।
शाखादर्शनमार्गः शाखाभिनयः स विज्ञेयः ।।

समस्तेन शाखाव्यापारेण वर्तनाप्रधानतया प्रयुक्तः शाखाभिनयः 'शिरोमुखजङ्घोरु'—इत्यादिना कृतैकवद्भावेन द्वन्द्वपदसमूहेन पुनः श्लोकद्वन्द्वेन, नाटचायितमित्यादि स्थान इत्यादि च ।।४७।।

पूर्वप्रविष्टस्य पात्रस्य स्वस्तरूपमुदीक्षमाणस्य अपरपात्रस्य प्रवेशः तद्ध्रुवागानतत्सूचापरिक्रमणादि किंचिन्नाटचमस्तीति तत्काले पूर्वपात्रेण ये समुचिता उपचाराः क्रियन्ते नाटचायितमित्याद्यार्यायास्तात्पर्यम्। पूर्वप्रविष्टेन पात्रेण सह सङ्गमं विधाय पश्चात्प्रविष्टपात्रपरिक्रमणादिकाले स्थानकेनैवासीनस्य तूष्णीं स्थितौ प्राप्तायामभिनयः तदपि नाटचायितमिपरायास्तात्वर्यमिति श्रीशङ्कुकाद्याः, तच्चायुक्तम्। अन्योन्यसङ्गमावधि यत्पात्रस्य चेष्टितं तदपरोदितवाक्यार्थसूचनो-

बालक्रीड़ा

(मूल) जहां क्रमशः शिर मुख वक्षः स्थल उदर कर हस्थ जंघा उरु एवं पैरों से शाखा के देखने का मार्ग माने उपाय कर दिया गया हो उसे शाखाभिनय समझना चाहिए ।।४७।।

यत्तु। शिरोमुखजङ्घोरु इत्यादि पद समूह में किये गये एकद्भावरूप समाहार द्वन्द्व के द्वारा पुनः नाटचायितमित्यादि और स्थान इत्यादि दो श्लोकों के द्वारा समस्त शाखा व्यापार से वर्त्तना को प्रधान मान कर शाखाभिनय का प्रयोग किया जाता है। पूर्व प्रविष्ट पात्र के स्वरूप को उत्कृष्टता से देखते हुए अपर पात्र के प्रवेश के समय में सादृश ध्रुवा का गान एवं तादृश सूचा परिक्रमादि कुछ नाटच होता है अतः उस समय में पूर्व प्रविष्ट पात्र जो उपचार करता है। ऐसा नाटचायित इस आर्या का तात्पर्य है। पूर्वप्रविष्ट पात्र के साथ संगम करके स्थानक विधि से बैठे हुए पश्चात्प्रविष्ट पात्र का जो पूर्व प्रविष्ट पात्र के परिक्रमण के समय में प्राप्त तूष्णी स्थिति रूप में अभिनय है वह भी नाटचायित है ऐसा अपर आर्या का तात्पर्य है इसको श्रीशंकुकादि कहते हैं। किन्तु वह अयुक्त है। परस्पर के संगम पर्यन्त जो पात्र का व्यापार है वह दूसरे पात्र

अभिनवभारती

चितत्वं वा निर्वचनकादौचित्यमात्रादेवोपनतं वा, पूर्वत्र पक्षे निवृत्त्यङ्कुरः उत्तरत्राङ्कुर इत्युभयं न नाटचायितम् ।

तथा हि प्रयोगकुशलाः प्राहुः एवंविधे विषये धर्मी—लिखति इति, पाल यन्नास्ते इति, तथा पुष्पापचयं नाटयतीति। नाटचस्य सन्धानरूपत्वं च वाक्ये सूचादीनामपि संभवत्येव। न वा नाट्येन नाटचं सन्धीयत इति नाटचायितवाचोयुक्तिरपि कथम्। तस्मादित्थमेतद् व्याख्यातव्यम्—इह यदा स्वप्नोऽप्येकघनो दृश्यते तन्मध्यत एव च किंचिद्दृश्यमान परस्य स्वप्न एव जाग्रद्रूपतामापादिते स्वप्नोऽयं मया दृष्ट इति वर्ण्यते, तदा जाग्रदपेक्षया स्वप्नव्यवहारः, न तत्र पारमार्थिक इत्यौपचारिकं तदपेक्षं तस्य स्वप्नत्वमिति तस्य स्वप्नायितव्यवहारो दृष्टः। एवमिहापि नाटच एकघनस्वभावे हि स्थिते तत्रैवासत्यनाटचानुप्रवेशान्नाटचपात्रेषु सामाजिकीभूतेषु तदपेक्षया यदन्यं नाटचं तस्य तदपेक्षया नाटचरूपत्वं पारमार्थिकमिति नाट्चायितमुच्यते। तच्च द्विविधं नाट्करूपकनिष्ठमेव वा तस्य क्रमेण लक्षणमार्याद्वितयेनोच्यते। नाट्चे यत्प्रवेशकैर्नाटचान्तरगतैरिव पात्रैः

बालक्रीड़ा

के द्वारा कथित वाक्य के अर्थ की सूचना के अनुसार है अथवा निर्वचन के औचित्य से उपनत है पूर्व पक्ष में निवृत्यङ्कुर है उत्तर में अंकुर है। अतः ये दोनों ही नाटचायित नही है।

जैसा कि प्रयोग कुशल लोग कहते है कि इस तरह विषय में कहीं धर्मी लिखता है, कहीं प्रतिपालन करता हुआ बैठा है तथा पुष्पावचय का नटन करता है। इत्यादि। इस तरह नाटच की सन्धान रूपता सूचादि के भी वाक्य में होती है। अथवा नाटच से नाटच का अनुसन्धान नही होता है अतः यह नाट्यायित है यह वाचोयुक्ति भी कैसे हो सकती है। इस लिए इसकी व्याख्या ऐसे करनी चाहिए यहां जब स्वप्न भी एकघन अर्थात् एक रूप में घन माने निरन्तर दिखाई पड़ता है। जैसे—स्वप्न के बीच में ही दूसरे को कुछ दीख रहा है—कि मैंने यह स्वप्न देखा। क्योंकि यह स्वप्न ही जाग्रदवस्था को प्राप्त हो गया है तभी तो वह कहता है कि मैंने यह स्वप्न देखा। वहां जाग्रदपेक्षा से स्वप्न व्यवहार होता है यह पारमार्थिक व्यवहार नही है। यह औपचारिक है। इस लिए इसको स्वप्न कहते हैं। इसका स्वप्न की तरह व्यवहार होता हुआ देखा गया है। इस प्रकार यहां भी एक घन स्वरूप नाट्य स्थित है वहां असत्य नाट्य के अनुप्रवेश होने से सामाजिक रूप नाट्य पात्रों जो अन्य नाट्य है उसका पूर्वापेक्षा से नाट्यरूपत्व पारमार्थिक है अतः इसको नाट्यायित कहते हैं। वह नाट्यायित दो प्रकार का है एक नाटक नामक रूपक में रहता है। (दश भेद वाले रूपक का नाटक भी एक भेद है अतः नाटक नामक रूपक लिखा है') दूसरा कार्यान्तर में है। उन दोनों के लक्षणों को क्रमशः दो आर्याओं से कहते हैं।

अभिनवभारती

अत एव ततः प्रविशतीत्युक्तैः सङ्गमः क्रियते तन्नाटचायितम् । कीदृशैरभिनयद्वारेण यत्सूचना तयोपचारैः परमार्थतयोपचर्यमाणैः । ननूभयमपि नाटच कस्मान्न भवति नत्वेकघनतेत्याशङ्क्याह कालप्रकर्षलक्षणाद्धेतोरन्योन्यभिन्नकालत्वात् कथं तत्रैकघनता युक्तेति भावः । यावदिति भूयस्तरं प्रबन्धं व्याप्नोति परिमितं वा तत्सर्वं नाटचायितमित्यर्थः । तथा यावदिति स्वप्ने स्वप्नान्तरं तत्राप्यन्यत् स्वप्नान्तरमित्यादिन्यायेन वा भवत्वेकघनस्वप्नायितवृत्त्या वा सर्वथा तन्नाटयायितम् । तत्रास्य बहुतरव्यापिनो बहुगर्भस्वप्नायिततुल्यस्य नाटचायितस्योदाहरणं महाकविसुबन्धुनिबद्धो वासवदत्तानाटचधाराख्यः समस्त एव प्रयोगः । तत्र हि बिन्दुसारः प्रयोज्यवस्तुक उदयनचरिते सामाजिकीकृतः, असावप्युदयनो वासवदत्ताचेष्टिते । एष चार्थः—स्वस्मिन सूत्ररूपके दृष्टे सुज्ञानो भवति । अतिवैतत्यभयात्तु न प्रदर्शितः एकस्तु प्रदेश उदाह्रियते तत्रह्यु दयने सामाजिकीकृते सूत्रधारप्रयोगः—'तव सुचरितैरेष जयति'' इति, तत उदयनः 'कुतो मम सुचरिता' नीति सास्रं विलपति—

बालक्रीड़ा

रूपकों में जो प्रवेशकों को ततः प्रविशति—इसतरह कहे गये अभिनयान्तर प्रविष्ट पात्रों के साथ संगम किया जाता है वह नाट्चायित है । कैसे पात्रों के साथ—जिनका अभिनय के द्वारा जो सूचना है उस उपचार से माने परमार्थ रूप से उपचर्यमाण है । प्रश्न—ये दोनों रूपक क्यों नहीं होते हैं । एकघनता नही होती है तो मत होवे ! ऐसी आशंका करके उत्तर देते हैं कि एक की अपेक्षा दूसरे से कालका प्रकर्ष है अधिक समय है । इस काल प्रकर्ष रूप हेतु से दोनों के काल में भेद है । तब वहां एकघनता कैसे युक्त हो सकती है ।

यावत् माने जो बहुत बड़े प्रबन्ध को व्याप्त करता है या परिमित सबन्ध को व्याप्त करता है वह सब नाट्यायित है अथवा यावत् का अर्थ है जैसे स्वप्न में स्वप्नान्तर को देखना उसमें भी अन्य स्वप्नान्तर का देखना इस न्याय से अथवा एकघन स्वप्नायित वृत्ति से प्राप्त है वह सर्वथा नाट्यायित है । उक्त दोनों प्रकार के नाट्यायित का उदाहरण महाकवि सुबन्धु के द्वारा रचित वासवदत्ता नामक गद्य प्रबन्ध के आधार पर बने हुए स्वप्नवासवदत्ता नाटक वगैरह समस्त प्रयोग हैं ।

वहां विन्दुसार प्रयोज्य वस्तु वाले उदयन के चरित से सामाजिक है । यह उदयन भी वासवत्ता के चेष्टित में सामाजिक है । यहां यह अर्थ है कि अपने को सूत्र धार के रूप में देखने पर सुज्ञान होता है । अतिवितत हो जायगा अतः सब नही लिखते हैं । तब भी उसके एक प्रदेश का उदाहरण देते हैं । जब उदयन सामाजिक है तब सूत्रधार का प्रयोग—जैसे आपके पुण्य से ही यह विजय करता है । इस पर उदयन कहते है—कहां मेरे पुण्य हैं ! ऐसा कहकर अश्रुधारा गिराते हुए बिलाप करते हैं ।

नाट्यायितमुपचारैर्यः क्रियतेऽभिनयसूचया नाट्ये ।
काल प्रकर्षहेतु प्रवेशकैः संगमो यावत् ।।४८।।
स्थाने ध्रुवास्वभिनयो यः क्रियते हर्षशोकरोषाद्यैः ।

अभिनवभारती

एह्यम्ब किं कटकपिङ्गलपालकैस्तैर्भक्तोऽहमप्युदयनः सुतलालनीयः ।
यौगन्धरायण ममानय राजपुत्रीं हा हर्षरक्षित गतस्त्वमपप्रभावः ।।

तत्रैव बिन्दुसारः सामाजिकीभूतः परमार्थतामभिमन्यमानो "धन्या खलु (ईदृशैर्भक्तस्य) प्रलापैः" इत्युच्छ्वसति । प्रतीहारी आत्मगतं—"अअणिदपरमत्थकलणेहिं पिच्छइ खु देवो" इत्यादि ।

परिमितव्यापिनो निर्गर्भस्य नाट्यायितस्योदाहरणं यथा बालरामायणे गर्भाङ्के सीतास्वयंबरे ।

एवं तावन्नाटकरूपकनिष्ठं नाट्यायितं व्याख्यातम् ।।४८।।

कार्यान्तरनिष्ठं तूच्यते । इह यदाभ्यन्तररसाविष्टता भवति तदा ध्रुवायोगाभिनयः स्वतुल्यतामापाद्यमानः परस्परमिलिताकारकतां काकतालीयेनोपनिपातात् (संभाव्यते) । यथा—

बालक्रीड़ा

(मूल) नाट्य में रङ्ग स्थल मञ्च पर अभिनय की सूचना के द्वारा औपचारिक प्रवेशों से अर्थात् ततः प्रविशति मातलि, ततः प्रविशति सूत्रधारः ! इस तरह के उपचारकृत पात्र प्रवेशों से काल के प्रकर्ष का हेतु संगम पात्रों का होता है वह नाट्यायित है ।।४८।।

हे आद्य ! आइये । इन कटक पिङ्गलों से क्या हो सकता है सुत की तरह लालन के योग्य मैं उदयन, आपका भक्त हूँ । हे यौगन्धरायण ! राजपुत्री को मेरे समीप में लाओ । हा हर्षरक्षित तुम प्रभाव रहित होकर चले गये ।

वहाँ पर बिन्दुसार सामाजिक बनने से परमार्थता का अभिमान करता हुआ भक्त के ऐसे प्रलापों से—हम लोग धन्य हैं ! ऐसा उच्छ्वास लेता है । प्रतीहारी अअणिद इत्यादि अपने मन में कहता है । परिमितव्यापी निर्गर्भनाट्यायित का उदाहरण जैसे बालरामायण में गर्भाङ्क में सीता स्वयम्बर में है । इस प्रकार नाटक नामक रूपक में निष्ठ नाट्यायित का व्याख्यान कर दिया ।।४८।।

अब कार्यान्तर निष्ठ नाट्यायित को कहते हैं । यहां जब अन्तःकरण में रस का आवेश होता है तब काकतालीय के उपनिपात से परस्पर मिलिताकार कलस्वय स्वतुल्यता को आपाद्यमान ध्रुवागान के अभिनय की संभावना होती है ।

भावरससंप्रयुक्तं ज्ञेयं नाट्यायितं तदपि ॥४६॥

अभिनवभारती

नलिनीदलए णीसहसुकदेहिं आतथा मुच्चइ ।
पलइ विअब्भइ विज्जई हंसी णलिणीवणे वि णत्थिज्जइ ॥

इत्यादौ। तत्र हि प्रयोक्तुरेवमभिसन्धिध्रुवामभिनयेन दर्शयामीति। किंतु प्रासादिक्यध्रुवायां, "यत्र वाक्येन नोक्तं स्यात् तत्तु गीतं प्रसाधयेत्" (अ ३२) इति वचनात् ध्रुवार्थस्तत्रोचित आघातः, प्रयोगो हि बहुविधां मदनावस्थां नाटयतीति। एवं भूतोऽङ्कुरस्वभावः पौर्वापर्यपर्यालोचनवशात् तथाभूत एवोपनिपतित इति, अप्रयुज्यमानापि ध्रुवा काकतालीयेन प्रयोगमुपांशुरूपा नाटचमपि नाटचमिव शास्ते इति तथाविधनाटचायितत्वापादकः शारीराभिनयो नाटचायितमिति दर्शयति स्थाने ध्रुवास्वभिनयो यः क्रियत इति। भावैर्व्यभिचारियिभिः रसैः स्वस्थायिभिः ये संप्रयुक्ता आविष्टाः तत्संपादनैकमनसः प्रयोक्तारस्तैर्यो ध्रुवास्विति ध्रुवार्थविषयोऽभिनयः क्रियते। कथं, स्थाने प्रसङ्गे सति काकतालीयवशादित्यर्थः। योऽभिनयः शारीरो नाटचायितम्। ननु किं प्रतिपदमभिनयता नेत्याह हर्षादिभिरिति तत्सूचकैरङ्गोपाङ्गसत्त्वैरित्यर्थः। तदपीति न केवलं पूर्वं यावदिदमपीति ॥४६॥

बालक्रीड़ा

(मूल) रसों के अभिव्यंजक हर्ष, शोक, रोष एवं निर्वेदादि भावों के सम्यक् प्रयोग से ध्रुवाओं के समय में जो उचित अभिनय किया जाता है वह भी नाट्यायित है समझना चाहिए ॥४६॥

जैसे—नलिनीदले इत्यादि में। यहां प्रयोक्ता की यह अभिसन्धि है कि मैं ध्रुवा को अभिनय के द्वारा दिखलाऊँ। किन्तु प्रासादि की ध्रुवा के गाये जाने पर 'जो वाक्य से सिद्ध नही हो सकता है उसको गीत सिद्ध कर सकता है' इस वचन के अनुसार वहां ध्रुवा का आपात उचित ही है। प्रयोग में मदन की बहुत सी अवस्थाओं का अभिनय होता है। जिस प्रकार का अंकुर का स्वभाव है वैसा ही पूर्वापर के पर्यालोचन से उपनिपतित हो जाता है। अतः अप्रयुज्यमान भी अत एव उपांशुरूपा भी ध्रुवा काकतालीय न्याय से प्रयोग का नाट्य का भी नाट्य के सदृश शासन करती है। इस प्रकार के नाट्यायितत्व का आपादन करने वाला शारीराभिनय नाट्यायित होता है उसको दिखाते हैं—स्थाने। भावों से माने व्याभिचारियों से रसों से माने उस रस के अपने स्थायिओं से संप्रयुक्त आविष्ट हुए जो प्रयोक्ता लोग उनके सम्पादन में एक मनस्क हैं वे ध्रुवार्थ अभिनय करते हैं। कैसे करते है? इसको बतलाते है कि स्थाने माने काकतालीय न्याय से संगम होने पर। यह शारीर अभिनय नाट्यायित है। प्रश्न—क्या प्रत्येक पद में अभिनयता है। उत्तर—नही। हर्षादि के सूचक अंग एवं उपाङ्गों में निष्ठ सत्त्व से होता है यह यहां अर्थ है। वह भी केवल पहिले हो चुका है, वही नही है अपितु 'यह भी है' यहां तक है ॥४६॥

यत्रान्योक्तं वाक्यं सूचाभिनयेन योजयेदन्यः ।
तत्संबन्धार्थं कथं भवेन्निवृत्त्यङ्कुरः सोऽथ ॥५०॥

अभिनवभारती

यत्रान्योक्तं वाक्यं सूचाभिनयेन योजयेदन्यः ।
तत्संबन्धार्थकथं भवेन्निवृच्यङ्कुरः सोऽथ ॥

अन्योक्तं वाक्यं कथमन्यसूचाभिनये चित्तवृत्तिसूचकेनाङ्गोपाङ्गसत्त्व क्रमेण दर्शयेदित्याशङ्क्य हेतुमाह तत्संबन्धकथमिति बीजदेर्निवृत्ति यथाङ्कुरः सूचयति एवं निवृत्ते वाक्ये तदङ्कुर यति निवृत्त्यङ्कुर उक्तः। यथा हि विदूषकेण वत्स-राजे अवि सुहयदि दे लोअणाणं" इति पृष्टे सागरिका—सच्चं जीविदमरणाणं अन्तरं वट्टामि' इति ततो राजा—सुखयतीति किमुच्यते। कृच्छ्रेणोरुयुगं व्यतीत्य सुचिरं' इत्यादि पठति। तस्मिन् क्रमेणाकर्ण्यमाने सागरिका यथाभूत (संशयोत्क-ण्ठारागोदमजनितो) व्यभिचारिसत्त्वयोजितः सत्त्वाङ्गोपाङ्गपरिस्पन्दो दृश्यमानो निवृत्त्यङ्कुरो नाटचायितं च वासवदत्तानाटच धारे प्रतिपदं दृश्यते। एतेषां च सर्वा-भिनयैः सम्भूय वृत्तित्वात् सर्वत्र चाभिनेये प्रायशः सद्भावात् सामान्याभिनयत्वं तदर्थमेव च वितत्यैतत्स्वरूपाभिधानम् यत्पूर्वमुक्तम्—

बालक्रीड़ा

(मूल) जहां किसी अन्य पात्र ने एक वाक्य कहा किसी दूसरे पात्र ने उसकी सूचाभिनय से योजना कर दी। उस योजना में अर्थ का सम्बन्ध कैसे हुआ? इसको निवृत्यंकुर कहते हैं ॥५०॥

यत्र। अन्योक्त वाक्य को अन्यसूचा के अभिनय में चित्तवृत्ति के सूचक अंगो-पाङ्गक्रम से कैसे दिखावें ऐसी आशंका करके हेतु को कहते है— तत्सम्बन्ध। जैसे अङ्कुर के उत्पन्न होने से बीज की निवृत्ति हो जाती है। क्योंकि अंकुर बीज को फोड़कर निकलता है। अन्य सूचाभिनय अङ्कुरित हो रहा है उस समय अन्योक्त वाक्य निवृत्त हो जाता है अतः इसको निवृत्यंकुर कहा। जैसे विदूषकने वत्सराज में 'अयि ! यह देखना तुमको सुख दे रहा है' ऐसा पूछा तब सागरिका कहती है—सचमुच जीवित और मरण के अन्तर में मैं हूँ। उसके वाद राजा सुख देता है—यह क्या कहते हो? बड़े कष्ट से उस युग व्यत्यय का चिरकाल तक इत्यादि पढते हैं। उसके सुनने पर सागरिका को तथा भूत व्यभिचारियों के सम्बन्ध से जो सात्त्विक अङ्ग एवं उपाङ्गों का परिस्पन्द दिखाई पड़ रहा है वह निवृत्यङ्कुर है। यह निवृत्यङ्कुर और नाट्यायित वासवदत्त के आधार पर बने हुए नाटक में पद पद में दिखाई दे रहा है। सम्पूर्ण अभिनयों से मिलकर इनके रहने से और सर्वत्र अभिनयों में रहने से सामान्याभिनय यह है। इसी के लिए विस्तार के साथ इसके स्वरूप का कथन किया है। जो पहले कहा

ऐतषां तु भवेन्मार्गो यथाभावरसान्वितः ।
काव्यवस्तुषु निर्दिष्टो द्वादशाभिनयात्मकः ॥५१॥

अभिनवभारती

अस्य शाखा च नृत्तं च तथैवाङ्कुर एव च ।
त्रिविधं वस्त्वभिनयः ....।

इति तेन सहास्य यथा न विरोधस्तथैवोपपादितमुपाङ्गाभिनय इति तत एवावधार्यम् । किं पुनरुक्ताभिधानेन ॥५०॥

एवमाङ्गिकं सामान्याभिनयमुपपाद्य वाचकमुपपादयति एतेषां तु भवेन्मार्ग इति विषय इत्यर्थः । वाक्यभावे यद्यप्या शरीरो निर्विषय एव तेन यदेके शाखाङ्कुर-नाटचायितानां च वाक्यविरहितत्वं मन्यमाना एतेषामिति सर्वेषामित्यादि वाक्य-सूचानिवृत्त्यङ्कुरमात्रविषयत्वेनैव संकोचयन्ति ते न तत्त्वज्ञाः सर्वोऽप्यभिनयो वाक्योपजीवनमन्तरेण नियमहेत्वभावादसमञ्जसतामभ्येति । केवलं तत्कालिका-तत्कालिकादिमात्रेण वाक्यं भिद्यतां नाम । एतच्चोपाङ्गाभिनये वितस्योपपादितम् ।

काव्यवस्तुष्विति दशरूपकभेदेषु द्वादशरूपोऽभिनयात्मको वाचिकाभिनयस्य भाव इत्यर्थः ॥५१॥

बालक्रीड़ा

(मूल) इनका जो योग्यता के अनुसार रस एवं भावों से समन्वित मार्ग हो उसे काव्य में बारह प्रकार के अभिनय द्वारा कहा है ॥५१॥

था कि जिसकी शाखा नृत्य इत्यादि । इसके इसका किसी प्रकार विरोध नही होय अतः उसी प्रकार से उपाङ्ग अभिनय के प्रसङ्ग में उपपादन किया है वही से समझना चाहिए दुबारा कहने से क्या लाभ है ॥५०॥

इस प्रकार आङ्गिक सामान्याभिनय का उपपादन करके वाचिक सामान्याभिनय का उपपादन करते हैं कि इनका तो मार्ग माने विषय हो । यद्यपि वाक्यभाव में अर्थात् वाचिक अभिनय में शारीर अभिनय का विषय नही ही होता है तब भी जो कोई शाखाअङ्कुर एवं नाट्यायित को मानते हुए इन सब का इत्यादि का वाक्य सूचा और निवृत्यङ्कुर मात्र विषय के रूप से संकोच करते हैं । वे तत्वज्ञ नही हैं । क्योंकि सभी अभिनय वाक्योपजीवन के विना नियामक हेतु के अभाव में असमञ्ज में पड़ जाता है । भले ही तात्कालिक यह वाक्य है और वह वाक्य असामयिक है, इस तरह भेद हो जाय । इस सबका उपपादन हमने वाक्याभिनय में कर दिया है वही पर देखें ।

काव्य वस्तुओं में माने विभिन्न दशरूपकों में वाचिकाभिनय का बारह प्रकार का अभिनयात्मक भाव है ॥५१॥

आलापश्च प्रलापश्च विलापः स्यात्तथैव च ।
अनुलापोऽथ संलाप स्त्वपलापस्तथैव च ॥५२॥
सन्देशश्चातिदेशश्च निर्देशः स्यात्तथापरः ।
उपदेशोऽपदेशश्च व्यपदेशश्च कीर्तितः ॥५३॥
आभाषणं तु यद्वाक्यमालापो नाम स स्मृतः ।
अनर्थकं वचो यत्तु प्रलापः स तु कीर्तितः ॥५४॥

अभिनवभारती

द्वादशप्रकारानुद्दिशति आलापश्चेत्यादिना ॥५२।५३॥

तानेव क्रमेण लक्षयति आभाषणं त्वित्यादिना। युष्मदर्थविषयमुपदेशादि-शून्यं यद्वचनं तदालाप इत्यर्थः। यथा विभ्राजसे मकरकेतनमर्चयन्ती' (रत्ना-१) यथा वा 'जयतु भवान्' इत्यादि। अनर्थकं वचो यत्तु स प्रलाप इति परस्परमसम्वद्धं मौर्ख्यादिवशादित्यर्थः। यथा दरिद्रचारुदत्ते शकारः— शुणामि मल्लगन्धं अन्ध-आलशच्चिदादो उण णासिआदो हिदुत्तं एलामि शृणोमि माल्यगन्धम् अन्धकार-संचितया पुनर्नासिकया तदुक्तं आलोकयामि (मृच्छ-१) ॥५४॥

बालक्रीड़ा

(मूल) आलाप १, प्रलाप २, विलाप ३, अनुलाप ४, संलाप ५, अपलाप ६, सन्देश ७, अतिदेश ८, निर्देश ९, उपदेश १०, अपदेश ११, एवं व्यपदेश १२, ये बारह हैं ॥५२।५३॥

(मूल) जो वाक्य आभाषण स्वरूप है वह आलाप है और जो अनर्थक वाक्य है वह प्रलाप है ॥५४॥

आनापश्च इत्यादि से उन्ही बारह प्रकारों को क्रमशः कहते हैं ॥५२।५३॥

अब आभाषण इत्यादि से उन्ही आलापादिकों का क्रमशः लक्षण कहते हैं। उपदेश रहित जो सम्बोधनात्मक वचन है वह आलाप है। 'युष्मदर्थ विषयः' का अर्थ है सम्बोधनात्मक। क्योंकि संम्बोधन सारो हि युष्मदर्थः ऐसा आचार्यो का निर्देश है। जैसे मकरकेतन की पूजा करती हुई चमक रही हो। और जैसे—जयतु भवान् इति जो तो अनर्थक वचन है वह प्रलाप है। अर्थात् मूर्खता से परस्पर में असम्बद्ध बोलना है। जैसे—दरिद्रचारुदत्त में शकार का प्रलाप है। माला की गन्ध को सुनता हूँ। और अन्धकार से संचित नासिका से उसके वाक्य को देखता हूँ ॥५४॥

करुणप्रभावो यस्तु विलापः स तु कीर्तितः ।
बहुशोऽभिहितं वाक्यमनुलाप इति स्मृतः ।।५५।।
उक्तिप्रत्युक्तिसंयुक्तः संलाप इति कीर्तितः ।

अभिनवभारती

करुणप्रभवो यस्तु स विलाप इति । करुणग्रहणं दुःखोपलक्षणम् तेन विप्रलम्भोऽपि गृह्यते । तत्र करुणरससंबन्धं वचनं (दुःखे) यथा —क्वासि प्रयच्छ मे प्रतिवचनम् विप्रलम्भे यथा—बाणाः पञ्चमनोभवस्य (रत्ना-३) इत्यादि । एतत्प्रधानादेव कामावस्थाविशेषो विलापः (तासुषष्ठचवस्था) इति वक्ष्यते । बहुशोऽभिहितं वाक्यमनुलाप इति । अनुवादार्थं तदेव पुनरुच्यमानमित्यर्थः । यथा— द्वीपादन्यस्मादपि' (रत्ना १) इति सूत्र धारेणोक्ते नेंपथ्ये यौगन्धरायणः—एवमेतत् दीपादन्यस्मादपीत्यनुवदति ।।५५।।

उक्तिप्रत्युक्तिसंयुक्तः संलाप इति । यद्विधान्युदाहरणानि (?) पूर्वोक्तस्यान्यथा वादोऽप्यपलाप इति । यथा कृत्यारावणे गीतमीरूपच्छन्ना रामाक्रन्दितं लक्ष्मणे श्रावयितुकामा शूर्पणखा पूर्वमाह—'अवि सुदं ते ' अपि श्रुतं त्वया । ततः सीता

बालक्रीड़ा

(मूल) जो वाक्य करुण प्रभव है वह विलाप है । और जो वाक्य वार २ कहा गया हो वह अनुलाप है ।।५५।।

करुणा से दीनता से जो वचन निकलता है वह विलाप है । करुण पद के उपन्यास का मतलब है दुःख । इससे विप्रलम्भ को भी लेना चाहिए । उनमें दुःख में करुण सम्बन्धी वचन जैसे—कहां हो मुझे उत्तर दो । विप्रलम्भ में जैसे—मनोभव के बाण इत्यादि । इस के प्रधान होने से ही विलाप काम की अवस्था विशेष है । उनमें षष्टी अवस्था को कहेंगे । बहुश अभिहित वाक्य अनुलाप है अर्थात् अनुवाद करने के लिए उसी को बार - बार कहना । जैसे—द्वीपादन्यस्मादपि । ऐसा सूत्रधार के कहने पर नेपथ्य में—यौगन्धरायण ! यह ऐसा ही है । द्वीपात इसका अनुवाद करता है ।।५५।।

संलाप । इसके उदाहरण बहुत हैं । अपलाप जैसे—कृत्यारावण में गौतमी के रूप में छिपी हुई शूर्पणखा लक्ष्मण को राम का आक्रन्दन सुनाने की इच्छा से पहले कहती है कि सुना तुमने ! तब सीता घबरा कर-अरे क्या है ! उसके बाद वह शूर्पणखा आं वञ्चित

पूर्वोक्तस्यान्यथावादो ह्यपलाप इति स्मृतः ॥५६॥

तदिदं वचनं ब्रूहीत्येष सन्देश उच्यते ।

यत्त्वयोक्तं मयोक्तं तत्सोऽतिदेश इति स्मृतः ॥५७॥

अभिनवभारती

(ससंभ्रमम्) अये किंति' (अये किमिति) । ततः सा— अं वञ्चिते सत्यं गौतमीमेव मामियं सीता जानात्वित्येवं ह्याह णं मए णक्क हण्णिदं अवि सुदं ते' इति ॥५६॥

तदिदं वचनं ब्रूहीत्येष सन्देश इति । उदाहरणेन लक्षणमुन्नेयम् । ततः परमुखेनान्यस्मै स्ववचोऽर्पणं सन्देश इति । अतिदेशस्त्वयोक्तं युक्तं मयोक्तमिति सिद्धेनासिद्धस्य तुल्यतापादनमतिदेश इत्यर्थः । अत्रोपदेशातिदेशयोरूपमानस्य च साहित्यविषये तार्किकमीमांसकविषये विशेषप्रतिपादनं यत् टीकाकारैः कृतं यत्सु-कुमारमनोमोहनं वृथा भ्रमणिकामात्रं प्रकृतानुपयोगादिहोपेक्ष्यमेव ॥५७॥

बालक्रीड़ा

(मूल) जो उक्ति एवं प्रत्युक्ति से संयुक्त हैं वह संलाप हैं । पहले जो वाक्य कहा उसका उलटा बोलना अन्यथा कथन अपलाप है ॥५६॥

(मूल) जाओ और ऐसा कहो वह सन्देश है । और जो तुमने कहा उसे मैंने कहा या जैसा तुमने कहा वैसा मैंने कहा वह अतिदेश है ॥५७॥

हो गई । सीता सचमुच ही मुझे गौतमी समझती है । फिर कहती है—मैंने जो कहा उसे तुमने सुना ॥५६॥

सन्देशः । उदाहरण के द्वारा सन्देश के लक्षण का उन्नमन करना चाहिए । अतः परमुख से दूसरे को अपना वचन का अर्पण करना सन्देश है । जो तुमने कहा नही मेंने कहा युक्त है । इस तरह सिद्धपदार्थ के साथ असिद्ध पदार्थ की तुल्यता का आपादन करना अतिदेश है । यह इसका अर्थ है । यहां टीकाकारों ने जो अतिदेश उपदेश एवं उपमान को साहित्यिकों की अपेक्षा से तार्किक एवं मीमांसकों के मत में विशेषता का प्रतिपादन किया है वह सुकुमारमति बालकों को मोहने के लिए वृथा भ्रम को पैदा करना है अतः प्रकृत के अनुपयोगी होने से उपेक्षणीय है ॥५७॥

स' एषोऽहं ब्रवीमीति निर्देश इति कीर्तितः ।
व्याजान्तरेण कथनं व्यपदेश इहोच्यते ॥५८॥
इदं कुरु गृहाणेति ह्यु पदेशः प्रकीर्तितः ।
अन्यार्थकथनं यत् स्यात् सोऽपदेशः प्रकीर्तितः ॥५९॥

अभिनवभारती

स एवैषोऽहं ब्रवीमीति निर्देश इति लक्षणम् । व्याजान्तरेण कथनं व्यपदेश इति व्याजविशेषेणेत्यर्थः । यथा मुद्राराक्षसे क्षपणकस्य राक्षसदूषणार्थं तावन्नगरान्निर्वासनं तत्र च चाणक्येन व्याजेन वचनं कृतम्—'अयं पापीयान् जीवसिद्धिः राक्षसप्रयुक्तविषकन्यया पर्वतेश्वरं घातितवान् ततो निर्वास्यते' इति ॥५८॥

इदं कुरु गृहाणेति ह्यु पदेश इति नियोग इत्यर्थः । अन्यार्थकथनमपदेश इति स्वयं विवक्षितस्यान्य एव वक्तीत्यन्यकथनमित्यर्थः । यथा भीमं प्रति सहदेवः—एवं गुरुणा सन्दिष्टं सुयोधनस्येति (वेणी-१) ॥५९॥

बालक्रीड़ा

(मूल) वह यह मैं बोल रहा हूं इसको निर्देश कहते हैं। किसी बहाने से जो कथन है वह व्यपदेश है ॥५८॥

(मूल) यह करो ऐसा करो, इसे ग्रहण करो इसको लो यह उपदेश कहाता है। जो अन्यार्थ कथन है वह अपदेश है ॥५९॥

निर्देश है यह लक्षण है। व्याजान्तर से अर्थात् व्याज विशेष से। जैसे मुद्राराक्षस में राक्षस को दूषित करने के लिए क्षपणक का नगर से निर्वासन किया उस विषय में चाणक्य ने छल करके कहा कि—यह जीवसिद्धि क्षपणक अतिशय पापी है इसने विषकन्या के द्वारा पर्वतेश्वर को मरवा डाला इस लिए इसको नगर से निर्वासित करते हैं ॥५८॥

उपदेश का अर्थ है नियोग। अपदेश माने स्वयं जिसको कहना चाहता है उसके विषय में अन्य कहता है ऐसे अन्य को कहना। जैसे भीम के प्रति सहदेव कहते हैं कि गुरुजी ने इस प्रकार सुयोधन को सन्देश दिया है ॥५९॥

एते मार्गास्तु विज्ञेयाः सर्वाभिनययोजकाः ।
सप्त प्रकारमेतेषां पुनर्वक्ष्यामि लक्षणम् ॥६०॥
प्रत्यक्षश्च परोक्षश्च तथा कालकृतास्त्रयः ।
आत्मस्थश्च परस्थश्च प्रकाराः सप्त एव तु ॥६१॥
एष ब्रवीमि नाहं भो वदामीति च यद्वचः ।
प्रत्यक्षश्च परोक्षश्च वर्तमानश्च तद्भवेत् ॥६२॥
अहं करोमि गच्छामि वदामि वचनं तव ।
आत्मस्थो वर्तमानश्च प्रत्यक्षश्चैव स स्मृतः ॥६३॥

अभिनवभारती

उपसंहरति एते मार्गास्त्विति सर्वेषु षट्स्वपि शारीरेष्वित्यर्थः । तथा अभिनीयन्त इत्यभिनया नाटकादिकाव्यविशेषाः तेषु, यतः सामान्येन भवन्त्यत एवैते सामान्याभिनया इति तात्पर्यम् ॥६०॥

अथात्रैव भेदान्तराण्याह आत्मस्थश्च परस्थश्चेत्यादि । अत्रोदाहरणदिशमाह एष ब्रवीमि इति, अहं करोमीत्यादि ॥६२।६६॥

बालक्रीड़ा

(मूल) सभी प्रकार के अभिनयों के प्रयोजक को उन मार्गों को जानना चाहिए । अब मैं इनके सात प्रकार के लक्षणों को कहूंगा ॥६०॥

(मूल) प्रत्यक्ष, परोक्ष तथा तीन कालकृत और आत्मस्थ एवं परस्थ ये सात प्रकार हैं ॥६१॥

(मूल) यह मैं बोलता हूं । भोः मैं नही बोलता हूं इत्यादि जो वर्त्तमान कालिक वचन है वह प्रत्यक्ष है और जो वैसा नही है वह परोक्ष है ॥६२॥

(मूल) मैं करता हूं, मैं जाता हूं मैं तुमको कहता हूं ऐसा जो आत्मस्थ माने अपने में जो वर्तमान कालिक वचन है वह प्रत्यक्ष है ॥६३॥

उपसंहार करता है ये मार्ग है । सभी में यानी छहों शारीर अभिनयों में । अभिनीत किये जाते हैं वे नाटकादि काव्यविशेष अभिनय हैं उनमें । क्योंकि ये सामान्यरूप से होते हैं अत एव ये सामान्याभिनय हैं । यह तात्पर्य यहां है ॥६०॥

इसी के भेदान्तरों को कहते हैं आत्मस्थ और परस्थ इत्यादि । अब इनके उदाहरणों को उद्देश क्रम से कहते हैं । एष ब्रवीमि अहं करोमि । इत्यादि ॥६१।६६॥

करिष्यामि गमिष्यामि वदिष्यामीति यद्वचः ।
आत्मस्थश्च परोक्षश्च भविष्यत्काल एव च ॥६४॥
हता जिताश्च भग्नाश्च मया सर्वे द्विषद्गणा ।
आत्मस्थश्च परोक्षश्च वृत्तकालस्य स स्मृतः ॥६५॥
त्वया हता जिताश्चेति यो वदेन्नाट्यकर्मणि ।
परोक्षश्च परस्थश्च वृत्तकालस्तथैव च ॥६६॥
एष ब्रवीति कुरुते गच्छतीत्यादि यद्वचः ।
परस्थो वर्तमानश्च प्रत्यक्षश्च भवेत्तथा ॥६७॥
स गच्छति करोतीति वचनं यदुताहृतम् ।
परस्थं वर्तमानं च परोक्षं चैव तद्भवेत् ॥६८॥
करिष्यन्ति गमिष्यन्ति वदिष्यन्तीति यद्वचः ।
परस्थमेष्यत्कालं च परोक्षं चैव तद्भवेत् ॥६९॥
हस्तमन्तरतः कृत्वा यद्वदेन्नाट्यकर्मणि ।

अभिनवभारती

इदानीं विषयभेदकृतमात्मस्थस्यापि पारोक्ष्यं दर्शयति हस्तमन्तरतः कृत्वेत्यादि

बालक्रीड़ा

(मूल) मैं करूंगा, जाऊंगा कहूंगा यह जो आत्मस्थ माने अपने में भविष्यत्कालीन वचन है वह परोक्ष है ॥६४॥

(मूल) मैंने सब शत्रुओं का हनन एवं भञ्जन कर दिया अतः उनको जीत लिया ऐसा जो अपने में भूतकालीन वृत्तकालिक वचन है वह परोक्ष है ॥६५॥

(मूल) जो नाट्य कर्म अर्थात् प्रयोग के समय में तुमने मार दिया, तुमने जीत लिया ऐसा जो दूसरे में भूतकालीन वचन है वह परोक्ष है ॥६६॥

(मूल) यह बोलता है, करता है और जाता है इत्यादि जो परस्थ वर्तमान कालिक वचन है वह प्रत्यक्ष है ॥६७॥

(मूल) वह जाता है या करता है ऐसा जो किसी ने कहा वह परस्थ वर्तमान कालिक वचन परोक्ष है । ॥६८॥

(मूल) करेंगे, जायेंगे कहेंगे यह जो वचन है ऐसा जो दूसरे में माने परस्थ भविष्यत् कालिक वचन है वह परोक्ष है ॥६९॥

इस समय विषय भेद के कारण होने वाले आत्मस्थ को भी परोक्ष कहते हैं ।

आत्मस्थं हृदयस्थं च परोक्षं चैव तन्मतम् ॥७०॥
परेषामात्मनश्चैव कालस्य च विशेषणात् ।
सप्तप्रकारस्यास्यैव भेदा ज्ञेया अनेकधा ॥७१॥
एते प्रयोगा विज्ञेया मार्गाभिनययोजिताः ।

अभिनवभारती

स्वगतजनान्तिकापवारितकेषु वक्तुरात्मस्थं पात्रान्तराणां चाप्रत्यक्षं नाटचधर्मीवशादित्यात्मस्थमपि तत्परोक्षम् । लोकधर्म्याप्यात्मस्थं परोक्षम् । यथा—'सुप्तो मत्तो न्वहं किल विललाप' इति । यदाहोत्तमविषयेऽपि चित्तव्याक्षेपादिभ्यो 'लिट् भवतीति' ॥७०॥

अन्यभेदानां कार्येण सम्भवमाह—

परेषामात्मनश्चैव कालस्य च विशेषणात् ।
सप्तप्रकारस्यास्यैव भेदा ज्ञेया अनेकधा ॥
एते प्रयोगा विज्ञेया मार्गाभिनययोजिताः ।
एतेष्विह विनिष्पन्नो विविधोऽभिनयो भवेत् ॥

इह तावद्वाक्यं द्वादशधाभिन्नं तत्राप्यात्मस्थपरस्थयोः प्रत्यक्षत्वपरोक्षत्वाभ्यां चतुर्विधत्वं चतुर्णां कालत्रयेण गुणने द्वादशभेदाः । भूतभविष्यतोरपि प्रत्यक्षत्वं

बालक्रीड़ा

(मूल) अभिनय के समय में जो अभिनेता पात्र अपने और दूसरे पात्र के बीच में हाथ का व्यवधान (ओट करके) बोलता है तो वह वचन अपने में हृदयगत वाक्य परोक्ष कहलाता है ॥७०॥

(मूल) दूसरे के और स्वयं के, समय के कारण सात प्रकार वाले, इसके अनेक प्रकार के भेद होते हैं ॥७१॥

स्वगत जनान्तिक एवं अपवारितक में जो वस्तु है वह वक्ता के लिए आत्मस्थ है और पात्रान्तर के लिए परोक्ष है। इस तरह नाटच धर्मी के वश से आत्मस्थ भी परोक्ष होता है लोकधर्मी आत्मस्थ भी परोक्ष ही है। जैसे मैं सोता हुआ एवं पागल हुआ विलाप करता था । इत्यादि । जैसा कि कहा है कि चित्त के विक्षिप्त होने पर उत्तम पुरुष में भी लिट् लकार होता है ॥७०॥

यहां वाक्य के बारह भेद कहते हैं। उसमें भी आत्मस्थ और परस्थ का प्रत्यक्षत्व एवं परोक्षत्व भेद से चार प्रकार है। उन चारों का भी तीन कालों से गुणा करने पर १२ भेद होते हैं। भूत और भविष्य का भी योगी की प्रत्यक्ष दृष्टि से

एतेष्विह विनिष्पन्नो विविधोऽभिनयो भवेत् ॥७२॥
शिरो · हस्तकटीवक्षोजङ्घोरुकरणेषु तु ।
समः कर्मविभागो यः सामान्याभिनयस्तु सः ॥७३॥
ललितैर्हस्तसंचारै स्तथा मृद्वङ्गचेष्टितैः ।
अभिनेयस्तु नाटचज्ञै रसभावसमन्वितैः ॥७४॥

अभिनवभारती

योगिप्रत्यक्षादिदृशा भवति । एवं द्वादशानां तावद्भिर्गुणने २४ भेदाः संस्कृतेतरभेदेन चतुर्विधत्वं यदुक्तं तेन गुणने वाक्याभिनयस्य ९६ भेदाः । सूचाया वाक्यतदर्थभेदाद् द्वैगुण्यम् । तेन एकोनविंशतिशतानि चतुरधिकानि १९२ सूचाभेदाः । वाक्यतुल्या एवाङ्कुरभेदाः । सूचाभेदैर्गुणनीयास्ते, पुनः शाखाभेदास्तैरपि द्विविधनाटचायित-भेदास्तावद्भिर्निवृत्त्यङ्कुरभेदा इति कोटिशतान्यनेकानि भवन्ति । न तु यथा श्रीशङ्कुकेनोक्तं चत्वारिंशत्सहस्राणीत्यादि ॥७ ।७२।

एवं विशिष्टः यः सामान्येनाभिनीयमानः संभूयाभिनयैर्युक्तः सर्वाभिनयेषु सामान्यभूत इत्येवं स सामान्याभिनयः ॥७३।७४॥

बालक्रीड़ा

(मूल) मार्गाभिनय की योजना से किये गये इन प्रयोगों को जानना चाहिए इन्ही में ही विविध अभिनय निष्पन्न होता है ॥७२॥

(मूल) वह सामान्य अभिनय होता है जो क्रमशः शिर, हस्त, कटी, वक्ष जङ्घा ऊरु और कर्णो आदि में समान रूप से विभक्त होता है ॥७३॥

(मूल) रस एवं भाव में विभोर नाट्य के जानकार अभिनेता लोगों को मृद्वंग चेष्टा अर्थात् कोमल अंगो से की गई चेष्टाओं और सुन्दर तरीके से किये गये हस्त संचार से अभिनय करना चाहिए ॥७४॥

प्रत्यक्षत्व ही है। इस प्रकार बारह से दो का गुणा करने से २४ भेद होते हैं। इसके बाद संस्कृत एवं संस्कृतेर प्राकृत तथा उनके गद्यात्मक और पद्यात्मक भेद से जो चार प्रकार बतलाये थे उनसे २४ का गुणा करने पर वाक्याभिनय के ९६ भेद होते हैं। उसके बाद सूचा के वाक्य एवं वाक्यार्थ रूप से दो भेद होते हैं उनसे गुणा करने पर सूचा के १९२ भेद होते हैं। वाक्य भेद के समान अङ्कुर के भेद होते हैं। उनको सूचा के भेदों से गुणित करो फिर शाखा भेदों को उनसे गुणित करो। फिर द्विविध नाट्यायित भेदों को उतने ही प्रकार के अंकुर भेदों से गुणा करो तब अनेक भेद हो जायेंगे। किन्तु जैसा कि श्रीशंकुक ने ४० हजार भेद कहे हैं वे ठीक नही हैं ॥७१।७२॥

ऐसा विलक्षण जो सामान्य तौर से अभिनीयमान है वह अन्य अभिनयों से मिलकर सभी अभिनयों से जुड गया है इस तरह सामान्य हुआ सामान्याभिनय है ॥७३।७४।

अनुद्धतमसंभ्रान्तमनाविद्धाङ्गचेष्टितम् ।
लयतालकलापात प्रमाणनियतात्मकम् ॥७५॥
सुविभक्तपदालापमनिष्ठुरमकाहलम् ।
यदीदृशं भवेन्नाट्यं ज्ञेयमाभ्यन्तरं तु तत् ॥७६॥
एतदेव विपर्यस्तं स्वच्छन्दगतिचेष्टितम् ।
अनिबद्धगीतवाद्यं नाट्यं बाह्यमिति स्मृतम् ॥७७॥

अभिनवभारती

अस्या एकीभावनिबन्धनभूताया अलातचक्रसंनिभत्वसम्पादिकाया सामान्याभिनयक्रियायाः प्राधान्यप्रदर्शनार्थमाह अनुद्धतमसंभ्रान्तमित्यादि ॥७५।७६॥

अनाविद्धशब्देनाङ्गिकविषयं सामान्यं दर्शयति। एतदभावं दुष्टत्वमिति दर्शयन् व्यतिरेकक्रमेणापि सामान्याभिनयस्यावश्योपादेयतामाह एतदेव विपर्यस्तमित्यादिना ॥७७॥

बालक्रीड़ा

(मूल) अनुद्धत माने औद्धत्य स्वतन्त्रता से रहित हो संभ्रम घबराहट जहां नही हो अंगों की चेष्टायें आविद्ध विश्रृंखलित नही हो लय ताल कला एवं पात माने संगीत की ध्वनियों के प्रमाण अपने रूप में नियत हो पदों का गाये जाने लायक पदों का और ध्रुवाओं का आलाप विभक्त हो मिश्रित नही हो निष्ठुरता से रहित हो और जहां काहल माने कोलाहल नही हो यानी जन सम्मर्द के कारण गड़बड़ी जहां नही हो ऐसा नाट्य यदि होता वहनाट्य आन्तरिक नाट्य है ॥७५।७६॥

(मूल) यही पूर्वोक्त विशेषणों से युक्त नाट्य विपर्यस्त हो यानी उपर्युक्त विशेषणों से शून्य हो स्वतन्त्र आचरण पात्रों के होते हो पात्रों की चाल ढाल चेष्टाये स्वच्छन्द हो नियन्त्रित नही हो गीत वाद्य लयताल आदि अपने नियम में बंधे हुए नही हो ऐसा नाट्य बाह्य माना है ॥७७॥

एकीभाव का निबन्धन माने कारण बनने वाली तथा अलातचक्र प्रतिमता की सम्पादिका सामान्य अभिनय क्रिया की प्रधानता दिखलाने के लिए कहते हैं कि अनुद्धत। सुविभक्त ॥७५।७६॥

अनाविद्ध शब्द से आङ्गिक सामान्याभिनय को दिखाते हैं। इसके अभाव में दोष है इसको दिखाते हुए व्यतिरेक के क्रम से भी सामान्याभिनय की उपादेयता को कहते हैं एतदेव ॥७७॥

लक्षणाभ्यन्तरत्वाद्धि तदाभ्यन्तरमिष्यते ।
शास्त्रबाह्यं भवेद्यत्तु तद्बाह्यमिति भण्यते ॥७८॥
अनेन लक्ष्यते यस्मात् प्रयोगः कर्म चैव हि ।
तस्माल्लक्षणमेतद्धि नाट्येऽस्मिन् संप्रयोजितम् ॥७९॥

अभिनवभारती

आभ्यन्तरमिति स्वयमेव विवृणोति लक्षणाभ्यन्तरत्वादिति ॥७८॥

ननु वागङ्गाभिनयोपेत इति लक्षणं तस्य बाह्योऽप्यस्तीत्याशङ्क्याह अनेन लक्ष्यते यस्मादिति सामान्याभिनयरूपमेव लक्षणमिति तात्पर्यम् । संप्रयोजितमिति नाट्यविषयाः प्रत्येकं तावत् क्रिया एकीभावं नेयाः, एकीभावगतश्च क्रियासमूहोऽप्येकीभावं नेय इत्येतत् । कर्मप्रयोगशब्दाभ्यां नाट्य इति सप्तम्या कथयति—अनेन विना स्फुटं नाट्यरूपत्वमेव साक्षात्काराध्यवसायरूपं रसानुप्राणितं तन्न संपद्यत इति ॥७९॥

बालक्रीड़ा

(मूल) नाट्यचार्यों के द्वारा बतलाये लक्षणों से युक्त एवं आभ्यन्तर लक्षणों से सम्पन्न होने से वह नाट्य आभ्यन्तर माना जाता है और आचार्यों के शासन से बाह्य नाट्य बाह्य कहलाता है ॥७८॥

(मूल) क्योंकि पहले बतलाये हुए इन लक्षणों से प्रयोग अभिनय एवं कर्म पात्रों की चेष्टायें क्रियायें लक्षित होती हैं इसी लिए इस नाट्य में इन लक्षणों वाले अभिनय का सम्यक् प्रयोग होता है या किया जाता है ॥७९॥

लक्षणाभ्यन्तरत्व इत्यादि से आभ्यान्तर का स्वयं विवरण करते हैं । ॥७८॥

प्रश्न — आपने आभ्यन्तर लक्षण कहा ठीक है किन्तु वागङ्गाभिनयोपेत इत्यादि वाह्य भी तो उसका लक्षण है ऐसी आशंका करके कहते हैं अनेन । सामान्याभिनय रूप ही लक्षण है ऐसा तात्पर्य है । संप्रयोजितम् का अर्थ है कि नाट्य सम्बन्धी जितनी भी क्रियायें हैं उन सबका एकीभाव करना चाहिए एकीभाव में किये गये क्रिया समूह का भी एकीभाव करना चाहिए । कर्म एवं प्रयोग शब्दों से और 'नाट्ये' इस सप्तमी विभक्ति से कहते हैं कि इस एकीभाव के विना रस से अनुप्राणितता साक्षात्कार अध्यवसायात्मक नाट्य स्वरूप स्फुट माने संपन्न नही होता है ॥७९॥

अनाचार्योषिता ये च ये च शास्त्रबहिष्कृताः ।
बाह्यं प्रयुञ्जते ते तु अज्ञात्वाचार्यकीं क्रियाम् ।।८०।।
शब्दं स्पर्शं च रूपं च रसं गन्धं तथैव च ।
इन्द्रियाणीन्द्रियार्थांश्च भावैरभिनयेद् बुधः ।।८१।।
कृत्वा साचीकृतां दृष्टिं शिरः पार्श्वनतं तथा ।

अभिनवभारती

व्युत्पत्तिदूरीभावं त्वनत्रीयानां, भट्टपुत्रादौ तदभावात्तदाह अनाचार्योषिता ये चेत्यादिना ।।८०।।

अथ संभूयाभिनयरूपत्वमेव सामान्याभिनयमाह शब्दं स्पर्शं चेत्यादि । इन्द्रियस्येन्द्रियार्थस्पर्शादिविशेषेणस्यात् सम्भूयमानत्वम् । स्वविषयग्राहकतावेशः स्वकरणग्राह्यतावेशश्च सर्वेषामिन्द्रियाणाँ विषयाणां च प्रदर्श्यते, अत एवैष सामान्याभिनयनेयेऽर्थद्वयेऽभिनयस्य साधारण्यम् । भावैरिति क्रियाविशेषैरित्यर्थः ।।८१।।

तानाह कृत्वा साचीकृतां दृष्टिमित्यादि । अनेनादरवशात्समस्तो भरः श्रोत्रदेशमनुयाति, यथोक्तं—

बालक्रीड़ा

(मूल) जिन्हों ने आचार्य के यहां उसकी सेवा में निवास नही किया जो शासन से बहिष्कृत हैं वे आचार्यो की क्रिया विना जाने प्रयोग करते है अतः वह बाह्य प्रयोग है ।।८०।।

(मूल) रूप रस गन्ध स्पर्श एवं शब्द इन इन्द्रियों के अर्थ विषयों एवं इन्द्रियों के अभिनय को बुध भाव के साथ करें ।।८१।।

जो तो अध्ययन नही करते हैं उनको स्फुट होना क्या उनसे तो व्युत्पत्ति ही दूर हो जाती है । उसका अभाव भट्टपुत्र वगैरह में है । इसको कहते हैं कि जिन्होंने आचार्य की सेवा में निबास नही किया है ।।८०।।

अथ सामान्याभिनय संभूयाभिनय रूप ही है इसको कहते हैं शब्द । इन्द्रियों का इन्द्रियों के विषय शब्दस्पर्शादि विशेष अर्थो के साथ सम्भूयमात्व हो सकता है । क्योंकि इन्द्रियों में ग्राहकता और विषयों में ग्राह्यता दिखाई पड़ती है । इन्द्रियों की अपने विषय में ग्राहकता है और विषयों की अपने करणों इन्द्रियों के लिए ग्राह्यता है । इसी लिए सामान्य एवं अभिनेय इन दो अर्थो में अभिनय की साधारणता है । भाव के माने क्रिया विशेष है ।।८१।।

उन भावों को कहते हैं—दृष्टि का साचीकरण कर के ।

तर्जनीं कर्णदेशे च बुधः शब्दं विनिर्दिशेत् ॥८२॥
किंचिदाकुञ्चिते नेत्रे कृत्वा भ्रूक्षेपमेव च ।
तथाऽसगण्डयोः स्पर्शात् स्पर्शमेवं विनिर्दिशेत् ॥८३॥
कृत्वा पताकौ मूर्धस्थौ किंचित्प्रचलिताननः ।
निर्वर्णयन्त्या दृष्टया च रूपं त्वभिनयेद् बुधः ॥८४॥
किंचिदाकुञ्चिते नेत्रे कृत्वोत्फुल्लां च नासिकाम् ।
एकोच्छ्वासेन चेष्टौ तु रसगन्धौ विनिर्दिशेत् ॥८५॥

अभिनवभारती

तथाहि शेषेन्द्रियवृत्तिरासां ।
सर्वात्मना चक्षुरिव प्रविष्ठा ॥ (रघु ७-१२) इति

चकाराच्छ्रोत्रमपि शब्दग्रहणाविष्टमनेनाभिनीतं भवतीत्याह । एव मुत्तरत्र ॥८२।८५॥

बालक्रीड़ा

(मूल) अभिनय की मर्यादा के जानकार लोग दृष्टि को तिरछी करके शिर को वायें या दायें तरफ झुका कर और कर्ण पर तर्जनी को रखकर शब्दों का निर्देश करें ॥८२॥

(मूल) स्पर्श का अभिनय करते समय नेत्रों को किञ्चित् आकुञ्चित भ्रुकुटियों का विक्षेपण और कपोलों का स्पर्श करना चाहिए ॥८३॥

(मूल) पताका मस्तक पर रखकर मुख का किञ्चित् संचालन करते हुए किसी वस्तु को बड़े गौर से निहार रही है ऐसी दृष्टि से रूप का अभिनय करे ॥८४॥

(मूल) नेत्रों को किञ्चित् आकुञ्चित करके एवं नासिका को फुला कर एक ही सांस में माने एक ही क्रिया में अपने अभीष्ट रस एवं गन्ध का अभिनय करना चाहिए ॥८५॥

इस साचीकरण के जरिये अनादर से समस्त भार कर्णदेश पर आ गया है । जैसा कि कालिदास ने रघुवंश में कहा है—ऐसा मालूम पड़ता है अज को देखने के समय में इन नायिकाओं की सभी इन्द्रियों की वृत्ति चक्षु में ही घुस गई है । यहां 'कर्णदेशे च' में जो च शब्द है उससे यह अभिनीत होता है कि कर्ण का भी शब्द के ग्रहण करने में आवेश है । इसी प्रकार आगे भी समझें ॥८२।८५॥

पञ्चानामिन्द्रियार्थानां भावा ह्येतेऽनुभाविनः ।
श्रोत्रत्वङ्नेत्रजिह्वानां घ्राणस्य च तथैव हि ॥८६॥
इन्द्रियार्थाः समनसो भवन्ति ह्यनुभाविनः ।
न वेत्ति ह्यमनाः किंचिद्विषयं पञ्चधागतम् ॥८७॥
मनसस्त्रिविधो भावो विज्ञेयोऽभिनये बुधैः ।

अभिनवभारती

एतदुपसंहरति पञ्चानामिन्द्रियार्थानामित्यादि ॥८६॥

इन्द्रियार्थाः समनस इति यथाशब्दादिग्रहणक्रियाभिः शब्दः श्रोत्रे प्रतीयते, तन्मनोऽपि तदधिष्ठातृक्रमेणाधिष्ठानं कुर्वदित्यतोऽपि सामान्याभिनयः । तदुक्तम्—युगपद्ज्ञानद्वयानुत्पत्तिर्मनसो लिङ्गमिति ॥८७॥

मनसस्त्रिविधो भाव इति वैशेषिकादिदृशि मनस्संयोगजो य आत्मन इच्छा द्वेषमाध्यस्थ्यलक्षणो भावः स मनस इत्युक्तः । कापिलदृशि तु विन्ध्यवासिनो मनस

बालक्रीड़ा

(मूल) श्रोत्र त्वक् नेत्र जिह्वा एवं घ्राण इन पाञ्चों इन्द्रियों के तथा पांचों इन्द्रियों के विषयों के अनुभावी ये उपरिनिर्दिष्ट भाव हैं ॥८६॥

(मूल) समनस्क पुरुष ही इन्द्रियों के पांचो विषयों का अनुभव कर सकता है इससे सिद्ध है कि मन रहित अमनस्क पुरुष पांच प्रकार के विषयों का अनुभव नही कर सकता ॥८७॥

इस पाँचों इन्द्रियों का उपसंहार करते हैं ॥८६॥

इन्द्रियों के अर्थ । जैसे शब्द ग्रहण क्रियाओं से शब्द कर्णदेश पर जाता है वैसे मन भी इन्द्रियों के अधिष्ठाता के क्रम से अधिष्ठान करता है । क्योंकि कहा है—मनो हि हेतुः सर्वेषामिन्द्रियाणां प्रवर्त्तने । इसलिए भी यह सामान्याभिनय है । आचार्य ने तदुक्त से कहा है एक साथ दो ज्ञानों का नही होना मन का चिह्न है लिङ्ग है । मन का किसी एक ही इन्द्रिय के साथ सम्बन्ध होता है अतः युगपत् ज्ञानद्वय की उत्पत्ति नही होती है ॥८७॥

मन का तीन प्रकार का भाव है । वैशेषिको की दृष्टि में मन के संयोग से जो आत्मा का इच्छा द्वेष एवं आध्यस्थ्य रूप भाव है वह मन का है । कपिल की

इष्टस्तथा ह्यनिष्टश्च मध्यस्थश्च तथैव हि ॥८८॥
प्रह्लादनेन गात्रस्य तथा पुलकितेन च ।
वदनस्य विकासेन कुर्यादिष्टनिदर्शनम् ॥८९॥
इष्टे शब्दे तथा रूपे स्पर्शे गन्धे तथा रसे ।
इन्द्रियैर्मनसा प्राप्तैः सौमुख्यं संप्रदर्शयेत् ॥९०॥

अभिनवभारती

एव, ईश्वरकृष्णादिमते मनःशब्देनात्र बुद्धिः ॥८८॥

प्रह्लादनेन गात्रस्येत्यादिकं विषयग्रहणक्रियास्यभीष्टविषये निदर्शयितव्यम् । अतोऽपि चास्य सामान्याभिनयत्वं द्रष्टव्यम् ॥८९॥

एतदेव स्फुटयति इष्टे शब्द इत्यादिना । सुमुखत्वं प्रसादादियुक्तं वदनमित्यर्थः ॥९०॥

बालक्रीड़ा

(मूल) इष्ट अनिष्ट तथा मध्यस्थ इस प्रकार से मन का त्रिविध भाव होता है ऐसा अभिनय के विषय में विद्वानों को समझना चाहिए ॥८८॥

(मूल) इनमें इष्ट भाव का अभिनय गात्र शरीर के प्रह्लादन माने अनन्दमयी चेष्टा व रोमाञ्च और मुख के विकास से करना चाहिए ॥८९॥

(मूल) समनस्क इन्द्रियों से प्राप्त किये गये इष्ट रूप, रस, स्पर्श, शब्द एवं गन्ध के विषय में सौमुख्य यानी अनुकूलता दिखाये । अर्थात् इन इष्ट पदार्थों की तरफ आकृष्ट हो जाय ॥९०॥

दृष्टि विन्ध्यवासी मन से ही है ईश्वर कृष्णादि के मत में मन शब्द से यहाँ बुद्धि है ॥८८॥

गात्र के प्रह्लादन से इत्यादिक विषयों के ग्रहण में अभीष्ट के विषय में निदर्शन है । इससे भी यह सामान्याभिनय है ऐसा समझना चाहिए ॥८९॥

इष्ट शब्द में इत्यादि के द्वारा इसी को स्पष्ट करते हैं । सुमुखित्व माने प्रसन्नता से युक्त मुख है ॥९०॥

परावृत्तेन शिरसा नेत्रनासाविकर्षणैः ।
चक्षुषश्चाप्रदानेन ह्यनिष्टमभिनिर्दिशेत् ॥९१॥
नातिहृष्टेन मनसा न चात्यर्थंजुगुप्सया ।
मध्यस्थेनैव भावेन मध्यस्थमभिनिर्दिशेत् ॥९२॥
तेनेदं तस्च वापीदं स एवं प्रकरोति वा ।
परोक्षाभिनयो यस्तु मध्यस्थ इति स स्मृतः ॥९३॥
आत्मानुभावी योऽर्थः स्यादात्मस्थ इति स स्मृतः ।

अभिनवभारती

विकर्षणानि सङ्कोचनानि च । बहुवचनेन मध्ये ग्रहणसिद्धये विकासासंभिन्न इति दर्शयति ॥९१।९२

अथात्रैव पूर्वोक्तप्रकारसंभवं दर्शयति तेनेदमित्यादि । कृतं कर्तव्यमिति वाक्यशेषे भूतता भविष्यत्ता च ॥९३॥

आत्मनि सुखदयोऽर्थाः समवायिन इति सर्वं एव ते आत्मस्था! स्युः, रूपादीनां चान्यत्र समवायात् सदैव परस्थता स्यादित्याशङ्क्याह आत्मानुभावी योऽर्थः

बालक्रीड़ा

(मूल) शिर को घुमाकर अर्थात् उससे पराङ्मुख होकर नेत्र एवं नासिका का विकर्षण करके चक्षु का सम्पात न करके अनिष्ट अर्थ का अभिनय करे ॥९१॥

(मूल) न ही अत्यन्त प्रसन्न मन से, न ही अत्यन्त घृणित भाव से अर्थात् मध्यस्थ भाव से मध्यस्थ का अभिनय करे ॥९२॥

(मूल) मध्यस्थ अभिनय वह होता है जिसमें अर्थ, अभिनेय वस्तु—उसका यह है, उसने ऐसा किया, वह ऐसा करता है ऐसी परोक्ष स्थिति हो ॥९३॥

नेत्रनासाविकर्षणैः विकर्षण का अर्थ है सङ्कोचन ! यहां बहुवचन से दिखाते हैं कि मध्य में ग्रहण की सिद्धि के लिए यह विकास से असंभिन्न है ॥९१।९२॥

यहां पूर्वोक्त प्रकार के संभव को दिखाते हैं तेन । प्रकरोति इस वाक्य का शेष है । कृत कर्त्तव्यम् माने करता है किया है और अभी कर्त्तव्य है । इस तरह भूतता और भविष्यता भी है ॥९३॥

सुखादि अर्थ आत्मा में समवायी है अतः वे सब आत्मस्थ हैं । और रूपादि का तो अन्यत्र समवाय है अतः सदा ही परस्थता रहे भी तब आव्यस्यता परस्थता के

परार्थवर्णना यत्र परस्थः स तु संज्ञितः ॥९४॥

प्रायेण सर्वभावानां कामान्निष्पत्तिरिष्यते ।

अभिनवभारती

स्यादिति । परशब्दसन्निधानादात्मशब्दोऽत्राहंभावास्पदे प्रत्यगात्मनि वर्तते । तमात्मानमनुभावयति यदार्थः स आत्मस्थः । रूपादयोऽपि चैवं भवन्तीति कथं नात्मस्थाः परसुखादयश्च नैवमिति कथमात्मस्थाः ॥९४॥

अथ कामोपचारस्य सामान्याभिनयत्वमुपपादयति प्रायेण सर्वभावानामिति । कामादिति इच्छातः । यद्यप्यनिच्छोः किञ्चिद्भवति तदपि प्राक्तनं च कर्माधिपत्यात् कर्मस्थापूर्वकमिति प्रायग्रहणं व्याप्त्यर्थः कामादेव निष्पत्तिरित्यर्थः ।

ननु कोऽयं कामो नामेत्याह स चेच्छेति । न चेच्छामात्रादेव कार्यविनिष्पत्तिरित्याह गुणेन कार्यप्रयत्नादिना कार्यव्यापारादिसहितेन सम्पन्नः सहकृतः सर्वकार्य-

बालक्रीड़ा

(मूल) जो अर्थ जो वस्तु अपने द्वारा अनुभव की जाती है वह आत्मस्थ एवं जो पर के द्वारा अनुभव की जाती है वह परस्थ कहलाती है ॥९४॥

विश्लेषण की आवश्यकता है। ऐसी आशंका करके कहते हैं जो अर्थ आत्मा का अनुभव कराता है। यहां परार्थवर्णना में पर शब्द के सन्निधान से आत्म शब्द अहंभावास्पद प्रत्यक्ष आत्मा में हैं। अतः जो अर्थ आत्मा का अनुभावक है वह आत्मस्थ है। रूपादि भी जब इस प्रकार के होते हैं तब क्यों नही वे भी आत्मस्थ हैं। परगत सुखादि ऐसे नही है तब आत्मस्थ कैसे हो सकते हैं ॥९४॥

अब कामोपचार के सामान्याभिनयत्वका उपपादन करते हैं प्रायेण। काम से इच्छा से। यद्यपि अनिच्छु का भी किञ्चित् कर्म होता है तब भी वह प्राक्तन कर्म है क्योंकि वह किया हुआ है उस पर आधिपत्य है। इसी लिए कहा जाता है। अपूर्व कर्मस्थ है। पाप या पुण्य रूप अपूर्व कर्म से पैदा होता है कर्म किया है तो अपूर्व पैदा होगा ही। प्राय ग्रहण व्याप्ति के लिए है काम से ही कर्म की निष्पत्ति होती है। प्रश्न—यह काम कौन है। उत्तर—वह इच्छा है। यह तो ठीक नही है कि इच्छा मात्र से कार्य की निष्पत्ति होती है। इस पर कहते है कार्य इच्छा से ही होता है विना इच्छा के नही होता है किन्तु उस इच्छा के साथ गुण रहता है उस गुण से माने कार्य के लिए किया जाने वाला प्रयत्न से अर्थात् कार्य के लिये किये गये व्यापार सहित काम से सम्पन्न होता है। अतः गुण सहकृत काम सब कार्मो का करने वाला है।

स चेच्छागुणसम्पन्नो बहुधा परिकल्पितः ॥६५॥

धर्मकामोऽर्थकायश्च मोक्षकामस्तथैव च ।

अभिनवभारती

कारो । नन्वेकैव चेदिच्छा कथमनेकं कार्यं प्रसूयत इत्याशङ्कयाह बहुधा परिकल्पितः भूयस्य इच्छा इति ॥६५॥

यावन्तमुदाहरति धर्मकाम इत्यादि । धर्मे कामे अर्थे मोक्षे च । तत्र कामो नामेच्छा सा च सुखे तत्साधने वा भवति । तत्र धर्मार्थयोः स्वयं सुखरूपत्वं नास्ति सुखसाधनतापि च । साक्षाद्धर्मेण ह्यप्सरोगतादिसुखसाधनमुपाज्यते । एवमर्थेऽपि मन्तव्यम् । मोक्षो यद्यप्यबहिस्साधनाधीनपरमानन्दविश्रान्तिलक्षणः सुखात्मैव, तथापि दुर्लभ इति न तत्र संमोहितं लोकस्य हृदयम् । स्त्रीपुरुषयोस्तु संयोगः साक्षादेव सुखसाधनमिति तस्यैवेच्छाविषयतेति निरुपपदेन कामशब्देन स एव वाच्यः । तेन च सर्वोऽर्थोनुरज्यते, यदाह—स्त्रीति नामापि संह्लादीति (कामन्द-स ४-५२) तथापि तत्स्पृष्टे लोकोत्तरेऽप्यर्थे लोकस्य हृदयसंवादादयत्नेनैव हृदयंगमत्वमभ्युपगच्छति । यथा –

बालक्रीड़ा

(मूल) प्रायः सभी भावों की निष्पत्ति माने सभी भावों का सम्पादन कामना से होता है कामना से किया जाता है । इन इच्छित गुणों से सम्पन्न व्यक्ति बहुत प्रकार का होता है ॥९५॥

प्रश्न—इच्छा एक ही है तब अनेक कार्य क्यों होते हैं ऐसी आशंका करके कहते हैं कि इच्छायें बहुत हैं ॥६५॥

सब को उदाहृत करते हैं धर्म काम इत्यादि । धर्म काम अर्थ और मोक्ष में । काम इच्छा का नाम है । वह सुख और उसके साधन में होती है । वे धर्म और अर्थ स्वयं सुखरूप नही होते है सुख साधनता भी उनमें नही है । अप्सराओं से प्राप्त होने वाले सुख का साक्षाद्धर्म साधन बनता है । इसी तरह अर्थ के बारे में भी मानना चाहिए । मोक्ष परमानन्द विश्रान्ति स्वरूप सुख ही है । जो परमानन्द बहिः साधनों के अधीन नही है उसके साधन अन्तरङ्ग हैं । तब भी वह सुख दुर्लभ है उस सुख का मिलना बड़ा मुश्किल है अतः दुनियां का हृदय इस सुख के लिए संमुग्ध नही होता है । स्त्री और पुरुष का संयोग तो सुख का साक्षात् साधन है । अतः उसी सुख में सब की इच्छा होती है । अतः धर्मादि उपपदों से रहित काम शब्द से वही बाच्य है । उससे सभी अनुरक्त होता है जो कहा है कि स्त्री यह नाम ही आनन्ददायक है । तब भी उससे स्पष्ट लोकोत्तर अर्थ में भी लोक के हृदय का संवाद है । मिलान है । अतः बिना प्रयत्न के ही उस सुख को लोक हृदयंगम मानता है । जैसे—

स्त्रीपुंसयोस्तु योगो यः स तु काम इति स्मृतः ।।९६।।

सर्वस्यैव हि लोकस्य सुखदुःखनिबर्हणः ।

भूयिष्ठं दृश्यते कामः स सुखं व्यसनेष्वपि ।।९७।।

यः स्त्रीपुरुषसंयोगो रतिसंभोगकारकः ।

अभिनवभारती

मोहदुर्दिननिशाभिसारिका मानिनी समदना मदोद्धता ।
घोरियं प्रणयतस्त (स्त्व) ? दुन्मुखी खण्डितां रमण मास्म तां कृथाः ।। इति

अनेनैवाशयेन रहस्योऽप्यर्थो मया रहस्येषु (मुख्ययैव वृत्त्या) निवद्धः कैशिक्या ह्य तदर्थमेवादरेण विनिवेशः प्रतिपादितः । अत एह्यस ।।९६।९७।।

कामोपचारस्य सामान्याभिनयत्वं बहुतरलक्ष्यव्यापकत्वात् तदेव दर्शयति यः स्त्रीपुरुषसंयोग इति । इच्छामात्रमपि तत्र सुखे (चोपचारकृत) मित्यत इच्छा-लक्षणं संभोगं करोतीत्याह । उपचारोऽन्यहृदयग्रहणोचितैर्व्यापारैः परिपूर्णः । इह चोत्तम प्रकृतिर्यदि भवति तद्रसाध्यायोक्तदृशा शृङ्गार इत्युच्यते । एतमे-

बालक्रीड़ा

(मूल) धर्म, अर्थ काम और मोक्ष की कामना से स्त्रियों का तथा पुरुषों का जो अभियोग है वह काम कहलाता है ।।९६।।

(मूल) सभी लोगों की इच्छा, काम जो अधिकतर दुःख एवं सुख का निर्वाहकारी दिखाई पड़ता है वही काम इच्छा सुख है ।।९७।।

इन आठों नायिकाओं के क्रमशः लक्षण लिखते हैं उचित वासक इत्यादि। उचित माने पहले बतलाये हुए नय से प्राप्त है। लालसा अभिलाष ॥२१३।२१४॥

अनेककार्यव्यासङ्गाद्यस्या नागच्छति प्रियः ।
तदनागतदुःखार्ता विरहोत्कण्ठिता तु सा ॥२१४॥
सुरतातिरसैर्बद्धो यस्याः पार्श्वे तु नायकः ।
सान्द्रामोदगुणप्राप्ता भवेत् स्वाधीनभर्तृका ॥२१५॥
ईर्ष्याकलहनिष्क्रान्तो यस्य नागच्छति प्रियः ।
सामर्षवशसंप्राप्ता कलहान्तरिता भवेत् ॥२१६॥
व्यासङ्गादुचिते यस्या वासके नागतः प्रियः ।
तदनागमदुःखार्ता खण्डिता सा प्रकीर्तिता ॥२१७॥
यस्यै दूतीं प्रियः प्रेष्य दत्वा संकेतमेव वा ।
नागतः कारणेनेह विप्रलब्धा तु सा भवेत् ॥२१८॥

अभिनवभारती

आमोदगुणो हर्षः सौभाग्याभिमानश्च ॥२१५।२१६॥

व्यासङ्गादित्यन्यनारीविषयादित्यर्थः ॥२१७।२१८॥

बालक्रीड़ा

(मूल) अनेक कार्यो में व्यासङ्ग के कारण जिसका प्रिय नही आता है वह न आने के दुःख से पीड़ित नायिका विरहोत्कण्ठिता नायिका कहलाती है ॥२१४॥

(मूल) सुरत अर्थात् मैथुन के आनन्द में निमग्न हुआ प्रिय जिसके पास में बैठा रहता है ऐसी पूर्ण आनन्द को प्राप्त नायिका स्वाधीन भर्तृका कहलाती है ॥२१५॥

(मूल) जिसका पति लड़ाई झगड़े के कारण घर से बाहर निकल गया अतएव न आरहा हो ऐसी नायिका कलहान्तरिता नायिका कहलाती है ॥२१६॥

(मूल) अन्य नायिका के व्यासङ्ग के कारण होने वाले बिकारों के जानने से जो ईर्ष्या एवं द्वेष से जलती है और उसके नही आने से दुःखित होती है वह खण्डिता कहलाती है ॥२१७॥

(मूल) दूती के द्वारा सन्देश को भेज कर अथवा संकेत स्थान का निर्देश कर के भी जिसका प्रिय समय पर नही आता है वह नायिका विप्रलब्धा कहलाती है ॥२१८॥

आमोद गुण हर्ष है और सौभाग्यातिशय है ॥२१५।२१६॥

व्यासङ्ग से परस्त्री के साथ सम्भोग से ॥२१७।२१८॥

नानाकार्याणि सन्धाय यस्या वै प्रोषितः प्रियः।
सा रूढालककेशान्ता भवेत् प्रोषितभर्तृका ॥२१६॥
हित्वा लज्जां तु या श्लिष्टमदेन मदनेन च।
अभिसारयते कान्तं सा भवेदभिसारिका ॥२२०॥

अभिनवभारती

रूढाः प्रलम्बीभूता अलकाः। केशान्तश्च कबरीभारो रूढ एकवेणीभूतो यस्याः। अन्ये त्वकृतकर्मतया केशान्ते ललाटे रोम्णामुद्भेदमुत्प्ररूढं वर्णयन्ति ॥२१६॥

मदो मद्यकृतः, चकाराद् द्वयं वदन्मदनस्यैव प्राधान्यमाह। अभिसरः सहायः तस्य व्यापारेण प्रियतममतिक्रामति, "तत्करोति तदाचष्टेय" इति णिचि तेनाभिसारयते इति सृ धातोरूपं सृ इत्यस्य वृद्धिः। कुप्यन्ती प्रशान्तेत्यादयस्तु नायिकाभेदे नेहोक्ताः। तेषां वासकाभावनिवृत्तत्वाभावात् ॥२२०॥

बालक्रीड़ा

(मूल) अनेक कार्यों का अनुसन्धान करके जिसका प्रिय परदेश चला गया है और पति के विरह में जिसने केशादि को न संवारा है न संजोया है अतएव केश बढ़ गये हैं अलग बिखर गये हैं वह नायिका प्रोषित भर्तृका कहलाती है ॥२१६॥

(मूल) जो यौवन के मद से श्लिष्ट हुई, काम से आती हुई, लज्जा को छोड़ कर कान्त के समीप में पहुंचने के लिए अभिसरण करती है वह अभिसारिका है ॥२२०॥

प्रलंब रुढ है माने खूब लम्बे २ हो गये हैं। और केशान्त माने कवरी भार रूढ है एक वेणी रूप में हैं। अन्य लोग तो कर्म के नही करने से यानी बालों में कंघा नही करने से केश के प्रान्त भाग ललाट में रोएं उत्पन्न हो गये, उत्कृष्ट रूप से जम गये ऐसा वर्णन करते हैं ॥२१९॥

मद मदिरा के पीने से होने वाला विकार। मदनेन च—में उक्त चकार से यह प्रतीत होता है कि मदन की प्रधानता है। अभिसर माने सहायक, उसके व्यापार से प्रियतम के पास अतिक्रमण करती है। यहां अभिसारयति यह सृ धातु का रूप है। 'तत्करोति तदाचष्टे' इससे इसमें णिच् प्रत्यय हुआ और सृको वृद्धि हो गयी है यहां नायिकाओं के भेद में कुप्यन्ती एवं प्रशान्ता इत्यादि भेदों को यहां नही कहा है। क्योंकि इनमें वास का भाव की निवृत्ति नही हुई है ॥२२०॥

आस्वावस्थासु विज्ञेया नायिका नाटकाश्रया ।
एतासां चैव वक्ष्यामि कामतन्त्रमनेकधा ।।२२१।।
चिन्तानिःश्वासखेदेन हृद्दाहाभिनयेन च ।
सखीभिः सह संलापैरात्मावस्थावलोकनैः ।।२२२।।
ग्लानिदैन्याश्रुपातैश्च रोषस्यागमनेन च ।
निर्भूषणभुजात्वेन दुःखेन रुदितेन च ।।२२३।।
खण्डिता विप्रलब्धा वा कलहान्तरितापि वा ।
तथा प्रोषितकान्ता च भावानेतान् प्रयोजयेत् ।।२२४।।

अभिनवभारती

नाटकाश्रया इति नाटचविषया इत्यर्थः ।।२२१।।

तत्र विप्रलम्भजीवितं शृङ्गारेण वासकभावभावितनायिकाभेदाश्रयं प्रथमं दर्शयति चिन्तानिःश्वासखेदेनेत्यादिना । सामान्यभूते सकलहृदयसंवादिनि मदनोपचारे चायमभिनय इत्यपि सामान्याभिनयः ।।२२२।२२३।।

बालक्रीड़ा

(मूल) नाटकाश्रित नायिकाओं की इन अवस्थाओं के विषय में समझना चाहिए । अब मैं इनके सम्बन्ध में अनेक प्रकार के काम तन्त्र को, काम विधान को कहूंगा ।।२२१।।

(मूल) खण्डित विप्रलब्धा कलहान्तरि तथा प्रोषित भर्तृका नायिका चिन्ता निःश्वास खेद हृदयदाह के अभिनय सखियों के साथ संलाप, अपनी अवस्था का अवलोकन, ग्लानि, दीनता आसुओं के गिराने, क्रोध के आगमन अंगो की भूषण हीनता दुःखी होने एवं रोदन से अपने भावों को प्रकट करें ।।२२२।२२४।।

नाटकाश्रया माने नाटचविषया ।।२२१।।

विप्रलम्भ जिसमें जीवित है, प्राण है ऐसे प्रथम भेद को चिन्ता निःश्वास खेद इत्यादि से दिखाते हैं । इसमें शृङ्गार से वासक भाव से भावित नायिका भेद है । सामान्यभूत सकलजनों के हृदय के संवाद वाले मदनोपचार में यह अभिनय होता है इसलिए भी यह सामान्याभिनय है ।।२२२।२२३।।

विचित्रोज्ज्वलवेषा तु प्रमोदोद्द्योतिताननना ।
उदीर्णशोभा च तथा कार्या स्वाधीनभर्तृका ॥२२५॥

वेश्यायाः कुलजायाश्च प्रेष्यायाश्च प्रयोक्तृभिः ।
एभिर्भावविशेषैस्तु कर्तव्यमभिसाररणम् ॥२२६॥

समदा मृदुचेष्टा च तथा परिजनावृता ।
नानाभरणचित्राङ्गी गच्छेद्वेश्याङ्गना शनैः ॥२२७॥

संलीना स्वेषु गात्रेषु त्रस्ता विनमिताननना ।
अवगुण्ठनसंवीता गच्छेत्तु कुलजाङ्गना ॥२२८॥

अभिनवभारती

भावानेतानिति पठितानुभावव्यभिचारिसमुचिता ये भावा स्थायिरूपास्तेषा-मिहापठितमप्यनुभावजातं प्रदर्शयति यावत् । वासकसज्जा अभिसारिका च स्वावसरे स्वाधीनभर्तृकयैव तुल्ये इति पृथङ् नोक्ते ॥२२४।२२५॥

अथाभिसारणस्वरूपमाह वेश्यायाः इत्यादि । भावविशेषैरिति वस्तुविशे-षैरित्यर्थः ॥२२६।२२८॥

बालक्रीड़ा

(मूल) जिसका वेष विचित्र एवं उज्ज्वल है आनन्द से जिसका मुख चमक रहा है जिसकी शोभा उदीर्ण है ऐसी स्वाधीनपतिका को रंग मंच पर नाट्य में अभिनय में दिखाना चाहिए ॥२२५॥

(मूल) वेश्या कुलाङ्गना एवं प्रेष्या के अभिसार को अभिनेता लोग इन आगे कहे जाने वाले भावों से रंग रंच पर अभिनय करें या दिखाये ॥२२६॥

(मूल) वेश्या मद से विह्वल हुई कोमल चेष्टाओं को करती हुई परिवार के साथ विविध आभूषणों को पहिरकर धीरे २ अपने प्रिय के यहां अभिसरण करे ॥२२७॥

(मूल) कुलाङ्गना अपने गात्रों में लीन हुई छिपी सी हुई डरी हुई मुख को झुकाए हुए घूंघट पट को ओढे हुई अभिसार करे ॥२२८॥

इन भावों को इस पठित अनुभाव एवं व्यभिचारियों के समुचित जो भाव स्थायी रूप हैं उनका यहां पाठ नही किया है तब भी अनुभाव जनितत्व इनका दिखलाते हैं ।-वासक सज्जा और अभिसारिका स्वाधीन भर्तृका के तुल्य हैं अतः अपने निरूपण के अवसर में इनको पृथक् नही कहा है ॥२२४।२२५॥

अभिसारण के स्वरूप को कहते हैं । वेश्याया इत्यादि । भाव विशेष माने वस्तु विशेष ॥२२६।२२८॥

मदस्खलितसंलापा विभ्रमोत्फुल्ललोचना ।
आविद्धगतिसंचारा गच्छेत्प्रेष्या समुद्धतम् ॥२२९॥
गत्वा सा चेद्यदा तत्र पश्येत्सुप्तं प्रियं तदा ।
अनेन तूपचारेण तस्य कुर्यात्प्रबोधनम् ॥२३०॥
अलङ्कारेण कुलजा वेश्या गन्धैस्तु शीतलैः ।
प्रेष्या तु वस्त्रव्यजनैः कुर्वीत प्रतिबोधनम् ॥२३१॥
कुलाङ्गनानामेवायं नोक्तः कामाश्रयो विधिः ।

अभिनवभारती

संलापो दूत्या सख्या सहोक्तिप्रत्युक्तिः ॥२२९।३०॥

अलङ्कारेणेति अलङ्कारशब्दो नूपुरादिषुशिष्टः ॥२३१॥

ननु राज्ञां वेश्यादिसंभोगो निह्नवकाखपायसङ्कुलत्वात् किमिहानेन दर्शितेनेत्याशङ्कयाह सर्वावस्थानुभाव्यं हि कार्यं नाटकमिति नाटच इति यावत् । सर्वावस्था अनुभाव्या प्रत्यक्षायमाणत्वं नेया, यत्र प्रकरणादौ वेश्यासंभोगोऽप्यस्तीत्युक्तं

बालक्रीड़ा

(मूल) मद के कारण जो रुक २ कर वार्तालाप करती है विभ्रम से जिसके लोचन खिले हुए हैं और गति का संचार जिसका आविद्ध हो जाता है ऐसी अवस्था वाली प्रेष्या का उद्धत अभिसार होता है ॥२२९॥

(मूल) अगर वह वहां पहुंच कर प्रिय को जब सोया हुआ देखती है तब इन आगे कहे जाने वाले उपचार से उसका प्रबोधन करे ॥२३०॥

(मूल) कुलीना नायिका अलंकार पहिराकर, वेश्या सुगन्धि वस्त्र एवं माला का समर्पण करके, और प्रेष्या व्यजन को डुलाकर सेवा करके उसका प्रबोधन करें ॥२३१॥

संलाप माने दूती के एवं सखी के साथ उक्ति प्रत्युक्ति ॥२२९।२३०॥

अलंकार शब्द का नूपुरादि में शासन किया है ॥२३१॥

प्रश्न—राजाओं का वेश्याओं के साथ सम्भोग विद्रव करण रूप अपाय से आकुल है अतः इसके यहां दिखाने से क्या लाभ है ऐसी आशंका करके कहते हैं—सभी अवस्थाओं से अनुभाव नाटक माने नाटच है । सभी अवस्थायें अनुभाव्य हैं प्रत्यक्ष करने लायक है । जहां यदि प्रकरणादि में वेश्याओं के संभोग को दशरूपक में

सर्वावस्थानु भाव्यं हि यस्माद्भवति नाटकम् ॥२३२॥
नवकामप्रवृत्ताया क्रुद्धाया वा समागमे ।
सापदेशैरुपायैस्तु वासकं संप्रयोजयेत् ॥२३३॥

अभिनवभारती

दशरूपके (अध्या—१८) यदि तर्हि सर्वतः प्रकारो नाटके प्रदर्श्यस्तदा वासके यदा प्रकटप्रकार उक्तः ॥२३२॥

एवं व्याजप्रकारोऽपि वाच्य इत्याशयेनाह नवकामप्रवृत्ताया इति । नवेकामे पुरुषसम्भोगे या प्रवृत्ता प्रथमसमागमनीया वेश्या पूनर्भू र्गान्धर्वविवाहविवाह्या कन्या वा तस्याः समागमे चिकीर्षिते, सव्याजैः उपायैः वासको, व्याजश्च यथा तथैव प्रकटं नाङ्गीकरोति, नायिकान्तरेभ्यश्च झटिति भीरुर्नायको भवति । अवरुद्धापि खण्डिता कलहान्तरिता वा वासकमनङ्गीकुर्वती व्याजतोऽङ्गीकार्यते ॥२३३॥

बालक्रीड़ा

(मूल) यह काम के विषय की विधि केवल कुलाङ्ग के सम्बन्ध में ही नही कही गई है अपितु सभी के विषय में कही गई है क्योंकि नाटकादि रूपक सभी की अवस्थाओं से अनुभवनीय है ॥२३२॥

(मूल) जो पहले २ काम में प्रवृत्त हुई नयी नायिका है अथवा जो क्रुद्धा है उसके साथ समागम में किसी बहाने के साथ वशीकरण के उपायों से वासक का संप्रयोग करे ॥२३३॥

बतलाया है तब सभी प्रकारों को नाटक में दिखाना चाहिए। अतः वासक में उनके प्रकारों को प्रकट रूप से कहा है ॥२३२॥

इस तरह व्याज प्रकार को भी कहना चाहिए इस आशय से कहते हैं— तब नूतन काम माने पुरुष के सम्भोग में प्रवृत्त होने वाली प्रथम प्रथम समागम के योग्य वेश्या पुनर्भू अथवा गान्धर्व विवाह से विवाह करने योग्य कन्या। इनके साथ समागम करना चाहते हैं तो छल कपटमय उपायों से वासक होता है। व्याज से (छल कपट) भी जैसे तैसे वह कन्या प्रकट रूप से सम्भोग करना अङ्गीकार नही करती है तथा नायक भी अन्य नायिकाओं से डरता है। अवरुद्धा खण्डिता अथवा कलहान्तरिता जो वासक का अङ्गीकार नही करती है उसको व्याज से माने छल से अङ्गीकार कराया जाता है ॥२३३॥

नानालङ्कारवस्त्राणि गन्धमाल्यानि चैव हि ।
प्रियायोजितभुक्तानि दिषेवेत मुदान्वितः ॥२३४॥
न तथा भवति मनुष्यो
मदनवशः कामिनीमलभमानः ।
द्विगुणोप जातहर्षो भवति
यथा सङ्गतः प्रियया ॥२३५॥
विलासभावेङ्गित वाक्यलीला
माधुर्यविस्तारगुणोपपन्नः ।

अभिनवभारती

तत्र नायिकाहृदयग्रहणोचितविदग्धतानिमित्तं नायकस्योपचारमाह नाना-लङ्कारेत्यादि ॥२३४॥

ननु प्राप्ता चेत् प्रमदा तर्हि निवृत्तकामः, तत् कोऽयमुपचारप्रतिभर इत्याशङ्कयाह न तथा भवतीति । मदनः कामभवः इति काम एव । मदि हर्षग्लपनयोरिति पठति तेन समागमे द्विगुणीभवति कामः ॥२३५॥

ततश्चोपचारे यत्न उचित इत्याह विलासभावेति । विलासः स्त्रीणां च व्याख्यातः 'स्थानासनगमनाना' मिति, (२२-१५) 'धीरसंचारिणी दृष्टि; (२२-३५) इति

बालक्रीड़ा

(मूल) प्रिया के द्वारा उपयोग करके छोड़ दिये गये हैं—ऐसे अलंकार, वस्त्र इत्र एवं मालाओं का बड़ी प्रसन्नता के साथ सेवन करे ॥२३४॥

(मूल) अपने अनुकूल कामिनी के नही मिलने से कामार्त्त मनुष्य ऐसा दुःखी नही होता है जैसा कि कामिनी प्रिया के संगम करने पर द्विगुणित प्रसन्न होता है ॥२३५॥

नायिका के हृदय के ग्रहण के उचित चतुराई के लिए नायक के द्वारा कर्त्तव्य उपचार को कहते हैं—नानालंकारेति ॥२३४॥

प्रश्न—जब प्रमदा मिल गई और सम्भोग भी हो चुका तब यह कौन ? यह उपाय का बोझा उठाना है। ऐसी आशंका करके कहते हैं पुरुष वैसा नही होता है। मदनम कामना से होने वाला काम ही है। मदि धातु हर्ष एवं जलपन अर्थ में पठित है। फलतः पुरुष के साथ समागम में काम द्विगुणित होता है ॥२३५॥

उपचार में यत्न करना चाहिए इसको कहते हैं विलास भाव। स्त्रियों का विलास होता है। इसकी व्याख्या स्थान आसन एवं गमन से कर दी है और धीरता

परस्परप्रेमनिरीक्षितेन समागमः कामकृतस्तु कार्यः ॥२३६॥

ततः प्रवृत्ते मदन उपचारसमुद्भवे ।
वासोपचारः कर्तव्यो नायकागमनं प्रति ॥२३७॥

गन्धमाल्ये गृहीत्वा तु चूर्णवासस्तथैव च ।
आदर्शो लीलया गृह्यश्छन्दतो वा पुनः पुनः ॥२३८॥

अभिनवभारती

पुरुषस्य च । तत्प्रधानभावाः चेष्टितानि । इङ्गितं प्रेमसूचका व्यापाराः व्याख्याताः 'काम्येनाङ्गविकारेणे' त्यादि, 'चकिता भवेत्' इत्यन्तेन (२२-१६७-१७२) ।

वाक्यलीलेति अङ्गाःसाध्यादिषूक्ता । माधुर्यं स्त्रीणां "सर्वावस्थाविशेषे" ष्विति (२२-२९) नृणां च, 'अभ्यासात् करणानां' (२२-३६) इति । एपां विस्तारगुणेन कविवर्णनाकृतेनोपपन्न एतस्मादुपचारात्सम्यगुद्भवो यस्य ॥२३६।२३७॥

चूर्णः पटवासः । वासो वस्त्रम् ॥२३८॥

बालक्रीड़ा

(मूल) परस्पर प्रेम पूर्वक निरीक्षण से हुये जो विलास, भाव, इंगित, वाणी, लीला मधुरता के विस्तार रूपी गुण से उपपन्न समागम कामबासना के कारण करना चाहिये ॥२३६॥

(मूल) जब उपचारो के द्वारा काम वासना प्रवृत्त हो गयी माने उत्पन्न हो गयी तो नायक के आगमन के लिये स्थान की व्यवस्था करनी चाहिये ॥१३७॥

(मूल) गन्ध माला और चूर्णवास माने पाउडर लगाये हुए वस्त्र को ग्रहण करके लीला के साथ दर्पण को ग्रहण करना अथवा अपनी इच्छा के अनुसार पुनः पुनः दर्पण को लेना चाहिए ॥२३८॥

के संचार करने वाली दृष्टि से पुरुष के विलास की व्याख्या कर दी है । इङ्गित माने प्रेम सूचक व्यापार है इनकी व्याख्या काम्य, 'अङ्गविकारों से' यहां से आरम्भ करके 'चकिता हो जाती है' यहां तक के पाठ से कर दी है ।

वह, विलास जिसमें प्रधान है वे चेष्टित हैं जो आंगिक अभिनयों से साध्य नही है वहां वाक्य लीला माने वाचिक अभिनय किया जाता है । सभी अवस्थाओं में स्त्रियों का माधुर्य होना चाहिए । और इन्द्रियों के द्वारा अभ्यास से पुरुषों का माधुर्य होता है । कवियों के वर्णन से किये गये विस्तार गुण से इनकी उपपत्ति होती है अतः उपचार से काम का सम्यक् उद्भव होता है ॥२३६।२३७॥

चूर्ण माने पटवास और वास माने वस्त्र ॥२३८॥

वासोपचारे नात्यर्थं भूषणग्रहणं भवेत् ।
रशनानूपुरप्रायं स्वनवच्च प्रशस्यते ॥२३९॥
नाम्बरग्रहणं रङ्गे न स्नानं न विलेपनम् ।
नाञ्जनं नाङ्गरागश्च केशसंयमनं तथा ॥२४०॥
नाप्रावृता नैकवस्त्रा न रागमधरस्य तु ।
उत्तमा मध्यमा वापि कुर्वीत प्रमदा क्वचित् ॥२४१॥

अभिनवभारती

नात्यर्थमिति खेदावहत्वात् । रात्रावदृश्यत्वात्तु दरिद्राणां दीपशून्यं वासगृहं दृष्टवतां हेतुत्वेन स्वनवत्त्वं, चेति हेतौ यतः प्रशस्तेन सुरतलीलोपयोगिना शब्देन युक्तम् ॥२३९॥

नाम्बरग्रहणं रङ्गे इत्यादिना प्रसङ्गतो निषेधमाह । वासोपचारसिद्धये तु रङ्गेऽप्येतदुपचारोपयोगि कर्तव्यमिति । कोपसंभावनयेति नाम्बरग्रहणमिति सामान्योक्तावपि प्रकारादुत्तमाया मध्यमायाश्चेति गम्यते । अधमायाश्च भवत्ये- तद्रङ्गेऽपि ॥२४०।२४२॥

बालक्रीड़ा

(मूल) वास के, उपचार के समय में भूषणों का अधिक मात्रा में ग्रहण नही करना चाहिए। रशना एवं नूपर खूब शब्द करते हुए अच्छे लगते हैं ॥२३९॥

(मूल) उत्तम एवं मध्यम प्रमदा कहीं पर भी रंगमञ्च पर पात्र लोग खुले तौर से न वस्त्रों को पहिरे न स्नान करें न गन्ध विलेपन करें न काजर लगावें न अंगराग को लगावें और न केशों का संयमन करे। न नंगा रहें न एकवस्त्रा रहे और न अधरोष्ठ में राग लगावें ॥२४०।२४१॥

अत्यन्त नही करना चाहिए क्योंकि खेद का जनक होता है। रात्रि में अदृश्य होने से अर्थात् दरिद्रों के दीपशून्य वासगृह को देखने वालों के लिए संभोग की प्रतीति में हेतु है। स्वनवत्त्व च—यहां हेतु अर्थ में है। प्रशस्त सुरत रूपी लीला के उपयोगी शब्द से युक्त है।

अब प्रसङ्गतः रङ्ग में अम्बर ग्रहण नही करना चाहिए इत्यादि से निषेध को कहते हैं। वासोपचार की सिद्धि के लिए रङ्ग में भी उपचार के उपयोगी अम्बर ग्रहण को करना चाहिए। कोप की संभावना में अम्बर ग्रहण नही करना चाहिए ऐसा सामान्य तौर से कहने पर भी किसी प्रकार से उत्तमा एवं मध्यमा के अम्बर का ग्रहण हो सकता है यह व्यक्त होता है। अधमा का तो रङ्ग में भी अम्बर ग्रहण हो सकता है ॥२४०।२४२॥

अधमानां भवेदेष सर्व एव विधिः सदा ।
कारणान्तरमासाद्य तस्मादपि न कारयेत् ॥२४२॥
प्रेष्यादीनां च नारीणां नराणां वापि नाटके ।
भूषणग्रहणं कार्यं पुष्पग्रहणमेव च ॥२४३॥
गृहीतमण्डना चापि प्रतीक्षेत प्रियागमम् ।
लीलया मण्डितं वेषं कुर्याद्यन्न विरुध्यते ॥२४४॥

विधिवद्वासकं कुर्यान्नायिका नायकागमे ।

अभिनवभारती

एवं निषेधमधमासु पुनर्विधिमुक्त्वा प्रकृतमुपचारमेवाभिसन्धत्ते भूषणग्रहणमित्यादि ॥२४३।२४४॥

उक्तपूर्वेऽत्रोपचारे आदरं दर्शयति विधिवद्वासकं कुर्यादिति वासकोचितमुपचारमित्यर्थः ।

बालक्रीड़ा

(मूल) हां अधम श्रेणी की स्त्रियों के लिए यह पूर्वोक्त विधि सर्वदा हो सकती है। किन्तु यदि कोई कारण विशेष उपस्थित हो जाय तो अधम स्त्रियां भी उक्त विधि को नही करें ॥२४२॥

(मूल) नाटक में रंगमञ्च पर दास और दासियों भूषणों को धारण कर सकती है पुष्पो को भी ले सकती है ॥२४३॥

(मूल) मण्डनों को ग्रहण करके प्रिय के आगमन की प्रतीक्षा करे। लीला के पूर्व उस सुन्दर वेष को नायिका धारण कर सकती है जो प्रकृत के विरुद्ध नही हो ॥२४४॥

इस प्रकार निबंध को अधमा के लिए पुनः विधि को कह कर प्रकृत उपचार को कहते हैं—भूषणमित्यादि ॥२४३।२४४॥

पहले बतलाये हुए उपचार में आदर दिखाते हैं, विधि पूर्वक वासक को करे अर्थात् वासक के उचित उपचार को करे।

प्रतीक्षमाणा च ततो नालिकाशब्दमादिशेत् ॥२४५॥

श्रुत्वा तु नालिकाशब्दं नायकागमविक्लबा ।

विषण्णा वेपमाना च गच्छेत्तोरणमेव च ॥२४६॥

तोरणं वामहस्तेन कवाटं दक्षिणेन च ।

गृहीत्वा तोरणाश्लिष्टा संप्रतीक्षेत नायकम् ॥२४७॥

शङ्कां चिन्तां भयं चैव प्रकुर्यात्तोरणाश्रिता ।

अदृष्ट्वा रमणं नारी विषण्णा च क्षणं भवेत् ॥२४८॥

अभिनवभारती

ननु समाप्त उपचारे यदि प्रियो नागतः किं कुर्यादित्याह प्रतीक्षमाणेति । नालिकाशब्दमादिशेदिति इयांश्च कालो गतः किमित्यादि न प्राप्तः स्यादिति, ॥२४५॥

ततोऽप्यनागतेऽयं विधिरित्याह श्रुत्वा तु नालिकशब्दमिति ।।२४६।२४९।।

बालक्रीड़ा

(मूल) नायक के आगमन के समय नायिका विधि पूर्वक स्थान पर उपस्थित रहे और प्रतीक्षा करती हुई घंटी बजाने के लिए आदेश दे ॥२४५॥

(मूल) फिर नालिक शब्द को सुनकर नायक आगम के लिए विह्वल हुई विषण्ण होकर कांपती हुई तोरण की तरफ जावे ॥२४६॥

(मूल) वहां बायें हाथ से तोरण को और दाहिने हाथ से कपाट को ग्रहण करके तोरण से चिपक कर नायक की प्रतीक्षा करे ॥२४७॥

(मूल) तोरण से चिपकी हुई नायिका शंका चिन्ता और भय को करे। रमण को नही देखकर नारी क्षण भर के लिए विषण्ण दुःखी हो जाय ॥२४८॥

प्रश्न—यदि उपचारों के समाप्त होने पर भी प्रिय नही आवे तो क्या करना चाहिए। इसलिए कहते है कि प्रतीक्षा करे। नालिका शब्द को करने का आदेश दे कि इतना समय चला गया क्यों कैसे नही आया ? ॥२४५॥

फिर भी यदि नही आवे तब यह विधि करनी चाहिए इसको कहते हैं नालिका शब्द को सुन कर ॥२४६।२४९॥

दीर्घं चैव विनिःश्वस्य नयनाम्बु निपातयेत् ।
सन्नं च हृदयं कृत्वा विसृजेदङ्गमासने ॥२४६॥
व्याक्षेपाद्विमृशेच्चापि नायकागमनं प्रति ।
तैस्तैर्विचारणोपायैः शुभाशुभसमुत्थितैः ॥२५०॥
गुरुकार्येण मित्रैर्वा मन्त्रिणा राज्यचिन्तया ।
अनुबद्धः प्रियः किं नु वृतो वल्लभयापि वा ॥२५१॥
उत्पातान्निर्दिशेच्चापि शुभाशुभसमुत्थितान् ।
निमित्तैरात्मसंस्थैस्तु स्फुरितैः स्पन्दितैस्तथा ॥२५२॥

अभिनवभारती

तैस्तैर्विचारणोपायैरिति यदुक्तं तत्रोदाहरणम् । अनागतोपायानाह गुरुकार्येणेत्यादि । अनुभाववर्गस्त्वसूयाखेदार्थचिन्तादिव्यभिचारिसंभवो यथायोगं योज्यः ॥२५१॥

उत्पातः सहसाऽशुभसूचको महाभूतपरिस्पन्दः स च परस्थः। स्फुरितं चलनं स्पन्दितमेतदित्येते स्वदेहस्थे इति भेदेनोक्ते ॥२५२।२५३॥

बालक्रीड़ा

(मूल) लम्बा श्वास लेकर आसुओं को गिरावे हृदय को शून्य करके अर्थात् दुःखी होकर अपने शरीर को आसन पर गिरा दे ॥२४६॥

(मूल) नायक के अनागमन के विषय में व्याक्षेप माने विघ्न को देखकर शुभाशुभ परिस्थितियों के उदगम से विचारणीय उपायों का विमर्श करें ॥२५०॥

(मूल) प्रिय क्यों नहीं आया ? क्या कोई बड़ा भारी कार्य उपस्थित हो गया, राज्य विषय चिन्ता के कारण मंत्री ने रोक लिया अथवा किसी प्रेयसी ने घेर लिया ॥२५१॥

(मूल) चक्षुस्फुरण अंगस्पन्दनादि निमित्तो से होने वाले शुभाशुभ फल सूचक उत्पातो का निर्देश करें ॥२५२॥

उन उन विचार करने के उपायों से—ऐसा जो कहा उसमें उदाहरण है ॥२५०॥

नही आने पर उपायों को कहते हैं गुरु कार्य से । यह अनुभाव वर्ग है । असूया खेद अर्थचिन्ता आदि व्यभिचारी भावों की योजना योग्यता से करनी चाहिए ॥२५१॥

उत्पात, सहसा अशुभ का सूचक महाभूतों का परिस्पन्द यह पर में होता है । स्फुरित चलित एवं स्पन्दित ये सब अपने देह में होते हैं इस लिए भेद से कहे हैं । ॥२५२।२५३॥

शोभनेषु तु कार्येषु निमित्तं वामतः स्त्रियाः ।
अनिष्टेष्वथ सर्वेषु निमित्तं दक्षिणं भवेत् ॥२५३॥
सव्यं नेत्रं ललाटं च भ्रूनासोष्ठं तथैव च ।
ऊरुबाहुस्तनं चैव स्फुरेद्यदि समागमः: ॥२५४॥
एतेषामन्यथाभावे दुर्निमित्तं विनिर्दिशेत् ।
दर्शने दुर्निमित्तस्य मोहं गच्छेत्क्षणं ततः ॥२५५॥
अनागमे नायकस्य कार्यो गण्डाश्रयः करः ।
भूषणे चाप्यवज्ञानं रोदनं च समाचरेत् ॥२५६॥
अथ चेच्छोभनं तत्स्यान्निमित्तं नायकागमे ।
सूच्यो नायिकयासन्नो गन्धाघ्राणेन नायकः ॥२५७॥

अभिनवभारती

नेत्रमित्यादि सव्यं वाममिति मन्तव्यम् तथा बाहुः ॥२५४॥

अन्यथाभाव इति दक्षिणस्फुरणे ॥२५५।२५७॥

बालक्रीड़ा

(मूल) शुभ कार्यों में स्त्रियों के वाम अंगों में स्पन्दनादि होते हैं और अनिष्ट कार्यों में स्त्रियों के दक्षिण अंग में निमित्त होते हैं ॥२५३॥

(मूल) यदि नायिका को वाम नेत्र, ललाट, भ्रुकुटी नासिका, ओष्ठ, जंघा बाहु और स्तन स्फुरित हों तो प्रिय का समागम अवश्य होता है ॥२५४॥

(मूल) पूर्वोक्त के अन्यथा भाव में अर्थात् दक्षिण नेत्रादि के स्फुरण होने पर दुर्निमित्त को कहे अथवा निर्देश करे। दुर्निमित्तों के जानने पर क्षण भर के लिये पागल हो जाय ॥२५५॥

(मूल) नायक के अनागमन पर हाथ को कपोल पर रखें, अलंकार के प्रति भी निरस्कार भाव रखें। और रोने लगे ॥२५६॥

(मूल) यदि नायक के आगमन के समय में अंगस्फुरणादि निमित्त शुभ हो तो प्रिय का आगमन आसन्न है यह जानकर सुगन्धित उत्तम पदार्थो को ग्रहण करें ॥२५७॥

सत्य माने वाम नेत्र को मानना चाहिए। वाहू ॥२५४॥

अन्यथा भाव माने दक्षिण नेत्र स्फुरण ॥२५५।२५७॥

दृष्ट्वा चोत्थाय संहृष्टा प्रत्युद्गच्छेद्यथाविधि ।
ततः कान्तं निरीक्षेत प्रहर्षोत्फुल्ललोचना ॥२५८॥
सखीस्कन्धार्पितकरा कृत्वा स्थानक्रमायतम् ।
दर्शयेत तंतः कान्तं सचिह्नं सरसव्रणम् ॥२५९॥
यदि स्यादपराद्धस्तु कृतस्तैस्तैरुपक्रमैः ।
उपालम्भकृतैर्वाक्यैरुपालभ्यस्तु नायकः ॥२६०॥
मानापमानसम्मोहैरवहित्थभयक्रमैः ।
वचनस्य समुत्पत्तिः स्त्रीणामीर्ष्याकृता भवेत् ॥२६१॥

अभिनवभारती

प्रत्युद्गच्छेदिति नायिकेति प्रथमया योज्यम् ॥२५८।२५९॥

एवमियता वासकसज्जया वागङ्गसत्त्वव्यामिश्रः सामान्याभिनयः प्रिय संप्राप्त्यवधिर्दर्शितः । अथ खण्डितादीनां संदर्श्यते यदि स्यादपराद्धस्त्विति तैस्तैरिति मानावहित्थवस्त्रभङ्गाभिष्यन्दादिभिः ॥२६०।२६१॥

बालक्रीड़ा

(मूल) प्रिय को आया हुआ देखकर उठे और प्रसन्न मन से यथा विधि अगवानी करें। फिर खिले हुये नेत्रों से प्रिय को देखे ॥२५८॥

(मूल) सखी के कन्धे पर हाथ रखती हुयी, स्थान को व्यवस्थित करके चिन्ह के साथ साथ सरस नखक्षत एवं दंतक्षत को दिखाये ॥२५९॥

(मूल) यदि उन उपक्रमों से नायक ने अपराध किया हो। उपालम्भ सूचक वाक्यों से उसे उलहना दें ॥२६०॥

(मूल) ईर्ष्या से कारण मान, अपमान, पागलपन, अवहित्था माने आकार गोपन, भय एवं प्रचलन इन हेतुओं से नायिका बड़बडाती है ॥२६१॥

नायिका प्रत्युद्गमन करे, यहां प्रथम नायिका की योजना करनी चाहिए। ॥२५८।२५९॥

इस प्रकार इतने प्रबन्ध से वासक सज्जा के स्वरूप को लेकर वागङ्ग सत्त्व व्यामिश्र प्रियप्राप्ति पर्यन्त सामान्याभिनय को दिखा दिया अब खण्डिता वगैरहक सामान्याभिनय को दिखाते हैं। यदि अपराधी हो तो। उन उन उपक्रमों से माने मान रूठना, अवहित्था आकारगोपन, वस्त्रभङ्ग छीना झपटी में वस्त्र का, धोती का गिर जाना अर्थात् नंगी हो जाना। अभिष्यन्दस्खलनों के द्वारा ॥२६०।२६१॥

विस्रंभस्नेहरागेषु सन्देहे प्रणये तथा ।
परितोषे च घर्षे च दाक्षिण्याक्षेपविभ्रमे ॥२६२॥
धर्मार्थकामयोगेषु प्रच्छन्नवचनेषु च ।
हास्ये कुतूहले चैव संभ्रमे व्यसने तथा ॥२६३॥
स्त्रीपुंसयोः क्रोधकृते पृथङ्मिश्रे तथापि वा ।
अनाभाष्योऽपि संभाष्यः प्रिय एभिस्तु कारणैः ॥२६४॥

अभिनवभारती

अन्यथाभाषणे कोपादनुचिते तदपवादमाह विस्रम्भेत्यादि कस्मिंश्चित् कार्ये निरूप्ये विस्रम्भसात्मिका कार्या, शरीरापाटवादि पश्यतो वार्ताप्रश्नादौ स्नेहः, तद्वशाद्योऽनुरागो लक्षितः, कृतापराधः सत्यतो न वेति सन्देहः, प्रणयः प्रार्थना, अपत्याद्यभ्युदयः परितोषः कलाशिल्पादिभिः निकृतिपक्षेण स्पर्धा संघर्षः, पक्षस्य सखी जनादेर्यदा कार्यः प्रियेण सम्पाद्यः, पश्यति तदा सखीकार्यविवादविषयाद्दाक्षिण्यम्, इन्द्रजालादिकृते विस्मयः ॥२६२॥

बालक्रीड़ा

(मूल) विश्वास, स्नेह, अनुराग, सन्देह प्रणय परितोष, संघर्ष दाक्षिण्य माने अनुकूलता के विषय में आक्षेप से होने वाले विभ्रम, धर्म अर्थ काम के सम्बन्ध प्रच्छन्न वचन, हास्य, कुतूहल, संभ्रम स्त्री पुरुष का परस्पर या पृथक् २ क्रोध—इन कारणों से असंभाष्य भी प्रिय संभाष्य हो जाता है ॥२६२।२६४॥

अपराधी कोप से अन्यथा उनुचित भाषण करता है। अब उसके अपवाद को कहते हैं विस्रम्भ इत्यादि ।

कोई कार्य कर्तव्य है उसमें विस्रम्भ माने विश्वास का स्वरूप करना चाहिए। विना विश्वास हुए कोई कार्य नही हो सकता है। कार्य करने में शरीर के असामर्थ्य को देखने वाले को वार्त्तालाप में एवं प्रश्न करने में स्नेह दिखाना चाहिए। और स्नेह के वश से अनुराग को लक्षित किया है। यह अपराधी सत्यतः सचमुच ही है या नही ऐसा सन्देह। प्रणय प्रार्थना। सन्तान आदि का अभ्युदय पारितोष है। निकृति तिरस्कार पक्ष से स्पर्धा संघर्ष। पक्ष मान सखी मन उनका जब कोई कार्य उपस्थित हो जाय तो प्रिय को उसे करना चाहिए। किन्तु वह प्रिय करने के वजाय देखता ही है तदा सखी के कार्य के विवाद के विषय में दाक्षिण्य माने अनुकूलता करनी चाहिए। दाक्षिण्याक्षेप विभ्र में विभ्रम पाठ की जगह विस्मये पाठ अभिनवभारतीकार को समझते है अत एव लिखते है इन्द्र जालादि विस्मय होने पर ॥२६२॥

यत्र स्नेहो भवेत्तत्र ह्यीर्ष्या मदनसम्भवा ।
चतस्रो योनयस्तस्याः कीर्त्यमाना निबोधत ।।२६५।।
वैमनस्यं व्यलीकं च विप्रियं मन्युरेव च ।
एतेषां संप्रवक्ष्यामि लक्षणानि यथाक्रमम् ।।२६६।।
निद्राखेदालसगतिं सचिह्नं सरसव्रणम् ।
एवंविधं प्रियं दृष्ट्वा वैमनस्यं भवेत् स्त्रियाः ।।२६७।।

अभिनवभारती

धर्मार्थकामोपयोगिनि व्रतगृहकृत्यकौमुदीहर्षोत्सवादावश्यं कर्तव्ये प्रियं प्रति स्मरणा, कर्तव्यां, तेन वा स्मरणम्, उपालम्भद्वारेण किमयं वदेदिति परीक्षणम्, यदा नायकोऽत्यादरात् किंचित्पृच्छति तत्कुतूहलम्, सर्वो यदा हसति तदा हास्यम्, अग्न्याद्युत्पातः संभ्रमः वसुवियोगादि व्यसनम्, एतेष्वनाभाषणे सर्वथैव निःस्नेहता स्यात् ।।२६३।।

क्रोधकृत इति युगपदित्यर्थः ।।२६४।।

बालक्रीड़ा

(मूल) जहां स्नेह होता है वहा स्त्रियों को काम के कारण इर्ष्या हो जाती है स्नेह होने पर इर्ष्या होने के चार कारण होते है मैं उनको कहता हूं आप उन्हे समझें ।।२६५।।

(मूल) वे चार कारण वैमनस्य माने मनमुटाव, व्यलीक झूठ बोलना, विप्रिय विरोध और क्रोध—ये है । अब मैं क्रमशः उनके लक्षणों को कहूंगा ।।२६६।।

(मूल) निद्रा, खेद, अलसगमन और स चिन्ह ताजा घाव से युक्त प्रिय को देखकर स्त्रियों को प्रिय के प्रति वैमनस्य हो जाता है ।।२६७।।

धर्मोपयोगी व्रत अर्थोपयोगी गृहकृत्य एवं कामोपयोगी कौमुदी महोत्सव आदि अवश्य-कर्त्तव्य कार्यों में प्रिय के विषय में स्मरण करना चाहिए अथवा प्रिय को स्मरण करना चाहिए यहां स्मरणा माने स्मृति है ।

उपालम्भ देने पर यह क्या बोलता है ऐसा परीक्षण है । यहां मूल—'प्रच्छन्नवचनेषु च' पाठ है किन्तु अभिबनभारतीकार के अनुसार परीक्षणवचस्सु च पाठ होना चाहिए । जब नायक अति आदर से कुछ पूछता है वह कुतूहल है । सभी कोई जब हँसता है तब हास्य है । अग्नि, पाला, हिम भूस्खलन आदि उत्पात है । वसु धन का वियोग माने नष्ट हो जाना या छीन लेना व्यसन है इनमें कुछ नही बोलने पर स्नेह शून्यता होती है । क्रोध से, युगपत् एक साथ किया ऐसा ।।२६३।२६४।।

निद्राभ्यसूयितावेक्षणेन रोषप्रकम्पमानाङ्ग्या ।
साध्विति सुष्ठ्विति वचनैः शोभत इत्येवमभिनेयम् ॥२६८॥
बहुधा वार्यमाणोऽपि यस्तस्मिन्नेव दृश्यते ।
संघर्षमत्सरात्तत्र व्यलीकं जायते स्त्रियाः ॥२६९॥
कृत्वोरसि वामकरं दक्षिणहस्तं तथा विधुन्वन्त्या ।
चरणविनिष्ठम्भेन च कार्योऽभिनयो व्यलीके तु ॥२७०॥

अभिनवभारती

अपराद्ध इत्युक्तं तत्रापराधं दर्शयितुमुपक्रमं करोति यत्र स्नेह इति । योनयो हेतवश्चत्वारः—वैमनस्यं, व्यलीकं, विप्रियं, मन्युरिति, तान् क्रमेण लक्षयति निद्राखेदालसगतिमित्यादिना (सुरते) गतया निद्रया ॥२६७॥

(असूयितेति) यदसूयितेनावेक्षणं तेन ॥२६८॥

(बहुधेति) यतो नायिकातो वार्यते तस्यामेव दृश्यत इति सम्बन्धः । (संघर्षेति) सम्यक् कृतो घर्षः संघर्षः ॥२६९।२७०॥

बालक्रीड़ा

(मूल) रोष से जिसके अंग कांप रहे हैं ऐसी नायिका के साधु सुष्ठ ऐसा ठीक है ! यह अच्छा है ! आप शोभायमान हो रहे हैं ! इस प्रकार निद्रावस्था में अभ्यसूया के साथ निरीक्षण करता हुआ अभिनय करे । अथवा—

(मूल) अभ्यसूया से निरीक्षण करके रोष से कांपते हुए अंगों वाली नायिका आप अच्छे हैं ! यह ठीक है ! ऐसे वचनों से अभिनय करें ॥२६८॥

(मूल) बारम्बार रोकने पर भी जो वहीं पर दिखाई पड़ता है वहां संघर्ष से मत्सरता ईर्ष्या से स्त्रियां झूठ बोलने लगती हैं ॥२६९॥

(मूल) बाया हाथ छाती पर रखे हुए एवं दाया हाथ हिलाती हुई नायिका के चरणों का जो विनिष्ठम्भ माने गति को रोक लेना, रुक जाना व्यलीकाभिनय होता है ॥२७०॥

पहले अपराद्ध ऐसा कहा था उसमें प्रश्न होता है कि क्या अपराध है । अतः अपराध को दिखाने के लिए उपक्रम करते हैं—जहां स्नेह है । इति ! ईर्ष्या के चार कारण हैं—वैमनस्य, व्यलीक, विप्रिय और मन्यु । इनके क्रम से लक्षण कहूंगा ॥२६५।२६६॥

लक्षण को कहते हैं निन्द्रा सुरत से, थकान में आती है । असूयित से ईक्षण करना ॥२६७।२६८॥

जिस नायिका के साथ सम्बन्ध करने में बहुत वार रोकने पर भी उसी में प्रेमासक्त मालूम पड़ता है । सम्यक् किया गया घर्ष संघर्ष है ॥२६९।२७०॥

जीवन्त्यां त्वयि जीवामि दासोऽहं त्वं च मे प्रिया ।
उक्त्वैवं योऽन्यथा कुर्याद्विप्रियं तत्र जायते ॥२७१॥
दूतीलेखप्रतिवचनभेदनैः क्रोधहसितरुदितैश्च ।
विप्रियकरणेऽभिनयः सशिरःकम्पैश्च कर्तव्यः ॥२७२॥
प्रतिपक्षसकाशात्तु यः सौभाग्यविकत्थनः ।
उपसर्पेत् सचिह्नस्तु मन्युस्तत्रोपजायते ॥२७३॥

अभिनवभारती

(उक्त्वैवमित्यादि) प्रतिज्ञातस्यारिपालनं विप्रियम् । दूतलेखादिमुखेन यानि प्रसादनार्थं प्रतिवचनानि तेषां भेदः दूषणमनङ्गीकरणम् । (वलयेत्यादि मन्युना तत्क्षण एव तनुत्वं गात्रे भवतीति वलयानां परिवर्तनं, वाससो रशनायाश्चोत्क्षेप इति ।

बालक्रीड़ा

(मूल) तुम्हारे जीते रहने पर मैं जीता हूँ ! मैं दास हूँ ! तुम मेरी प्यारी हो ! ऐसा कहकर भी जो विपरीत आचरण करता हो वह विप्रिय कहलाता है ॥२७१॥

(मूल) दूतीलेख एवं प्रतिवचन इनमें भेद भिन्नता दिखाने के लिए क्रुद्ध होना हँसना रोना, शिरः कम्पन्न इनसे विप्रिय का अभिनय करे ॥२७२॥

(मूल) जो प्रिय प्रतिपक्ष की नायिका के यहां से सौभाग्य की प्रशंसा करता हुआ सव्रण चिन्हों से युक्त हुआ लौटता है तो उस पर क्रोध हो जाता है ॥२७३॥

ऐसा करूंगा कहकर नही करना माने प्रतिज्ञा का परिपालन नही करना । विप्रिय है । ॥२७१॥

दूती के द्वारा पत्र भेज कर प्रसन्न करने के लिए जिन वाक्यों को कहा है उनका भेद माने दूषित करना, अङ्गीकार नही करना ॥२७२।२७३॥

मन्यु से अर्थात् दीनता से गात्र में उसी क्षग क्षीणता हो जाती है अतः वलयों का, कंकण का परिवर्त्तन होने लगता है । धौत वस्त्र का रसना का उत्क्षेपण होने लगता है ।

वलयपरिवर्तनैरथ सुशिथिलमुत्क्षेपणेन रशनायाः ।
मन्युस्त्वभिनेतव्यः सशङ्कितं बाष्पपूर्णाक्ष्या ॥२७४॥
दृष्ट्वा स्थितं प्रियतमं सशङ्कितं सापराधमतिलज्जम् ।
ईर्ष्यावचनसमुत्थैः खेदयितव्यो ह्युपालम्भैः ॥२७५॥
न च निष्ठुरमभिभाष्यो न चाप्यतिक्रोधनस्तु परिहासः ।
बाष्पोन्मिश्रैर्वचनै रात्मोपन्याससंयुक्तैः ॥२७६॥
मध्याङ्गुष्ठाग्रविच्यवात्पाणिनोरसि कृतेन ।
उद्वर्तितनेत्रतया प्रततैरभिवीक्षणैश्चापि ॥२७७॥

अभिनवभारती

केचित्सहृदयास्त्वाहुः—मन्युना सखीजनमध्य एवास्याबहुमानलक्षणा भवत्यप्रतिपत्तिरिति तत्कृतानि च वलयस्य परिवर्तनं लोचनभ्रमणादिकं, रशनोत्क्षेपणं यन्त्रोत्क्षेपणं चेति ॥२७४।२७६॥

मध्याङ्गुल्यङ्गुष्ठाग्रविच्यवादिति तत्स्थं मूलं व्यापारं स्मारयति ॥२७७॥

बालक्रीड़ा

(मूल) आंसूओं से व्याप्त नेत्र वाली अङ्गना सशङ्कित होकर वलय के बार-बार घुमाने और रसना का सुथिलता से क्षेपण कर के मन्यु का अभिनय करे ॥२७४॥

(मूल) सशंकित सापराध एवं लज्जिल प्रियतम को पास में बैठे हुए देखकर ईर्ष्यामय वाक्यों से उपालम्भ देती हुई खिन्न करें ॥२७५॥

(मूल) प्रियतम के प्रति न तो निष्ठुर शब्द कहे और न क्रोध के उद्भावक परिहास को करे। किन्तु आत्मोपन्यास पुरः सर अर्थात् मैंने आपके साथ ऐसा भला किया, मैंने वह उपकार किया – ऐसे वाक्यों से रोती हुई उपालम्भ करे ॥२७६॥

(मूल) अंगूठे से मध्य (बीच) की अंगुली को दबा कर छाती पर रखे हुए, नेत्रों को घुमाते हुए, टकटकी लगाकर देखने से कमर पर हाथों को घुमाने से विछिन्न रूप से

दूसरे सहृदय तो कहते हैं कि मन्यु के द्वारा सखियों के मध्य में ही इसको अनादन लक्षणा अप्रतिपत्ति होने लगती है उसके कारण वलय का परिवर्त्तन लोचन भ्रमण रशनोत्क्षेपण एवं यन्त्रोत्क्षेपण होता हैं । मध्यमा अंगुली एवं अंगुष्ठ के अग्र भाग के विच्यव से उनमें होने वाले व्यापार की याद करता है ॥२७४।२७७॥

कटिहस्तविवर्तनया विच्छिन्नतया तथाञ्जलेः करणात् ।
मूर्धभ्रमणनिह (कु) ञ्चितनिपातसंश्लेषणाच्चापि ।।२७८।।
अवहित्थवीक्षणाद्वा अङ्गुलिभङ्गेन तर्जनैर्ललितैः ।
एभिर्भावविशेषैरनुनयनेष्वभिनयः कार्यः ।।२७९।।
शोभसे साधु दृष्टोऽसि गच्छत्वं किं विलम्बसे ।
मा मां स्प्राक्षीः प्रिया यत्र तत्र या ते हृदि स्थिता ।।२८०।।
गच्छेत्युक्त्वा परावृत्तान्तरेण तु ।
केनचिद्वचनार्थेन प्रहर्षं योजयेत्पुनः ।।२८१।।

अभिनवभारती

(कटीति) कटीपार्श्वगतस्य हस्तस्य विवर्तमेन। अञ्जलेर्हस्तस्य पताकाभ्यां तु संश्लेषादित्यस्य विश्लेषणम् ।।२७८।।

अवहित्थेन गाम्भीर्येण यद्वीक्षणं, तेन चायतं स्थानकमाक्षिप्तम् । तत्र हि तस्य विनियोग उक्तः ।।२७९।२८०।।

(१२-१६४)। निरपेक्षभावता संभवतीत्याह गच्छेत्युक्त्वेति। विनिवृत्तिप्राधान्य मुत्तरं येनासौ विलम्बते ।।२८१।।

बालक्रीड़ा

अंजलि करने से मस्तक पर घुमाते हुए निपात द्वारा संश्लेषण करने से अवहित्थ (आकार) गोपन करते हुए देखने से अंगुली भंग करते हुए ललित तर्जनी से उत्पन्न हुए विशिष्ट भावों के साथ नायक को खुश करने के लिए अभिनय करना चाहिए ।।२७७।२७९।।

(मूल) वाह ! वाह ! बहुत अच्छे लग रहे हैं देख लिया हमने । जहां आपकी प्रिया हैं वहां जाइये क्यों देरी करते है—मुझे मत छूइये जो आपके हृदय में है उसे छूइये ।।२८०।।

(मूल) जाइये !—ऐसा कहकर घुम जाय, थोड़ी देर में फिर लौट कर आवे फिर उसके बाद भावमय वाक्य से नायक को प्रसन्न करें ।।२८१।।

कटि के पार्श्व में रखे हुए हाथ के निवर्त्तन से । हाथों की अञ्जलि के करने से पताकाकार हस्त के संश्लेषण का तो विश्लेषण अर्थ है ।।२७८।।

अवहित्थ से गाम्भीर्य से जो देखना और उससे आयत स्थान क्रम से आक्षिप्त है । वहां उसका विनियोग कह दिया ।।२७९।२८०।।

निरपेक्ष भाव का होना संभव है इसको कहते हैं । जाओ ! ऐसा कह कर जिसमें लौट आने का प्राधान्य है—ऐसा उत्तर देती है जिससे यह विलम्ब करता है ।।२८१।।

रभसग्रहणाच्चापि हस्ते वस्त्रे च मूर्धनि ।
कार्यं प्रसादनं नार्या ह्यपराधं समीक्ष्य तु ॥२८२॥
हस्ते वस्त्रेऽथ केशान्ते नार्याप्यथ गृहीतया ।
कान्तमेवोपसर्पन्त्या कर्तव्यं मोक्षणं शनैः ॥२८३॥
गृहीतयाथ केशान्ते हस्त्रेऽथवा पुनः ।
हुं मुञ्चेत्युपसर्पन्त्या वाच्यः स्पर्शालसं प्रियः ॥२८४॥
पादाग्रस्थितया नार्या किंचित्कुट्टमितोत्कटम् ।
अश्वक्रान्तेन कर्तव्यं केशानां मोक्षणं शनैः ॥२८५॥
अमुच्यमाने केशान्ते संजातस्वेदलेशया ।
हुं हुं मुञ्चापसर्पेति वाच्यः स्पर्शालसाङ्गया ॥२८६॥

अभिनवभारती

अपराधमिति, अल्पेऽपराधे मूर्धनि मध्ये ॥२८२॥

हस्ततले भूषितवस्त्रे ॥२८३।२८७॥

बालक्रीड़ा

(मूल) अपराध को देख कर भी मस्तक में हाथ रखे जबरन वस्त्र को ग्रहण करते हुए नायिका को प्रसन्न करना चाहिए ॥२८२॥

(मूल) हाथ, वस्त्र व केशों में पकड़ी हुई अपने पास आती हुई नायिका को धीरे से छोड़ दे ॥२८३॥

(मूल) केश वस्त्र और हाथ को पकड़ने पर हुं छोड़ो ! हुँ छोड़ो ! ऐसा कह कर जाती हुई नायिका प्रिय को कहे कि तुमको छूने में भी आलस्य होता है ॥२८४॥

(मूल) पादाग्र माने पैर के पंञ्जे के अगले भाग पर खड़ी नारी के द्वारा किञ्चित उत्कट कुट्टमित माने प्रिय को प्रेम में तिरस्कार करते हुए अश्वक्रान्त विधि से अर्थात् उछल कर धीरे से बालों को छुड़ाना चाहिए ॥२८५॥

(मूल) केशों को नही छोड़ने पसीने से युक्त हुई और स्पर्श करने में अलसाङ्गी नायिका प्रिय को हुँ हुँ छोड़ो ! भागो ! इस प्रकार का वचनकहे ॥२८६॥

अपराध को देखकर मस्तक के मध्य में ॥२८२॥

हस्त तल पर, भूषित वस्त्र में ॥२८३।२८७॥

गच्छेति रोषवाक्येन गत्वा प्रतिनिवृत्य च ।
केनचिद्वचनार्थेन वाच्यं यास्यसि नेति च ॥२८७॥
विधूननेन हस्तेन हुंकारं संप्रयोजयेत् ।
स चावधूनने कार्यः शपथैर्व्याज एव च ॥२८८॥
अक्ष्णोः संवरणे कार्यं पृष्ठतश्चोपगूहनम् ।
नार्यास्त्वपहृते वस्त्रे दीपच्छादनमेव च ॥२८९॥
तावत् खेदयितव्यस्तु यावत्पादगतो भवेत् ।
ततश्चरणयोर्याते कुर्याद्दूतीनिरीक्षणम् ॥२९०॥
उत्थाप्यालिङ्गयेच्चैव नायिका नायकं ततः ।
रतिभोगगता हृष्टा शयनाभिमुखी व्रजेत् ॥२९१॥

अभिनवभारती

व्याज इति व्रतोपवासोऽद्य मया प्रस्तुत इत्यादि ॥२८८।२९१॥

बालक्रीड़ा

(मूल) जाओ ! ऐसा रोषमय वाक्य कहती हुई नायिका चली जाय, फिर लौट आवे, फिर किसी विलक्षण भाव विशिष्ट वाक्य कहती हुई जाओगे कि नही ? ऐसा कहे ॥२८७॥

(मूल) हाथ को घुमाती हुई हुं हुं करे, प्रिय भी उस हस्त के अवधून पर बहाना करते हुए शपथ खाये ॥२८८॥

(मूल) धीरे धीरे पीछे से आकर नायिका के नेत्रों को ढांप ले, नारी को भी वस्त्र के अपहरण करने पर दीपक को ढांप देना चाहिए ॥२८९॥

(मूल) इस प्रकार तब तक प्रिय को खिन्न करती रहे जब तक वह पैरों पर न गिर, जाय जब पैरों में गिर जाय तब दूती का निरीक्षण करे ॥२९०॥

(मूल) उसके बाद नायिका पैरों में गिरे नायक को उठावे और आलिंगन करे। फिर रति से प्रसन्न हुई नायिका सोने के लिए अभिमुख होवे ॥२९१॥

व्याज माने छल करना कि आज मैंने व्रतोपवास करने का विचार किया है। अतः आज तुम से संभोगादि नही करूंगी ॥२८८।२९१॥

एतद्गीतविधानेन सुकुमारेण योजयेत् ।
यदा शृङ्गारसंयुक्तं रतिसंभोगकारणम् ॥२६२॥
यदा चा(यात)काशपुरुष परस्थवचनाश्रयम् ।
भवेत्काव्यं तदा ह्येष कर्तव्योऽभिनयः स्त्रिया ॥२६३॥
यदन्तःपुरसंबन्धं काव्यं भवति नाटके ।
शृङ्गाररससंयुक्तं तत्राप्येष विधिर्भवेत् ॥२६४॥

. अभिनवभारती

ननु वस्त्रापहारशयनादि रङ्गे निषिद्धमिति (किं) तेनोक्तेन, सत्यं लास्यदाने (स्थाने ?) तु तस्योपयोगः । इह तु कामोपचारप्रसङ्गादित्युक्तं, तदाह एतद्गीतविधानेनेति, न च नाटयेऽस्य सर्वात्मनानुपयोगः तथाहि यथा भाणकादौ ॥२६२॥

आकाशपुरुष इति (प्रविष्टपात्रेण) भावितः प्रधानोऽप्रविष्टः पुरुषो भवति तदा इदमिदं मया दृश्यत इति ब्रूयात् ॥२६३॥

एवं परस्थं वा यदा व्याख्यायते न च प्रत्यक्षत्वेनैतदुपयुज्यत इति दर्शयति यदन्तः पुरसंबन्धमिति ॥२६४॥

बालक्रीड़ा

(मूल) सुकुमार गाना गा कर ऐसी योजना करे जिससे प्रिय फिर संभोग के हेतु शृंगार से युक्त हो जाय ॥२६२॥

(मूल) जब रंग मंच पर आये हुए अन्य पुरुष के वचन पर काव्य आश्रित हो जाय तब स्त्री को ऐसा अभिनय करना चाहिए ॥२९३॥

(मूल) जब नाटक में शृङ्गार रस से युक्त काव्य अन्तःपुर के पुरुषों से संबद्ध हो जाय तब भी यही विधि करें ॥२६४॥

प्रश्न—वस्त्र का अपहरण और शयन आदि रंग स्थल में निषिद्ध है । ऐसा कहने से क्या तात्पर्य है सत्य कहते है किन्तु लास्य स्थान में तो उसका उपयोग है ही । यहाँ तो कामोपचार के प्रसङ्ग से कह दिया । उसको बतलाते है कि सुकुमार गीत विधान से इसकी योजना करनी चाहिए । ऐसा नही है कि नाटच में इसका सर्वथा अनुपयोग है जैसा कि भाण वगैरह में ॥२६२॥

आकाश पुरुष । प्रविष्ट पात्र से भावित प्रधान पुरुष जब अप्रष्ट के जैसा होता है तब ऐसा इसको मैंने देखा या देखता हूँ । ऐसा कहे ॥२६३॥

इसी तरह जब दूसरे में इसकी व्याख्या करते हैं तब प्रत्यक्ष रूप से इसका उपयोग नही होता है । इसको दिखाते हैं— यदन्तः पुरसम्बन्धमिति ॥२९४॥

न कार्यं शयनं रङ्गे नाट्यधर्मं विजानता ।
केनचिद्वचनार्थेन अङ्कच्छेदो विधीयते ॥२९५॥
यद्वा शयीतार्थवशादेकाकी सहितोऽपि वा ।
चुम्बनालिङ्गनं चैव तथा गुह्यं च यद्भवेत् ॥२९६॥
दन्तच्छेद्यं नखच्छेद्यं नीवीस्रंसनमेव च ।
स्तनान्तरविमर्दं च रङ्गमध्ये न कारयेत् ॥२९७॥
भोजनं सलिलक्रीडा तथा लज्जाकरं च यत् ।
एवंविधं भवेद्यद्यत्तद्रङ्गे न कारयेत् ॥२९८॥

अभिनवभारती

नन्वेवं सर्वमत्र प्राप्तमिति। ननूत्पलचेटादौ दृश्यते शयनमित्याशङ्क्याह यद्वा शयीतेति नात्र शयननिषेधेतात्पर्यम्, अपि तु चुम्बनादिनिषेध इति भावः ॥२९५।२९८॥

बालक्रीड़ा

(मूल) नाट्य धर्म के जानकार अभिनेता को रंग मंच पर शयन नही करना चाहिए किसी विलक्षण अर्थ वाले वाक्य से अङ्क का विच्छेद कर देना चाहिए ॥२९५॥

(मूल) अथवा किसी कारणवश एकाकी अथवा प्रिया के साथ सो सकता है तथा गुह्य छिपे तौर से चुम्बन और आलिङ्गन भी किये जा सकते हैं ॥२९६॥

(मूल) दन्तक्षत नखक्षत नीवी का वस्त्रग्रन्थिका स्रंसन विमोच और कुचमर्दन का रंग मंच पर अभिनय नही करना चाहिए ॥२९७॥

(मूल) इस प्रकार के और भी जो लज्जाजनक कार्य है उसको तथा भोजन और जल क्रीडा का रंग मंच पर अभिनय नही करना चाहिए ॥२९८॥

उत्कल देशीय चेट वगैरह का रंगमंच पर शयन करना देखा जाता है इस पर कहते है कि अच्छा सोया करे। यहां शयन का निषेध से तात्पर्य नही है अपितु चुम्बन आलिङ्गन के निषेध से है ॥२९५।२९८॥

पितापुत्रस्नुषाश्वश्रूदृश्यं यस्मात्तु नाटकम् ।
तस्मादेतानि सर्वाणि वर्जनीयानि यत्नतः ॥२६६॥
वाक्यैः सातिशयैः श्रव्यैर्मधुरैर्नातिनिष्ठुरैः ।
हितोपदेशसंयुक्तैस्तज्ज्ञः कुर्यात्तु नाटकम् ॥३००॥
एवमन्तःपुरकृतः कार्यस्त्वभिनयो बुधैः ।
समागमेऽथ नारीणां वाच्यानि मदनाश्रये ॥३०१॥
प्रियेषु वचनानीह यानि तानि निबोधत ।
प्रियः कान्तो विनीतश्च नाथः स्वाम्यथ जीवितम् ॥३०२॥

अभिनवभारती

पितापुत्रेत्यादि । ततश्च रसो भज्येत, स हि साधारणान्योन्यानुप्रवेशप्राण इति प्रत्यर्पितं वदामः ॥२६६।३०१॥

एतत्सामान्याभिनयमध्ये वाचिकोऽप्यभिनयोऽस्तीत्याशयेनाह प्रियेषु वचनानीति ॥३०२।३०८॥

बालक्रीड़ा

(मूल) क्योंकि नाटक को पिता, पुत्र, पुत्री, पुत्र वधू, एवं सास सभी कोई देख सकते हैं । अतः हमें सब कार्यो का यत्न पूर्वक वर्णन करना चाहिए ॥२६६॥

(मूल) अभिनय के जानकार लोग अतिशय सम्पन्न, सुनने में प्रिय, मधुर निष्ठुरता रहित एवं उपदेशमय वाक्यों से नाटक का अभिनय करें ॥३००॥

(मूल) इस प्रकार बुध लोग अन्तःपुर सम्बन्धी अभिनय करे । और इसी प्रकार काम सम्बन्धी नारियों के समागम के समय में भी कहना चाहिए ॥३०१॥

(मूल) प्रिय को जिन शब्दों से पुकारे या कहे उनको समझें । प्रिय, कान्त, विनीत नाथ, स्वामी अथ च जीवित और नन्दन इस प्रकार के शब्दों का अभिप्रीत नायक के विषय में प्रयुक्त करने चाहिए ॥३०२॥

पिता पुत्र वगैरह के रहने से रस भंग हो ही जायगा । उसका तो सर्व साधारण में अनुप्रविष्ट होना प्राण है । ऐसा प्रत्यर्पित किया हुआ कहते है ॥२९६।३०१॥

इस सामान्याभिनय के मध्य में वाचिक अभिनय भी होता है । इस आशय से कहते है—कि प्रियेषु वचनानि ॥३०२।३०८॥

नन्दनश्चेत्यभिप्रीते वचनानि भवन्ति हि ।
दुःशीलोऽथ दुराचारः शठो वामो विकत्थनः ॥३०३॥
निर्लज्जो निष्ठुरश्चैव प्रियः क्रोधेऽभिधीयते ।
यो विप्रियं न कुरुते न चायुक्तं प्रभाषते ॥३०४॥
तथार्जवसमाचारः स प्रियस्त्वभिधीयते ।
अन्यनारीसमुद्भूतं चिह्नं यस्य न दृश्यते ॥३०५॥
अधरे वा शरीरे वा स कान्त इति भाष्यते ।
संक्रुद्धेऽपि हि यो नार्या नोत्तरं प्रतिपद्यते ॥३०६॥
परुषं वा न वदति विनीतः सोऽभिधीयते ।
हितैषी रक्षणे शक्तो न मानी न च मत्सरी ॥३०७॥
सर्वकार्येष्वसंमूढः स नाथ इति संज्ञितः ।
सामदानार्थसंभोगैस्तथा लालनपालनैः ॥३०८॥

बालक्रीड़ा

(मूल) क्रोध में प्रिय को दुःशील, दुराचार शठ, वाम विकत्थन निर्लज्ज और निष्ठुर इन शब्दों से सम्बोधन करे ॥३०३॥

(मूल) जो न तो विरुद्ध आचरण करता है और न अटपट बोलता है किन्तु जो सरलता से व्यवहार करता है वह प्रिय कहलाता है ॥३०४॥

(मूल) जिसके अधरोष्ठ एवं शरीर पर स्त्री के संभोग से उत्पन्न चिन्ह नही दिखाई पड़ें वह कान्त कहलाता है ॥३०५॥

(मूल) जो नारी के क्रुद्ध होने पर भी उत्तर नही देता है अथवा न कठोर शब्द को कहता है वह विनीत कहलाता है ॥३०६॥

(मूल) जो हित चाहता है और रक्षा करने में समर्थ है तथा न कभी मान करता है अर्थात् गुस्सा करता है और न मात्सर्य करता हैं। किसी भी काम में समूढ नही है अर्थात् चतुर है उसकी नाथ यह संज्ञा है ॥३०७॥

(मूल) जो साम दान धनके संभोग से तथा लालन पालन से नारी का सेवन करता है वह स्वामी कहलाता है ॥३०८॥

नारीं निषेवते यस्तु स स्वामीत्यभिधीयते ।
नारीप्सितैरभिप्रायैर्निपुणं शयनक्रियाम् ॥३०६॥
करोति यस्तु संभोगे स जीवितमिति स्मृतः ।
कुलीनो धृतिमान्दक्षो दक्षिणो वाग्विशारदः ॥३१०॥
श्लाघनीयः सखीमध्ये नन्दनः सोऽभिधीयते ।
एते वचनविन्यासा रतिप्रीतिकराः स्मृताः ॥३११॥
तथा चाप्रीतिवाक्यानि गदतो में निबोधत ।
निष्ठुरश्चासहिष्णुश्च मानी धृष्टो विकत्थनः ॥३१२॥

अभिनवभारती

नारीप्सितैरिति न तु स्वोचितैरिति यावत् ॥ ३०६।३१०॥

रतिप्रीतीति रतौ सत्यां या प्रीतिः रतौ क्रोधोऽपि हि भवति परितोषश्च सुतादावुभययप्यु पात्तम् ॥३११।३१७॥

बालक्रीड़ा

(मूल) जो पुरुष, नारी जैसा संभोग चाहती है जिस प्रकार से मैथुन करना चाहती है उन सभी अभिप्रायों के अनुसार बड़ी निपुणता के साथ शयन क्रिया को करता है वह जीवित कहलाता है ॥३०६॥

(मूल) जो कुलीन है वह धृतिमान् है सदा अनुकूल रहता है और बोलने में विशारद है और सखियों में श्लाघनीय है अर्थात् सखियां जिसकी प्रशंसा करती हैं वह नन्दन है ॥३१०॥

(मूल) ये सब वचन विन्यास रति एवं प्रीति को करते है । और जो अप्रीति कर वाक्य है उनको मैं कहता हूँ उन्हें समझो ॥३११॥

(मूल) जो निष्ठुर है सहन नही करता है यानी धृष्ठ है विकत्थन है तथा जिसका चित्त अव्यस्थित है वह दुःशील कहलाता है ॥३१२॥

नारियों के ईप्सित न कि अपने ईप्सित ॥३०६।३१०॥

रतिप्रीतिकरा रति होने पर प्रीति होती है। रति में क्रोध भी होता है। और परितोष भी होता है पुत्रादि में तो दोनों होते हैं ॥३११।३१७॥

अनवस्थितचित्तश्च दुःशील इति स स्मृतः ।
ताडनं बन्धनं चापि यो विमृश्य समाचरेत् ॥३१३॥
तथा परुषवाक्यश्च दुराचारः स तन्यते ।
वाचैव मधुरो यस्तु कर्मणा नोपपादकः ॥३१४॥
योषितः किञ्चिदप्यर्थं स शठः परिभाष्यते ।
वार्यते यत्र यत्रार्थे तत्तदेव करोति यः ॥३१५॥
विपरीतनिवेशी च स वाम इति संज्ञितः ।
सरसव्रणचिह्नो यः स्त्रीसौभाग्यविकत्थनः ॥३१६॥
अतिमानी तथा स्तब्धो विकत्थन इति स्मृतः ।
वार्यमाणो दृढतरं यो नारीमुपसर्पति ॥३१७॥

बालक्रीड़ा

(मूल) जो ताडन और बन्धन का विमर्श करके करता है वह दुःशील माना गया है ॥३१३॥

(मूल) जो वाणी से केवल मधुर है क्रिया में ईष्ट का उपपादक नही है योषित के अभिप्रीत किसी प्रयोजन का सम्पादन नही करता है वह शठ कहलाता है ॥३१४॥

(मूल) जिस जिस वस्तु के विषय में उसको रोका जाता है उसी उसी को वह करता है इस तरह जो विपरीत कार्यो का निवेश आग्रह रखता है या करता है उसकी वाम यह संज्ञा है ॥३१५॥

(मूल) ताजा दन्तक्षत नखक्षत के चिन्हों से युक्त है और परस्त्री के सौभाग्य की प्रशंसा करता है, मानी है तथा स्तब्ध है वह विकत्थन माना गया है ॥३१६॥

(मूल) जो बड़ी दृढ़ता से परस्त्री के साथ संभोग करने से रोका जाने पर भी उसके पास जाता है उससे संम्भोग करता है वह निर्लज्ज है। क्योंकि सचिन्ह है। अत एव अपराधी है ॥३१७॥

सचिह्नः सापराधश्च स निर्लज्ज इति स्मृतः ।
योऽपराद्धस्तु सहसा नारीं सेवितुमिच्छति ॥३१८॥
अप्रसादनबुद्धिश्च निष्ठुरः सोऽभिधीयते ।
एते वचनविन्यासाः प्रियाप्रियविभाषिताः ॥३१९॥
नर्तकीसंश्रिताः कार्या बहवोऽन्येऽपि नाटके ।
एष गीतविधाने तु सुकुमारे विधिर्भवेत् ॥३२०॥
शृङ्गाररससंभूतो रतिसंभोगखेदनः ।
यच्चैवाकाशपुरुषं परस्थवचनाश्रयम् ॥३२१॥

अभिनवभारती

सहसेत्यप्रसाद्य ॥३१८।३१९॥
अन्येऽपीति उदाहरणमेतदित्यर्थः ।
पूर्वोक्तमेवोपसंहरति एष गीतविधान इति ॥३२०॥
शृङ्गारे रसे आकाशपुरुषादौ ॥३२१॥

बालक्रीड़ा

(मूल) जो अपराधी है तथा अपनी प्रिया से संभोग करता है, प्रसन्न किये बिना जबरन् संभोग करता है या संभोग करना चाहता है वह निष्ठुर है ॥३१८॥

(मूल) ये प्रिय एवं अप्रिय के विषय के वचन-विन्यास को कह दिया है ॥३१९॥

(मूल) नाटक में नर्तकी को लक्ष्य करके अन्य बहुत से वचन विन्यासों को करना चाहिए । सुकुमार गीत विधान के विषय में यह विधि होती है ॥३२०॥

(मूल) शृङ्गार रस से सम्भूत एवं रति रूपी सम्भोग से, नायक के खिन्न होने से सुकुमार विधि को करना चाहिये । परदे के पीछे नेपथ्य में बोलने वाला पुरुष आकाश पुरुष होता है, उस पुरुष के वचन परपुरुष के वाक्यों के सहारे होते है ॥३२१॥

सहसा माने बिना प्रसन्न किये ॥३१८।३१९॥

अन्य भी उदाहरण उसके हैं पूर्वोक्त का उपसंहार करता है यह गीत विधान में विधि होती है ॥३२०॥

शृङ्गार रस में । आकाश पुरुष वगैरह में ॥३२१॥

श्रृङ्गार एवं वाच्यं स्यात्तत्राप्येष क्रमो भवेत् ।
यद्वा पुरुषसंबन्धं कार्यं भवति नाटके ॥३२२॥
श्रृङ्गाररससंयुक्तं तत्राप्येष क्रमो भवेत् ।
एवमन्तःपुरगतः प्रयोज्योऽभिनयो भवेत् ॥३२३॥
दिव्याङ्गनानां तु विधिं व्याख्यास्याम्यनुपूर्वशः ।
नित्यमेवोज्ज्वलो वेषो नित्यं प्रमुदितं मनः ॥३२४॥
नित्यमेव सुखः कालो देवानां ललिताश्रयः ।
न चेर्ष्या नैव च क्रोधो नासूया न प्रसादनम् ॥३२५॥

अभिनवभारती

एवमिति प्रीत्या कोपेन वा, यदा वाच्यवचनं स्यात् तत्राप्येष एव वचनक्रमः । पुरुषसंबन्धमिति प्रत्यक्षपुरुषयुक्तमित्यर्थः ॥३२२।३२३॥

दिव्यवेश्याङ्गनाभिस्तु राज्ञां भवति संभोग इति तत्र सामान्याभिनयमाह

बालक्रीड़ा

(मूल) श्रृङ्गार में भी पूर्वोक्त की तरह ही कहना चाहिये क्योंकि वहाँ भी यही विधि है । अथवा नाटक में जो भी कर्तव्य है वह किसी नायक के सम्बन्ध से होता है ॥३२२॥

(मूल) जो भी श्रृंगार से संयुक्त कार्य है उसमें भी यही क्रम होता है अन्तः पुरगत अभिनय भी इसी प्रकार होता है। अब क्रमशः विद्याङ्गनाओं की विधि को कहूँगा ॥३२३॥

(मूल) देवताओं का वेश नित्य ही उज्ज्वल होता है उनका मन नित्य प्रसन्न रहता है तथा ललित क्रियाओं के कारण भी उनका समय, काल भी नित्य सुखमय होता है क्योंकि देवताओं में न इर्ष्या होती है न क्रोध होता है न असूया माने दूसरे के गुणों में दोष निकालने की आदत होती है और न ही प्रमाद होता है अतः किसी के नाराज न होने से प्रसाधन क्रिया की आवश्यकता नही होती है ॥३२४।३२५॥

इस तरह प्रीति से अथवा कोप से जब वाच्य हो कथन हो तब भी वहां पर भी यही वचन का क्रम रहेगा । पुरुष का सम्बन्ध माने पुरुष के साथ प्रत्यक्ष योग ॥३२२।३२३॥

दिव्य वेश्याओं के साथ राजाओं का सम्भोग होता है। उस सामान्याभिनय

दिव्यानां दृश्यते पुंसां शृङ्गारे योषितां तथा ।
ये भावा मानुषाणां स्युर्यदङ्गं यच्च चेष्टितम् ॥३२६॥
सर्वं तदेव कर्तव्यं दिव्यैर्मानुषसङ्गमे ।
यदा मानुषसंभोगो दिव्यानां योषितां भवेत् ॥३२७॥
तदा सर्वाः प्रकर्तव्या ये भावा मानुषाश्रयाः ।
शापभ्रंशात्तु दिव्यानां तथा चापत्यलिप्सया ॥३२८॥
कार्यो मानुषसंयोगः शृङ्गाररससंश्रयः ।
पुष्पैर्भूषणजैः शब्दैरदृश्याऽपि प्रलोभयेत् ॥३२९॥
पुनः संदर्शनं दत्त्वा क्षणादन्तरिता भवेत् ।
वस्त्राभरणमाल्याद्यैर्लेखसंप्रेषणैरपि ॥३३०॥

अभिनवभारती

नित्यमेवेत्यादि । अत्र श्लोकद्वये यद्यपीत्यध्याहारेण ये भावा इत्यत्र च तथापीत्यध्याहारेण सङ्गतिः कार्याः ॥३२४॥

विप्रलम्भो हि जीवितेऽभिमान इति भावः ॥३२५।३३०॥

बालक्रीड़ा

(मूल) शृङ्गार के विषय में जो भाव पुरुषों के होते हैं वही भाव दिव्य पुरुषों दैवता देवाङ्गनाओं के होते हैं मनुष्यों में जो अङ्गिक व्यवहार और चेष्टाएँ होती हैं वही सब क्रियाएँ दिव्य मनुष्यों के मिलन में करनी चाहिए । अतः जब मनुष्यों में सम्भोग होता है तो दिव्याङ्गनाओं में भी होता है मनुष्यों में जो भाव होते है वही सब देवताओं में भी होते हैं । शाप से पदच्युत होने पर तथा अपत्य की लिप्सा से देवताओं में भी मनुष्य जैसे कार्य होते हैं ॥३२६।३२८॥

(मूल) शृङ्गार रस के सम्बन्ध में देवताओं एवं मनुष्यों का संयोग कर देना चाहिए पुष्पों के सौरभ एवं भूषणों की झंकार से अदृश्य नायिका को भी लुब्ध करे फिर दिखाई देकर क्षण भर में छिप जाना चाहिए ॥३२९।३३०॥

को कहते हैं नित्य ही इत्यादि । यहां दो श्लोकों में नित्यमेव के साथ एक जगह यद्यपि का और दूसरी जगह तथापि का अध्याहार करने से ये भावाः की संगति करनी चाहिए । विप्रलम्भ से तात्पर्यजी ने में अभिमान से ॥३२४।३३०॥

ईदृशैरुपचारैस्तु समुन्माद्यस्तु नायकः ।
उन्मादनात्समुद्भूतः कामो रतिकरो भवेत् ॥३३१॥
स्वभावोपगतो यस्तु नासावत्यर्थभाविकः ।
एवं राजोपचारो हि कर्तव्योऽभ्यन्तराश्रयः ॥३३२॥
बाह्यमप्युपचारं तु प्रवक्ष्याम्यथ वैशिके ॥३३३॥

इति भरतीये नाट्यशास्त्रे सामान्याभिनयो
नामाध्यायो द्वाविंशः ।

अभिनवभारती

समुन्माद्य इत्यत्र हेतुमाह उन्मादनादिति एतच्च विक्रमोर्वश्यां स्फुटमेव दृश्यताम् । इति शिवम् ॥३३१।३३३॥

सामान्याभिनयः सोऽयं ग्रन्थिस्थानेषु सङ्गतः ।
कृतोऽभिनवगुप्तेन शिवस्मरणशालिना ॥

इति महामाहेश्वराभिनवगुप्तविरचितायां नाट्यवेदवृत्तावभिनवभारत्यां
सामान्याभिनयो द्वाविंशः ॥

बालक्रीड़ा

(मूल) वस्त्र आभरण, माला तथा लेख सम्प्रेषण रूपी उपचारों से नायक को उन्मत्त कर देना चाहिए क्योंकि उन्मत्त कर के उत्पन्न होने वाला, सम्पादित होने वाला काम रतिकर होता है ॥३३१॥

(मूल) जो स्वाभाविक कार्य है उसको अत्यन्त भावनाश्रय, भावना प्रधान नहीं करना चाहिए। इस तरह राजाओं का उपचार अन्तःपुर में ही करना चाहिए और बाह्य उपचारों को मैं वैशिक उपचार के अन्तर्गत अध्याय में कहूँगा ॥३३२।३३३॥

(मूल) इस प्रकार भरत के नाट्यशास्त्र के सामान्याभिनय नाम बाइसवां अध्याय समाप्त हुवा।

समुन्मान्द्यः इसमें हेतु को कहते हैं उन्मादन से। इसको विक्रमोर्वशी में स्पष्ट रूप से आप लोग देखें ॥३३१।३३३॥

इति आचार्य मधुसूदनशास्त्री की कृति भारतीय नाट्यशास्त्र के बाइसवें अध्याय की बालक्रीड़ा हिन्दी टीका समाप्त हुई।

श्रीः

नाटयशास्त्रम्

त्रयोविंशोऽध्यायः

विशेषयेत्कलाः सर्वा यस्मात्तस्मात्तु वैशिकः ।
वेशोपचारे साधुर्वा वैशिकः परिकीर्तितः ॥१॥

अभिनवभारती—त्रयोविंशोऽध्यायः

पुंसामशक्तापि तदेकभावमादर्शयन्ती बहुभावपूर्णा ।
वेश्यामतिर्निर्वृतिधाम यत्स्था तस्मै नमस्तात्परमेश्वराय ॥

सामान्याभिनयशेष एव वैशिक इत्युपसंहृतं वृत्तपूर्वेऽध्याये—बाह्यमप्युपचारं तु प्रवक्ष्याम्यथ वैशिके– इति, वैशिको वक्तव्य इति सङ्गतिः । तदुपक्रममाणो...मानेन तावन्निरुक्तमाह विशेषयेदिति । विशेषण जानाति, तेनातिकामयतीति च धात्वर्थो

बालक्रीड़ा

(मूल) अब तेवीसवें अध्याय को आरम्भ करते हैं । क्योंकि जिससे वह सभी कलाओं को विशेष रुप से करता है उससे वह वैशिक कहलाता है । अथवा जो वेशोपचार में कुशल है वह वैशिक कहलाता है ॥१॥

अथ अब २३ वें अध्याय की अभिनवभारती की हिन्दी टीका बालक्रीडा का आरम्भ करते हैं । पुंसाम् । पुरुषों की अपेक्षा अशक्त असमर्थ हुई भी शक्ता उसी वाक् में भाव को दिखाती हुई भी बहुतों में भाव से पूर्णा वेश्या की मति जिस परमेश्वर में स्थित हुई अर्थात् भावमयी हुई निर्वृति निर्वाण की धाम अर्थात् मोक्ष का पात्र हो जाती है उस परमेश्वर के लिए नमस्कार होवे ।

पहले बीते हुए बाइसवें अध्याय में अन्त में,—अब मैं वैशिक के विषय में बाह्य उपचार को कहूंगा । इस तरह उपसंहार किया है अतः वैशिक में सामान्याभिनय अंग ही है अतः वैशिक वक्तव्य है यह अध्यायारम्भ की सङ्गति है । उसका उपक्रम करते हुए आचार्य प्रमाण से निर्वचन कहते है विशेषयेत । प्रमाण है जानाति, इच्छति यतते । अर्थात् पहले जानता है तब ज्ञान के अनुसार इच्छा करता है फिर यत्न करता है । प्रकृत में वि पूर्वक शेष धातु का अर्थ है जानता है तब उस जानने के आधार पर

यो हि सर्वकलोपेतः सर्वशिल्पविचक्षणः ।
स्त्रीचित्तग्रहणाभिज्ञो वैशिकः स भवेत्पुमान् ॥२॥

अभिनवभारती

लक्षणमिति हि तद्विदो वैशिकः वेश्याकामुकः, स च सर्वान् कामान् विशेषयत्यति-वैदग्ध्यात् । अथ व्याकरणोचितमस्य निर्वचनमाह वेश्योपचारे साधुर्वेति । वेशो वेश्या जनाश्रयः तत्रभवा इत्यर्थः । भवार्थमेव विभजति साधुरित्यनेन ॥१॥

तस्मादसौ कलासु विशेषज्ञ इत्याह यो हि सर्वकलोपेत इति ॥२॥

बालक्रीड़ा

(मूल) जो सब कलाओं से युक्त है और सभी शिल्प विद्याओं में विचक्षण है । तथा स्त्रियों के चित्त को ग्रहण करने में अभिज्ञ है वह पुरुष वैशिक है ॥२॥

अत्यन्त कामना करता हैं क्योंकि धात्वर्थ ही लक्षण होता है ऐसा लक्षण शास्त्र के जानकार कहते हैं । अतः धात्वर्थ 'अतिकामयति' के आधार पर वैशिक का अर्थ प्रस्तुत बाह्य उपचार है अतः प्रकृत में केवल कामुक नही किन्तु वेश्याकामुक अर्थ है । वह वेश्याकामुक अतिविदग्धता से कामदेव के सभी प्रकारों को विशेष रूप से करता है । क्योंकि विदग्धता के पांच कारणों में एक कारण वेश्या है । जैसा कि कहते हैं—

देशाटन० १ पण्डितमित्रताच २ वाराङ्गना ३ राजसभाप्रवेशः ४ शास्त्रावलोको बहुधावधानात् विदग्धताकारणमाहुः पञ्च ।

प्रमाण के अनुसार निर्वचन करने के अनन्तर अब व्याकरणोचित निर्वचन को कहते हैं । तत्र साधुः इस पाणिनि व्याकरण के सूत्र के आधार पर वेश्याओं के उपचार में जो साधु है । यहां पहले वेश्या शब्द की साधनिका को दिखाते हैं । वेशो वैश्या जनाश्रयः—वेश का अर्थ है वेश्याजन का आश्रय, उसमें होने वाली वेश्या होती है साधु इससे तत्र भवः इस भवार्थ का विभाग करते हैं ॥१॥

यस्मात् वेश्याओं के उपचार में साधु है तस्मात इससे वह सब काम की कलाओं में विशेष निपुण है इसलिए कहते हैं कि जो सब काम की कलाओं से युक्त है ॥२॥

गुणास्तस्च तु विज्ञेयाः स्वशरीरसमुत्थिताः ।
आहार्याः सहजाश्चैव त्रयस्त्रिशत्समासत ॥३॥
शास्त्रविच्छिल्पसम्पन्नो रूपवान् प्रियदर्शनः ।
विक्रान्तो धृतिमाश्चैव वयोवेषकुलान्वितः ॥४॥
सुरभिर्मधुरस्त्यागी सहिष्णुरविकत्थनः ।
अशङ्कितः प्रियाभाषी चतुरः शुभदः शुचिः ॥५॥
कामोपचारकुशलो दक्षिणो देशकालवित् ।
अदीनवाक्यः स्मितवान् वाग्मी दक्षः प्रियंवदः ॥६॥
स्त्रीलुब्धः संवि ागी च श्रद्धधानो दृढस्मृतिः ।
गम्यासु चाप्यविस्रम्भी मानी चेति हि वैशिकः ॥७॥

अभिनवभारती

आहर्याः शास्त्रज्ञतादयः । सहजा रूपलावण्यादयः ॥३।६॥

गम्यासु चाप्यविस्रम्भीति सहसैव नाभियुक्तः, अपि तु स्फुटभावमन्वेष्यति ॥७॥

बालक्रीड़ा

(मूल) उस वैशिक के संक्षेप में शरीर से उत्पन्न होने वाले शारीरिक आहार्यिक एवं स्वाभाविक तैंतीस गुण होते हैं ॥३॥

(मूल) शास्त्र का जानकार, शिल्प क्रिया में निपुण, रूपवान, देखने में प्रिय पराक्रमी, धैर्यशील, वेषभूषा में उचित, उच्च कुल का खानदानी, सुगन्ध युक्त, सुन्दर मधुर मीठा, त्यागी, सहिष्णु सहनशील, बड़-चढ़ कर न बोलने वाला, डींग न हाँकने वाला, शंका रहित, मीठा बोलने वाला, चतुर, सुख देने वाला, पवित्र, काम सम्बन्धी क्रियाओं में कुशल, दक्षिण अर्थात् उदार, सरल, किस देश व काल में क्या करना चाहिए कैसा कहना चाहिए—इसका जानकार, हीन भावों के द्योतन के लिए दीन वाक्य न बोलने वाला, हँसमुख, सार्थक बातों को बोलने वाला, दक्ष माने क्रिया दक्ष, प्रियंवद, स्त्री लोभी, सबको बांट कर खाने वाला, आध्यात्मिक भावनाओं में श्रद्धा रखने वाला, दृढ़ब्रत अपने सिद्धान्त का पक्का, गम्यस्त्री जिस स्त्री से सम्भोग किया जाता है उसमें भी विश्वास न करने वाला और मानी सम्मान देने वाला, इन गुणों से युक्त पुरुष वैशिक कहलाता है ॥४।७॥

आहार्य अर्थात् शास्त्रज्ञतादि । सहज अर्थात् रूपलावण्यादि है ॥३॥६॥

गम्याओं में, सम्भोग करने के योग्य स्त्रियों में अविश्वास से सहसा ही अभिगमन, अभियोग नही करता है अपितु स्फुट भावों को अन्वेषण करेगा ॥७॥

अनुयुक्तः शुचिर्दक्षो दक्षिणः प्रतिपत्तिमान् ।
भवेच्चित्राभिधायी च वयस्यस्तस्य तद्गुणः ।।८।।
विज्ञानगुणसम्पन्ना कथिनी लिङ्गिनी तथा ।
प्रातिवेश्या सखी दासी कुमारी कारुशिल्पिनी ।।९।।
धात्री पाषण्डिनी चैप तथा रङ्गोपजीविनी ।
प्रोत्साहनेऽथ कुशला मधुरकथा दक्षिणाथ कालज्ञा ।।१०।।
लडहा संवृतमन्त्रा दूती त्वेभिर्गुणैः कार्या ।
तयाप्युत्साहनं कार्यं नानादर्शितकारणम् ।।११।।

अभिनवभारती

भवेत् चित्राभिधायीति वक्रोक्तिकुशलः । तस्येति वैशिकस्य ।।८।।

कथिनी बृहत्कथादिलम्भ[न]कथनाकर्णनकुशला । लिङ्गिनी चित्रकरी । प्रातिवेश्या निकटावसथस्था ।।९।।

बालक्रीड़ा

(मूल) अनुयुक्त, अनुकूल योग करने वाला अर्थात् आज्ञाकारी, शुचि, दक्ष, दक्षिण माने उदार, प्रतिपत्तिमान् माने प्रत्युत्पन्नमति और विलक्षण बातों को या कथाओं को कहने वाला चित्राभिधायी जो होता है वह उस वैशिक का वयस्य होता है जो उसी के सामान गुणशाली है ।।८।।

(मूल) विज्ञान माने विज्ञता अर्थात् समझदारी के गुणों से सपन्न कथिनी कहानी कहने वाली लिङ्गिनी सन्यासिनी, प्रतिवेश्या पड़ोसिन, सखी, दासी, कुमारी, कारुशिल्पिनी कुह्मारिन्, धात्री, पाषण्डिनी रङ्ग का नाटयमञ्च नृत्य एवं नृत्य के मञ्च से जीविका चलाने वाली, प्रोत्साहन देने में कुशल, मीठा बोलने वाली, दक्षिणा सरला, समय को पहिचान ने वाली, लडहा सुन्दरी एवं मन्त्रणा को गुप्त रखने वाली ऐसे गुणों वाली स्त्री को दूती बनाना चाहिए। वह दूती भी अनेक हेतुओं को दिखाती हुई प्रोत्साहन करे ।।९।११।।

चित्राभिधायी को वक्रोक्तिकुशल होना चाहिए । उस वैशिक को ।।८।।

कथिनी—वृहत्कथा वगैरह के सहारे कहानी कहने और सुनने में कुशल । लिङ्गिनी चित्रकरी । वस्तुतः लिङ्गिनी का अर्थ संन्यासिनी होना चाहिए । प्रतिवेश्या पड़ोसिन माने निकट के आवसथ घर में रहने वाली ।।९।।

यथोक्तकथनं चैव तथा भावप्रदर्शनम्।
न जडं रूपसम्पन्नं नार्थवन्तं न चातुरम् ॥१२॥

अभिनवभारती

पाषण्डिनी व्रतिनी। रङ्गोपजीविनी रजकस्त्री अथवा चारणस्त्री। प्रोत्साहने कुशलेत्यादीनि सर्वासां विशेषणानि। प्र उत्: सह धातोः प्रोत्साहः प्रोत्साहनमिति द्वौं णिचौ। प्रोत्साहयति नायिका तु नायकस्तया संमुखीकारयतीत्यर्थः ॥१०।११॥

तस्या व्यापारान्तरमाह यथोक्तेति संमुखीकरणाँ सन्देशार्पणं काम्याया भावपरीक्षणं चेति द्वितयमनया कार्यमित्यर्थः। जडः करणीयानि शक्नोति कर्तु प्रत्युत्पन्नमतिसाध्यानि कृत्यानीत्याह। रूपेणार्थेन वा युक्तः स्वार्थान्ध तामाहरेत्। आतुरो हि दृश्यमान एव जुगुप्सां जनयति, स च रतौर्निरपेक्ष इत्यातुरो न कामदूतः ॥१२॥

बालक्रीड़ा

(मूल) जैसा वक्ता ने कहा उसको वैसा ही कहने वाला और उसी तरह के भाव को प्रतिदर्शित करने वाला दूत या दूती होनी चाहिए किन्तु जड एवं जड़ा रूपिणी और रूपवान्, धनी और धनिका, रोगी और रोगिणी, दूत एवं दूती को, बुधो को नही करना चाहिए ॥१२॥

पाषण्डिनी—ब्रत का छल करके पाप के खण्ड को करने वाली। वस्तुतः संन्यासिनी लिङ्गिनी का अर्थ व्रतिनी होना चाहिए और पाषण्डिनी का चित्रकरी चित्र माने नई नई बातों को करने वाली। रङ्गो का उपजीवन करने वाली रजक की स्त्री रङ्गरेज, रंगाई करने वाली औरत। अथवा रङ्गमञ्च का उपजीवन करने वाली चारण की स्त्री। प्रोत्साहन देने में कुशला। ये सब के विशेषण हैं। यहां प्र उत् सह धातु से प्रोत्साह बना उसके माने प्रोत्साहन। यहां णिच् प्रत्यय है। अतः नायिका नायक को प्रोत्साहन देती है अर्थात् नायक उससे संमुख कराया जाता है ॥१०।११।

उसके अन्य कार्यो को कहते हैं—जैसा सन्देश कहा वैसा ही उसको कह दिया संमुख करने के लिए सन्देश का अर्पण कर दिया और जिसको नायक चाहता है उस कान्या के भावों की परीक्षा करना—ये दो कार्य उसके द्वारा किये जाने चाहिए। जड वह है जो प्रत्युत्पम्नमति से साध्यकरणीय कृत्यों कार्यों को नही कर सकता है। रूप से और अर्थ से सम्पन्न युक्त पुरुष अपने अर्थ में मतलब स्वयं में अन्धा होकर नायिका का आहरण करता है। आतुर तो दृश्यमान हो जुगुप्सा को पैदा करता है वह रति के विषय में निरपेक्ष ही रहता है इसलिए आतुर कामदूत नही होता है ॥१२॥

दूतं वाप्यथवा चेटीं बुधः कुर्यात्कदाचन ।
कुलभोगधनाधिक्यैः कृत्वाऽधिकविकत्थनम् ॥१३॥
दूती निवेदयेत्काममर्थांश्चैवानुवर्णयेत् ।
न चाकामप्रवृत्तायाः क्रुद्धाया वापि सङ्गमः ॥१४॥
नानुपायः प्रकर्तव्यो दूत्या हि पुरुषाश्रयः ।
उत्सवे रात्रिसञ्चार उद्याने मित्रवेश्मनि ॥१५॥
धात्रीगृहेषु सख्या वा तथा चैव निमन्त्रणे ।
व्याधितव्यपदेशेन शून्यागारनिवेशने ॥१६॥
कार्यः समागमो नृणां स्त्रीभिः प्रथमसङ्गमे ।
एवं समागमं कृत्वा सोपायं विधिपूर्वकम् ॥१७॥

अभिनवभारती

नानादर्शितकारणं कृत्वा प्रोत्साहनमित्युक्तं तानि कारणान्याह कुल-भोगेत्यादि ॥१३।१४॥

उत्सव इति मित्रगृह एव रात्रिचारप्रधानो य उत्सवः । प्रथमसङ्गमं इति गान्धर्वविवाहे वेश्यापुनर्भूसङ्गमे चेत्यर्थः ॥१५।१७॥

बालक्रीड़ा

(मूल) कुल के गौरव भोग की सम्पन्नता एवं धन की अधिकता के बारे में बढ़ा चढ़ा कर कहती हुई दूती अपने इष्ट अर्थ का निवेदन करे और अनुवर्णन करे ॥१३॥

(मूल) जो कामना से या कामुकता से प्रवृत्त नही हो रही है और जो क्रुद्धा है उसका सङ्गम नही करना चाहिए। दूती को पुरुष के विषय में अनुपयोगी उपाय को नही करना चाहिए अपितु वही उपाय करे जो उपयोगी हो ॥१४॥

(मूल) उत्सव के समय में, रात्रि में, उद्यान में, मित्र के घर में, धाय के घर में अथवा सखी के द्वारा निमन्त्रित करने पर रोगी का बहाना करके शून्य एकान्त घर में पुरुषों को स्त्रियों के साथ प्रथम मिलने में समागम कराना चाहिए। इस प्रकार उपाय के द्वारा विधि पूर्वक समागम करे ॥१५।१७॥

दिखाये हुए नाना कारणों को करके प्रोत्साहन करना चाहिए जो कहा था उसको कहते हैं कुलभोग इत्यादि ॥१३।१४॥

जिससे मित्र के घर में रात्रि में आने जाने का अवसर मिले ऐसे उत्सव को करना प्रथम संगम का अर्थ है। गान्धर्व विवाह में—वेश्या एवं पुनर्भू के साथ पहले समागम में ॥१५।१७॥

अनुरक्तां विरक्तां वा लिङ्गाकारैस्तु लक्षयेत् ।
स्वभावभावातिशयैर्नारी या मदनाश्रया ॥१८॥
करोति निभृतां लीलां नित्यं सा मदनातुरा ।
सखीमध्ये गुणान् ब्रूते स्वधनं च प्रयच्छति ॥१९॥
पूजयत्यस्य मित्राणि द्वेष्टि शत्रुजनं सदा ।
गमागमे सखीनां या हृष्टा भवति चाधिकम् ॥२०॥
तुष्यत्यस्य कथाभिस्तु सस्नेहं च निरीक्षते ।
सुप्ते तु पश्चात् स्वपिति चुम्बिता प्रतिचुम्बति ॥२१॥
उत्तिष्ठत्यपि पूर्वं च तथा क्लेशसहापि च ।
उत्सवे मुदिता या च व्यसने या च दुःखिता ॥२२॥

अभिनवभारती

स्वभावेति स्वभावे भावे सुरते येऽतिशया नखरदनसहिष्णुतादयस्तैरुपलक्षिता अनुरक्तेति संबन्धः ॥१८।१९॥

मित्राणि शत्रुजनमिति नायकस्येति शेषः पश्चात्संवेशनं ॥२०।२१॥

बालक्रीड़ा

(मूल) अनुरक्त यह है अथवा विरक्त यह है—ऐसा लिङ्गों से एवं आकारों से समझें। जो नारी मदन के वश में है आश्रय में हो गई वह मदन से आतुर होकर नित्य एकान्त में लीला करती है। सखियों में बैठकर उसका गुणगान करती है और अपने धन को देती है ॥१८।१९॥

(मूल) प्रिय के मित्रों का पूजन करती है तथा प्रिय के दुश्मनों से दुश्मनी करती है। सखियों के आने जाने में अधिक प्रसन्न होती है। प्रिय की कथाओं से तुष्ट होती है। स्नेह के साथ ताकती है प्रिय के सोने के बाद सोती है और जागने के पहले जागती है चुम्बन करने पर प्रतिचुम्बन करती है अगवानी करने के लिए पहले ही उठ खड़ी होती है तथा क्लेशों को भी सहन करती है उत्सव में प्रसन्न होती है विपत्ति में दुःखित होती है। इस तरह के गुणों से या विशेषताओं से जो युक्त है उसे अनुरक्ता मानना चाहिए ॥२०।२२॥

स्वभावतः किये गये भाव में सुरत में जो अतिशय नखक्षत एवं दन्तक्षतों को सहना वगैरह है उनसे उपलक्षित की गई माने यह अनुरक्ता है—ऐसी जानी गई। यह यहां सम्बन्ध है ॥१८।१९॥

मित्र और शत्रु नायक के हैं इतना अंश अवशिष्ट है पीछे सोती है ॥२०।२१॥

एवंविधैर्गुणैर्युक्ता त्वनुरक्ता तु सा स्मृता ।
विरक्तायास्तु चिह्नानि चुम्बिता नाभिचुम्बति ॥२३॥
अनिष्टां च कथां ब्रूते प्रियमुक्तापि कुप्यति ।
प्रद्वेष्टि चास्य मित्राणि भजतेऽरिजनं तथा ॥२४॥
शेते पराङ्मुखी चापि शयने पूर्वशायिनी ।
सुमहत्युपकारेऽपि न तोषमुपयाति च ॥२५॥
क्लेशं न सहते चापि तथा कुप्यत्यकारणात् ।
या स्यादेवंप्रकारा तु विरक्तां तां विनिर्दिशेत् ॥२६॥
हृदयग्रहणोपायमस्या व्यापारचेष्टितम् ।

अभिनवभारती

पूर्वमभ्युत्थानं च। तेन बिना किमत्र सुखमिति दर्शयति उत्सवे व्यसन इति नायकस्य ॥२२।२३॥

अनिष्टां कथां ब्रूते इति पर्वतादपि कठोरो (पूर्वकृतामिति ?) ॥२४।२६॥

हृदयं गृह्यते यैरुपायैः अस्या इति रक्ताया व्यापारचेष्टितमिति तदीय

बालक्रीड़ा

(मूल) विरक्ता के तो चिन्ह हैं जो चुम्बन करने पर प्रतिचुम्बन नही करती है। अनिष्ट कथा कहती है। प्रिय कथन पर भी क्रुद्ध होती है। उसके मित्रों से द्वेष करती है। तथा दुश्मनों की सेवा करती है। मुँह फेर कर सोती है। उसके सोने के पहले ही सो जाती है। बड़े भारी उपकार करने पर भी सन्तुष्ट नही होती है। क्लेश को सहन नही करती है। अकारण कोप करती है जो इस प्रकार की नारी है उसको विरक्ता कहें ॥२३।२६॥

पहले उठती है। उसके बिना यहां क्या सुख है—ऐसा दिखाती है। नायक के उत्सव में सुखी और व्यसन में दुःखी ॥२२।२३॥

अनिष्ट कथा को कहती है जो कथा पाषाण से भी कठोर है ॥२४।२६॥

जिन उपायों से विरक्ता नायिका का हृदय गृहीत हो जाय। अनुरक्त करने वाले व्यापारों में चेष्टा अर्थात् उसके हृदय को ग्रहण करने वाले व्यापारों में तात्पर्य को

अर्थप्रदर्शनं चैव उपदानं पुनर्भवेत् ॥२७॥
अकारणमुपन्यासस्तथैव व्याधितापि च ।
व्याजात्यागोऽथ निकटाद् भावोपक्षेप एव च ॥२८॥

अभिनवभारती

हृदयग्रहणव्यापारतात्पर्यत्वं कामतन्त्रे चेष्टितम् । अर्थस्य प्रदर्शनमिदं ममास्तीति । उपदानं अर्थस्य दास्यामीति ॥२७॥

उपन्यासः अन्यमुखेन काचि दनुरक्तस्याङ्गनास्तीति कथनम् । (व्याधितेति) विचित्रा आधयो यस्य तस्य भावः । ततो हैतोरसेवनम् विचित्राभिप्रायदर्शनव्याजेन तन्निकटादपसर्पणम् इति यावत् (व्याजात्परित्याग इति) । एषोऽन्यत्र रागीत्यन्य-मुखेनाभिधानं भावोपक्षेपः ॥२८॥

बालक्रीड़ा

(मूल) जिन उपायों से नायिका के हृदय को अनुकूल बनाया जा सकता है वे उपाय हैं—उसके अनुकूल व्यापार एवं चेष्टा, अर्थ का प्रदर्शन कि मेरे पास इतने रुपये हैं यह प्रदर्शन करना फिर उसको दे देना इत्यादि हो सकते हैं ॥२७॥

(मूल) अकारण अर्थात् हमारा तुम्हारा सम्बन्ध रहे इसका अब कोई कारण नही रह गया है। उपन्यास अर्थात् ऐसी कोई अङ्गना है जिसमें यह अनुरक्त है। ऐसा किसी के मुख से कहलवाना। व्याधिता विचित्र या विविध आधि, मानसी व्यथा जिसको हो गई है ऐसा पुरुष व्याधि होता है उसका भाव अर्थात् मानसी व्यथाओ से दुःखी। व्याज से किसी बहाने से, निकटता का सान्निध्य का त्याग माने उसके पास नही बैठना। भावों का अपने हृदय के अभिप्रायों का उपक्षेप किसी दूसरे से कहलवाना ॥२८॥

कामतन्त्र में चेष्टित कहा है। अर्थ को दिखाना कि मेरे पास इतना पैसा है। मैं तुम्हें इस वस्तु को दूंगा इस तरह अर्थ का उपदान ॥२७।

उपन्यास माने दूसरे के मुख से 'यह कोई अनुरक्त पुरुष की अंगना है'—ऐसा कहना। विचित्र आधि मनोव्यथाएँ जिसको हो वह व्याधि है उसका भाव व्याधिता है। व्याधिता के कारण से उसका सेवन सम्बन्ध नही करना। विचित्र अभिप्रायों के दिखाने के बहाने से उसके पास से अपसर्पण करना। यह व्याजात् परित्याग है। यह अन्यत्र अनुरक्त है—ऐसा दूसरे के द्वारा कहलवाना भावोपक्षेप है ॥२८॥

दारिद्र्याद्व्याधितो दुखात्पारुष्याद्दुःश्रवात्तथा ।
प्रवासगमनादेव ह्यतिलोभादतिक्रमात् ॥२९॥
अतीवाभिगमाच्चापि तथा विप्रियकारणात् ।
एभिः स्त्री पुरुषो वापि कारणैस्तु विरज्यते ॥३०॥
भावग्राहीणि नारीणां कार्याणि मदनाश्रये ।
तुष्टिमेति यथा नारी प्राप्यते पुरुषैरथ ॥३१॥
लुब्धामर्थप्रदानेन कलाज्ञानेन पण्डिताम् ।

अभिनवभारती

रक्ताया अप्येतानि विरागकारणानीत्याह दारिद्र्यादित्यादिभ्यः, अपत्यमरणादेः अश्राव्यत्वं यद्वचने पारुष्यं ततः ॥२९।३०॥

यत एवं तेनास्या अपि रागं रक्षेदिति भावग्राहीणीति। प्राप्यत इति सेव्यत इति यावत्। पुरुषैरिति कुशलैरिति भावः ॥३१॥

अस्याः कथं तुष्टिरित्याह लुब्धामित्यादि। पण्ठितामिति कलाविदाम्।

बालक्रीड़ा

(मूल) दरिद्रता, व्याधि (रोग) नाना प्रकार के दुःख, परुषता, कटु व्यवहार दुःश्रव बुरी बातों को सुनना। परदेश में जाना। अतिलोभ करना। अतिक्रमण करना ॥२९॥

(मूल) अतीव अभिगमन करना तथा विप्रिय विरोधी हेतु—इन कारणों से स्त्री अथवा पुरुष विरक्त हो जाते हैं ॥३०॥

(मूल) मदन के आश्रय में महिलाओं के भाव को ग्रहण करने वाले आचरणों को करना चाहिए। जिस प्रकार वह सन्तुष्ट हो और पुरुष उसको प्राप्त कर सकें ॥३१॥

अनुरक्ता के लिए भी ये दारिद्र्यादि विराग के कारण हो सकते हैं। अपत्य मरण वगैरह से दुःख। वचन में जो अश्राव्यत्व है वह पारुष्य है ॥२९।३०॥

क्योंकि यह इस तरह है इसलिए ऐसे उसके राग की रक्षा करे इसलिए कहा कि नायिका के भावों के ग्राही। प्राप्यतेमाने सेव्यते। पुरुषैः माने कुशल पुरुष ॥३१॥

इसकी तुष्टि कैसे हो इस पर कहते हैं लुब्धाम्। पण्डिता कलाविदा कलाओं

चतुरां लडहत्वेन ह्यनुवृत्त्या च मानिनीम् ॥३२॥
भूषणग्राहणाच्चापि शृङ्गारमुखरो, भवेत् ।
पुरुषद्वेषिणीमिष्टैः कथायोगैरुपक्रमैः ॥३३॥
उपक्रीडनकैर्बालां भीरुमाश्वासनेन च ।
गर्वितां नीचसेवाभिरुदात्तां शिल्पदर्शनैः ॥३४॥
सर्वासामेव नारीणां त्रिविधा प्रकृतिः स्मृता ।
उत्तमा मध्यमा नीचा वेश्यानां तु स्वभावजाः ॥३५॥

अभिनवभारती

लडहत्वेन प्रागल्भ्येन ॥३२।३३॥

नीचसेवाभिरिति पादस्पर्शनादिभिः । शिल्पदर्शनैरिति विस्मयहेतुभिरित्यर्थः ॥३४॥

प्रतिपदमशक्यो भेदसंग्रह इत्याशयेनाह सर्वासामेवेति उत्तममध्यमाधमानां प्रत्येकमिति यावत् ॥३५।४१॥

बालक्रीड़ा

(मूल) लोभी नायिका को पैसा देकर, पण्डिता को कलाओं का ज्ञान करा कर, चतुरा को लडहत्व से प्रगल्मता से, मानिवी को अनुवर्त्तन से गहनों को प्रदान करके शृंगार के विषय में मुखर हो जाय। जो नारी पुरुष से द्वेष करती है उसको कथाएँ कहकर और अनुकूल उपक्रमों से खुश करे ॥३२।३३॥

(मूल) बाला नायिका को खेल के क्रीडा के उपकरणों से, भीरु को आश्वासन देने से। गर्विता को सेवा से, सेवा भी नीच तरीके की हो सकती है। उदात्त नायिका को शिल्पकारिता से प्रसन्न करे ॥३४॥

(मूल) सभी प्रकार की स्त्रियों का स्वभाव माने प्रकृति तीन प्रकार की होती है। उत्तम मध्यम और अधम। किन्तु वेश्याओं की तो स्वभाव के कारण ऐसी अवस्थाएँ होती हैं ॥३५॥

की जानकार। यहां विज्ञ में इगुपध होने से क प्रत्यय है और टाप् है। लडहत्व प्रगल्मता है ॥३२।३३॥

नीचसेवा पादस्पर्शनादि। शिल्पप्रदर्शन विस्मयकारी शिल्पों को दिखाना ॥३४॥

प्रतिपद में भेदों का संग्रह करना अशक्य है इस आशय से कहते हैं—सभी उत्तम मध्यम एवं अधम स्त्रियों का अर्थात् प्रत्येक का ॥३५।४१॥

या विप्रियेऽपि तिष्ठन्तं प्रियं वदति नाप्रियम् ।
न दीर्घरोषा च तथा कलासु च विचक्षणा ॥३६॥
शीलशोभाकुलाधिक्यैः पुरुषैर्या च काम्यते ।
कुशला कामतन्त्रेषु दक्षिणा रूपशालिनी ॥३७॥
गृह्णाति कारणाद्रोषं विगतेर्ष्या ब्रवीति च ।
कार्यकालविशेषज्ञा सुभगा सा स्मृतोत्तमा ॥३८॥
पुरुषैः काम्यते या तु तथा कामयते च तान् ।
कामोपचारकुशला प्रतिपक्षास्यसूयिनी ॥३९॥
ईर्ष्यातुरा त्वनिभृता क्षणक्रोधाति गर्विता ।
क्षणप्रसादा या चैव सा नारी मध्यमा स्मृता ॥४०॥
अस्थानकोपना या तु दुष्टशीलातिमानिनी ।
चपला परुषा चैव दीर्घरोषाधमा स्मृता ॥४१॥

बालक्रीड़ा

(मूल) वह नारी उत्तम होती है जो विरोध में रहने वाले को भी प्रिय ही बोलती है अप्रिय नही बोलती है। दीर्घ काल तक रोष नही करती है। कला की जानकार होती है ॥३६॥

(मूल) शील की विशेषता शोभा सम्पन्नता और कुल की अधिकता माने कुल के गौरव से है जिसकी पुरुष कामना करते हैं। काम तन्त्र में कुशल है। दक्षिणा है अर्थात् सरला है एवं उदार है। रूपशालिनी है ॥३७॥

(मूल) कारण होने पर रुष्ट होती है और ईर्ष्या रहित होकर बोलती है। अब यह समय कार्य करने का है ऐसा समझती है और जो सुभगा है सौभाग्य युक्ता है ॥३८॥

(मूल) वह नारी मध्य श्रेणी की होती है जिसकी पुरुष कामना करते है और जो पुरुषों की कामना करती है। काम के उपचारों में कुशल है। दुश्मनों से असूया करती है। ईर्ष्या से आतुर रहती है। अनिभृता माने चुपचाप नही रहती है या बैठती है। जो क्षणिक क्रोध करती है। जो अतिगर्विता है। जो क्षण में प्रसन्न हो जाती है ॥३९।४०॥

(मूल) वह नारी अधमा होती है जो अस्थान में कोप करती है जिसका स्वभाव दुष्ट होता है। जो अत्यन्त मान करती है। परुषभाषिणी है और दीर्घ काल तक गुस्सा करती है ॥४१॥

सर्वासां नारीणां यौवनभेदाः स्मृतास्तु चत्वारः ।
नैपथ्यरूपचेष्टागुणेन शृङ्गारमासाद्य ॥४२॥
पीनोरुगण्डजघनाधरस्तनद्वयं कर्कशं रतिमनोज्ञम् ।
सुरतं प्रति सोत्साहं प्रथमं तद्यौवनं ज्ञेयम् ॥४३॥
गात्रं पूर्णावयवं पीनौ च पयोधरौ नतं मध्यम् ।
कामस्य सारभूतं यौवनमेतद् द्वितीयं तु ॥४४॥
सर्वश्रोसंयुक्तं रतिकरमुन्मादनं रतिगुणाढ्यम् ।
कामाप्यायितशोभं यौवनमेतत्तृतीयं तु ॥४५॥

अभिनवभारती

(सर्वासामिति) प्रथमं यौवनं यावद्विंशति। एवं त्रिंशच्चत्वारिंशत्पञ्चाशदिति विभागः । अन्ये तु षोडशपञ्चविंशतिपञ्चत्रिंशत्पञ्चत्वारिंशदिति विभागमाहुः ॥४२।४७॥

बालक्रीड़ा

(मूल) नेपथ्य माने वेषभूषा सजावट से रूप चेष्टा एवं तदनुकूल गुण से श्रृंगार को प्राप्त करके अर्थात् शृङ्गार भाव के उत्पन्न हो जाने से सभी नारियों के यौवन के भेद चार प्रकार के होते हैं ॥४२॥

(मूल) उसे प्रथम यौवन समझना चाहिए जब नायिका की जंघा कपोल, नितम्ब एवं स्तन पीन हो और कर्कश हों रति के लिए आकर्षक हो एवं रति के विषय में उत्साह जनक हो जिसका अधर कोमल हो ॥४३॥

(मूल) जब शरीर के अवयव अपने रूप में पूर्ण हों पयोधर पीन हो, कमर नत हो अर्थात् झुकी हुई हो लचीली हो तब यह काम का सारभूत द्वितीय यौवन है ॥४४॥

(मूल) जो सम्पूर्ण कान्ति से संयुक्त हो रति का जनक हो उत्पन्न करने वाला हो तथा रति के गुणों से विशेषताओं से सम्पन्न हो और जिसकी शोभा काम से आप्यस्थित बढ गई हो वह तृतीय यौवन है ॥४५॥

सबका। २० वर्ष तक प्रथम यौवन। और अन्य तीस, चालीस एवं पचास वगैरह से विभाग होता है। और लोग तो १६।२५।३५।४५। ऐसा विभाग कहते हैं ॥४२।४७॥

नवयौवने व्यतीते तथा द्वितीये तृतीयके वापि ।
शृङ्गारशत्रुभूतं यौवनमेतच्चतुर्थं तु ॥४६॥
विम्लानगण्डजघनाधरस्तनं किञ्चिदूनलावण्यम् ।
कामं प्रति नोच्छवासं यौवनमेतच्चतुर्थं तु ॥४७॥
नात्यर्थं क्लेशसहा न कुप्यति न हृष्यति प्रतिस्त्रीषु ।
सौख्यगुणेष्ववसक्ता नारी नवयौवना ज्ञेया ॥४८॥
किंचित्करोति मानं किंचित्क्रोध च मत्सरं चैव ।
क्रोधे च भवति तूष्णीं यौवनभेदे द्वितीये तु ॥४९॥

अभिनवभारती

एषूपचारभेदमाह नात्यर्थमिति क्लेशः दशनादिकृत्यं नातीव सहते ॥४८।४९॥

बालक्रीड़ा

(मूल) प्रथम द्वितीय एवं तृतीय यौवन के व्यतीत होने पर जो यौवन शृंगार का शत्रु है वह चतुर्थ यौवन है ॥४६॥

(मूल) जिस समय में या अवस्था में कपोल, नितम्ब, अधर स्तन निर्मांस हो यानी पीन नही रहे और लावण्य भी कुछ कम हो गया हो तथा काम के प्रति उत्साह नही रह गया हो वह चतुर्थ यौवन होता है ॥४७॥

(मूल) जो अतिशय क्लेश के सहनें में असमर्थ हो तथा जो प्रति स्त्री के विषय में न प्रसन्न होती है और न क्रुद्ध होती है अर्थात् जिसको सौतिया डाह नही होती हैं। सुख के कार्यों में जो आसक्त हो उस नारी को प्रथम यौवन बाली समझना चाहिए ॥४८॥

(मूल) जो नारी कुछ मान करती हैं कुछ क्रोध करती है और कभी मत्सर इर्ष्या भी करती हैं और क्रोध आने पर चुप रहती है वह नारी द्वितीय यौवन की अवस्था में होती है ॥४९॥

इनमें किये जानेलायक उपचार के भेदों को कहते हैं। अत्यर्थ माने नखक्षत दन्तक्षत के क्लेश को नही सहन करती है ॥४८।४९॥

रतिसंभोगे दक्षा प्रतिपक्षासूयिनी रतिगुणाढ्या ।
अनिभृतगर्वितचेष्टा नारी ज्ञेया तृतीये तु ॥५०॥

चित्तग्रहणसमर्था कामाभिज्ञा त्वमत्सरोपेता ।
अविरहितमिच्छति सदा पुरुषं नारी चतुर्थे तु ॥५१॥

यौवन भेदास्त्वेते विज्ञेया नाटकेषु चत्वारः ।
पुनरेव तु पुरुषाणां च कामतन्त्रे प्रवक्ष्यामि ॥५२॥

चतुरोत्तमौ तु मध्यस्तथा च नीचः प्रवृत्तकश्चैव ।
स्त्रीसंप्रयोगविषये ज्ञेयाः पुरुषास्त्वमी पञ्च ॥५३॥

अभिनवभारती

रतिगुणाढ्या कामतन्त्रप्रयोगप्रगल्भेत्यर्थः ॥५०॥

अविरहितमिति भावैस्त्रिभिरपि ॥५१।५२॥

उपचारार्थं पुरुषभेदो ज्ञेय इत्याशयेनाह चतुरोत्तमावित्यादि ॥५३॥

बालक्रीड़ा

(मूल) जो नारी रति सम्भोग में दक्ष है सौतिया डाह करती है। अपनी ऊमर की स्त्रियों के साथ प्रतिपक्ष दुश्मन की तरह असूया करती है। रति की विशेषताओं से सम्पन्न है। और खुले तौर पर गर्वित चेष्टायें करती है उस नारी को तृतीय यौवन में पहुंच गई—ऐसा समझना चाहिए ॥५०॥

(मूल) अपने प्रिय के चित्त के ग्रहण करने में, समझने में, अनुकूल करने में समर्थ है। काम सम्बन्धी क्रियाओं की जानकार है। अपने मत्सर से युक्त है। और जो सदा अपने प्रेमी को अविरहित माने अपने साथ ही रखना चाहती है उस नारी को यौवन की चतुर्थ कक्षा में पहुंच गई है ऐसा समझना चाहिए ॥५१॥

(मूल) नाटकों में अभिनय के उपयोगी इन यौवन के चारों भेदों को समझना चाहिए। पुरुषों के भी ऐसे भेद होते हैं जो कि कामतंत्र में वर्णित है उनको मैं कहूंगा ॥५२॥

(मूल) स्त्रियों के संप्रयोग के विषय में चतुर, उत्तम, मध्य, नीच एवं प्रवृत्तक इन पांच प्रकार के पुरुषों को समझना चाहिए ॥५३॥

रति गुणों से आढ्य माने काम शास्त्र में बतलाये हुए प्रयोगों में प्रगल्भ ॥५०॥

तीनों भावों से पुरुष के विरह को नही चाहती है ॥५१।५२॥

उपचार के लिए पुरुषों के भेद को जानना चाहिए इस आशय से कहते हैं चतुर और उत्तम इत्यादि ॥५३॥

समदुःखक्लेशसहः प्रणयक्रोधप्रसादने कुशलः ।
योऽर्थी नात्मच्छन्दो दक्षश्चतुरः स बोद्धव्यः ।।५४।।

यो विप्रियं न कुरुते नार्याः किंचिद्विरागसंज्ञातम् ।
अज्ञातेप्सितहृदयः स्मृतिमान्धृतिमान् स तु ज्येष्ठः ।।५५।।

मधुरस्त्यागी रागं मयाति मदनस्य चापि वशमेति ।
अवमानितश्च नार्या विरज्यते चोत्तमः स पुमान् ।।५६।।

सर्वार्थैर्मध्यस्थो भावग्रहणं करोति यो नार्याः ।
किंचिद्दोषं दृष्ट्वा विरज्यते मध्यमः स भवेत् ।।५७।।

अभिनवभारती

पञ्च क्रमेण लक्षयति समदुःख इति ।।५४।।

अज्ञातेप्सितहृदय इति गम्भीर इत्यर्थः । ज्येष्ठ इति यावत् ।।५५।५८।।

बालक्रीड़ा

(मूल) प्रेयसी के दुःख को अपने दुःख के समान और क्लेश को अपने क्लेश के समान समझ कर सहने वाला, प्रणय कलह में कुपित नायिका के प्रसादन में, प्रसन्न करने में जो कुशल है और जो अर्थी होता हुआ भी अपने मतलब को साधने वाला नहीं है तथा दक्ष है उसे चतुर समझना चाहिए ।।५४।।

(मूल) नारी के इषत् विराग को सम्यक् जानता हुआ भी जो विप्रिय द्वेष को नही करता है, जिसके हृदय का अभीष्ट अज्ञात है, जिसके मन की बात को कोई जान नही सकता है जो स्मृतिमान् है और धैर्यशाली है वह ज्येष्ठ है ।।५५।।

(मूल) जो मधुर है बातचीत में व्यवहार में जो मीठा है त्यागी है बराबर कुछ २ देता रहता है राग प्रयाति प्रेम करता है मदन के वश में रहता है माने कामार्त्त रहता है किन्तु अपमानित होने पर नारी से विरक्त हो जाता है वह पुरुषउत्तम है ।।५६।।

(मूल) जो सभी विषयों में मध्यभाव से रहता है जो नारी के भाव को ग्रहण करता है समझता है और स्त्री के किसी रोष को देखकर विरक्त हो जाता है वह पुरुष मध्यम श्रेणी का होता है ।।५७।।

पांचों का क्रम से लक्षण कहते हैं । समदुःख इति ।।५४।।

उसके मन का अभीष्ट अज्ञात है अर्थात् वह नायक गंभीर है और ज्येष्ठ है अर्थात् बड़ा है ।।५५।५८।।

काले दाता ह्यवमानितोऽपि न क्रोधमतितरामेति ।
दृष्ट्वाव्यलीकमात्रं विरज्यते मध्यमोऽयमपि ॥५८॥
अवमानितोऽपि नार्या निर्लज्जतयाभ्युपैत्यविकृतास्यः ।
अन्यत्रत्य संक्रान्त स्नेहपरावृत्तभावश्च ॥५९॥
अभिनवकृते व्यलीके प्रत्यक्षं रज्यते दृढतरं यः ।
मित्रैर्निवार्यमाणो विज्ञेयः सोऽधमः पुरुषः ॥६०॥
अविगणितभयामर्षो मूर्खप्रकृतिः प्रसक्तहासश्च ।
एकान्तदृढग्राही निर्लज्जः कामतन्त्रेषु ॥६१॥

अभिनवभारती

नन्वन्यदीयं कार्यवशात्संक्रामेदित्याह स्नेहेति अन्यदीयेन स्नेहेन प्रेम्णा परावृत्तः तद्विषयो भवोऽभिप्रायो यस्य ॥५९।६२॥

बालक्रीड़ा

(मूल) समय पड़ने पर देता है अवमानित होने पर भी अत्यन्त क्रुद्ध नही होता है। और जो थोड़े से भी व्यलीक को देखकर विरक्त हो जाता है वह भी मध्यम है ॥५८॥

(मूल) जिस नारी का भाव स्नेह से परावृत्त हो गया है पराङ्मुख हो गया है अत एव जो किसी दूसरे में संक्रान्त हो गई है। ऐसी नारी से अवमानित हुआ भी निर्लज्जता से मुख विकारों को छिपाकर आता है वह अधम होता है ॥५९॥

(मूल) नायिका के द्वारा किये हुए ताजा अपराध के अवसर पर प्रेम नही करना चाहिए तब भी जो मित्रों के रोकने पर प्रत्यक्ष दृढतर अनुराग करता है उस पुरुष को अधम समझना चाहिए ॥६०॥

(मूल) यह कुछ कर देगी या करा देगी—ऐसे भय एवं अनर्थ की परवाह नही करता है, जो स्वाभाविक मूर्ख है हँसी करने में प्रसक्त है। एकान्त में दृढ ग्रहण करने वाला और काम के तंत्रों में निर्लज्ज है ॥६१॥

हो सकता है कि दूसरो के भावों का उसके हृदय में संक्रमण हो गया हो—इस पर कहते हैं कि स्नेह है अतः दूसरी नायिका के स्नेह से प्रेम से वह पराङ्मुख है अतः परावृत्त है। अपनी उस नायिका के विषय में उसका भाव है अभिप्राय है ॥५९।६२॥

रतिकलहसंप्रहारेष्वकर्कशः क्रीडनीयकः स्त्रीणाम् ।
एवंविधस्तु तज्ज्ञैं विज्ञेयः संप्रवृत्तस्तु ॥६२॥
नानाशीलाः स्त्रियो ज्ञेया गूढार्थहृदयेप्सिताः ।
विज्ञाय तु यथा सत्त्वमुपसर्पेत्तथैव ताः ॥६३॥
भावाभावौ विदित्वाऽथ तत्र तैस्तैरुपक्रमैः ।
पुमानुपचरेन्नारीं कामतन्त्रं समीक्ष्य तु ॥६४॥

अभिनवभारती

ननु किमनेन स्त्रीणां भावज्ञानेनेत्याह नानाशीला इति अर्थनमर्थः अभिप्रायः गूढाभिप्रायं हृदयमासाम् । यथासत्त्वमिति यथाशयम् ॥६३॥

भावाभावा विति अनुरागविरागौ ॥६४॥

बालक्रीड़ा

(मूल) तथा रति कालिक कलह के समय में किये गये संप्रहारों के होने पर जो कर्कश नही है स्त्रियों का खिलौना बना रहता है ऐसे पुरुष को कामशास्त्र के जानकार लोग संप्रवृत्तक समझें ॥६२॥

(मूल) जिनके मतलब एवं हृदयेक्षित अर्थात् मन की चाह गूढ हैं इस तरह की नाना शीलवाली स्त्रियों को समझना चाहिए। अतः उनके योग्य भावों को समझ कर उनके तरफ प्रवृत्त होना चाहिए ॥६३॥

(मूल) विभिन्न अवसरों पर किये गये उन उन उपक्रमों से, व्यवहारों से स्त्रियों के भाव एवं अभाव यानी राग एवं द्वेष को समझे किन्तु स्त्रियों की प्रवृत्ति के प्रति काम तंत्र की समीक्षा करके पुरुष को उपचार करना चाहिए ॥६४॥

इस तरह स्त्रियों के भावों के समझ लेने से क्या लाभ है। इस पर कहते हैं स्त्रियाँ नानाशील वाली होती हैं। अर्थन ही अर्थ है अभिप्राय है। इनका हृदय गूढाभिप्रांय वाला होता है। यथासत्त्व माने यथाशय को ॥६३॥

भाव और अभाव माने राग और विराग ॥६४॥

साम चोपप्रदानं च भेदो दण्डस्तथैव च ।
उपेक्षा चैव कर्तव्या नारीणां विषयं प्रति ।।६५।।
तवास्मि मम चैवासि दासोऽहं त्वं च मे प्रिया ।
आत्मोपक्षेपणकृतं यत्तत्सामेति कीर्तितम् ।।६६।।
काले काले प्रदातव्यं धनं विभवमात्रया ।
यन्निमित्तान्तरकृतं प्रदानं नाम तत्स्मृतम् ।।६७।।

अभिनवभारती

नारीणां विषयबन्धनं स्वीकारः तं प्रतीति ।।६५।।

तस्मिन्साध्ये सामादयः उपेक्षान्ताः पञ्चोपाया इत्यर्थः । तान् क्रमेण व्याचष्टे तवास्मीत्यादि । आत्मन उपक्षेपो निजभावप्रदर्शनम्, ।।६६।।

काले दिवसे दातव्यामिति नियमेन निमितविशेषकृतेन प्रमोदव्यसनादिनिबन्धनेन दानेन वर्तयतीत्यर्थः ।।६७।।

बालक्रीड़ा

(मूल) अवसर के अनुसार स्त्रियों के विषय के प्रति कभी साम कभी दान कभी भेद कभी दण्ड तथा कभी उपेक्षा करनी चाहिए ।।६५।।

(मूल) मैं तुम्हारा हूं, तुम मेरी हो, मैं दास हूं, तुम मेरी प्रिया हो—इस तरह से जो अपने आपका उपक्षेपण समर्पण करना है वह साम है ।।६६।।

(मूल) अपने विभव की मात्रा के अनुसार समय समय पर कुछ देना चाहिए ऐसी भावना से विभिन्न निमित्त पर किया गया धन का प्रदान दान कहलाता है ।।६७।।

नारियों का विषय बन्धन माने स्वीकार । उसके प्रति ।।६५।।

उस साध्य स्वीकार के विषय में सामादि उपेक्षापर्यन्त ५ उपाय हैं। उनकी क्रम से व्याख्या करते हैं। मैं तुम्हारा हूं। आत्मोपक्षेप माने निजी भावों को दिखाना ।।६६।।

काल, जो दिवस निश्चित किया है उस दिन में देना । प्रमोद एवं व्यसनादि के निबन्धन से हेतु से निमित्त विशेष के लिए किये गये नियम से दान करके व्यवहार करता है ।।६७।।

भेदः स्यात्तत्प्रियस्चेह सोपायं दोषदर्शनम् ।
बन्धनं ताडनं चापि दण्ड इत्यभिधीयते ॥६८॥
मध्यस्था मानयेत्साम्ना लुब्धां चोपप्रदानतः ।
अन्यावबद्धभावां च भेदेन प्रतिपादयेत् ॥६९॥
दुष्टाचारे समारब्धे त्वन्यभावसमुत्थिते ।
दण्डः पातयितव्यस्तु मृदुताडनबन्धनैः ॥७०॥

अभिनवभारती

तस्या योऽन्यः प्रियः तस्य दोषास्तथा दृश्यन्ते यथा तया सत्यत्वेन प्रतीयेरन्निति भेदः तदाह सोपायमिति ॥६८॥

चतुर्णामुपायानां स्वं स्वं विषयमाह मध्यस्थामिति किञ्चित् स्निह्यन्तीमित्यर्थः । आनयेत् स्वीकुर्यात् । प्रतिपादयेदिति आत्मनि संमुखीभावं गमयेत् ॥६९॥

'दुष्टाचार इति देशात्पलायनं पुरुषान्तरगृह एव वास इत्यादिके । तत्रापि च स्त्रीषु निरपेक्षः स्यादिति मृदुताडनबन्धनैरिति ॥७०।७१॥

बालक्रीड़ा

(मूल) किसी भी कारण से प्रिय के दोष को देखना यहां नाट्य में भेद होता है। बांध देना, पीटना आदि दण्ड कहलाता है ॥६८॥

(मूल) मध्य भाव में स्थित नारी को साम से माने फुसलाकर के खुश करे। लुब्धा को धन देकर खुश करे। परपुरुष के भाव में बंधी हुई नारी को भेद से प्रतिपादित करे ॥६९॥

(मूल) परपुरुष के प्रति उत्पन्न हुए भावों से जब नारी दुष्ट आचरण को करने लगे तब मृदुताडन और बन्धन रूप दण्ड देवें ॥७०॥

उस नायिका का जो दूसरा प्रेमी है उसके दोषों को उस प्रकार से दिखाये जिससे वह नायिका उनको सत्य समझें। इसका निम्न भेद है ॥६८॥

चारों उपायों के अपने अपने विषय को कहते हैं। मध्यस्था माने जो कुछ कुछ स्नेह करती है। उसको आनयन स्वीकार करे। प्रतिपादन करे अपनी तरफ संमुखी भाव को करवावे ॥६९॥

दुष्ट आचरण माने अपने देश को छोड़कर भाग जाय दूसरे के घर में रहने लग जाय। इत्यादि। उस समय स्त्रियों में निरपेक्ष हो जाना इसलिए कोमल २ लाडन एवं बन्धन रूपी दण्ड उसको देवे ॥७०।७१॥

[नायकः पुरुषो वाच्यो नायिकां ताडयेच्च ताम् ।
ताडयेत्तां बुधो नारीं रज्ज्वा वेणुदलेन वा] ॥७१॥
सामादीनां प्रयोगे तु परिक्षीणे यथाक्रमम् ।
न स्याद्या च समापन्ना तामुपेक्षेत बुद्धिमान् ॥७२॥
मुखरागेण नेत्राभ्यां विज्ञेयो भावचेष्टितैः ।
द्वेष्यो वापि प्रियो वापि मध्यस्थो वापि योषिताम् ॥७३॥
अर्थहेतोस्तु वेश्यानां प्रियो वा यदि वाप्रियः ।

अभिनवभारती

उपेक्षाया विषयमाह सामादीनामिति दण्डेनापि हि तत्साम्मुख्यं त्यजति या तस्याः किञ्चिदुपेक्षेत बुद्धिमानित्युक्तम् ॥७२॥

किं संबुंध्यत इत्याह मुखरागेणेत्यादि ॥७३॥

वेश्याचित्तं तु दुर्लक्षमिति प्रयत्नपरीक्ष्यमित्याशयेनाह अर्थहेतोस्त्विति । किं

बालक्रीड़ा

(मूल) नायक पुरुष कहलाता है अतः उसे कहना चाहिए कि तुम उस नायिका को पीटो । ऐसा सुनने पर बुध माने समझदार नायक रज्जु से और बांस के दण्ड से उस नायिका का ताडन करे ॥७१॥

(मूल) क्रमशः किये गये सामादि प्रयोग का परिक्षण हो जाने पर नायिका की समापत्ति माने प्राप्ति या अनुकूलता यदि नही होती है तब बुद्धिमान् को उसकी उपेक्षा कर देनी चाहिए ॥७२॥

(मूल) नायक के मुखराग से, नेत्रों से और भावमयी चेष्टाओं से नायिकाओं को समझना चाहिए कि यह द्वेष्य है, यह प्रिय है और याउदासीन है ॥७३॥

उपेक्षा करने के अवसर को बतलाते है कि सामादि । जब दण्ड से भी जो सामुख्य को आनुकूल्य को छोड़ देती है तो बुद्धिमान् उसकी उपेक्षा करे ॥७२॥

कैसे समझे कि यह अनुकूल नही हो रही है इसको कहते हैं मुखराग से ॥७३॥

वेश्याओं के चित्त को लक्षित करना कठिन है अतः उसकी परीक्षा प्रयत्न से करनी चाहिए इस आशय से कहते हैं कि पैसे के लिए । सब वेश्याओं की यह विधि

गम्य एव नरो नित्यं मुक्त्वा दिव्यनृपस्त्रियः ॥७४॥
द्वेष्यं तु प्रियमित्याहुः प्रियं प्रियतरं तथा।
सुशीलमिति दुश्शीलं गुणाढ्यमिति निर्गुणम् ॥७५॥
प्रहसन्ती च नेत्राभ्यां यं दृष्ट्वोत्फुल्लतारका।
प्रसन्नमुखरागाच्च लक्ष्यते भावरूपणैः ॥७६॥
भावाभावौ विदित्वैवं चिरंस्तैस्तैरुपक्रमैः।
यत्नादुपचरेन्नारीं कामतन्त्रं प्रतीक्ष्य तु ॥७७॥

अभिनवभारती

सर्वासां वेश्यानामयं विधिः नेत्याह मुक्त्वा दिव्यनृपस्त्रिय इति ॥७४॥

ननु वचने वेश्याहृदयमुपलक्षेतेत्याह द्वेष्ये तु प्रिय इत्याहुरिति। तुरप्यर्थे।

ननु किमुस्वकार्यहृदया एव ताः, नेत्याह उपचारबलत्वादिति अर्थकाम मयादित्यर्थः। मध्ये वा मो सेवया (?)। ननु यद्येवंभूताः कथं ताः काम्यन्ते

बालक्रीड़ा

(मूल) दिव्याङ्गनाओं माने अप्सराओं को और राजाङ्गनाओं को छोड़कर वेश्याएं अर्थ ही के कारण पुरुष गम्य होती हैं चाहे वह प्रिय हो अथवा अप्रिय हो ॥७४॥

(मूल) वेश्याओं को पैसे के बदौलत द्वेष्य भी प्रिय हो जाता है प्रिय तो प्रियतर हो जाता है दुःशील ! सुशील हो जाता है और निर्गुण गुणों से सम्पन्न हो जाता है ॥७५॥

(मूल) क्योंकि इसका हेतु है—नायिका जिसको देखकर हंसने लगती है तथा उसके नेत्रों के तारे या कनीनिकाएं खिल जाते हैं खिल जाती हैं। इस तरह मुखराग से एवं भावों के निरूपण से नायिका का प्रसन्न होना लक्षित होता है ॥७६॥

(मूल) इसकी हिन्दी ६४ वें श्लोक में हो गई है ॥७७॥

नही है इसलिए कहते हैं कि दिव्यस्त्रियों एवं राजाङ्गनाओं को छोड़कर यह विधि है ॥७४॥

अजी साहब! बोलने पर उनके भी चित्त को जाना जा सकता है इस पर कहते हैं कि द्वेष्य को भी वे प्रिय कहती है तब कैसे जाना जा सकता है। यहां देष्यं तु में तु अपि के अर्थ में है ॥७५।७७॥

उपाचार बलत्वाच्च विप्रलम्भात्तथैव च।
तातु निष्पद्यते कामः काष्ठादग्निरिवोत्थितः ॥७८॥
योषितामुपचारोऽयं यथोक्तो वैशिकाश्रयः।
कार्यः प्रकरणे सम्यग्यथायोगं च नाटके ॥७९॥

अभिनवभारती

जनैरित्याशङ्क्यावृत्त्यैतदेवाह उपचारबलत्वाच्चेति। मुतो हृदयग्रहणोचितमुपचारं निन्दती मध्ये च विप्रलम्भयन्ती तस्मात् काम उत्सुको भवति। कामाभिनिवेशी स इत्युक्तम्। काष्ठादग्निरिति प्रत्युत दुश्चिकित्स्य इत्यर्थः ॥७८॥

वैशिकपुरुषाधिकारे प्रवृत्ताध्यायं प्रकृते उपयोजयति योषितामिति। नाटक इति दिव्यवेश्यानां तत्र भावात् पताकानायकादिगतत्वेन चेत्ति शिवम् ॥७९।८०॥

बालक्रीड़ा

(मूल) जैसे काष्ठ से अग्नि उत्पन्न हो जाता है उसी तरह उपचारों के प्रभाव से तथा वियोग से स्त्रियों में काम उत्पन्न हो जाता है ॥७८॥

(मूल) स्त्रियों के विषय का यह उपचार जैसा कि वैशिकों के सम्बन्ध से कहा गया है। उसको योग्यता के अनुसार सप्रकरण में और नाटक में करना चाहिए ॥७९॥

क्या उनके हृदय में अपना मतलब सिद्ध करना ही है? अतः वे दुःसाध्य हैं इस पर कहते हैं—नहीं। अर्थ के अधीन ही उनका काम है। जब ऐसी वे हैं तब मनुष्य उनकी क्यों कामना करते हैं? इस पर कहते हैं उपचारों के बल से वे लक्षित होती हैं क्योंकि वे हृदय के ग्रहणकारी उपचार की निन्दा करती हैं और बीच बीच में विप्रलम्भन करती है वञ्चना करती हैं। इस लिए वह पुरुष काम में उत्सुक हो जाता है। इसी लिए कहा है कि वह कामाभिनिवेशी है। काण्ठ से अग्नि उठ जाती है। यानी प्रत्युत दश्चिकित्स्य है ॥७८॥

प्रवृत्त अध्याय के वैशिक पुरुषाधिकार में कथित सप्रकरण में, नाटक में, योषितो का स्त्रियों का उपयोग होता है। दिव्यवेश्याओं का अप्सराओं का उसमें और पताका नायकादि में भी भाव होने से ऐसी विधि है ॥७९।८०॥

एवं वेश्योपचारोऽयं तज्ज्ञैः कार्यो द्विजोत्तमाः ।
अत ऊर्ध्वं प्रवक्ष्यामि प्रकृतीनां तु लक्षणम् ॥८०॥

इति भरतीये नाटयशास्त्रे त्रयोविंशोऽध्यायः ।

अभिनवभारती

अध्यायो वैशिकः सोऽयं त्रयोविंशतिपूरणः ।
कृतोऽभिनवगुप्तेन भग्नग्रन्थिपदक्रमः ॥

इति श्रीमहामाहेश्वराचार्याभिनवगुप्तविरचितायां नाटयवेदविवृत्तावभिनवभारत्यां वैशिकस्त्रयोविंशोऽध्यायः

बालक्रीड़ा

(मूल) हे द्विजोत्तमो ! इस प्रकार वेश्याओं के विषय में बतलाए हुए इस उपचारों को जानकार पण्डित अभिनय से दिखावें । अब इसके बाद प्रकृतियों के लक्षण को कहूंगा ॥८०॥

इस तेइसवें वैशिक अध्याय के ग्रन्थि अर्थात् दुर्बोध, अव्यवस्थित पदों के क्रम को परिपाटी को अभिनव गुप्त ने भग्न कर दिया माने व्यवस्थित कर दिया ।

इस प्रकार अचार्य पं० मधुसूदन शास्त्री की कृति नाटयशास्त्र के २३ वें अध्याय की हिन्दी टीका बालक्रीड़ा सम्पूर्ण हुई ।

श्रीः

नाटयशास्त्रम्

चतुर्विंशोऽध्यायः

समासतस्तु प्रकृतिस्त्रिविधा परिकीर्तिता ।
पुरुषाणामथ स्त्रीणामुत्तमाधममध्यमा । १।।

अभिनवभारती—चतुर्विंशोऽध्यायः

त्रिधा विकल्पनं यस्यां पुमान् यत्रोपचर्यते ।
तां वन्दे प्रकृतिं शम्भोः शक्तित्रयविजृम्भणात् ।।

इह कामोपचारः पूर्वदर्शितः कामश्च स्त्रीपुरुषहेतुक इत्युक्तम् । स्त्रीणां च पुंसां च यद्यपि विचित्राः स्वभावास्तथापि ते प्रतिपदमशक्यकलना इति प्रकृतित्रयेण ते सर्वे शक्यसंग्रहा इति प्रकृतित्रयं वक्तव्यम् । तथा चाह समासत

बालक्रीड़ा

अथ इसके बाद भरतीय नाटचशास्त्र के २४ वें अध्याय के मूल की हिन्दी टीका बालक्रीड़ा का आरम्भ करते हैं ।

(मूल) समासतस्तु । पुरुषों एवं स्त्रियों की उत्तम मध्यम एवं अधम भेद से संक्षेप में तीन प्रकार की प्रकृतियों को आचार्यो ने कहा है ।।१।।

अब २४ वें अध्याय की अभिनवभारती की बालक्रीड़ा का आरम्भ करते हैं ।

जिसमें तीन शक्तियों के विजृम्भण विकाश के बदौलत तीन प्रकार के विकल्प हैं और पुरुष जिसमें उपचरित होता हैं ऐसी शम्भु की प्रकृति शक्ति की वन्दना करता हूं ।

यहां २३ वें अध्याय में काम का उचार बतलाया है उसको पहले दिखा दिया है । यह भी कह दिया है कि वह काम स्त्री पुरुष हेतुक है । यद्यपि स्त्रियों और पुरुषों के स्वभाव विचित्र हैं तद्यपि प्रतिपद में यानी प्रत्येक के रूप में उनकी कल्पना गणना करना अशक्य है । किन्तु प्रकृतित्रय के जरिये उनका संकलन किया जा सकता है । अतः प्रकृतित्रय को कहना है । इसीको कहते हैं समासतः माने संक्षेप से ।

जितेन्द्रियाज्ञानवती नानाशिल्पविचक्षणा ।
दक्षिणार्थमहालक्ष्मी भीतानां परिसान्त्वनी ॥२॥
नानाशास्त्रार्थसंपन्ना गाम्भीर्यौदार्यशालिनी ।
स्थैर्यत्यागगुणोपेता ज्ञेया प्रकृतिरुत्तमा ॥३॥

अभिनवभारती

इति कामोपचारश्च शृङ्गारपर्यवसायी नायकविशेष एवेति नायकभेदा वक्तव्याः । तस्य च नायकस्यान्तःपुरो बहिर्वा किन्नामधेयः कियान्वा परिवार इति सर्वं कविना ज्ञातव्यं नटेन च। तदेवं प्रकृततिनायकपरिवारभेदानभिधाय कोऽयमध्याऽ-योस्याभिचारमारम्यते प्रकृत्यादिभेदोपचारो हि स्त्रीभिः तश्च नपुंसकस्य काम विरहत्वादुपचारः स्नेहव्यवहार इत्यध्यायसङ्गतिः तत्र प्रकृतिव्यवहारं ताव दाह समासतस्त्विति । तुर्व्यतिरेके—पूर्वं विस्तरेण स्वभावो दर्शितोऽधुना तु संक्षेपत इति ॥१।२।३॥

बालक्रीड़ा

(मूल) जितेन्द्रिया, ज्ञानवती, नानाशिल्पों की जानकार दक्षिणा माने उदार एवं सरला, अर्थ के पैसे रूपये के सम्बन्ध में महालक्ष्मी तथा भीतों को परिसान्त्वना देनें वाली, अनेक प्रकार के शास्त्रीय अर्थों से सम्पन्ना, गाम्भीर्य औदार्य स्थैर्य एवं त्यागादि गुणों से उपेत अतएव शालिनी सुशोभित होने वाली प्रकृति को उत्तम श्रेणी की समझना चाहिए ॥२।३॥

कामोपचार का पर्यवसान शृंगार के रूप में नायक में होता है अतः नायकों के भेदों को कहना आवश्यक है। नायक के भेदों के साथ २ कवि और नटको यह भी जानना चाहिए कि अन्तःपुर में और बाहर लोक में नायक का परिवार कितना है और उसका नाम क्या है। इस प्रकार प्रकृत नायक और उसके परिवार के भेदों को कह कर यह कौन अध्याय है जिसका आरम्भ करते है।

प्रकृति वगैरह के उपचार का अर्थ है स्त्रियों के साथ स्नेह व्यवहार। उसमें नपुंसक का उपचार व्यवहार कामोपभोग से रहित होता है। यह सङ्गति अध्याय है। अब प्रकृति के व्यवहार को कहते हैं समासतस्तु। यहां तुका अर्थ व्यतिरेक है अभाव है पूर्व में स्वभाव को विस्तार से कहा है, अधुना संक्षेप से कहते हैं ॥१।२।३॥

लोकोपचार चतुरा शिल्पशास्त्रविशारदा ।
विज्ञानमाधुर्ययुता मध्यमा प्रकृतिः स्मृता ॥४॥
रूक्षवाचोऽथ दुःशीलाः कुसत्त्वाः स्थूलबुद्धयः ।
क्रोधना घातकाश्चैव मित्रघ्नाश्छिद्रमानितः ॥५॥
पिशुनास्तूद्धतैर्वाक्यैरकृतज्ञास्तथालसाः ।
मान्यामान्याऽविशेषज्ञा स्त्रीलोलाः कलहप्रियाः ॥६॥
सूचकाः पापकर्माणः परद्रव्यापहारिणः ।
एभिर्दोषैस्तु संपन्ना भवन्तीहाधमा नराः ॥७॥

अभिनवभारती

लोकोपचारेति। लोकोपचारो लोक व्यवहार स्तस्मिन् चतुरा पतत्यवश्यम्। कृतमुपकारं या विस्मरन्त्यकृतज्ञास्ता । मान्यामान्ययोरविशेषज्ञा । इति समासः ॥४।७॥

बालक्रीड़ा

(मूल) लौकिक उपचार में चतुर शिल्प शास्त्र में विशारद, विज्ञान एवं माधुर्य से युता प्रकृति मध्यमा मानी गई है ॥४॥

(मूल) रूक्ष बोलने वाले दुष्ट स्वाभाव वाले कुत्सित मनवाले, स्थूल बुद्धि वाले क्रोधी, घात करने वाले, मित्रों का हनन करने वाले चुगल खोरों से छिद्रों से मानित अर्थात् छिद्रों का अन्वेषण करने वाली औरतों से सम्मानित अतएव स्वयं भी पिशुन चुगली करने वाले, उद्धत वाक्य बोलने वाले, अकृतज्ञा अर्थात् कृत उपकार को जो भूल जाते हैं वे, अलस, यह मान्य है और यह अमान्य है इसकी विशेषता को नही समझने वाले, स्त्रियों में चञ्चल, कहल करने में जिनको प्रेम रहता है ऐसे कलह प्रिय, सूचक भेदिया व्यक्ति या समाज के या राष्ट्र के रहस्य की सूचना उसके दुश्मनों को देने वाले, पाप कर्म करने वाले और परद्रव्य करने वाले नर अधम प्रकृति के होते हैं। ऐसे कर्म करने वाले दोषी होते है अतः इन दोषों से जो सम्पन्न हैं वे नर अधम हैं ॥५।७॥

लोकोपचार माने व्यवहार ॥४।५॥

जो किये हुए उपकार को भूल जाते हैं वे अकृतज्ञ हैं कृतघ्न हैं। यह मान्य हैं और यह अमान्य है—इस विशेषता को वे नही जानते हैं। यहां मान्यामान्ययोरविशेषज्ञा ऐसा षष्ठी समास है ॥६।७॥

एवं तु शीलतो नृणां प्रकृतिस्त्रिविधा स्मृता ।
स्त्रीणां पुनश्च प्रकृतिं व्याख्यास्याम्यनुपूर्वशः ।.८॥

मृदुभावा चाचपला स्मित भाषिण्यनिष्ठुरा ।
गुरूणां वचने दक्षा सलज्जा विनयान्विता ॥६॥

रूपाभि जनमाधुर्यैर्गुणैः स्वाभाविकैर्युता ।
गाम्भीर्य धैर्यसंपन्ना विज्ञेया प्रमदोत्तमा ॥१०॥

अभिनवभारती

पुनश्चेति पूर्वं यद्यप्युक्ता तथापीत्यर्थः । तत्र हि कामोपचाराभिप्रायेण प्रकृतित्रैविध्यं व्याख्यातम् । इह तु सर्वव्यवहारविषयमिति विशेषो दृश्यते । तत्र तु विषयभेदादुत्तमादित्वम् सत्त्वसमुद्भवत्वात् रस्याः स्निग्धा इत्यादय आहाराः सात्त्विकस्य प्रिया इत्युच्यन्ते । तत्र हि सत्त्वमाहारविषयमेव सहधूमाभ्यवहारादिति कृतकटुकाहारव्रतो मुनिर्न सात्त्विक इति नापि चोरो घृतगुड पयोन्नभोजी सात्त्विक इति ॥८॥

वचने दक्षा सती, गुरूणां विषये सलज्जा ॥६।१०॥

बालक्रीड़ा

(मूल) इस प्रकार के शील से पुरुषों की तीन प्रकार की प्रकृति मानी गई है। पुनश्च माने यद्यपि पहले भी प्रकृतियाँ कह दी गई हैं तद्यपि स्त्रियों की प्रकृतियों की अनुपूर्वशः क्रमशः फिर व्याख्या करूँगा ॥८॥

(मूल) मृदुभावा कोमल जिसका स्वभाव है। अचपला, हँसकर बात करने वाली, अनिष्ठुरा अक्रूरा, बोलने में दक्षा, कुशला, गुरुओं के विषय में लज्जा करने वाली विनय से अन्विता, रूप अभिजन कुलीनता एवं माधुर्य—इन स्वभाविक गुणों से युता, जो माधुर्य एवं धैर्य से सम्पन्न है उनको प्रमदाओं में उत्तम समझना चाहिए ॥६।१०॥

पुनः फिर। यद्यपि पहले कह दिया है तब भी पुनः कहते हैं। वहां कामोपचार के अभिप्राय से प्रकृति के तीन प्रकारों का व्याख्यान किया है। और यहां सभी व्यवहारों के विषय में कहते है यह विशेष है। उत्तम मध्यम एवं अधम ये भेद विषय भेद से होते हैं। सत्त्व गुण के उद्रेक से रस्य एवं स्निग्ध आहार सात्त्विक को प्रिय होते हैं ऐसा कहते हैं। यहां सत्त्व आहार विषयक ही है। कडु आहार करके ब्रत करने वाला मुनि सात्विक नही होता है। और न धृत गुड एवं पय से मिश्रित अन्न को खाने वाला चोर सात्त्विक हो सकता है ॥८॥

वचन में कुशल होती हुई गुरुओं के विषय में सलज्जा ॥६।१०॥

नात्युत्कृष्टैरनिखिलैरेभिरेवान्विता गुणैः ।
अल्पदोषानुविद्धा च मध्यमा प्रकृतिः स्मृता ॥११॥
अधमा प्रकुतिर्या तु पुरुषाणां प्रकीर्तिता ।
विज्ञेया सैव नारीणामधमानां समासतः ॥१२॥
नपुंसकस्तु विज्ञेयः संकीर्णोऽधम एव च ।
प्रेष्याश्चापि हि विज्ञेयाः संकीर्णप्रकृतिस्थिताः ॥१३॥
शकारश्च विटश्चैव ये चान्येऽप्येवमादयः ।
संकीर्णास्तेऽपि विज्ञेया ह्यधमा नाटके बुधैः ॥१४॥

अभिनवभारती

नात्युत्कृष्टैरतिश्रेष्ठताहीनैः, अनिखिलैः, असमग्रैः ॥११।१२॥

सङ्कीर्ण इति । कश्चिन्मिश्रप्रकृतिः कश्चिदधमप्रकृतिरेव । प्रेष्याश्च संकीर्णा इति स्वामिचित्तानुरोधात् ॥१३॥

विटोऽप्येवं शकरोऽप्येवं (नुभूत) विभवत्वादुत्तममध्यमचेष्टितमाचरति सङ्कीर्णः । परमार्थतस्तु प्रेष्यविटशकारा अधमा एव ॥१४।१५॥

बालक्रीड़ा

(मूल) अत्यन्त उत्कर्ष से शून्य इन पहिले कहे हुए गुणों से समन्वित और अल्प दोषों से अनुविद्ध प्रकृति मध्यम मानी गई है ॥११॥

(मूल) पुरुषों की जो अधम प्रकृति बतलाई गई है उसी को अधम स्त्रियों की प्रकृति समझना चाहिए ॥१२॥

(मूल) नपुंसक तो संकीर्ण होता है अतः अधम प्रकृति वाला ही होता है। जो प्रेष्य हैं उनको भी संकीर्ण प्रकृति में स्थित समझें ॥१३॥

(मूल) शकार, विट और भी जो इस तरह के संकीर्ण लोग हैं उनको बुध लोग नाटक में अधम प्रकृति वाला समझें ॥१४॥

अत्यन्त उत्कृष्ट नहीं हो माने अतिश्रेष्ठता से हीन हो । अनिखिल माने असमग्र ॥११।१२॥

संकीर्ण माने कोई मिलीजुली प्रकृति वाला और कोई अधम प्रकृति वाला । प्रेष्य भी स्वामी के चित्त के अनुरोध से संकीर्ण होते हैं ॥१३॥

विट भी इसी प्रकार संकीर्ण होता है। शकार भी विभव के अनुभव करने के कारण उत्तम एवं मध्यम चेष्टाएँ करता है अतः संकीर्ण है। वस्तुतः प्रेष्य विट एवं शकार अधम ही होते हैं ॥१४।१५॥

एता ज्ञेयाः प्रकृतयः पुरुषस्त्रीनपुंसकाः ।
आसां तु संप्रवक्ष्यामि विधानं शीलसंश्रयम् ॥१५॥
अत्र चत्वार एव स्युर्नायकाः परिकीर्तिताः ।
मध्यमोत्तमप्रकृतौ नानालक्षणलक्षिताः ॥१६॥
धीरोद्धता धीरललिता धीरोदात्तास्तथैव च ।
धीरप्रशान्तकाश्चैव नायकाः परिकीर्तिताः ॥१७॥
देवा धीरोद्धता ज्ञेयाः स्युर्धीरललिता नृपाः ।
सेनापतिरमात्यश्च धीरोदात्तौ प्रकीर्तितौ ॥१८॥
धीरप्रशान्ता विज्ञेया ब्राह्मणा वणिजस्तथा ।
एतेषां तु पुनर्ज्ञेयाश्चत्वारस्तु विदूषकाः ॥१९॥

अभिनवभारती

प्रकृतिभेदमभिधाय नायकभेदमाह अत्र चत्वार इति ॥१६।१८॥

सुरतविषये संबन्धिग्रहणे वा विग्रहं सन्धिना दूषयतीति विदूषकः । विप्रलम्भ नवकथा विनोदनैः दूषयन्ति विस्मारयन्ति ॥१९॥

बालक्रीड़ा

(मूल) इन बतलाई हुई प्रकृतियों को स्त्री, पुरुष एवं नपुंसक भेद वाली समझें । अब इनका शील के अनुसार विधान को कहूंगा ।

(मूल) यहां उत्तम एवं मध्यम प्रकृतियों में नाना लक्षणों में लक्षित चार प्रकार के ही नायक कहे गये हैं ॥१६॥

(मूल) धीरोद्धत, धीरललित, धीरोदात्त तथा धीरप्रशान्त नायक कहे गये हैं ॥१७॥

(मूल) देवताओं को धीरोद्धत समझें । राजा लोग धीरललित होते हैं । सेनापति और अमात्य धीरोदात्त कहे गये हैं ॥१८॥

(मूल) ब्राह्मण तथा वणियों को धीरप्रशान्त समझना चाहिए । इन चार प्रकार के नायकों के विदूषकों को चार प्रकार का समझना चाहिए । विदूषक का मतलब है नायक और नायिकाओं के विग्रह को सन्धि कराकर दूषित कर दे यानी शान्त कर दे ॥१९॥

प्रकृति भेद कहकर नायक भेद को कहते हैं यहां चार नायक होते हैं ॥१६।१८॥

सुरत के विषय में, सम्बन्ध के ग्रहण में विग्रह को सन्धि के द्वारा दूषित कर देता है वह विदूषक है । विप्रलम्भ को नूतन नूतन कथाएँ एवं विनोद के द्वारा दूषित कर देता है माने भुलावा देता है ॥१९॥

लिंगी द्विजो राजजीवी शिष्यश्चेति यथाक्रमम् ।
देवक्षितिभृतामात्यब्राह्मणानां प्रयोजयेत् ।।२०।।
विप्रलंभसुहृदोंमी संकथालापपेशलाः ।
व्यसनी प्राप्य दुःखं वा युज्यतेऽभ्युदयेन यः ।।२१।।
तथा पुरुषमाहुस्तं प्रधानं नायकं बुधाः ।
यत्रानेकस्य भवतो व्यसनाभ्युदयौ पुनः ।।२२।।

अभिनवभारती

यथाक्रममिति क्रमिकमौचित्यमत्र यथोचितं योजनीयं तद्यथा लिङ्गी ऋषिः देवानाम्, द्विजो वीरः सेनापति राज्ञां राज्ञः जीवी शिष्यो ब्राह्मणस्य ।।२०।।

तेषां व्यापारमाह विप्रलम्भसुहृद विदूषक इति ।।२१।।

नन्वेकपुरुषसंभव इतिवृत्ते को नायक इत्याह व्यसनीति। प्राप्यदुखं चेति । पूर्वमेव न व्यासनपतितो व्यसनी वा अयमपि तु सुखीभूत्वा दुखं प्राप्तः ।।२२।।

बालक्रीड़ा

(मूल) देवता, राजा, अमात्य एवं ब्राह्मणों के विदूषक यथाक्रम लिंगी द्विज राजजीवी एवं शिष्य को बनावें ।।२०।।

(मूल) ये लोग विप्रलम्भ में सुहृत होते हैं। क्योंकि संकथा अच्छी प्रकार की कहानी कहने में और वार्त्तालाप में पेशल होते हैं। जो व्यसनों में निमग्न होकर या दुःखों को भोगकर अभ्युदय को प्राप्त करता है उस पुरुष को बुध लोग प्रधान कहते हैं अतः यह प्रधान पुरुष नायक होता है ।।२१।।

(मूल) जहां अनेक पुरुष होते हैं वहां उनमें ये व्यसन और आभ्युदय वार २ होते ही रहते हैं ।।२२।।

यथाक्रमम् । क्रमिक औचित्य की योग्यता अनुसार योजना करनी चाहिए। जैसे लिङ्गी ऋषि देवताओं का, द्विज वीर सेनापति का, राजा से जीविका चलाने वाला राजा का और ब्राह्मण का शिष्य विदूषक होता है ।।२०।।

उनके व्यवहार को कहते हैं विप्रलम्भ में ये सुहृत् होते हैं ।।२१।।

जो इतिवृत्त एक ही पुरुष से संभव है उस इतिवृत्त में कौन नायक है इसको कहते हैं व्यसनी । दुःख को प्राप्त करके। पहले से ही व्यसन में पतित नही हुआ है किन्तु फिर व्यसनी हो गया है यह भी सुख का अनुभव करके दुःखी हो गया है ।।२२।।

सपुष्टौ यत्र तौ स्यातां न भवेत्तत्र नायकः ।
दिव्या च नृपपत्नी च कुलस्त्री गणिका तथा ॥२३॥

एतास्तु नायिका ज्ञेया नानाप्रकृतिलक्षणाः ।
धीरा च ललिता च स्यादुदात्ता निभृता तथा ॥२४॥

धीरा च ललिता चैव दिव्या राजाङ्गना भवेत् ।
उदात्त निभृता कुलस्त्री गणिका भवेत् ॥२५॥

ललितामभ्युदात्ताया गणिकाधीरयोरपि ।
राजोपचारं वक्ष्यामि ह्यन्तःपुरसमाश्रयम् ॥२६॥

प्रकृतीनां तु सर्वासामुपचाराद् द्विधा स्मृताः ।
बाह्यश्चाभ्यन्तरश्चैव तयोर्वक्ष्यामि लक्षणम् ॥२७॥

अभिनवभारती

नन्वेतल्लक्षणमात्रेतिवृत्तेऽनेकस्यापि रामचरित इव सुग्रीवविभीषणयोरपीत्याह यत्रानेकस्येति ॥२३॥

एवं नायकभेदं निरूप्य नायिकाभेदमाह दिव्याचेति ॥२४।२८॥

बालक्रीड़ा

(मूल) किन्तु जिसमें ये पुष्ट होते हैं माने अधिक होते है वह नायक नही होता है ॥२३॥

(मूल) दिव्य नृपपत्नी, कुलस्त्री एवं गणिका इनको नाना स्वभाव वाली धीरा, ललिता, उदात्ता एवं निभृता नाम वाली नायिका समझें ॥२४॥

(मूल) इनमें धीरा और ललिता क्रमशः दिव्या एवं राजाङ्गना होती हैं। उदात्ता एवं निभृता क्रमशः कुल स्त्री और गणिका होती हैं ॥२५॥

(मूल) ललिता, उदात्ता, गणिका तथा धीरा के विषय में अन्तःपुर के अनुसार राजोपचार को कहूँगा ॥२६॥

(मूल) सभी प्रकृतियों के उपचार के बदौलत दो भेद होते हैं। एक बाह्य दूसरा आभ्यन्तर। इनके लक्षण को कहूँगा ॥२७॥

जहां केवल ऐसा लक्षण होता है वहां अनेक होते हैं। जैसे राम के चरित में सुग्रीव और विभीषण। इसलिए कहते हैं अनेकस्य ॥२३॥

इस प्रकार नायक के भेद का निरूपण करके नायिका के भेद को कहता हैं—दिव्या च ॥२४।२८॥

तत्र राजोपचारो यो भवेदाभ्यन्तरो हि सः ।
ततो भिन्नोपचारस्तु यस्च बाह्यः स उच्यते ॥२८॥
अथ राजोपचार भिन्नोपचारतरस्तथा ।
स्त्रीविभागं प्रवक्ष्यामि राज्ञामन्तःपुराश्रितम् ॥२९॥
महादेवी तथा देव्यः स्वामिन्यः स्थापिता अपि ।
भोगिन्यः शिल्पकारिण्यो नाटकीयाः सनर्तक्यः ॥३०॥
अनुचारिकाश्च विज्ञेयास्तथा च परिचारिकाः ।
तथा संचारिकाश्चैव तथा प्रेषणकारिकाः ॥३१॥
महत्तर्यः प्रतीहार्यः कुमार्यः स्थविरा अपि ।
आयुक्तिकाश्च नृपतेरयमन्तःपुरो जनः ॥३२॥

अभिनवभारती

अथ परिवारभेदमाह राजोपचारमित्यादि ॥२९॥

महादेवीप्रभृत्यायुक्तिकान्तः सप्तदशकः स्त्रीगणः, नपुंसकादिवर्गोऽष्टादश । अत एव वक्ष्यति एतदष्टादशविधं प्रोक्तमन्तःपुरमिति, तद्विषयः परिवार इत्यर्थः । महादेवीत्येकत्वं विवक्षितम् ॥३०।३२॥

बालक्रीड़ा

(मूल) उनमें जो राजा का उपचार होता है वह आभ्यन्तर होता है और उससे भिन्न का उपचार बाह्य कहलाता है ॥२८॥

(मूल) अथ इसके अनन्तर राजोपचार और भिन्नोपचार के कारण होने वाले स्त्रियों के विभाग को राजाओं के अन्तःपुर के अनुसार कहूँगा ॥२९॥

(मूल) महादेवी तथा अन्य देवियों - स्वामिनी, स्थापिता, भोगिनी शिल्पकारिणी नर्तकों के सहित नर्तकियों, अनुचारिका, परिचारिका, संचारिका, प्रेषणकारिका माने सन्देशवाहिनी, महत्तरियों प्रतीहारी कुमारियाँ, बुढ़ियाँ और आयुक्तिकाएँ। यह राजा के अन्तःपुर के जन हैं ॥३०।३२॥

अथ अब परिवार के भेद को कहते हैं राजोपचारम् इत्यादि ॥२९॥

महादेवी से लेकर आयुक्तिका पर्यन्त १६ स्त्रियों का गण है और नपुंसकादि वर्ग १८ हैं। इसीलिए कहेंगे कि अठ्ठारह प्रकार के अन्तः पुर को कहा। अर्थात् यह सब अन्तःपुर का परिवार है। महादेवी यहां एक वचन विवक्षित है ॥३०।३२॥

अत्र मूर्धाभिषिक्ता या कुलशीलसमन्विता ।
गुणैर्युक्ता वयस्स्था च मध्यस्थाऽक्रोधना तथा ॥३३॥
मुक्तेर्ष्या नृपशीलज्ञा सुखदुःखसहा समा ।
शान्तिस्वस्त्ययनैर्भर्त्तुस्सततं मङ्गलैषिणी ॥३४॥
शान्ता पतिव्रता धीरा अन्तःपुरहितेरता ।
एभिर्गुणैस्तु संयुक्ता महादेवीत्युदाहृता ॥३५॥
एभिरेव गुणैर्युक्तास्तत्संस्कारविवर्जिताः ।
गर्विताश्चातिसौभाग्याः पतिसंभोगतत्पराः ॥३६॥

अभिनवभारती

महादेवीप्रभृतीनां क्रमेण लक्षणान्याह अत्र मूधाभिषिक्तेत्यादि । सर्वेषां मूर्धनि प्रधानस्थानेत्यभिषिक्ता । वयसि मध्यमे तिष्ठतीति मध्यस्था ॥३३।३४॥

(अन्तःपुरेति) अन्तःपुरिके बाह्ये च वर्गे । अन्तःपुराय हितं कौशल्यसंपादनम् ॥३५।३६॥

बालक्रीड़ा

(मूल) यहां नाटचशास्त्र में जिन गुणों से युक्ता को महादेवी कहा है वे गुण हैं जो युवती, मूर्धाभिषिक्ता, कुलीन, शीलवती, गुणों से सम्पन्ना प्रपञ्चों से उदासीन क्रोध नही करने वाली ईर्ष्या एवं द्वेष से विनिर्मुक्ता, नृप के शील को समझने वाली सुख एवं दुःख को समान रूप से सहन करने वाली शान्ति एवं स्वस्त्ययनों से निरन्तर पति के मंगल को चाहने वाली शान्ता पतिव्रता धीरा और अन्तःपुर में ही रत रहने वाली हो ॥३३।३५॥

(मूल) वे स्त्रियाँ देवी कहलाती हैं जो इन उपयुक्त गुणों से युक्त होती हुई भी महादेवी के संस्कारों से भावनाओं से रहित हैं गर्ववाली, अपने में अतिसौभाग्य मानने वाली पति के साथ सम्भोग करने में तत्पर, ॥३६॥

क्रम से महादेवी प्रभृति के लक्षणों को कहते हैं मूर्धाभिषिक्त सबके मस्तक में अर्थात् जिसका प्रधान स्थान होता है वह अभिषिक्ता होती है। जो मध्यम वय में रहती है वह मध्यस्था होती है ॥३३।३४॥

अन्तःपुर माने अन्तःपुरिक एवं बाह्य वर्ग में। अन्तःपुर के लिए हित कुशलता का सम्पादन ॥३५।३६॥

शुचिनित्योज्ज्वलाकाराः प्रतिपक्षाभ्यसूयकाः ।
वयोरूपगुणाढचा यास्ता देव्य इति भाषिताः ॥३७॥
सेनापतेरमात्यानां भृत्यानामथवा पुनः ।
भवेयुस्तनया यास्तु प्रतिसम्मानवर्जिताः ॥३८॥
शीलरूपगुणैर्यास्तु संपन्ना नृपतेर्हिताः ।
स्वगुणैर्लब्धसम्माना स्वामिन्य इति ताः स्मृताः ॥३९॥
रूपयौवनशालिन्यः कर्कशा विभ्रमान्विताः ।
रतिसंभोग कुशलाः प्रतिपक्षाभ्यसूयिकाः ॥४०॥

अभिनवभारती

देव्य इति। महादेवी तु शृङ्गारोचिता नातीव भवति साभिमुख्यमभि प्रयातीत्याशयेन वासवदत्तादिषु कवयो देवी वाचोयुक्तचा व्यवहरन्ति ॥३७।३८॥

स्वगुणैरिति समानं लम्भिता गुणैर्योजिता कलाशीलब योभिः ॥३९॥

कर्कशा सौभाग्यगर्वेण अथेत्यपिचेत्यर्थः ॥४०।५५॥

बालक्रीड़ा

(मूल) शुचि रहने वाली, अपने आकार को नित्य ही उज्ज्वल रखने वाली, प्रतिपक्ष से अभ्यसूया रखने वाली अर्थात् सौतिया डाह रखने वाली तथा वय के अनुसार रूपादि गुणों से आढच हो ॥३७॥

(मूल) वे स्वामिनी मानी गई है जो सेनापति अमात्य एवं भृत्य लोगों की लडकियां है। प्रतिसम्मान से रहिता, शील से सम्पन्ना, गुणवती, नृपति के हित में तत्पर और अपने गुणों के बलपर सम्मान को प्राप्त करने वाली हैं ॥३८।३९॥

(मूल) वे नायिकाएँ स्थापित माने रखेलिन होती हैं जो यौवन के अनुरूप सौन्दर्य से युक्त है कर्कशा कटु स्वभाव वाली, विभ्रम से आशंका से युक्त, रति के विषय में सम्भोग में कुशल, सौतिया डाह रखने वाली चतुरा, ॥४०॥

देव्यः। महादेवी शृङ्गार में अतीव उषित डूबी हुई नही रहती है वह तो नायक के अभिमुख में अभिप्राय रखती है इसीलिए कवि वासवदत्तादि में देवी शब्द का व्यवहार करते हैं ॥३७।३८॥

स्वगुण यह शब्द सब में समान है। लम्भिता माने गुणों से युक्त कर दी गई है। कलाशील एवं वय से ॥३९॥

सौभाग्य के गर्व से कर्कश हैं कठोर हैं। अथ माने अपि च ॥४०।५५॥

दक्षा भर्तुश्च चित्तज्ञा गन्धमाल्योज्ज्वलास्सदा ।
नृपतेश्छन्दवर्त्तिन्यो न ह्रीर्ष्यामानगर्विताः ॥४१॥
उत्थिताश्च प्रमत्ताश्च त्यक्तालस्या न निष्ठुराः ।
मान्यामान्यविशेषज्ञाः स्थापिता इति ताः स्मृताः ॥४२॥
कुलशील लब्धपूजामृदवो नातिचोद्भटाः ।
मध्यस्था निभृताः क्षान्ता भोगिन्य इति ताः स्मृताः ॥४३॥
नाना कलाविशेषज्ञा नानाशिल्पविचक्षणाः ।
गन्धपुष्पविभागज्ञा लेख्यालेख्यविकल्पिकाः ॥४४॥
शयनासनभागज्ञाश्चतुरा मधुरास्तथा ।
दक्षाः सौम्याः स्फुटाः श्लिष्टा निभृताः शिल्पकारिकाः ॥४५॥
ग्रहमोक्षलयज्ञा या रसभावविकल्पिकाः ।

बालक्रीड़ा

(मूल) भर्त्ता के चित्त को समझने वाली सुगन्धित द्रव्यों एवं मालाओं से सदा उज्ज्वल रहने वाली नृपति के छन्द का स्वभाव का अनुवर्त्तन करने वाली ईर्ष्या द्वेष अभिमान एवं गर्व से रहित प्रमाद करती हुई भी उत्थित माने सावधान आलस्य शून्य अनिष्ठुर और यह सम्मान के योग्य है और यह सम्मान के योग्य नही है—इसकी विशेषता की जानकार हैं ॥४१।४२॥

(मूल) वे स्त्रियों योगिनी हैं जो कुल एवं शील के बदौलत पूजा को सम्मान को प्राप्त करती हैं और कोमल स्वभाव की हैं, अत्यन्त उद्भट नही हैं मध्यम उमर की हैं निभृता एकान्त में रहना पसन्द करने वाली और क्षमा से सम्पन्न हैं ॥४३॥

(मूल) विभिन्न कलाओं की विशेषता की जानकार, अनेक प्रकार की कारीगरी में शिल्प में विलक्षण, गन्ध एवं पुष्पों के विभाग की जानकार लेख्य एवं आलेख्य का विकल्प भेद करने वाली, शयन-आसन के भाग की हिस्से की जानकार, चतुर, मधुर, दक्ष माने कुशल सौम्य स्वभाव वाली, स्फुटा माने विकसिता, श्लिष्टा माने अंगों के परस्पर में श्लेष से युक्ता, निभृता एकान्त में चुप रहने वाली शिल्प करने वाली स्वर सम्बन्धी लय के ग्रहण एवं मोक्ष माने त्याग की जानकार, रस के विना भाव नही रह सकते हैं और भावों के अभाव में रस की स्थिति दुर्लभ होती है—इसके विकल्प को भेद

चतुरा नाटचकुशलाश्चोहापोहविचक्षणाः ॥४६॥
रूपयौवनसंपन्ना नाटकीयास्तु ताः स्मृताः।
हेलाभावविशेषाढचा सत्त्वेनाभिनयेन च ॥४७॥
माधुर्येण च संपन्ना ह्यातोद्यकुशला तथा।
अङ्गप्रत्यङ्गसंपन्ना चतुष्षष्ठिकलान्विता ॥४८॥
चतुराः प्रश्रयोपेताः स्त्रीदोषैश्च विवर्जिताः।
सदा प्रगल्भा च तथा त्यक्तालस्या जितश्रमा ॥४६॥
नानाशिल्प प्रयोगज्ञा नृत्तगीतविचक्षणा।
अथ रूपगुणौदार्यधैर्य सौभाग्य शीलसंपन्ना ॥५०॥
पेशलमधुरस्निग्धानुनादिकल चित्रकण्ठा च।
समागतासु नारीषु रूपयौवनकान्तिभिः ॥५१॥
न दृश्यते गुणैस्तुल्या यस्याः सा नर्तकी स्मृता।
सर्वावस्थोपचारेषु या न मुञ्चति पार्थिवम् ॥५२॥
विज्ञेया दक्षिणा दक्षा नाटचज्ञैरनुचारिका।
अथ क्रमः- क्रमः संचिन्त्यमानाप्तिः

अवलोकः

कथं चिरयति वसन्तकः। किं नु खलु विदितः स्यादयं वृत्तान्तो देव्या।' इत्यनेन रत्नावलीसमागमप्राप्त्याशानुगुण्येनैव देवीशङ्कया वितर्काद्रूपमिति ॥

यथा रत्नावल्याम्—'विदूषकः—(सहर्षम्।) [1]ही ही भोः, कोसम्बीरज्जलाहेणावि ण तादिसो वअस्सस्स परितोसो आसि, यादिसो मम सआभादो पिअवअणं सुणिअ भविस्सदि त्ति तक्केमि।' इत्यनेन रत्नावलीप्राप्तिवार्तापि कौशाम्बीराज्यलाभादतिरिच्यत इत्युत्कर्षाभिधानादुदाहृतिरिति ॥

यथा रत्नावल्याम्—'राजा—उपनतप्रियासमागमोत्सवस्यापि मे किमिदमत्यर्थमुत्ताम्यति चेतः। अथवा।

तीव्रः स्मरसंतापो न तथादौ बाधते यथासन्ने।
तपति प्रावृषि सुतरामभ्यर्णजलागमो दिवसः ॥

बालक्रीड़ा

है। इसके बाद राजा फिर विचार करता है कि वसन्तक क्यों देरी कर कर रहा है क्या इस वृत्तान्त को वासवदत्ता तो नही जान गई है। इससे सागरिका के समागम की प्राप्ति की आशा के आनुकूल्य होते हुए भी वासवदत्ता संबंधी आशंका की तर्कना करने से रूप नामक यह अंग है। यहां शंकायाश्च में चकार अपदार्थ है।

उत्कर्षमय वाक्य कहना उदाहृति है।

विदूषक—(हर्ष के साथ) ही, ही भो मैं तर्कना करता हूँ कि कौशाम्बी के राज्य के लाभ से भी इतना आनन्द प्रियवयस्य को नही हुआ होगा जितना कि मेरे कथन को सुन कर होगा। इससे रत्नावली के प्राप्ति की बात ही कौशाम्बी के राज्य लाभ से अधिक है इस प्रकार ऐसे उत्कर्ष कथन से यह उदाहृति है।

जिसका चिन्तन किया जा रहा है उसका मिलना क्रम है। जैसे रत्नावली में राजा—प्रिया के समागम रूपी उत्सव के प्राप्त होने पर भी क्यों मेरा यह चित्त इतना उतावला हो रहा है। अथवा

प्रिया की तीव्र स्मृति से जन्य ताप माने कामोद्रेक आरम्भ में इतनी पीडा को नही पहुँचाता जितना कि प्रिया की सन्निकटता पहुँचाती है जैसे वर्षा ऋतु में वर्षा होने के पहले जब कि जल बरसने का समय नजदीक होता है उस समय घाम या ऊष्मा शरीर को पीडा पहुँचाता है।

---

१. 'ही ही भोः, कौशाम्बीराज्यलाभेनापि न तादृशो वयस्यस्य परितोष आसीत्, यादृशो मम सकाशात्प्रियवचनं श्रुत्वा भविष्यतीति तर्कयामि।' इति च्छाया।

अथ क्रमान्तरं मतभेदेन-भावज्ञानमथापरे ॥३६॥

अवलोकः

विदूषकः—(आकर्ण्य ।) १भोदि सागरिए, एसो पिअवअस्सो तुमं ज्जेव उद्दिसिअ उक्कण्ठाणिब्भरं मन्तेदि । ता निवेदेमि से तुहागमणम् ।' इत्यनेन वत्सराजस्य सागरिकासमागममभिलषत एव श्रान्तसागरिकाप्राप्तिरिति क्रमः ॥

यथा रत्नावल्याम्—'राजा—(उपसृत्य ।) प्रिये सागरिके,

शीतांशुर्मुखमुत्पले तव दृशौ पद्मानुकारौ करौ
रम्भागर्भनिभं तवोरुयुगलं बाहू मृणालोपमौ ।
इत्याह्लादकराखिलाङ्गि ! रभसान्निःशङ्कमालिङ्ग्य मा-
मङ्गानि त्वमनङ्गतापविधुराण्येह्येहि निर्वापय ॥'

इत्यादिना 'इह तदप्यस्त्येव बिम्बाधरे ।' इत्यन्तेन वासवदत्तया वत्सराजभावस्य ज्ञातत्वात्क्रमान्तरमिति ॥

बालक्रीड़ा

विदूषक—हे सागरिके ! यह प्रिय मित्र तुमको ही उद्देश्य करके अत्यन्त उत्कण्ठा के साथ चिन्तन कर रहा है । इससे सागरिका के समागम की अभिलाषा करने वाले वत्सराज को वासवदत्ता के रूप में अभिसरण से चलने से थकी हुई सागरिका की प्राप्ति क्रम है ।

यहां अवलोक में 'श्रान्तसागरिका' में श्रान्त पाठ अशुद्ध है क्योंकि विदूषक और सुसंगता की योजना के अनुसार सागरिका ने वासवदत्ता का वेश धारण कर वत्सराज का अभिसरण किया जिसके कारण काञ्चनमाला ने विदूषक को साधुवाद दिया कि तुमने सन्धि विग्रह की चिन्ता कर के यौगन्धरायण को भी मात कर दिया । इससे सिद्ध है कि यह पाठ नही हैं अभिसरण से श्रांत पाठ होना चाहिए । संचित्यमान सम्यक् चिन्त्यमान अर्थ की प्राप्ति में भ्रम दोषप्रद है ।

मतभेद से अब क्रमा के अन्तर माने भिन्न लक्षण को कहते हैं—

जैसा रत्नावली में—राजा पास में जाकर कहते है—प्रिये सागरिके—तुम्हारा मुख चन्द्रमा के समान है तुम्हारी आंखे कमल है तुम्हारे हाथ कमल के सदृश है तुम्हारे ऊरु कदली के मध्य भाग के सदृश है तुम्हारे बाहु मृणाल के समान है इस प्रकार तुम्हारे अखिल अंग आह्लादकारी हैं आनन्द दायक है अतः आवो, आवो निःशङ्क होकर वेग से आलिङ्गन करके काम से संतप्त मेरे अंगों को शीतल करो । यहां से तुम्हारे होठ में अमृत भी है—यहां तक के कथन से वासवदत्ता ने वत्सराज के भाव को जान लिया अतः यह क्रम है ।

---

१. 'भवति सागरिके, एष प्रियवयस्यस्त्वामेवोद्दिश्योत्कण्ठानिर्भरं मन्त्रयति । तन्निवेदयामि तस्मै तवागमनम् ।' इति च्छाया ।

अथ संग्रहः- संग्रहः सामदानोक्तिः

अथानुमानम्- अभ्यूहो लिङ्गतोऽनुमा ।

अवलोकः

यथा रत्नावल्याम्--राजा–'साधु वयस्य, साधु । इदं ते पारितोषिकं कटकं ददामि ।' इत्याभ्यां सामदानाभ्यां विदूषकस्य सागरिकासमागमकारिणः कटकसंग्रहात्संग्रह इति ॥

यथा रत्नावल्याम्–'राजा–धिङ् मूर्ख, त्वत्कृत एवायमापतितोऽस्माकमनर्थः । कुतः ।

समारूढा प्रीतिः प्रणयबहुमानात्प्रतिदिनं
व्यलीकं वीक्ष्येदं कृतमकृतपूर्वं खलु मया ।
प्रिया मुञ्चत्यद्य स्फुटमसहना जोवितमसौ
प्रकृष्टस्य प्रेम्णः स्खलितमविषह्यं हि भवति ॥

विदूषकः—[1]भो वअस्स, वासवदत्ता किं करिस्सदि त्ति ण जाणामि । साग-

बालक्रीड़ा

अथ संग्रह –

साम (प्रशंसा) एवं दानमयी उक्ति संग्रह है जैसे – रत्नावली में राजा विदूषक से कहता है वाह, वाह ! धन्य हो दोस्त । यह सोने का कडा तुम्हे पारितोषिक देता हूं । इस साम एवं दान से सागरिका समागम कराने वाले विदूषक का कटक संग्रह करना संग्रह है—

अब अनुमान –

लिङ्ग से माने हेतु से साध्य का ऊह, ज्ञान, अनुमान है ।

जैसे—रत्नावली में राजा–धिङ् मूर्ख । तुम्हारे ही कारण यह अनर्थ हम लोगों पर आ पड़ा ।

प्रणय के बहुमान माने अत्यधिक सम्मान से प्रीति अत्यन्त बढ गई थी । मेरे द्वारा पहले कभी न किये हुए इस अपराध को देखकर न सहन कर सकने वाली मेरी प्रिया जीवन को छोड़ देगी क्योंकि बढे हुए प्रेम का स्खलन असह्य हो जाता है ।

विदूषक—दोस्त ! वासवदत्ता क्या कर बठैगी मैं नही जान पा रहा हूं । किन्तु सागरिका का जीना बहुत मुश्किल है ऐसा मैं तर्क कर रहा हूं समझ रहा हूं

---

१. 'भो वयस्य, वासवदत्ता किं करिष्यतीति न जानामि । सागरिका पुनर्दुष्करं जोविष्यतीति तर्कयामि ।' इति च्छाया ।

अथाधिबलम्- अधिबलमभिसंधिः
अथ तोटकम्- संरब्धं तोटकं वचः ॥४०॥

अवलोकः

रिआ उण दुक्करं जीविस्सदि त्ति तक्केमि ।' इत्यत्र प्रकृष्टप्रेमस्खलनेन सागरिकानुरागजन्येन वासवदत्ताया मरणाभ्यूहनमनुमानमिति ॥

यथा रत्नावल्याम्—'काञ्चनमाला—१भट्टिणि, इअं सा चित्तसालिआ। ता वसन्तअस्स सण्णं करेमि। (छोटिकां ददाति।)' इत्यादिना काञ्चनमालावासदत्तावेषाभ्यां सुसङ्गतासागरिकाभ्यां राजविदूषकयोरभिसंधीयमानत्वादधिबलमिति ॥

यथा रत्नावल्याम्—'वासवदत्ता—(उपसृत्य।) २अज्जउत्त, जुत्तमिणं सरिसमिणम्। (पुनः सरोषम्।) अज्जउत्त, उट्ठेहि उट्ठेहि किं अज्जवि आहिजाईए सेवादुक्खमणुभवीअदि। कञ्चणमाले, एदेण ज्जेव पासेण बन्धिअ आणेहि एणं

बालक्रीड़ा

इससे सागरिका से किये गये अनुराग के कारण वासवदत्ता विषयक जो प्रकृष्ट प्रेम का स्खलन है उससे मरण का अभ्यूहन ज्ञान करना अनुमान है। अथ अधिबल—

अभिसन्धि अभिसन्धान मिलान को अधिबल कहते हैं।

जैसे रत्नावली में काञ्चनमाला—मालकिन यह वह चित्रशाला है अतः अब मैं वसन्तक को संकेत करती हूं (चुटकी देती है) इससे काञ्चनमाला और वासवदत्ता के वेष को धारण करने वाली सुसंगता और सागरिका के द्वारा राजा और विदूषक के साथ मिलान किया जा रहा है इसलिए यह अधिबल है।

'यहां पर वासवदत्ताकाञ्चनमालाभ्यां सागरिकासुसङ्गतावेषाभ्यां, यह पाठ अशुद्ध है क्योंकि इस संवाद के पहले हीं 'रत्नावली' में वासवदत्ता स्वयं काञ्चनमाला से कहती है कि—हञ्जे कञ्चणमाले सच्चज्जेव्व मह वेसधारिणी भविअ साअरिआ अज्जउत्तं अहिसरिस्सदि। अमृताहरणं एवं छद्म' के उदाहरण में भी देख सकते हैं। अतः यहां काञ्चनमालावासवदत्तावेषाभ्यां सुसङ्गतासागरिकाभ्यां ऐसा पाठ होना चाहिए।

अब तोटक को कहते हैं

क्रोध युक्त (संरब्ध) वाक्य तोटक है। रत्नावली में वासवदत्ता—(समीप में जाकर) राजा से कहती है—

---

१. 'भत्रि, इयं सा चित्रशालिका। तद्वसन्तकस्य संज्ञां करोमि।' इति च्छाया।

२. 'आर्यपुत्र, युक्तमिदं सदृशमिदम्। आर्यपुत्र, उत्तिष्ठ। किमद्याप्याभिजात्याः सेवादुःखमनुभूयते। काञ्चनमाले, एतेनैव पाशेन बध्वानयैनं दुष्टब्राह्मणम्। एतामपि दुष्टकन्यकामग्रतः कुरु।' इति च्छाया।

ग्रन्थान्तरे तु– तोटकस्यान्यथाभावं ब्रुवतेऽधिबलं बुधाः ।

अवलोकः

दुट्ठबह्मणम् । एदं पि दुट्ठकण्णअं अग्गदो करेहि ।' इत्यनेन वासवदत्तासंरब्धवचसा सागरिकासमागमान्तरायभूतेनानियतप्राप्तिकारणं तोटकमुक्तम् ।।

यथा च वेणीसंहारे—

अश्वत्थामा—'प्रयत्नपरिबोधितः स्तुतिभिरद्य शेषे निशाम् ।'
इत्यादिना,

'वृतायुधो यावदहं तावदन्यैः किमायुधैः ।'

इत्यन्तेनान्योन्यं कर्णाश्वत्थाम्नोः संरब्धवचसा सेनाभेदकारिणा पाण्डवविजयप्रात्याशान्वितं तोटकमिति ।।

यथा रत्नावल्याम् – 'राजा — देवि, एवमपि प्रत्यक्षदृष्टव्यलीकः किं विज्ञापयामि ।।

आताम्रतामपनयामि विलक्ष एव लाक्षाकृतां चरणयोस्तव देवि ! मूर्ध्ना ।
कोपोपरागजनितां तु मुखेन्दुबिम्बे हर्तुं क्षमो यदि परं करुणा मयि स्यात् ।।'

बालक्रीड़ा

आर्यपुत्र ! यह कार्य आप के योग्य है सदृश । आर्यपुत्र ! उठें उठें । क्यों आप आज भी नैसर्गिक स्वाभाविक अपनी सेवा से मुझे कष्ट पहुंचाते हैं दुःखित करते हैं । इससे सागरिका के समागम में विघ्नस्वरूप वासवत्ता के कोधयुक्त वाक्य से अनियत प्राप्ति के अनिश्चित प्राप्ति के कारण तोटक है ।

और भी जैसे वेणीसंहार में– अश्वत्थामा दुर्योधन से कहते हैं कि आज आप रात्रि में ऐसे आराम से सोयेंगे कि बन्दीजनों की स्तुतियों के द्वारा बड़े प्रयत्न से जगाए जायेंगे । यहां से लेकर जब तक मैंने आयुधो को धारण कर रखा है तब अन्य आयुधधारियों की क्या जरूरत है यहां तक सेना में फूट डालने वाले कर्ण और अश्वत्थामा के क्रोधयुक्त वचन से पाण्डवों के बिजय की प्राप्ति की आशा से अन्वित तोटक है ।

ग्रथान्तर में बुध लोग तोटक के अन्यथा भाव को अधिबल कहते हैं ।

जैसे रत्नावली में राजा कहते हैं—इस प्रकार जिसके अपराध को प्रत्यक्ष देख लिया गया है ऐसा मैं क्या विज्ञापन करूं निवेदन करूं । हे देवि । महावर से रंजित आपके चरणों की लाली को मस्तक से रगड कर दूर कर सकता हूं और आपके मुख चन्द्र में कोप से जनित लाली को भी दूर कर सकता हूं अगर आप करुणामयी होओ ।

संरब्धवचनं यत्तु तोटकं तदुदाहृतम् ।।४१।।

अथोद्वेगः- उद्वेगगोऽरिकृता भीतिः

अवलोकः

यथा रत्नावल्याम्—'राजा—प्रिये वासवदत्ते, प्रसीद प्रसीद । वासवदत्ता—(अश्रूणि धारयन्ती ।) १अज्जउत्त, मा एवं भण । अण्णसङ्कन्ताइं खु एदइं अक्खराइंत्ति ।'

यथा च वेणीसंहारे–'राजा–अये सुन्दरक, कच्चित्कुशलमङ्गराजस्य। पुरुषः–२कुशलं सरीरमेत्तकेण । राजा—किं तस्य किरीटिना हता धौरेयाः, क्षत्तः सारथिः, भग्नो वा रथः । पुरुषः—३देव, ण भग्गो रहो । भग्गो से मणोरहो । राजा—(संसभ्रमम् ।) कथम्' । इत्येवमादिना संरब्धवचसा तोटकमिति ।।

यथा रत्नावल्याम् –'सागरिका – (आत्मगतम् ।) ४कहं अकिदपुण्णेहिं अत्तणो इच्छाए मरिउं पि ण पारीअदि ।' इत्यनेन वासवदत्तातः सागरिकाया भयमित्युद्वेगः । यो हि यस्यापकारी स तस्यारिः ।

बालक्रीड़ा

जो संरब्ध युक्त क्रोध युक्त वाक्य हैं उसे तोटक कहते हैं ।

जैसे रत्नावली में राजा–प्रिये ! वासवदत्ते ! क्रोध को छोड़िये अर्थात् क्रुद्धमत होइये प्रसन्न होइये प्रसन्न होवें । फिर वासवदत्ता रोती हुई आँसूओं को धारण करती हुई कहती है कि आर्यपुत्र ! ऐसा मत बोलिये । ये अक्षर माने (प्रिये प्रसीद प्रसीद) ये शब्द अन्य में संक्रान्त हो गये माने प्रिये प्रसन्न होवो, ये वाक्य सागरिका के लिए कहिए मैं इसकी पात्र नही रही ।

और भी जैसे वेणीसंहार में –राजा (दुर्योधन) ओ सुन्दरक ! अङ्गराज कर्ण कुशल तो हैं । पुरुष—केवल शरीर मात्र से कुशल है । राजा—क्या अर्जुन ने उनके घोड़ो को मार दिया या सारथि नष्ट हो गया या रथ टूट गया । पुरुष—हे देव रथ नही टूटा किन्तु उसका मनोरथ टूट गया । राजा–(घबराहट के साथ) कैसे । इत्यादि से इस प्रकार संरब्धमय घबराहट से भरे वाक्य तोटक है ।

दुश्मन के कारण उत्पन्न होने वाली भीति को भय को उद्वेग कहते हैं ।

जैसे रत्नावली में सागरिका अपने मन में कहती है कि जिन्होंने पुण्य नही किया है वे लोग अपनी इच्छा से मर भी कैसे सकते हैं । इससे सागरिका को वासवदत्ता से जो भय है वह उद्वेग है । जो जिसका अपकार करता है वह उसका वैरी है ।

---

१. 'आर्यपुत्र, मैवं भण । अन्यसंक्रान्तानि खल्वेतान्यक्षराणीति ।' इति च्छाया । २. 'कुशलं शरीरमात्रकेण ।' इति च्छाया । ३. 'देव, न भग्नो रथः । भग्नोऽस्य मनोरथः ।' इति च्छाया । ४. 'कथमकृतपुण्यैरात्मन इच्छया मर्तुमपि न पार्यते ।' इति च्छाया ।

अथ संभ्रमः- शङ्कात्रासौ च संभ्रमः ।

अवलोकः

यथा च वेणीसंहारे—'सूतः—(श्रुत्वा सभयम् ।) कथमासन्न एवासौ कौरव-राजपुत्रमहावनोत्पातमारुतो मारुतिरनुपलब्धसंज्ञश्च महाराजः । भवतु । दूरमपहरामि स्यन्दनम् । कदाचिदयमनार्यो दुःशासन इवास्मिन्नप्यनार्यमाचरिष्यति ।' इत्यरिकृता भीतिरुद्वेगः ॥

यथा रत्नावल्याम्-'विदूषकः-(पश्यन् ।) १का उण एसा । (ससंभ्रमम् ।) कधं देवी वासवदत्ता अत्ताणं वावादेदि । राजा-(ससंभ्रममुपसर्पन् ।) क्वासौ क्वासौ ।' इत्यनेन वासवदत्ताबुद्धिगृहीतायाः सागरिकायाया मरणशङ्कया संभ्रम इति ।

यथा च वेणीसंहारे—'(नेपथ्ये कलकलः ।) अश्वत्थामा—(ससंभ्रमम् ।) मातुल मातुल, कष्टम् । एष भ्रातुः प्रतिज्ञाभङ्गभीरुः किरीटी समं शरवर्षैर्दुर्योधन-राधेयावभिद्रवति । सर्वथा पीतं शोणितं दुःशासनस्य भीमेन ।' इति शङ्का । तथा '(प्रविश्य संभ्रान्तः सप्रहारः) सूतः –'त्रायतां त्रायतां कुमारः ।' इति त्रासः' । इत्येताभ्यां दुःशासनद्रोणवधसूचकाभ्यां पाण्डवविजयप्राप्त्याशान्वितः संभ्रम इति ॥

बालक्रीडा

और भी जैसे वेणीसंहार में—सूत (सुनकर भय के साथ) कौरवराज के पुत्ररूपी वन को उखाड देने वाले वायु के समान यह भीम क्या पास ही आ गया है । इसकी चेष्टा मालूम नही पड़ रही है और महाराज दुर्योधन को अभी चेतना नही आई । अच्छा । मैं रथ को दूर ले जाता हूँ । कदाचित् यह अनार्य माने दुष्ट दुःशासन की तरह राजा पर भी दुष्टता न कर बैठे । इस प्रकार दुश्मन के कारण होने वाली भीति उद्वेग है । अब संभ्रम को कहते हैं—

शंका और त्रास को संभ्रम कहते हैं जैसे रत्नावली में—विदूषक (देखते हुए) वासवदत्ता क्यों अपने को मार रही है माने आत्महत्या कर रही है । राजा –सशंकित पास जाता हुआ कहता है—"कहां हैं वह, कहां है वह" इससे सागरिका को वासवदत्ता समझ कर उसके मरने की शंका करना संभ्रम है ।

और भी वेणीसंहार में—नेपथ्य में कोलाहल हो रहा हैं । अश्वत्थामा—(घबराता हुआ बोलता है) – मामा जी मामा जी कष्ट है । यह अर्जुन भाई की प्रतिज्ञा के टूटने से डर कर कर्ण और दुर्योधन दोनों पर एक साथ बाण से आक्रमण कर रहा है । भीम ने दुःशासन का सब का सब खून पी लिया । यह शङ्का है । (घबराया हुआ एव घायल सूत प्रवेश करता है और कहता है) कुमार रक्षा करिये रक्षा करिये । यह त्रास है । इस द्रोण और दुःशासन के बध की सूचना देने वाले इन शंका और त्रास से और पाण्डवविजय की प्राप्ति की आशा से अन्वित संभ्रम है ।

---

१. 'कापुनरेषा । कथं देवी वासवदत्तात्मानं व्यापादयति ।' इति च्छाया ।

अथाक्षेपः- ताद्दग्बीजसमुद्भेदादाक्षेपः परिकीर्तितः ।।४२।।

अवलोकः

यथा रत्नावल्याम्—'राजा—वयस्य, देवीप्रसादनं मुक्त्वा नान्यमत्रोपायं पश्यामि ।' पुनः क्रमान्तरे 'सर्वथा देवीप्रसादनं प्रति निष्प्रत्याशीभूताः स्मः ।' पुनः 'तत्किमिह स्थितेन देवीमेव गत्वा प्रसादयामि ।' इत्यनेन देवीप्रसादायत्ता सागरिकासमागमसिद्धिरिति दृष्टनष्टबीजोद्भेदादाक्षेपः ।

यथा च वेणीसंहारे—'सुन्दरकः—१अहवा किमेत्थ देव्वं उ आलहामि । तस्स क्खु एदं णिब्भच्छिदविदुरवअणबीअस्स परिभूदपिदामहहिदोवदेसङ्कुरस्स सउणिप्वोच्छाहणारूढमूलस्स कूडविससाहिणो पञ्चालीकेसग्गहणकुसुमस्स फलं परिणमेदि ।' इत्यनेन तादृग्बीजमेव फलोन्मुखतयाक्षिप्यत इत्याक्षेपः ।

बालक्रीड़ा

अब आक्षेप को कहते हैं—तादृग्बीजसमुद्भेदादाक्षेपः परिकीर्तितः ।

यहां आक्षेप के लक्षण में गर्भ शब्द का उपन्यास करना अपदार्थ है । क्योंकि गर्भ संधि अंगी है और आक्षेप अंग है अतः अंग के लक्षण में अंगी का उपन्यास दोषावह है इस लिए गर्भ संधि के लक्षण में जो अंश उपात्त है उसका उपन्यास करना चाहिए वह है बीज का दृष्टत्व और नष्टत्व । इस लिए दृष्टत्व नष्टत्व का आकर्षण करने के लिए तादृक् शब्द का उपन्यास किया है। क्योंकि तत् शब्द पूर्व का परामर्शक होता है । दृष्ट नष्ट बीज का जो सम्यक् प्रकाशन है उसको आक्षेप कहते हैं ।

जैसे रत्नावली में राजा—दोस्त उसी का चिन्तन कर रहा हूं (सागरिका के समागम के उपाय की अर्थात् उसकी प्राप्ति की चिन्ता कर रहा हूँ) उसकी प्राप्ति किस उपाय से हो । देवी को खुश करने के सिवाय सागरिका के प्राप्ति के लिए दूसरा कोई उपाय नही है ।

फिर यहां रहने से ठहरने से क्या फायदा है चल कर देवी को ही प्रसन्न करता हूँ । इससे देवी के प्रसादन के अधीन अनुरक्त सागरिका के समागम की सिद्धि हैं अर्थात् देवी के प्रसन्न होने से ही अनुरक्त सागरिका का समागम हो सकता है । अतः दृष्ट नष्ट अनुराग बीज का उद्भेदन आक्षेप है । और भी जैसे वेणीसंहार में—सुन्दरक—

इस विषय में क्यों दैव को उपालम्भ दूं उलाहना दूँ । विदुर के वचन का निर्भत्सन करना जिसका बीज है । भीष्म पितामह के हितोपदेश का तिरस्करण अंकुर है । शकुनि के प्रोत्साहन से जिसका मूल बढ गया है । चिरकाल से बढा हुआ बैर जिसका आल वाल है थाला है । उस लाक्षा गृह में आग लगाना विषसंम्पृक्त अन्न को खिलाना और जूवा खेलना रूप विषवृक्षका सभा में पाञ्चाली केशग्रहण जिसका पुष्प है उसका फल कौरव वंश का नाश है ।

---

१. 'अथवा किमत्र दैवमुपालभामि । तस्य खल्वेतन्निर्भर्त्सितविदुरवचनबीजस्य परिभूतपितामहहितोपदेशाङ्कुरस्य शकुनिप्रोत्साहनारूढमूलस्य कूटविषशाखिनः पाञ्चालीकेशग्रहणकुसुमस्य फलं परिणमति ।' इति च्छाया ।

अथावमर्शः– क्रोधादवमृशेद्यत्र व्यसनाद्वा विलोभनात् ।
गर्भनिर्भिन्नबीजार्थं सोऽवमर्शोऽङ्गसंग्रहः ॥४३॥

अवलोकः

एतानि द्वादश गर्भाङ्गानि प्राप्त्याशाप्रदर्शकत्वेनोपनिबन्धनीयानि । एषां च मध्येऽभूताहरणमार्गतोटकाधिबलाक्षेपाणां प्राधान्यम् । एतरेषां यथासंभवं प्रयोग इति साङ्गो गर्भसंधिरुक्तः ।

अवमर्शनमवमर्शः पर्यालोचनम् । तच्च क्रोधाद्वा वा व्यसनाद्वा विलोभनाद्वा । भवितव्यमनेनार्थेनेत्यवधारितैकान्तफलप्राप्त्यवसायात्मा गर्भसंध्युद्भिन्नबी-

बालक्रीड़ा

इससे बीज ही का फल के रूप से आक्षेप होना आक्षेप है । इससे बीज के फलों न्मुख होने के आक्षेप से यह आक्षेप है ।

इन गर्भसंधि के बारह अंगों को प्राप्त्याशा से अन्वित करके लिखना चाहिए । इनमें अभूताहरण मार्ग तोटक अधिबल और आक्षेप प्रधान है । औरों का प्रयोग यथा संभव करना चाहिए । इस तरह साङ्गगर्भसन्धि को कह दिया ।

अब अवमर्श सन्धि को कहते हैं ।

जो बीजरूपी अर्थ गर्भ में प्रकट हो गया है उस बीज का क्रोध से अथवा व्यसन से अथवा लोभ से अवमर्श माने विचार या प्रत्यालोचन है वह अवमर्श संधि होती है ।

अवमर्शन अवमर्श है माने प्रत्यालोचन है । वह भी क्रोध का आश्रयण करके अर्थात् क्रुद्ध व्यक्ति ने बने बनाये कार्य को संशायित स्थिति में पहुँचा दिया या व्यसन का विचार करके अर्थात् व्यसन में निमग्न व्यक्ति के बारे में चिन्ता करना कि यह व्यसन में डूबा तब ऐसा हुआ या लोभ का आलम्बन करके अर्थात् इसने लोभ किया तब इसकी ऐसी स्थिति हुई अन्यथा नही होती ऐसा प्रत्यालोचन ।

यह अर्थ भवितव्य है माने होगा ही इस तरह निर्धारित है निश्चित है एकान्त अवश्यम्भावी फल की प्राप्ति जिसमें ऐसी प्राप्ति के अवसाय माने समाप्ति के रूप में जहां गर्भ सन्धि में उद्भिन्न बीजरूपी अर्थ का अवमर्शन प्रत्यालोचन होता है वह अवमर्श सन्धि है ।

यहां क्रोधेन यह पाठ नितान्त अशुद्ध है क्योंकि क्रोध से प्रत्यालोचन नही हो सकता है । क्रोध से तो बुद्धि नष्ट हो जाती है । उससे अवशर्म कैसा । हां उसका आश्रयण करके जैसे भीम ने स्वल्पावशेष जय को क्रोध करके नष्ट होने की स्थिति में पहुँचा दिया । इसी तरह व्यसन एवं लोभ की भी स्थिति है । अतः क्रोधात् ऐसा पञ्चम्यन्त पाठ साधीयात् है । यहां क्रोधात् व्यसनात् और विलोभनात् ये तीनों पञ्चमी ल्यब्लोपार्था हैं । तथा गर्भनिर्भिन्नबीजार्थः ऐसा प्रथमान्त पाठ भी महान् अशुद्ध है । यह अवमर्शन

अवलोकः

जार्थसंबन्धी विमर्शोऽवमर्शः । यथा रत्नावल्यां चतुर्थेऽङ्के अग्निविद्रवपर्यन्तया वासवदत्ताप्रसक्त्या निरपायरत्नावलीप्राप्त्यवसायात्मा विमर्शो दर्शितः ।

यथा च वेणीसंहारे—

तीर्णे भीष्ममहोदधौ कथमपि द्रोणानले निर्वृते
कर्णाशीविषभोगिनि प्रशमिते शल्येऽपि याते दिवम् ।
भीमेन प्रियसाहसेन रभसादल्पावशेषे जये
सर्वे जीवीतसंशयं वयममी वाचा समारोपिताः ।।'

इत्यत्र 'स्वल्पावशेषे जये' इत्यादिना दुर्योधनरुधिराक्तभीमसेनागमपर्यन्तेन विजयप्रत्यर्थिसमस्तभीष्मादिमहारथिवधादत्रधारितैकान्तविजयावमर्शनं दर्शितमित्यवमर्शसंधिः । तस्याङ्गसंग्रहमाह —

बालक्रीड़ा

का कर्म है अतः क्रोधादवमृशेद्यत्र व्यसनाद्वा विलोभनाद् । गर्भनिर्भिन्नबीजार्थं सोऽवमर्श इति स्मृतः । ऐसा मूल का पाठ होना चाहिए ।

और अवलोक का पाठ भी तच्च क्रोधाद्वा व्यसनाद्वा विलोभनाद्वा । ऐसा तथा भवितव्यमनेनार्थेन ऐसा और गर्भसन्ध्युद्भिन्नबीजार्थसंम्बन्धी विमर्शः ऐसा और अग्निविद्रवपर्यन्तया ऐसा होना चाहिए ।

जैसे रत्नावली के चतुर्थ अंक में अग्नि विद्रव पर्यन्त यौगन्धरायण के द्वारा आग लगाये जाने तक वासवत्ता की विरोध में प्रसक्ति आसक्ति थी । बाद में उसके हट जाने से -क्योंकि अग्नि विद्रव को देखकर आर्यपुत्र ! सागरिका को बचाइये २ ऐसा चिल्लाती है और प्रयत्न भी करती है—निर्विघ्न सागरिका की प्राप्ति के अवसाय रूप अवमर्श को विमर्श को दिखला दिया । और भी वेणीसंहार में—

भीष्म रूपी समुद्र के पार करने द्रोणरूपी अग्नि के निर्वृत होने बुझ जाने और कर्णरूपी महासर्प के शांत होने और शल्य के भी स्वर्ग में पहुँच जाने से विजय को प्राप्त करने में कुछ ही अवशेष रह गया था किन्तु साहस जिसको प्रिय है ऐसे भीमसेन की आवेग से निकली वाणी के द्वारा आज ही दुर्योधन को मारूंगा ऐसे कथन से ये हम लोग जीवित के संशय में पहुंचा दिये गये अर्थात् जीयेंगे कि नहीं ऐसी स्थिति में पहुंचा दिये गये । विजय को प्राप्त करना थोड़ा ही रह गया है इत्यादि से दुर्योधन के रुधिर से सने हुए भीमसेन के आगमन तक विजय के विरोधी दुश्मन भीष्मादि महारथों के वध से विजय की निश्चित प्राप्ति के विचार से अवमर्श संधि है । "स्वल्पावशेषे जये इत्यादिना दुर्योधनरुधिराक्तभीमसेनागमपर्यन्तेन विजयप्रत्यर्थि" ऐसा पाठ यहां है । अब अवमर्शसन्धि के अंगों के संग्रह को कहते हैं—

तत्रापवादसंफेटौ विद्रवद्रवशक्तयः ।
द्युतिः प्रसङ्गश्छलनं व्यवसायो विरोधनम् ॥४४॥
प्ररोचना विचलनमादानं च त्रयोदश ।
यथोद्देशं लक्षणमाह– दोषप्रख्यापवादः स्यात्

अवलोकः

यथा रत्नावल्याम्—'सुसङ्गता—[१]सा खु तवस्सिणी भट्टिणीए उज्जइणिं णीअदित्ति पवादं करिअ उवत्थिदे उद्धरत्ते ण जाणीअदि कहिंपि णीदेत्ति। विदूषकः—(सोद्वेगम्) [२]अदिणिग्घिणं क्खु किदं देवीए।' पुनः। '[३]भो वअस्स, मा खु अण्णधा संभावेहि। सा खु देवीए उज्जइणीं पेसिदा अदो अप्पिअं त्ति कहिदम्। राजा-अहो निरनुरोधा मयि देवी।' इत्यनेन वासवदत्तादोषप्रख्यापनादपवादः।

यथा च वेणीसंहारे-'युधिष्ठिरः-पाञ्चालक, कच्चिदासादिता तस्य दुरात्मनः कौरवापसदस्य पदवी। पाञ्चालकः—न केवलं पदवी। स एव दुरात्मा देवीकेशपाश-

बालक्रीड़ा

अपवाद, संफेट, विद्रव, द्रव शक्ति, द्युति, प्रसङ्ग, छलन, व्यवसाय विरोधन, प्ररोचना विचलन और आदान ये तेरह अवमर्श संधि के अंग हैं।

जिस क्रम से अङ्गों को कहा उसी क्रम से उनके लक्षण को कहते हैं।

दोष को कहना कीर्तन करना अपवाद है। जैसे रत्नावली में—

सुसङ्गता कहती है–अर्धरात्रि में उस तपस्विनी को भट्टिनी मालकिन उज्जयिनी ले जा रही है'—ऐसा प्रवाद घोषणा करके न मालूम कहा ले गई।

विदूषक उद्वेग के साथ कहता है कि—

देवी ने यह अत्यन्त निर्दय कार्य किया है। पुनः हे दोस्त! अन्यथा सम्भावना न करो। उसको देवी ने उज्जयिनी में भेज दिया है। अतः यह घटना अप्रिय है ऐसा कहा। राजा—अहो, देवी मेरे विषय में अनुरोध रहित हो गई है।

इससे वासवदत्ता की निन्दा करना दोषों को कहना अपवाद है।

और भी जैसे वेणीसंहार में—युधिष्ठिर—हे पाञ्चालक! उस दुष्ट कौरव की पदवी प्राप्त हुई। अर्थात् किस रास्ते वह गया यह मालूम हुआ। पाञ्चालक-केवल

---

१. 'सा खलु तपस्विनी भट्टिन्योज्जयिन्यां नीयत इति प्रवादं कृत्वोपस्थितेऽर्धरात्रे न ज्ञायते कुत्रापि नीतेति।' इति च्छाया। २. 'अतिनिर्घृणं खलु कृतं देव्या।' इति च्छाया। ३. 'भो वयस्य, मा खल्वन्यथा संभावय। सा खलु देव्योज्जयिन्यां प्रेषिता अतोऽप्रियमिति कथितम्।' इति च्छाया।

अथ संफेटः– संफेटो रोषभाषणम् ।

अवलोकः

स्पर्शपातकप्रधानहेतुरुपलब्धः ।' इति दुर्योधनस्य दोषप्रख्यापनादपवाद इति ।

यथा वेणीसंहारे—'भोः कौरवराज, कृतं बन्धुनाशदर्शनमन्युना । मैवं विषादं कृथाः । पर्याप्ताः पाण्डवाः समरायाहमसहाय इति ।

पञ्चानां मन्यसेऽस्माकं यं सुयोधं सुयोधन ! ।
दंशितस्यात्तशस्त्रस्य तेन तेऽस्तु रणोत्सवः ॥

इत्थं श्रुत्वासूयात्मिकां निक्षिप्य कुमारयोर्दृष्टिमुक्तवान्धार्तराष्ट्रः—

कर्णदुःशासनवधात्तुल्यावेव युवां मम ।
अप्रियोऽपि प्रियो योद्धुं त्वमेव प्रियसाहसः ॥

इत्युत्थाय च परस्परक्रोधाधिक्षेपपरुषवाक्कलहप्रस्तावितघोरसंग्रामौ-' इत्यनेन भीमदुर्योधनयोरन्योन्यरोषसंभाषणाद्विजयान्वयेन संफेट इति ।

बालक्रीड़ा

पदवी ही नही मिली अपि तु देवी के केशपाश के स्पर्श से जनित पातक का प्रधान हेतु वह दुष्ट भी मिल गया । इससे दुर्योधन के दोष के प्रख्यापन से यह अपवाद है ।

अब संफेट को कहते हैं—

रोषमय क्रोधमय भाषण संफेट है । जैसे वेणीसंहार में—

हे कौरवराज ! बन्धुओं के नाश को देखकर क्रोध करना व्यर्थ है । इस प्रकार विषाद मत करिये कि पाण्डव लोग पर्याप्त है बहुत है और मैं युद्ध करने के लिए अकेला हूं असहाय हूं ।

हे दुर्योधन ! हम पांचो में से जिसके साथ युद्ध करना अच्छा समझते हो उसी एक ही के साथ तुम्हारा युद्ध होगा । तुम कवच पहन लो हाथ में शस्त्र ले लो यह सुनकर असूयामयी इर्ष्या युक्त दृष्टि से कुमारों को ताककर देखकर दुर्योधन बोला—अर्जुन ने कर्ण को मारा तुमने दुःशासन को मारा इसलिए तुम दोनों मेरे लिए समान हो । किन्तु अप्रिय होते हुए भी साहसप्रिय होने के कारण तुम ही युद्ध के लिए मुझे प्रिय हो । ऐसा कह कर वह उठा । फिर परस्पर क्रोध करते हुए कलह युक्त वाणी के साथ गाली गलौज देते हुए दोनों लडने लगे । इस प्रकार दुर्योधन और भीम की परस्पर क्रोधयुक्त वाणी का भीमसेनक्रोधोपचितयुधिष्ठिरोत्साह प्राप्त विजय से अन्वित संबन्धित होना संफेट है ।

अथ विद्रवः- विद्रवो वधबन्धादिः ।

अवलोकः

यथा छलितरामे—

'येनावृत्य मुखानि साम पठतामत्यन्तमायासितं
बाल्ये येन हृताक्षसूत्रवलयप्रत्यर्पणैः क्रीडितम् ।
युष्माकं हृदयं स एष विशिखैरापूरितांसस्थलो
मूर्च्छाघोरतमःप्रवेशविवशो बध्वा लवो नीयते ॥'

यथा च रत्नावल्याम्—

हर्म्याणां हेमशृङ्गश्रियमिव शिखरैरर्चिषामादधानः
सान्द्रोद्यानद्रुमाग्रग्लपनपिशुनितात्यन्ततीव्राभितापः ।
कुर्वन्क्रीडामहीध्रं सजलजलधरश्यामलं धूमपातै
रेष ल्पोषार्तयोषिज्जन इह सहसैवोत्थितोऽन्तःपुरेऽग्निः ॥'

इत्यादि । पुनः । 'वासवदत्ता—[1]अज्जउत्त, ण क्खु अहं अत्तणो कारनादो भनामि । एसा भए णिग्घिहिअआए संजदा सागरिआ विवज्जदि ।' इत्येताभ्यां लवसागरिकयोर्बन्धवधाभ्यां हर्म्याग्निना च विद्रव इति ।

बालक्रीड़ा

अब विद्रव को कहते हैं—

दुश्मन का वध एवं बन्धन आदि विद्रव है । यहां आदि पद से अग्नि दाह का ग्रहण है । जैसे छलितराम में—जो बचपन में सामवेद का पाठ करने वालों के मुंह पर हाथ रख कर उनको परेशान करता था । रुद्राक्ष की माला को हरण करना फिर याचना करने पर दे देना रूप क्रीड़ा करता था और जो तुम लोगों के हृदय को बाणों से भर देता था आपूर्ण कर देता था आज मूर्छारूपी घोर तम के प्रवेश से असमर्थ हुए उस लव को बांध कर ले जा रहे हैं ।

और भी जैसे रत्नावली में—अन्तःपुर में सहसा एकाएक ऐसी अग्नि उत्पन्न हो चुकी है जो अपनी ज्योति की लहरों से प्रासादों की स्वर्णशिखरों की सी शोभा को बढा रही है । जिसका अत्यन्त तेज ताप वन के घने वृक्षों को जलाकर माने झुलसा कर प्रकट हो रहा है जो धूवें की उड़ान से क्रीडा पर्वत को पर्याप्तजलयुक्त बादल जैसा काला बना रही है । और जो अपनी तेज दहन शक्ति से रमणी-संसार को परेशान कर रही है । इत्यादि । पुनः वासवदत्ता आर्यपुत्र ! मैं केवल अपने मतलब से नही कह रही हूं । निर्दयहृदयवाली मैंने इस सागरिका को बाँध दिया है । अतः सागरिका मर रही है । इससे लव के वन्धन और अन्तःपुर की अग्नि द्वारा सागरिका के जलन रूप वध से विद्रव है ।

---

१. 'आर्यपुत्र, न खल्वहमात्मनः कारणाद्भणाभि । एषा मया निर्घृणहृदयया संयता सागरिका विपद्यते ।' इति च्छाया ।

यथ द्रवः- द्रवो गुरुतिरस्कृतिः ।।४५।।

अवलोकः

यथोत्तरचरिते –

'वृद्धास्ते न विचारणीयचरितास्तिष्ठन्तु हुँ सन्तुते
सुन्दस्त्रीदमनेऽप्यखण्डयशसो लोके महान्तो हि ते।
यानि त्रीण्यकुतोमुखान्यपि पदान्यासन्खरायोधने
यद्वा कौशलमिन्द्रसूनुदमने तत्राप्यभिज्ञो जनः ।।'

इत्यनेन लवो रामस्य गुरोस्तिरस्कारं कृतवानिति द्रवः ।

यथा च वेणींसंहारे – 'युधिष्ठिरः भगवन् ! कृष्णाग्रज ! सुभद्राभ्रातः !
ज्ञातिप्रीतिर्मनसि न कृता क्षत्रियाणां न धर्मो
रूढं सख्यं तदपि गणितं नानुजस्यार्जुनेन।
तुल्य कामं भवतु भवतः शिष्ययोः स्नेहबन्धः
कोऽयं पन्था यदसि विगुणो मन्दभाग्ये मयीत्थम् ।।'

बालक्रीड़ा

अब द्रव को कहते है—

श्रेष्ठ लोगों का तिरस्कार द्रव है। क्योंकि यह द्रव शब्द द्रवस् परितापे धातु से बना है।

जैसे उत्तररामचरित में—वे वृद्ध हैं अतः उनका चरित आचरण विचारणीय नही है। अरे वे सामने खड़े है ऐसा मत बोलो ! हूं। खड़े हैं तो खड़े रहने दो। बड़े लोगों को स्त्री पर हाथ नही चलाना चाहिए इस नियम के रहते भी सुन्दरी स्त्री ताडिका राक्षसी को मार देने दमन कर देने पर भी जिनका यश अखण्ड है क्योंकि वे महान् हैं उनको दोष देना ठीक नही। खर के साथ युद्ध के समय में जो तीन पैर वापिस चले वह भी निन्दनीय नही है दोष नही है। इन्द्रसूनु इन्द्र के पुत्र बाली के दमन करने में जो कौशल को पेड़ की आड़ में होकर बाली को मारने की जो चतुराई को दिखलाया उसे भी लोग जानते हैं।

इससे लव के द्वारा अपने गुरु माने पिता राम का तिरस्कार करने से द्रव है।

और भी जैसे वेणीसंहार में – युधिष्ठिर—भगवन् ! हे कृष्ण के अग्रज ! सुभद्रा के बड़े भाई ! आपने जाति बिरादरी का प्रेम भी मन में नही किया; न क्षत्रियों के धर्म का विचार किया; अर्जुन के साथ कृष्ण की प्रसिद्ध मैत्री की भी परवाह नही की। भीम और दुर्योधन में शिष्यों में जो तुल्य प्रेम है उसकी भी परवाह नही की। वह कौन सा मार्ग है जो मेरे ऊपर इतने असंतुष्ट हो गये हैं वह क्या कारण है जिससे आप मेरे पर क्रुद्ध हो गये हैं।

अथ शक्तिः- विरोधशमनं शक्तिः ।

अवलोकः

इत्यादिना बलभद्रं गुरुं युधिष्ठिरस्तिरस्कृतवानिति द्रवः ।

यथा रत्नावल्याम्—'राजा—

सव्याजैः शपथैः प्रियेण वचसा चित्तानुवृत्त्याधिकं
वैलक्ष्येण परेण पादपतनैर्वाक्यैः सखीनां मुहुः ।
प्रत्यासत्तिमुपागता न हि तथा देवी रुदत्या यथा
प्रक्षाल्यैव तयैव वाष्पसलिलैः कोपोऽपनीतः स्वयम् ॥'

इत्यनेन सागरिकालाभविरोधिवासवदत्ताकोपोपशमनाच्छक्तिः ।

यथा चोत्तरचरिते लवः प्राह—

'विरोधो विश्रान्तः प्रसरति रसो निर्वृतिघन-
स्तदौद्धत्यं क्वापि व्रजति विनयः प्रह्वयति माम् ।
झटित्यस्मिन्दृष्टे किमपि परवानस्मि यदि वा
महार्घस्तीर्थानामिव हि महतां कोऽप्यतिशयः ॥'

इत्यनेन लवस्य विरोधशमनोक्तिः शक्तिः ।

बालक्रीड़ा

इत्यादि से युधिष्ठिर द्वारा गुरु बलराम का तिरस्कार द्रव है ।

अब शक्ति को कहते हैं—विरोध का शमन शक्ति है ।

जैसे रत्नावली में राजा—मेरे बहाना बनाने के साथ शपथ लेने से, बड़े विस्मय से, प्रिय वचन से, चित्तवृत्ति का अधिक अनुवर्त्तन करने से, चरणों पर गिरने से और सखियों की वाणी से देवी वासवदत्ता उतनी प्रसन्न न हुई जितनी स्वयं रोते हुए अपने अश्रुजल से अपने क्रोध को दूर करके हुई ।

इत्यादि कथन से सागरिका की प्राप्ति में बाधक वासवदत्ता के कोप का शमन (होने से) शक्ति है ।

और भी जैसे—उत्तररामचरित में-लव-विरोध शान्त हो गया, आनन्दघन रस फैलने लगा, वह उद्धतता कहीं चली गई, विनय मुझे झुका रहा है और इस (राम को) देखते ही तुरन्त मैं पराधीन हो गया हूं । तीर्थों का जैसे महत्व होता है वैसे ही महा-पुरुषों का अतिशय बड़प्पन होता है । इससे लव के विरुद्धभाव की शान्ति शक्ति है

अथ द्युतिः- तर्जनोद्वेजने द्युतिः ।

अवलोकः

यथा वेणीसंहारे—'एतच्च वचनमुपश्रुत्य रामानुजस्य सकलनिकुञ्जपूरितातिरिक्तमुद्भ्रान्तसलिलचरशतसंकुलं त्रासोद्वृत्तनक्रग्राहमालोड्य सरःसलिलं भैरवं च गर्जित्वा कुमारवृकोदरेणाभिहितम् ।

जन्मेन्दोरमले कुले व्यपदिशस्यद्यापि धत्से गदां
मां दुःशासनकोष्णशोणितसुराक्षीबं रिपुं भाससे ।
दर्पान्धो मधुकैटभद्विषि हरावप्युद्धतं चेष्टसे
मन्त्रासान्नृपशो विहाय समरं पङ्केऽधुना लीयसे ।।'

इत्यादि, त्यक्त्वोत्थितः सरभसम्' इत्यन्ताभ्यां दुर्वचनजलावलोडनाभ्यां दुर्योधनतर्जनोद्वेजनकरिभ्यां पाण्डवविजयानुकूलदुर्योधनोत्थापनहेतुभ्यां भीमस्य द्युतिरुक्ता ।

बालक्रीड़ा

अब द्युति को कहते है —

तर्जन माने डांट डपट और उद्वेजन माने भय से विकल करना द्युति है ।

जैसे वेणीसंहार में—कृष्ण की इस बात को सुनकर जिसको आडोलित माने मन्थन कर देने से जो सारे निकुंजों को भरता हुआ चारों ओर फैल गया और जिसमें रहने वाले सभी प्राणी मगर घडियाल आदि त्रास से व्याकुल हो गये उस सरःसलिलको आलोडित करके फिर भयंकर गर्जन करते' हुए कुमार वृकोदर भीमसेन ने कहा—(दुर्योधन से) हे नरपशु ! अपना जन्म उच्च चन्द्र-वंश में बताते हुए अब भी गदा को धारण कर रहे हो और दुःशासन के उष्ण (ताजा) रक्त रूपी सुरा को पी लेने के कारण मस्त हुए मुझको शत्रु बताते हो मुझे अपना शत्रु कहते हो । मधु एवं कैटभ नामक दुश्मन राक्षस के मारने वाले अर्थात् भगवान् मधुसूदन के प्रति घमण्ड में अन्धे होकर उद्धत हुए अनेक चेष्टाएं करते हो और मुझसे डर कर युद्ध त्याग कर अब कीचड़ में छिप रहे हो । इत्यादि से लेकर 'दुर्योधन का वेग के साथ तालाब त्याग कर उठकर बाहर आने' पर्यन्त भीम के दुर्वचन एवं जल के आलोडन से दुर्योधन को जो भयभीत और उद्विग्न करने में तथा पाण्डवों के विजय के अनुकूल दुर्योधन का उठकर जल से बाहर आने में हेतु है वह द्युति है ।

अथ प्रसङ्गः- गुरुकीर्तनं प्रसङ्गः ।

अवलोकः

यथा रत्नावल्याम्—'देव, यासौ सिंहलेश्वरेण स्वदुहिता रत्नावली नामायुष्मती वासवदत्तां दग्धामुपश्रुत्य देवाय पूर्वप्रार्थिता सती प्रतिदत्ता ।' इत्यनेन रत्नावल्या लाभानुकूलाभिजनप्रकाशिना प्रसङ्गाद् गुरुकीर्तनेन प्रसङ्गः ।

तथा मृच्छकटिकायाम्—'चाण्डालकः—१एस सागलदत्तस्स सुओ अज्जविणअदत्तस्स णत्ता चालुदत्तो वावादिदुं वज्झट्ठाणं णीअदि। एदेण किल गणिआ वसन्तसेणा सुवण्णलोभेण वावादिदात्ति। चारुदत्तः—

मखशतपरिपूतं गोत्रमुद्भासितं यत्सदसि निबिडचैत्यब्रह्मघोषैः पुरस्तात् ।
मम निधनदशामां वर्तमानस्य पापैस्तदसदृशमनुष्यैर्घुष्यते घोषणायाम् ॥'

इत्यनेन चारुदत्तवधप्रसङ्गाद् गुरुकीर्तनमिति प्रसङ्गः ।

बालक्रीड़ा

अब प्रसङ्ग को कहते हैं—

गुरुजनों का कीर्तन, प्रशंसा, गुणगान, प्रसङ्ग है ।

जैसे रत्नावली में—वसुभूति—हे देव ! सिंहलेश्वर ने वासवदत्ता को जली हुई सुनकर पहले ही से प्रार्थित अपनी आयुष्मती रत्नावली नाम की पुत्री को आप स्वामी के लिए दे दिया है । इससे रत्नावली के लाभ के अनुकूल कुल की श्रेष्ठता के प्रकाशित करने के समय में प्रसङ्ग से गुरु सिंहलेश्वर का कीर्तन प्रसङ्ग है ।

एवं मृच्छकटिक में—चाण्डालक—यह सागरदत्त का पुत्र आर्य विनयदत्त का नाती चारुदत्त वध के लिए वध्यभूमि को ले जाया जा रहा है । इसने सुवर्ण के लोभ में पडकर गणिका वसन्तसेना को मार दिया ।

चारुदत्त—सैकडों यज्ञों द्वारा पवित्र जो मेरा गोत्र ब्राह्मणों के द्वारा उच्चारित होता था वही आज मेरी मृत्यु के समय पाप के कारण इन पुरुषों के द्वारा कुत्सित घोषित किया जा रहा है । इससे चारुदत्त के वध के प्रसङ्ग से जो गुरु पिता और पितामह का कीर्तन है वह प्रसङ्ग है ।

---

१. 'एष सागरदत्तस्य सुत आर्यविनयदत्तस्य नप्ता चारुदत्तो व्यापादयितुं वध्यस्थानं नीयते । एनेन किल गणिका वसन्तसेना सुवर्णलोभेन व्यापादितेति ।' इति च्छाया ।

अथ छलनम्- छलनं चावमाननम् ॥४६॥
अथ व्यवसायः- व्यवसायः स्वशक्त्युक्तिः ।

अवलोकः

यथा रत्नावल्यां—'राजा—अहो निरनुरोधा मयि देवी' इत्यनेन वासवदत्ता-येष्टासंपादनाद्वत्सराजस्यावमाननाच्छलनम् ।
यथा च रामाभ्युदये सीतायाः परित्यागेनावमाननाच्छलनमिति ।

यथा रत्नावल्याम्- 'ऐन्द्रजालिकः—

[१]किं धरणीए मिगङ्को आआसे महिहरो जले जलणो ।
मज्झण्हम्मि पओसो दाविज्जउ जेहि आणत्तिम् ॥

अहवा किं बहुणा जम्पिएण ।

मज्झ पइण्णा एसा भणामि हिअएण जं महसि दठ्ठुम् ।
तं ते दावेमि फुडं गुरुणो मन्तप्पहावेण ॥'

बालक्रीड़ा

अब छलन को कहते हैं—

किसी का अवमानन माने अपमान छलन है ।

जैसे रत्नावली में—राजा—अहो । देवी मेरे विषय में प्रतिकूल है । इससे वासवदत्ता के द्वारा वत्सराज के इष्ट का सम्पादन न करना अवमानन छलन है ।

और भी जैसे रामाभ्युदय में सीता का त्याग करने रूप अवमानन करने से छलन है ।

अब व्यवसाय को कहते हैं ।

अपने सामर्थ्य शक्ति को बघारना—मैं यों कर दूंगा, मैं यूं कर सकता हूं, व्यवसाय है ।

जैसे रत्नावली में ऐन्द्रजालिक—आज्ञा दीजिए कि क्या दिखलाऊँ धरती पर चन्द्रमा को आकाश में पृथ्वी को जल में अग्नि को मध्याह्न में संध्या को प्रदोष को ।

अथवा ज्य.दा कहने से क्या फाद.दा है ।

मैं हृदय से यह प्रतिज्ञा करता हूं कि जो कुछ आप देखना चाहते हों उसे मैं गुरु मंत्र के प्रभाव से स्पष्ट दिखला दूंगा । इससे ऐन्द्रजालिक के द्वारा वत्सराज के

---

२. 'किं धरण्यां मृगाङ्क आकाशे महीधरो जले ज्वलनः मध्याह्ने प्रदोषो दर्श्यतां देह्याज्ञप्तिम् ॥ अथवा किं बहुना जल्पितेन । मम प्रतिज्ञैषा, भणामि हृदयेन; यद्वाञ्छसि द्रष्टुम; तत्ते दर्शयामि स्फुटं गुरोर्मन्त्रप्रभावेण ॥' इति च्छाया ।

अथ विरोधनम्- संरब्धोक्ति विरोधनम् ।

अवलोकः

इत्यनेनैन्द्रजालिको मिथ्याग्निसंभ्रमोत्थापनेन वत्सराजस्य हृदयस्थसागरिका-दर्शनानुकूलां स्वशक्तिमाविष्कृतवान् ।

यथा च वेणीसंहारे—

'नूनं तेनाद्य वीरेण प्रतिज्ञाभङ्गभीरुणा ।
बध्यते केशपाशस्ते स चास्याकर्षणे क्षमः ।।'

इत्यनेन युधिष्ठिरः स्वदण्डशक्तिमाविष्करोति ।

यथा वेणीसंहारे—'राजा—रे रे मरुत्तनय ! किमेवं वृद्धस्य राज्ञः पुरतो निन्दितव्यमात्मकर्म श्लाघसे । अपि च ।

कृष्टा केशेषु भार्या तव तव च पशोस्तस्य राज्ञस्तयोर्वा
प्रत्यक्षं भूपतीनां मम भुवनपतेराज्ञया द्यूतदासी ।
अस्मिन्वैरानुबन्धे तव किमपकृतं तैर्हता ये नरेन्द्रा
बाह्वोर्वीर्यातिसारद्रविणगुरुमदं मामजित्वैव दर्पः ।।

बालक्रीड़ा

हृदय में स्थित सागरिका के दर्शन के अनुकूल मिथ्या अग्नि से संभ्रम माने घबराट पैदा करके अपनी शक्ति का प्रदर्शन करना व्यवसाय है ।

और भी जैसे वेणीसंहार में— प्रतिज्ञा के भंग से डरने वाले उस वीर भीमसेन के द्वारा आज निश्चित ही तुम्हारे केशपाश बाँधे जायेंगे । क्योंकि वही इसके आकर्षण में समर्थ हैं । इससे युधिष्ठिर अपनी दमन कारिणी दण्ड शक्ति को दिखाता है ।

अब विरोधन को कहते हैं—संरब्ध माने क्रुद्ध मनुष्यों का कथोपकथन विरोधन है ।

जैसे वेणीसंहार में राजा—दुर्योधन–रे रे, वायु के लड़के ! वृद्ध राजा के सामने अपने निन्दनीय कर्म की क्यों प्रशंसा करते हो । और भी—हे पशु ! तुम्हारी तुम्हारी ही और उस राजा युधिष्ठिर की और उन दोनों नकुल एवं सहदेव की भार्या के केशपाश को मैंने सभा में खींचा । सभा में सभी राजाओं के समक्ष द्यूत से दासी बनाई गई तुम्हारी भार्या के केशपाश को खीचा । इस आपुस की लड़ाई झगड़े में उन (अन्य) राजा लोगों ने क्या तुम्हारा अपकार किया था जो तुमने उनको मार दिया । बाहु के वीर्या-तिरेकरूप विशाल धन के कारण अत्यन्त अभिमानी मुझे विना जीते ही विजय किये विना ही दर्प करते हो ? (ईर्ष्या काकु है) माने क्यों दर्प करते हो ? ।

अवलोकः

(भीमः क्रोधं नाटयति।) अर्जुनः—आर्य, प्रसीद। किमत्र क्रोधेन।

अप्रियाणि करोत्येष वाचा, शक्तो न कर्मणा।
हतभ्रातृशतो दुःखी प्रलापैरस्य का व्यथा॥

भीमः—अरे भरतकुलकलङ्क!

अद्यैव किं न विसृजेयमहं भवन्तं दुःशासनानुगमनाय कटुप्रलापिन्!।
विघ्नं गुरू न कुरुतो यदि मत्कराग्रनिर्भिद्यमानरणितास्थनि ते शरीरे॥

अन्यच्च मूढ!

शोकं स्त्रीवन्नयनसलिलैर्यत्परित्याजितोऽसि
भ्रातुर्वक्षःस्थलविदलने यच्च साक्षीकृतोऽसि।
आसीदेतत्तव कुनृपतेः कारणं जीवितस्य
क्रुद्धे युष्मत्कुलकमलिनीकुञ्जरे भीमसेने॥

राजा—दुरात्मन् भरतकुलापसद पाण्डवपशो! नाहं भवानिव विकत्थनाप्रगल्भः। किंतु।

द्रक्ष्यन्ति न चिरात्सुप्तं बान्धवास्त्वां रणाङ्गणे।
मद्गदाभिन्नवक्षोऽस्थिवेणिकाभङ्गभीषणम्॥'

बालक्रीड़ा

भीम क्रोध का अभिनय करता है। अर्जुन–आर्य! प्रसन्न होइये, यहां क्रोध करने से क्या फायदा है। कार्य से प्रतिशोध अपकार करने की शक्ति इसमें नही है इसलिए वचन से यह हमारा अप्रिय करता है। सौ भाइयों के वध से दुःखी इसके प्रलाप से हमें दुःख किस लिए करना चाहिए। भीम—अरे भरतकुल के कलङ्क! कटु प्रलाप करने वाले! यदि (धृतराष्ट्र और युधिष्ठिर) गुरु लोग विघ्न न उपस्थित करते तो अपनी गदा से तुम्हारे शरीर की हड्डियों को चरचर ध्वनि से तोड कर आज ही दुःशासन के अगवानी के लिए मृत्युलोक में क्या नही भेज देता अर्थात् क्या मार नही देता। और भी हे मूर्ख। तुम्हारी कुलकमलिनी के लिए हाथीरूप भीम के क्रुद्ध होने पर भी तुम्हारे जैसे दुष्ट राजा का जीवित रहने का यही कारण है कि स्त्रियों की तरह रुलाकर आंसुओं को बहवा कर तुमसे शोक का त्याग करवा दिया और भाई दुःशासन की छाती को फड़वा कर रक्तपान कराने के भी गवाह तुम्ही बने राजा—दुष्ट नीच! भरतकुल के अपसद माने अभिशप्त! पाण्डव पशु! मैं तुम्हारी तरह आत्मप्रशंसा करने में धृष्ट नही हूं। किन्तु—

तुम्हारे बन्धु बान्धव लोग मेरी गदा के आघात से चूर्ण हुई छाती की हड्डी की माला से अत्यन्त भीषण हुए तुमको शीघ्र ही रणभूमि में सोया हुआ देखेंगे।

अथ प्ररोचना-

सिद्धामन्त्रणतो भाविदर्शिका स्यात्प्ररोचना ।।४७।।

अथ विचलनम्- विकत्थना विचलनम् ।

अवलोकः

इत्यादिना संरब्धयोर्भीमदुर्योधनयोः स्वशक्त्युक्तिर्विरोधनमिति ।

यथा वेणीसंहारे—'पाञ्चालकः—अहं च देवेन चक्रपाणिना' इत्युपक्रम्य 'कृतं संदेहेन ।

पूर्यन्तां सलिलेन रत्नकलशा राज्याभिषेकाय ते
कृष्णात्यन्तचिरोज्झिते च कबरीबन्धे करोतु क्षणम् ।
रामे शातकुठारभासुरकरे क्षत्रद्रुमोच्छेदिनि
क्रोधान्धे च वृकोदरे परिपतत्याजौ कुतः संशयः ।।

इत्यादिना 'मङ्गलानि कर्तुमाज्ञापयति देवो युधिष्ठिरः ।' इत्यन्तेन द्रौपदी-केशसंयमनयुधिष्ठिरराज्याभिषेकयोर्भाविनोरपि सिद्धादेशाद् दर्शिका प्ररोचनेति ।

बालक्रीडा

इत्यादि वचनों से भीम और दुर्योधन के द्वारा आपसी वैर भाव से अपनी अपनी शक्ति का कथन विरोधन है ।

अब प्ररोचना को कहते हैं—

किसी सिद्ध पुरुष के आमन्त्रण माने कथन से—भावी माने होने वाली घटना-मयी बातों की दर्शिका प्ररोचना है ।

जैसे वेणीसंहार में—पाञ्चालक—और मुझे देव चक्रपाणि ने, ऐसा उपक्रम करके, सन्देह करना व्यर्थ है ।

आप अपने राज्याभिषेक के लिए रत्नों के कलशों को जल से भरवा दें, दौपदी बहुत दिनों से बिखरे हुए बालों को शीघ्र ही बांधने का उत्सव करे । चमकते हुए प्रखर कुठार को हाथ में लिए क्षत्रियों रूपी वृक्षों का उच्छेदन करने वाले परशुराम के और क्रोध से अन्धे हुए वृकोदर भीम के रण में आ जाने पर विजय में शंका करने की क्या बात है । इत्यादि से देव युधिष्ठिर मंगल कार्य करने की आज्ञा देते हैं "यहां तक" द्रौपदी के केश बांधने, और युधिष्ठिर के राज्याभिषेक इन होने वाली घटनाओं को सिद्ध के आदेशानुसार दिखाने वाली प्ररोचना है । यहां सिद्धत्वेन पाठ अशुद्ध है जब मूल पाठ में सिद्धामन्त्रणतो माने सिद्ध के आदेश से भावी घटना को दिखाना प्ररोचना है तो यहां मूल के अनुसार ही व्याख्या में भी सिद्धादेशात् होना चाहिए ।

अथ अब विचलन को कहते हैं । अपने बारे में बढ चढकर बोलना आत्मप्रशंसा करना विकत्थन है ।

अवलोकः

यथा वेणीसंहारे—'भीमः—तात, अम्ब,

सकलरिपुजयाशा यत्र बद्धा सुतैस्ते तृणमिव परिभूतो यस्य गर्वेण लोकः ।
रणशिरसि निहन्ता तस्य राधासुतस्य प्रणमति पितरौ वां मध्यमः पाण्डवोऽयम् ॥

अपि च । तात,

चूर्णिताशेषकौरव्यः क्षीबो दुःशासनासृजा ।
भङ्क्ता सुयोधनस्योर्वोर्भीमोऽयं शिरसाश्चति ॥'

इत्यनेन विजयानुगतस्वगुणाविष्करणाद्विचलनमिति ।

यथा च रत्नावल्याम्—'यौगंधरायणः—

देव्या मद्वचनाद्यत्प्रथामुपगतः पत्युर्वियोगस्तदा
सा देवस्य कलत्रसंघटनया दुःखं मया स्थापिता ।

बालक्रीड़ा

जैसे वेणीसंहार में—अर्जुन हे तात ! हे अम्ब ! जिसके ऊपर तुम्हारे पुत्रों ने सारे शत्रुओं पर विजय प्राप्त करने की आशा बांध रखी थी और जिसके अभिमान से सारे लोक को तृण की तरह ठुकरा दिया था उस राधासुत कर्ण को युद्ध भूमि में मारने वाला यह मध्यम पाण्डव अर्जुन आप दोनों माता पिता के चरणों में प्रणाम करता है ।

और भी जैसे भीम—अशेष माने सारे कौरवों को चूर्ण कर देने वाला दुःशासन के खून को पीकर मोटा हुआ मत्त हुआ और दुर्योधन की जंघा को भग्न करने वाला यह भीम आपको शिर से माने शिर को झुकाकर प्रणाम करता है ।

इससे विजय के अनुकूल अपने गुणों का आविष्कार करने माने बघारने से यह विचलन है ।

और भी जैसे रत्नावली में यौगन्धरायण कहते हैं—

'देव्या मद्वचनाद्यथाभ्युपगतः पत्युर्वियोगस्तदा' देवी ने मेरे कहने से पति के वियोग को उस समय स्वीकार किया । ऐसा पाठ बहुत ही अशुद्ध है । रत्नावली नाटिका में किसी भी अंक में ऐसी कोई कथा नही है जिससे यह सिद्ध हो सके कि देवि ! वासवदत्ताजी आप कुछ दिन के लिए अन्यत्र किसी स्थान में चली जायं या रहें । ऐसा अमात्य यौगन्धरायण ने कभी कहा है । बल्कि इसके विपरीत यह स्पष्ट अतिस्पष्ट लिखा है कि "इयं सिंहलेश्वरदुहिता सिद्धेनादिष्टा । योऽस्याः पाणिग्रहणं करिष्यति स सार्वभौमो राजा भविष्यति । तत्तस्तत्प्रत्ययवात्प्रार्थ्यमानेनापि सिंहलेश्वरेण यदा न दत्ता तदा लावाणिके देवी दग्धेति प्रसिद्धिमुत्पाद्य ।

यह सिंहलेश्वर की कन्या है इसके विषय में सिद्ध महानात्मा ने कहा कि जो इसके पाणि को ग्रहण करेगा माने इसके साथ विदाह करेगा वह सार्वभौम राजा हो जायगा ।

अथादानम्- आदानं कार्यसंग्रहः।

अवलोकः

तस्याः प्रीतिमयं करिष्यति जगत्स्वामित्वलाभः प्रभोः
सत्यं दर्शयितुं तथापि वदनं शक्नोमि नो लज्जया ।।'

इत्यनेनान्यपरेणापि यौगन्धरायणेन "मया सिंहलेश्वरकन्यानुबन्धी जगत्स्वामित्व लाभो वत्सराजस्य कृतः" इति स्वगुणानुकीर्तनाद्विचलनमिति।

यथा वेणीसंहारे—'भीमः—ननु भोः समन्तपञ्चकसंचारिणः,

रक्षो नाहंन भूतो रिपुरुधिरजलाप्लाविताङ्गः प्रकामं
निस्तीर्णोरुप्रतिज्ञाजलनिधिगहनः क्रोधनः क्षत्रियोऽस्मि।

बालक्रीड़ा

इसको सुनकर उसके वाक्य में विश्वास करके हम लोगों ने सिंहलेश्वर से बहुत प्रार्थना की। किन्तु जब सिंहलेश्वर ने अपनी कन्या को नही दिया और कहा कि बासवदत्ता को इसके विवाह कर देने से बड़ी पीड़ा होगी तब हम लोगों ने लावाणिक में वासवदत्ता अग्नि में जल गई—ऐसी प्रसिद्धि कर दी। उसी प्रसिद्धि को यहाँ इस श्लोक में लिखा कि मेरे वचन से मेरे द्वारा वैसा प्रचार कर देने से देवी का पति के साथ वियोग माने पति की संगति का अभाव प्रथा को प्रसिद्धि को प्राप्त हो गया। लोग जान गये कि बासवदत्ता की वत्सराज के साथ अब संगति नही रही। वियोग पद में योग शब्द का अर्थ संगति है। जैसा कि अमरकोष का लेख है—

योगः संहननोपायध्यानसंगत्तियुक्तिषु। अतः यहां शुद्ध पाठ—

मद्वचनात्प्रथामुपगतः। यह है। जो १८९५ सन् में छपी पुस्तक रत्नावली में है। इसी के अनुबन्धी "सिंहलेश्वरकन्यानुबन्धी जगत्स्वामित्वलाभः" ऐसा अवलोक का भी पाठ है। अन्य सब पाठ अशुद्ध हैं। जल गई की मिथ्या प्रसिद्धि से बासवदत्ता दुःखी थी ही उसी समय में अन्य कलत्र के साथ वत्सराज की संघटना कराकर देवी को और भी दुःख पहुंचाया। यह भी सच है कि यद्यपि प्रभु वत्सराज को इस विवाह के कर लेने से जगत्स्वामित्व का लाभ हो गया तद्यपि उस तरह के कष्टों को पहुंचा देने के कारण लज्जा से मुख दिखाने में असमर्थ हूँ।

इस तरह अन्य कार्यों में व्यासक्त हुए भी माने लज्जा से मुख दिखाने में भी अशक्त हुए यौगन्धरायण के "मैंने सिंहलेश्वर की कन्या का अनुबन्धी जगत्स्वामित्व का लाभ वत्सराज को करा दिया" ऐसा कह कर अपने गुणों का कीर्तन करने से यह विचलन है।

अब आदान को कहते हैं। कार्यों का या कार्य का संग्रह माने संक्षेप में ग्रहण करना समझना या लेना आदान है। जैसे वेणीसंहार में भीम कहते हैं—भोः भोः समन्त पञ्चक में संचार करने वालो! मैं न तो राक्षस हूं और न भूत हूं। प्रश्न—जब ऐसे नही हो तब ऐसे भीषण क्यों दिखाई पड़ रहे हो। उत्तर। मेरा शरीर दुश्मन

अथ निर्वहणसंधिः

बीजाद्यर्था मुखाद्येषु विप्रकीर्णा यथायथम् ॥४८॥

अवलोकः

भो भो राजन्यवीराः ! समरशिखिशिखादग्धशेषाः ! कृतं व-
स्त्रासेनानेन लीनैर्हतकरितुरगान्तर्हितैरास्यते यत् ॥'

इत्यनेन समस्तरिपुवधकार्यस्य संगृहीतत्वादादानम् ।

यथा च रत्नावल्याम् - 'सागरिका—(दिशोऽवलोक्य ।) [१]दिट्ठिआ समन्तादो पज्जलिदो भअवं हुअवहो अज्ज करिस्सदि दुक्खावसाणम् ।' इत्यनेन दुःखावसानकार्यस्य संग्रहादादानम् । यथा च 'जगत्स्वामित्वलाभः प्रभोः' इति दर्शितमेव । इत्येतानि त्रयोदशावमर्शाङ्गानि । तत्रैतेषामपवादशक्तिव्यवसायप्ररोचनादानानि प्रधानानीति ।

बालक्रीड़ा

के खून रूपी जल से खूब आप्लावित है । फिर पूछते हैं दुश्मनों के खून से आप्लावित होने का प्रसङ्ग क्या था । उत्तर । मैंने महान् महान् प्रतिज्ञायें की थी । उन महान् प्रतिज्ञा रूपी गहन समुद्र को मैं पार कर चुका हूं । भो ! भो ! युद्धाग्नि की ज्वाला से भस्म होने से बचे हुए राजमण्डल के वीरो ! आप लोगों का डरना व्यर्थ है । प्रश्न— कैसे आप समझते हैं कि हम लोग भयभीत हैं । उत्तर—जो आप लोग मरे हुए इन हाथी घोड़ों के मध्य में छिप कर बैठे हैं ।

इससे सकल रिपुओं के वधरूपी कार्य को संक्षेप में कह देने से आदान है ।

और भी जैसे रत्नावली में—सागरिका (दिशाओं को देखकर) भाग्य से यह अग्नि चारों तरफ जल उठा है । यह अवश्य मेरे दुःखों का अवसान करेगा । इससे दुःख के अवसन्न हो जाने रूप कार्य के संग्रह करने से आदान है । और भी जैसे प्रभु वत्सराज को जगत्स्वामित्व का लाभ हुआ उसको तो दिखा ही दिया है ।

ये १३ अवमर्श सधि के अङ्ग हैं । इनमें ये अपवाद, शक्ति, व्यवसाय, प्ररोचना एवं आदान प्रधान हैं ।

अथ निर्वहण संधि है ।

मुखादि सन्धियों में अपनी योग्यता के अनुसार अपने स्वभाव के अनुसार विप्रकीर्ण पृथक् पृथक् एक एक करके प्रसारित किये गये बीजादि अर्थों का जहां मुख्य प्रयोजन से उपनयन मिलान किया जाय वह निर्वहण सन्धि है ।

---

१. 'दिष्टया समन्तात्प्रज्ज्वलितो भगवान् हुतवहोऽद्य करिष्यति दुःखावसानम् ।' इति च्छाया ।

ऐकार्थ्येनोपनीयन्ते यत्र निर्वहणं हि तत् ।

अवलोकः

यथा वेणीसंहारे - 'कञ्चुकी – (उपसृत्य ।) महाराज, वर्धसे वर्धसे । अयं खलु कुमारभीमसेनः सुयोधनक्षतजारुणीकृतसकलशरीरो दुर्लक्षव्यक्तिः ।' इत्यादिना मुखसन्ध्यादिनिज निजस्थानेषूपक्षिप्तानां भीमक्रोधोपचितयुधिष्ठिरोत्साहादिबीजाद्यर्थानां द्रौपदीकेशसंयमनरूपैकार्थतया योजनम् ।

यथा च रत्नावल्यां – मुखसन्ध्यादिषु विप्रकीर्णानां वसुभूतिबाभ्रव्यसहकृत यौगन्धरायण व्यापाररूपबीजार्थानां रत्नावलीपाणिग्रहणानुबन्धिवत्सराजर्तृकजगत्स्मित्वलाभैक कार्यार्थत्वम् ॥

बालक्रीड़ा

यहां 'बीजवन्तो मुखाद्यर्थाः' यह पाठ अशुद्ध है । क्योंकि बीजबिन्दुपताकाख्य प्रकरीकार्यलक्षणाः । अर्थ प्रकृतयः पञ्च' इस प्रकार पूर्व में बीजादि पांचों को अर्थ की प्रकृतियां अर्थ के स्वरूप माने अर्थ बताया है और मुखाद्याः पञ्च सन्धयः । इस कथन के अनुसार मुखादि पांचों को सन्धियां कहा है । अतः बीजादि ही अर्थ हैं न कि मुखादि अर्थ हैं तथा मुखादि सन्धियां ही है न कि अन्य पदार्थ है । जब ऐसा निर्देश है तब बीजवाले मुखादि अर्थ इस तरह मुखादि को अर्थ कहना संगत नही है । वस्तुतस्तु बीजादि अर्थ मुखादि में होते हैं "अतः बीजाद्यर्था मुखाद्येषु"—ऐसा पाठ होना चाहिए । यदि मुखादि में उपात्त अर्थ इस तरह मध्यमपदलोपी समास करके संगति करे तब भी बीजवन्तः बीजवाले इसकी संगति नही होती है । क्योंकि बीज तो स्वयं अर्थ है उनमें फिर अर्थ माने अर्थ में अर्थ ऐसा अटर का पटर हो जाता है । अतः बीजाद्यर्था मुखाद्येषु यही पाठ होना चाहिए ।

जैसे वेणीसंहार में -- महाराज आप भाग्य से बढ रहे हैं महाराज आप भाग्य शाली हैं । यह कुमार भीमसेन जो सकल शरीर के दुर्योधन के खून से रक्त हो जाने से पहिचाना नही जा रहा है । इससे मुखसन्ध्यादिरूप जिन जिन स्थानों में उपक्षिप्त भीमसेन के क्रोध से उपचित युधिष्ठिर के उत्साहादि रूप बीजादि अर्थो का द्रौपदी की वेणी का संहार माने खोलकर केशों का संयमन करने रूप एक मुख्य अर्थ के प्रयोजन के रूप में योजन है ।

यहां भी इत्यादिना से योजनम् तक अवलोक का पाठ भी अशुद्ध है अतः वह भी 'मुखसन्ध्यादिनिजनिजस्थानेषूपक्षिप्तानां भीमक्रोधोपचितयुधिष्ठिरोत्साहादिबीजाद्यर्थानां द्रोपदीकेशसंयमनरूपैकार्थतया योजनम्' ऐसा होना चाहिए ।

और भी जैसे रत्नावली में — मुखसन्ध्यादिषु विप्रकीर्णानां वसुभूतिबाभ्रव्यसहकृत-यौगन्धरायणव्यापारादिरूपबीजाद्यर्थानां रत्नावलीपाणिग्रहणानुबन्धिवत्सराज कर्तृक जगत्स्वामित्वलाभैककार्यार्थत्वम् ।

संधिर्विबोधो ग्रथनं निर्णयः परिभाषणम् ॥४९॥
प्रसादानन्दसमयाः कृतिभाषोपगूहनाः ।
पूर्वभावोपसंहारौ प्रशस्तिश्च चतुर्दश ॥५०॥
अथोद्देशं लक्षणमाह- संधिर्बीजोपगमनम् ।

अवलोकः

अथ तदङ्गानि—

यथा रत्नावल्याम्—'वसुभूतिः—बाभ्रव्य, सुसदृशीयं राजपुत्र्या । बाभ्रव्यः—ममाप्येवमेव प्रतिभाति ।' इत्यनेन नायिकाबीजोपगमात्संधिरिति ।

यथा च वेणीसंहारे—'भीमः – भवति यज्ञवेदिसंभवे ! स्मरति भवती तत् यन्मयोक्तम् ।

चञ्चद्भुजभ्रमितचण्डगदाभिघातसंचूर्णितोरुयुगलस्य सुयोधनस्य ।
स्त्यानावबद्धघनशोणितशोणपाणिरुत्तंसयिष्यति कचांस्तव देवि ! भीमः ॥

इत्यनेन मुखोपक्षिप्तस्य बीजस्य पुनरुपगमात्संधिरिति ।

बालक्रीड़ा

मुखसन्ध्यादि में विप्रकीर्ण वसुभूति एवं बाभ्रव्य से मिलकर किये गये यौगन्धरायण के व्यापाररूपबीजादि अर्थों का रत्नावली के पाणिग्रहण का अनुबन्धी वत्सराज को जगत्स्वामित्व का लाभरूप एक कार्य ही अर्थ है प्रयोजन है जिसको 'वसुभूति सागरिका को पूरे तौर से देखकर हथेली से मुख का अपवारण करके कह रहा है कि बाभ्रव्य ! यह तो ठीक राजपुत्री के सदृश है 'इत्यादि से दिखा दिया है । यह निर्वहण संधि है ।

अब उसके अङ्गों को कहते हैं । संधि, निबोध, ग्रथन, निर्णय, परिभाषण, प्रसाद, आनन्द, समय, कृति, भाषा, उपगूहन, पूर्वभाव, उपसंहार एवं प्रशस्ति ये चौदह निर्वहण सन्धि के अङ्ग है ।

अब नाम निर्देश के अनुसार उनके लक्षण को कहते हैं—

बीज का उपगमन करना पर्याप्त खूब समझना संधि है ।

जैसे रत्नावली में—बाभ्रव्य यह तो ठीक राजपुत्री के जैसी सुन्दर है । बाभ्रव्य-मुझे भी ऐसा ही मालूम पड़ रहा है । इससे नायिका बीज का उपगमन करने से सन्धि नाम का अंग है । और भी जैसे वेणीसंहार में—भीम—हे यज्ञवेदी से उत्पन्न होने वाली, आपको वह याद है जो मैंने कहा था ।

चञ्चद्भुजभ्रमित……इस श्लोक का अर्थ पहले मुख संधि के सातवें अंग 'समाधान' के उदाहरण से देखें ।

इससे मुखसंधि में उपक्षिप्त बीज का पुनः उपगमन करने से संधि है ।

अथ विबोध:- विबोधः कार्यमार्गणम् ।

अवलोक:

यथा रत्नावल्याम् —'वसुभूतिः (निरूप्य ।) देव ! कुत इयं कन्यका । राजा— देवी जानाति । वासवदत्ता—१अज्जउत्त, एसा सागरादो पावि अत्ति भणिअ अमच्चजगन्धराअणेण मम हत्थे णिहिदा । अदो ज्जेव सागरिअत्ति सद्दावीअदि । राजा - (आत्मगतम्।) यौगंधरायणेन न्यस्ता । कथमसौ ममानिवेद्य करिष्यति ।' इत्यनेन रत्नावलीलक्षणकार्यान्वेषणाद्विबोधः ।

यथा च वेणीसंहारे भीमः मुञ्चतु मुञ्चतु मामार्यः । क्षणमेकम् । 'युधिष्ठिरः—किमपरमवशिष्टम् । 'भीमः—सुमहदवशिष्टम् । संयच्छामि दुर्योधन शोणितोक्षितेन पाणिना पाञ्चाल्या दुःशासनावकृष्टं केशहस्तम् । युधिष्ठिरः— गच्छतु भवान् । अनुभवतु तपस्विनी वेणीसंहारम् ।' इत्यनेन केशसंयमनकार्यास्यान्वेषणाद्विबोध इति ।

बालक्रीड़ा

अब विबोध को कहते हैं—

कार्य माने फल का मार्गण माने अन्वेषण करना विबोध है ।

वसुभूति —(देख कर) देव, यह कन्या कहाँ से आयी । राजा-कहां से आई इस बात को तो देवी जानती है । वासवदत्ता-आर्यपुत्र ! यह समुद्र से प्राप्त हुई है-ऐसा कहकर यौगन्धरायण ने मुझे दी । समुद्र से प्राप्त हुई इस लिए इसे सागरिका कहते हैं । राजा- (अपने मन में) मुझे बिना बतलाये हुए यौगन्धरायण ने इसको इसके हाथ में रख दिया यह कैसे ? इससे रत्नावली प्राप्तिरूप कार्य के फल के अन्वेषण करने से विबोध है ।

और भी वेणीसंहार में जैसे— भीम कहते हैं—छोडिये, छोडिये एक क्षण के लिए मुझे छोडिये । युधिष्ठिर — क्या कुछ और बाकी रह गया । भीम— बडा भारी कार्य बाकी है । दुर्योधन के खून से भींगे हुए हाथ से और दुःशासन के हाथ से खींचे हुए पाञ्चाली के केशपाश को मैं बाध देता हूँ । युधिष्ठिर — जाइये आप । वह बेचारी वेणीसंहार का अनुभव करे । इस तरह केशसंयमनरूप कार्य का अन्वेषण विबोध है ।

दशरूपक के सभी संस्करणो में संयच्छामि की जगह संयमयामि पाठ है जो अशुद्ध है क्योंकि संयमयामि में णिच्प्रत्यय होने से अन्यकर्तृकव्यापारप्रयोज्यसंयमन हो जाता है। और संयच्छामि होने से स्वतंत्र होकर स्वयं करने का भाव है किसी की प्रेरणा उसमें नहीं है । दूसरा सुयोधनशोणितोक्षितेन की जगह पर दुःशासन

---

१. 'आर्यपुत्र, एषा सागरात्प्राप्तेति भणित्वामात्ययौगंधरायणेन मम हस्ते निहिता । अत एव सागरिकेति शब्द्यते ।' इति च्छाया ।

अथ ग्रथनम्- ग्रथनं तदुपक्षेपः
अथ निर्णयः- अनुभूताख्या तु निर्णयः ॥५१॥

अवलोकः

